# वीर सेवा मन्दिर

## दिल्ली

★

क्रम संख्या

काल नं०

खण्ड

~~સંવત ૧૯૯૭ ના વર્ષે વૈશાખ સુદ ૬ ને બુધવાર~~

બાબુજી અમૃતલાલજી ગલા શારજી મુક્તારજી

સાળવી ભાઈચંદ ઓજ રેશમ વાળા તરફથી

જ્ઞાન પંચમી ઉધાપન નિમીત્તે સપ્રેમ ભેટ

Shri Atmananda Jain Granth Ratnamala Serial No. 82

# BRIHAT KALPA SUTRA

AND

# ORIGINAL NIRYUKTI

OF

## STHAVIR ARYA BHADRABAHU SWAMI

AND

A Bhashya by Shri Sanghadas Gani Kshamashramana there on with a Commentary begun by Acharya Shri Malayagiri and Completed by Acharya Shri Kshemakirti.

Introductory Vol. I

EDITED BY

GURU SHRI CHATURVIJAYA

AND HIS

SHISHYA PUNYAVIJAYA

THE FORMER BEING THE DISCIPLE OF

PRAVARTAKA SHRI KANTIVIJAYAJI

INITIATED BY

NYAYAMBHONIDHI SHRIMAD VIJAYANANDA SURIJI,

1ST ACHARYA OF

BRIHAT TAPA GACHCHHA SAMVIGNA SHAKHA.

Publishers:—SHRI ATMANAND JAIN SABHA, BHAVNAGAR.

| | | | | |
|---|---|---|---|---|
| Vir Samvat 2459 | Vikrama Samvat 1989 | Copies 500 | Atma Samvat 36 | A. D. 1933 |

Printed by Ramchandra Yesu Shedge, at the Nirnaya-Sagar Press, 26-28, Kolbhat Lane, Bombay.

Published by Vallabhadas Tribhuvandas Gandhi, Secretary, Jain Atmanand Sabha, Bhavnagar.

श्रीआत्मानन्द-जैनग्रन्थरत्नमालाया द्व्यशीतितमं रत्नम् (८२)

स्थविर-आर्यभद्रबाहुस्वामिप्रणीतस्वोपज्ञनिर्युक्त्युपेतं

# बृहत्कल्पसूत्रम् ।

श्रीसङ्घदासगणिक्षमाश्रमणसङ्कलितभाष्योपबृंहितम् ।

जैनागम-प्रकरणाद्यनेकग्रन्थातिगूढार्थप्रकटनप्रौढटीकाविधानसमुपलब्ध-
'समर्थटीकाकारे'तिख्यातिभिः श्रीमद्भिर्मलयगिरिसूरिभिः
प्रारब्धया वृद्धपोशालिकतपागच्छीयैः श्रीक्षेमकीर्त्या-
चार्यैः पूर्णीकृतया च वृत्त्या समलङ्कृतम् ।

तस्यायं

## पीठिकारूपः प्रथमोऽंशः ।

तत्सम्पादकौ—

सकलागमपरमार्थप्रपञ्चप्रवीण-बृहत्तपागच्छान्तर्गतसंविग्नशाखीय—आद्याचार्य—
न्यायाम्भोनिधि—श्रीमद्विजयानन्दसूरीश( प्रसिद्धनामश्रीआत्मारामजी
महाराज )शिष्यरत्नप्रवर्त्तक-श्रीमत्कान्तिविजयमुनिपुङ्गवानां
शिष्य-प्रशिष्यौ चतुरविजय-पुण्यविजयौ ।

प्रकाशं प्रापयित्री—

भावनगरस्था श्रीजैन-आत्मानन्दसभा ।

वीर संवत् २४५९
ईस्वी सन १९३३

प्रतयः ५००

विक्रम संवत् १९८९
आत्म संवत् ३८

इदं पुस्तकं मुम्बय्यां कोलभाटवीथ्यां २६-२८ तमे गृहे निर्णयसागरमुद्रणालये रामचन्द्र येसु शेडगेद्वारा मुद्रापितम्

प्रकाशितं च तत् "वल्लभदास त्रिभुवनदास गांधी, सेक्रेटरी श्रीआत्मानन्द जैन सभा, भावनगर" इत्यनेन

# अर्पण

जैन छेद आगमोना प्रकाशननी महत्ताने समजनार अने
ए आगमोना गम्भीर रहस्योने उकेलनार
विद्वान् मुनिगणना करकमळमां

सम्पादको.

# पीठिकानुं प्रकाशन

प्रस्तुत बृहत्कल्पसूत्रनो पीठिकारूप प्रथम विभाग तैयार थये आजे त्रण वर्ष वही गयां, अने एने लगतुं "प्रासङ्गिक निवेदन" वगेरे छपाई चूकये पण लगभग तेटलो ज गाळो थवा आवशे; तेम छतां बीजां अनेक अनिवार्य कार्योमां रोकाई जवाने कारणे अमे एनो विषयानुक्रम वगेरे जलदी तैयार न करी शक्या, तेथी आ पीठिकाविभागनुं प्रकाशन अतिविलम्बथी करवामां आवे छे। अमे समजी शकीए छीए के–अमारा तरफथी थयेल अतिविलम्बने कारणे अमारा ग्रन्थप्रकाशनने अतिउत्कंठित हृदये जोवा इच्छनार केटला य विद्वान मुनिवर वगेरेनी लागणीने आघात थयो हशे; तेम छतां अनिवार्य कारणोने लई प्रस्तुत प्रकाशनमां थयेल विलम्बने अमारा विद्वान मुनिवर वगेरे जरूर क्षम्य गणशे एवी आशा राखीए छीए अने इच्छीए छीए के–प्रस्तुत ग्रन्थना बीजा अने त्रीजा विभागना प्रकाशनमाटे आटलो विलम्ब नहि ज थवा दईए।

निवेदको—

मुनि चतुरविजय-पुण्यविजय

बृहत्तपागच्छान्तर्गत संविग्नशाखीय आद्याचार्य

## न्यायाम्भोनिधि श्री १००८ श्री विजयानन्द सूरि.

प्रसिद्धनाम श्री आत्मारामजी महाराज



The Lakshmi Art, Sankli Street, Bombay 8.

# व न्द न

अखंडत्यागमूर्त्ति जे महापुरुषना परोक्ष अमीमय
आशीर्वादना प्रभावे अमे अमारी
श्री आत्मानन्द जैन ग्रन्थरत्नमालाने
विशिष्ट अने विविध साहित्य प्रकाशन द्वारा दिन प्रतिदिन
उन्नतिने शिखरे लइ जई शक्या छीए तेम ज
बृहत्कल्प जेवा अतिमान्य आगमग्रन्थने
विद्वानोना करकमलमां अर्पण करवा भाग्यशाळी थया छीए
ए जगन्मान्य परमपवित्र स्वर्गवासी गुरुदेव
श्री १००८ श्री विजयानन्द सूरिवरना
पुनित पादपंकजमां अमारुं कोटिशः वन्दन हो.

निवेदक—चरणसेवको
मुनि चतुरविजय अने
पुण्यविजय.

## बृहत्कल्पसूत्रसंशोधनकृते सङ्गृहीतानां प्रतीनां सङ्केताः ।

भा० पत्तनस्थभाभापाटकसत्कचित्कोशीया प्रतिः ।

त० पत्तनीयतपागच्छीयज्ञानकोशसत्का प्रतिः ।

डे० अमदावादडेलाउपाश्रयभाण्डागारसत्का प्रतिः ।

मो० पत्तनान्तर्गतमोंकामोदीभाण्डागारसत्का प्रतिः ।

ले० पत्तनगतलेहेरुवकीलसत्कज्ञानकोशगता प्रतिः ।

कां० प्रवर्तकश्रीमत्कान्तिविजयसत्का प्रतिः ।

ता० ताडपत्रीया मूलसूत्रप्रतिः भाष्यप्रतिर्वा । ( सूत्रपाठान्तरस्थाने सूत्रप्रतिः, भाष्यपाठान्तरस्थाने भाष्यप्रतिरिति ज्ञेयम् । )

प्र० प्रत्यन्तरे ( टिप्पणीमध्योद्धृतचूर्णिपाठान्तः वृत्तकोष्ठकगतपाठेन सह यत्र प्र० इति स्यात् तत्र प्रत्यन्तरे इति ज्ञेयम्, दृश्यतां पृष्ठ २ पंक्ति २७-३२ इत्यादि । )

मुद्यमाणेऽस्मिन् ग्रन्थेऽस्माभिर्येऽशुद्धाः पाठाः प्रतिषूपलब्धास्तेऽस्मत्कल्पनया संशोध्य (      ) एतादृग्वृत्तकोष्ठकान्तः स्थापिताः सन्ति, दृश्यतां पृष्ठ १० पङ्क्ति २६, पृ० १७ पं० ३०, पृ० २५ पं० १२, पृ० ३१ पं० १७, पृ० ४० पं० २४ इत्यादि । ये चास्माभिर्गलिताः पाठाः सम्भावितास्ते [      ] एतादृक्चतुरस्रकोष्ठकान्तः परिपूरिताः सन्ति, दृश्यतां पृष्ठ ३ पंक्ति ९, पृ० १५ पं० ६, पृ० २८ पं० ५, पृ० ४९ पं० २६ इत्यादि ।

## टीकाकृताऽस्माभिर्वा निर्दिष्टानामवतरणानां स्थानदर्शकाः सङ्केताः ।

| | |
|---|---|
| आचा० श्रु० अ० उ० | आचाराङ्गसूत्र श्रुतस्कन्ध अध्ययन उद्देश |
| आव० हारि० वृत्तौ | आवश्यक-हारिभद्रीय-वृत्तौ |
| आव० नि० गा०<br>आव० निर्यु० गा० | आवश्यकनिर्युक्ति गाथा |
| उ० सू० | उद्देश सूत्र |
| उत्त० अ० गा० | उत्तराध्ययनसूत्र अध्ययन गाथा |
| ओघनि० गा० | ओघनिर्युक्ति गाथा |
| कल्पबृहद्भाष्य | बृहत्कल्पबृहद्भाष्य |
| गा० | गाथा |
| चूर्णि | बृहत्कल्पचूर्णि |
| जीत० भा० गा० | जीतकल्प भाष्य गाथा |
| तत्त्वार्थ० | तत्त्वार्थाधिगमसूत्राणि |
| दश० अ० उ० गा० | दशवैकालिकसूत्र अध्ययन उद्देश गाथा |
| दश० अ० गा०<br>दशवै० अ० गा० | दशवैकालिकसूत्र अध्ययन गाथा |
| दश० चू० गा० | दशवैकालिकसूत्र चूलिका गाथा |
| देवेन्द्र० गा० | देवेन्द्र-नरकेन्द्रप्रकरणगत देवेन्द्रप्रकरण गाथा |
| पञ्चव० गा० | पञ्चवस्तुक गाथा |
| प्रज्ञा० पद | प्रज्ञापनोपाङ्ग सटीक पद |
| प्रशम० आ० | प्रशमरति आर्या |
| मल० | मलयगिरीया टीका |
| महानि० अ० | महानिशीथसूत्र अध्ययन |
| विशे० गा० | विशेषावश्यक गाथा |
| विशेषचूर्णि | बृहत्कल्पविशेषचूर्णि |
| व्य० भा० पी० गा० | व्यवहारसूत्र भाष्य पीठिका गाथा |
| व्यव० उ० भा० गा० | व्यवहारसूत्र उद्देश भाष्य गाथा |

| | |
|---|---|
| श० उ० | शतक उद्देश |
| श्रु० अ० उ० | श्रुतस्कन्ध अध्ययन उद्देश |
| सि०<br>सिद्ध० | सिद्धहेमशब्दानुशासन |
| हैमाने० द्विस्व० | हैमानेकार्थसङ्ग्रह द्विस्वरकाण्ड |

यत्र टीकाकृद्भिर्ग्रन्थाभिधानादिकं निर्दिष्टं स्यात् तत्रास्माभिरुल्लिखितं श्रुतस्कन्ध-अध्ययन-उद्देश-गाथादिकं स्थानं तत्तद्ग्रन्थसत्कं ज्ञेयम्, यथा पृष्ठ १५ पं० ९ इत्यादि । यत्र च तन्नोल्लिखितं भवेत् तत्र सूचित-मुद्देशादिकं स्थानमेतन्मुद्यमाणबृहत्कल्पग्रन्थसत्कमेव ज्ञेयम्, यथा पृष्ठ २ पंक्ति २-३-४, पृ० ५ प० ३, पृ० ८ पं० २७, पृ० ११ पं० २७, पृ० ६७ पं० १२ इत्यादि ।

---

## प्रमाणत्वेनोद्धृतानां प्रमाणानां स्थानदर्शक-ग्रन्थानां प्रतिकृतयः ।

| | |
|---|---|
| अनुयोगद्वारसूत्र चूर्णी— | रतलाम श्रीऋषभदेवजी केशरीमलजी श्वेताम्बर संस्था । |
| अनुयोगद्वारसूत्र सटीक— | शेठ देवचन्द्र लालभाई जैन पुस्तकोद्धार फण्ड । |
| आचाराङ्गसूत्र सटीक— | आगमोदय समिति । |
| आवश्यकसूत्र चूर्णी— | रतलाम श्रीऋषभदेवजी केशरीमलजी श्वेताम्बर संस्था । |
| आवश्यकसूत्र सटीक (श्रीमलयगिरिकृत टीका)— | आगमोदय समिति । |
| आवश्यकसूत्र सटीक (आचार्य श्रीहरिभद्रकृत टीका)— | आगमोदय समिति । |
| आवश्यक निर्युक्ति— | आगमोदय समिति प्रकाशित हारिभद्रीय टीकागत । |
| ओघनिर्युक्ति सटीक— | आगमोदय समिति |
| कल्पचूर्णि— | हस्तलिखित । |
| कल्पबृहद्भाष्य— | ,, |
| कल्पविशेषचूर्णि— | ,, |
| कल्प-व्यवहार-निशीथसूत्राणि— | जैनसाहित्यसंशोधक समिति । |

| | |
|---|---|
| जीवाजीवाभिगमसूत्र सटीक— | आगमोदय समिति । |
| दशवैकालिक निर्युक्ति टीका सह— | शेठ देवचन्द्र लालभाई जैन पुस्तकोद्धार फण्ड । |
| दशाश्रुतस्कन्ध अष्टमाध्ययन (कल्पसूत्र)— | शेठ देवचन्द्र लालभाई जैन पुस्तकोद्धार फंड । |
| देवेन्द्रनरकेन्द्र प्रकरण सटीक— | श्रीजैन आत्मानन्द सभा भावनगर । |
| नन्दीसूत्र सटीक (मलयगिरिकृत टीका)— | आगमोदय समिति । |
| निशीथचूर्णि— | हस्तलिखित । |
| प्रज्ञापनोपाङ्ग सटीक— | आगमोदय समिति । |
| भगवतीसूत्र सटीक— | " |
| महानिशीथसूत्र— | हस्तलिखित । |
| राजप्रश्नीय सटीक— | आगमोदय समिति । |
| विपाकसूत्र सटीक— | " |
| विशेषणवती— | रतलाम श्रीऋषभदेवजी केशरीमलजी श्वेताम्बर संस्था । |
| विशेषावश्यक सटीक— | श्रीयशोविजय जैन पाठशाला बनारस । |
| व्यवहारसूत्रनिर्युक्ति भाष्य टीका— | श्रीमाणेकमुनिजी सम्पादित । |
| सिद्धप्राभृत सटीक— | श्रीजैन आत्मानन्द सभा भावनगर । |
| सिद्धान्तविचार— | हस्तलिखित । |
| सूत्रकृताङ्ग सटीक— | आगमोदय समिति । |
| स्थानाङ्गसूत्र सटीक— | " |

॥ अर्हम् ॥

# प्रासंगिक निवेदन ।

**ग्रन्थप्रकाशन**—प्रस्तुत अतिमान्य छेदसूत्रना एटले के निर्युक्ति लघुभाष्य अने वृत्तिसहित **बृहत्कल्पसूत्रना** सम्पादनने लगतुं कार्य विक्रम संवत् १९८४ मां पूज्यपाद शान्त महात्मा **प्रज्ञांश** श्री १००८ श्री **हर्षमुनिजी** महाराजना ज्ञानप्रिय साहित्यरसिक शिष्य महाराज श्री**माणेकमुनिजी**ए आरंभ्युं हतुं। परन्तु केटलां एक कारणोने लीधे अमे तेओश्रीने प्रस्तुत ग्रन्थरत्नना सम्पादननुं काम अटकाववा कह्युं। छेवटे तेओश्रीए अमारी सूचनाने मान्य राखी लगभग एक हजार श्लोक जेटला छपायेला भागने जतो करी तेनुं सम्पादन बन्ध कर्युं अने ते पछी अमे तरत ज एना सम्पादनने लगता कामनी शरूआत करी। आजे अमे ए छेदशास्त्रना पीठिकारूप प्रथम विभागने विद्वानोना करकमळमां समर्पण करवा भाग्यशाळी थया छीए अने क्रमे क्रमे बीजा भागो पण समर्पण करीशुं ए मुनिवर श्रीयुत **माणेकमुनि**जीना उत्साहपूर्ण साहसने ज आभारी छे। अने ए ज कारणथी अमे अमारा "प्रासङ्गिक निवेदन"ना आरम्भमां धन्यवादप्रदानपूर्वक तेमना नामनुं स्मरण करीए छीए।

**बृहत्कल्पनुं प्रकाशन अने जैनसमाजनी मान्यता**—जैन छेदग्रन्थो प्रकाशमां आवे ए सामे केटलाक आगेवान मनाता जैन मुनिओनो अने तेमना अवाजनो पडघो पाडनार केटलाक गृहस्थोनो सख्त विरोध छे। ए विरोधमाटे तेमनी पासे कारणो मागवामां आवे त्यारे तेओ एम जणावे छे के–**"छेदसूत्रोमां साधुओना अंगत आचार अने प्रायश्चित्तने लगती केटलीये एवी गुप्त तेम ज गंभीर बाबतो चर्चायेल छे, जेना आशयने बराबर न समजवाने लीधे भद्रिक जीवो धर्मथी पराङ्मुख थई जाय, तेम ज खास करी आज कालना नास्तिको एना उंधा अर्थ करी जैन साधुसंस्थाने उतारी पाडवा यत्न करे अने धर्मने वगोवे"**। आ दलीलने अमे थोडी वारने माटे प्रामाणिक तेम ज वजुददार मानी लईए; तेम छतां आजे आ जातनी दलीलो आपनाराओमांना केटलाक मुनिमहाशयो छेदसूत्रोमां आवती अत्यन्त आपवादिक बाबतोनो,–के जेनो उपयोग विशिष्ट द्रव्य क्षेत्र काळ भावमां तेम ज खास व्यक्तिमाटे अने ते पण क्वचित ज करवानो होय छे तेनो,–दरेक ठेकाणे एकसरखी रीते उपयोग करवामाटे जनता आगळ हिमायत करी छेदसूत्रकार मान्य स्थविर आचार्यवरोनी दीर्घदर्शिता अने प्रामाणिकताना मूळमां भयङ्कर कुठाराघात करे छे, तेम ज जे दोषोनो आरोप पोते पोतानी कल्पनाथी मानी लीधेल नास्तिको उपर करे छे तेनाथी पण भयङ्कर रीते छेदसूत्रोमांनी गम्भीर वातोने पोते समजवा छतां आंखमीचामणां करी जेम आवे तेम कही नाखवानी धृष्टता

होई शके ? एमने माथे जैनसंघने लगती केवी जातनी अने केटली जवाबदारीओ रहेली छे ? अयोग्यने पदवीओनां भेटणां करनारने केवा अपराधी मानवामां आव्या छे ? प्रसंग पडतां नालायक ठरेला पदवीधरोनी पदवीओने केवी रीते छीनवी लेवामां आवी छे ? ए पदवीधरोए पोतानी समकक्षाना इतर पदवीधरो साथे केवा गौरवथी अने केवी मर्यादाथी रहेवुं जोईए ? पोताना हाथ नीचे रहेता भिक्षु-भिक्षुणीसंघनुं पालन शी रीते करवुं जोईए ? तेमना प्रत्ये ए पदवीधरोनी शी शी जवाबदारीओ रहेली छे ? भिक्षु-भिक्षुणीसंघे पोताना गुरु आचार्य उपाध्याय आदि तेम ज भिक्षु-भिक्षुणी साथे गृहस्थवर्गसाथे अने गच्छान्तरीय आचार्यादि अने भिक्षु-भिक्षुणीसमुदाय साथे केवी सभ्यताथी रहेवुं जोईए ? उपसंपत् स्वीकारनार अर्थात् ज्ञानादिनी प्राप्ति अथवा वृद्धिमाटे गच्छान्तरमां जनार भिक्षुए जे आचार्यनी पासे उपसंपदा स्वीकारी होय ते आचार्य अने तेमना परिवारना भिक्षुसमुदाय साथे केवो वर्ताव राखवो जोईए ? तेम ज ए आचार्यादिए पोतानी पासे उपसंपदा स्वीकारनार भिक्षु प्रत्ये केवी उदार नीति राखवी जोईए अने तेमने केवी रीते दाबमां राखवा जोईए ? परस्परनी मर्यादा नहि जाळवनारने तेम ज अपराध करनारने केवा कडक दंडोथी–प्रायश्चित्तोथी दंडवामां आवे छे ? पांच महाव्रतो अने अष्ट प्रवचनमाता एटले के पांच समिति अने त्रण गुप्तिना पालन माटे जे झीणवटथी ऊहापोह करवामां आव्यो छे ए जोतां एनुं पालन केटलुं दुष्कर छे ? तेम ज एना पालनमाटे यत्न करनारे वाणी अने वर्तन केटलां विशद रीते केळववां जोईए ? जैन भिक्षुओनी भिक्षाचर्या–गोचरी, वस्त्र, पात्र, निवासस्थान, स्थंडिलभूमी वगेरे केवां शुद्ध होवां जोईए ? ए भिक्षुओनो विहार विहारभूमी केवां होवां जोईए ? विहार करवा अगाउ विहारयोग्य तेम ज मासकल्पयोग्य अर्थात् महिना सुधी रहेवा लायक क्षेत्रोनी प्रतिलेखना–तपास कोण अने केवी रीते करे ? भिक्षुओनी दिनचर्या अने जीवनचर्या शी शी छे ?" इत्यादि संख्याबंध बाबतोनो कोईने ख्याल सरखो य नथी होतो । आ सिवाय छेदशास्त्रोमां एवा अगणित शास्त्रीय विषयो भरचक भर्या पड्या छे जे बीजां शास्त्रोमां भाग्ये ज जडे अथवा न पण जडे ।

अत्यारनो जैन भिक्षुसमुदाय गमे तेम माने पण जैन आगमोना उंडा ज्ञान साथे छेदसूत्रोनो अभ्यास कर्या सिवाय साचुं साधुजीवन मेळवी के केळवी शकाशे नहि ए

---

१ **वूढो गणहरसद्दो, गोयममाईहिं धीरपुरिसेहिं ।**
**तं ठवइ जो अपत्ते, जाणंतो सो महापावो ॥**

श्रीगौतमस्वामी आदि जेवा धीर पुरुषोए "गणधर" ( गणी आचार्य सूरि आदिशब्दो "गणधर" शब्दना पर्याय अर्थात् समानार्थक शब्दो छे ) शब्दने धारण कर्यो छे तेने जाणवा छतां अयोग्यमां स्थापे अर्थात् अयोग्य शिष्योने आचार्यपद आदि आपे तो ते अयोग्यने पदवी आपनार महापापी छे ॥

( नोंध—योग्य अयोग्यनी तपास कर्या सिवाय आचार्यपदवीनी लहाणी करनार आचार्यो अने लेनार श्रमणो आ गाथाना अर्थनो विचार करे । ए पदवीओ साथे विशाळ ज्ञान अने विशिष्ट चारित्र्य हशे तो ज ए स्वपरना कल्याण माटे थशे. नहि तो ए पदवीनो भार कल्पनातीत छे । )

वात क्यारे पण भूलावी न जोईए। आजनी परिस्थितिमां आचार्य उपाध्याय प्रवर्तक आदि पूज्य पदवीओनो मोभो जनताना अंतरमांथी भूसातो जाय छे एनुं कारण जो बराबर विचारवामां आवे तो जणाशे के—ज्यारथी जैन भिक्षुसंघमांथी शास्त्रनुं आलोचन ओछुं थयुं छे अने पोता उपरनी जवाबदारी विसरी लोकपूजानो व्यामोह उत्पन्न थयो छे एटलुं ज नहि पण आखुं य जीवन आन्तर अने बाह्य कलहथी व्याप्त थई गयुं छे त्यारथी ज ए प्रातःस्मरणीय पदो गौरवहीन अने अनादरणीय थई गयां छे। अत्यारे जो सौए पोत-पोतानी जोखमदारी समजे अने ते प्रमाणे वर्ते तो जैन भिक्षुसंघमां अने जैन श्रावकसंघमां जे भीषण आन्तर अने बाह्य कलहनो दावानळ सळगी रह्यो छे ते सहेजे शमी जाय।

जगत तरफ नजर करीशुं तो जणाशे के—तेना तेना दरज्जा प्रमाणे धाराशास्त्रना ज्ञानमां काचो जणातो न्यायाधीश बेरिस्टर के वकील होय अथवा कोई नानामां नानो पोलीस जेवो अमलदार होय तो तेने कोई पण लायक प्रजा नभावी ले नहि; तो जैन धाराशास्त्रना ज्ञानथी रहित जैन आचार्यथी लईने यावत् भिक्षु सुधीना श्रमणसमुदायने जैन प्रजा आजे शी रीते नभावी शके ?। अत्यारे जैन मुनिओ गमे तेवी मोटी वातो करे अने गमे तेवा बचावो करे पण आजे ए वात खुल्ली छे के—जैन भिक्षुगणमांथी ज्ञाननो वारसो मोटा पाया उपर घसातो जाय छे–घसाई गयो छे, अने ते साथे एमनी महत्त्वभरी क्रियाओ निर्जीवप्राय थई गई छे। परिणामे रात दिवस क्रियाकांडोने करवा छतां ए क्रियाकांडो विशुद्ध बनतां नथी, एटलुं ज नहि पण ए पवित्र क्रियाओ द्वारा जीवनमां सरसता सरलता अने शुद्धि आववाने बदले रोज ने रोज नीरसता कृत्रिमता अने रूक्षता ज वधतां नजरे पडे छे। अने एने छुपाववा माटे अनेक कषायभावनाभरी असत् प्रवृत्तिओ तरफ नजर दोडाववी पडे छे–दोडावी पण रह्या छे। श्रमणगणनी आवी विषम परिस्थितिने लीधे मोटे भागे रात दिवस क्रियाकांड करनार गृहस्थवर्गनी दशा पण अतिशोचनीय थई रही छे अने थती जाय छे। अंदरथी जीवन जुदुं अने बहारथी जुओ तो जुदुं ज। केवळ रूक्ष क्रियाकांडो द्वारा जीवन उन्नति तरफ धपवाने बदले अवनति तरफ ज घसडावानुं एमां शंका ज नथी। रातदिवस पवित्र क्रियाकांडो करवा छतां जो आंतर जीवन सडेलुं ज रहे या जीवनमां हाथीना दांतनी जेम द्विविधता चालु रहे तो ए क्रियाओ करवामां कशी ज सार्थकता नथी ए कहेवानी आवश्यकता न होय। अहीं जे कांइ लखवामां आव्युं छे ए जैन भिक्षुसंस्थाने के जैन गृहस्थवर्गने उतारी पाडवा माटे लखवामां आव्युं छे एम कोई पण महानुभाव न मानी ले। कारण के आ "प्रासङ्गिक निवेदन"नो लेखक ए जैनभिक्षुसंस्था पैकीनो ज एक छे; एटले उपरोक्त आक्षेपमांथी आ लेखक सर्वथा बची शके छे एम नथी। आ लखवानो उद्देश मात्र एक ज छे के–जैन भिक्षुसंघ अने श्रावकसंघ पोताना जीवनमांनी द्विविधताने मटाडी जैनसंघ अने जैनधर्मने उज्ज्वल बनावे।

जैन भिक्षुसंघ जो हजु य चेतवुं होय तो बराबर सावधान थई विचार करे। नहि तो जेम दुनिआभरना धर्मगुरुओनी महत्ता झांखी थई गई छे ए ज स्थिति आवती काले त्यागमार्गनी उपासनानो दावो करनार जैन श्रमणगणनी न आवे ए वातने ध्यानमां लई हर हम्मेश वधारे ने वधारे झांखी पडती जती थोडी घणी रही सही पोतानी महत्ताने सावधान थई टकावी राखे ए इच्छवा योग्य छे ।

अस्तु, प्रस्तुत **बृहत्कल्पसूत्र** जेवा सर्वमान्य ग्रन्थोनुं प्रकाशन न थवाने कारणे अत्यारना केटला य जिज्ञासु विद्वान जैन मुनिओ एना अध्ययन वाचन आदिथी वंचित रहे छे, तेम ज "तेमना पोताना धार्मिक आचारो अने रीत-रिवाजो शा शा छे ? शा कारणथी ते उत्पन्न थया छे अथवा योजाया छे ? कई कई दृष्टिए ए महत्त्वना छे ? एक काळे साधुजीवनना नियमो केटला कडक हता ? आजे ए नियमो केटला विकृत अने शिथिल थई गया छे तेम ज परिवर्तन पामी गया छे ? द्रव्य क्षेत्र काल भाव बदलातां दीर्घदर्शी विज्ञ आचार्योए साधुजीवनना तेम ज सामान्य धार्मिक नियमोमां केवुं केवुं परिवर्तन कर्युं छे ?" इत्यादि अनेक वातोथी तेओ अजाण ज रही जाय छे । अने छेवटे जैन भिक्षुओना जीवनमां सामान्य रीते निरंतर उपयोगी धार्मिक रीत-रिवाजोनी परिपाटी अने परम्परा वीसराती जाय छे । आ मुख्य दृष्टिने ध्यानमां राखीने अमे **बृहत्कल्पसूत्र** जेवा मान्य ग्रन्थना सम्पादन अने प्रकाशनने अति आवकारदायक मानीए छीए ।

आ सिवाय केटलाक महानुभावो छेदसूत्रमां आवती गंभीर आपवादिक बाबतोने जेम फावे तेम लोको समक्ष गबडावे राखे त्यारे कोईना य पासे ए जाणवानुं साधन नथी होतुं के–आ वात कया महत्त्वना प्रसङ्गने लगती छे ? अने तेनो जे रीते उपयोग करवानी हिमायत करवामां आवे छे ए योग्य छे के अयोग्य ? ।

आ ठेकाणे अमे एक प्रसङ्गनो उल्लेख करवानुं कोई पण रीते विसरी शकता नथी । श्रीमान् **आनन्दसागरजी** जेवा कहेवाता बहुश्रुते **अमदावाद**मां व्याख्यानना व्यासपीठ उपर विराजी लोको समक्ष घोषणा करी हती के–"अमे तो काम पडे तो दीक्षा आपेल शिष्योने साध्वीनो वेष पहेरावी साध्वीना उपाश्रयमां पण संताडी शकीए छीए" । आ शब्दो तेओश्रीए गमे ते रूपमां उच्चार्या होय पण जनताना कहेवा प्रमाणे उपर जणावेल आशयना ज ते शब्दो हता । आ वात खोटी मानवाने कशुं ज कारण नथी । कारण के–आ माटे ते वखते जाहेर पेपरोमां तेम ज सागरजीना कहेवाता भक्त लोकोमां पण खूब चकचार जामी हती । श्रीमान् सागरजीए जणावेल वात केवी व्यक्तिने अने कया प्रसङ्गने लगती छे एनो खुलासो हजु सुधी कोईए कर्यो नथी । जो ते समये जे ग्रन्थमां उपरोक्त वात आवे छे ए ग्रन्थ प्रकाशित थयेल होत तो जरूर कोई ने कोई महाशय ए वात उपर जाहेर प्रकाश नाख्या सिवाय न रहेत । अस्तु, **सागरजीए** जे

वात जणावी छे ते पाठ प्रस्तुत बृहत्कल्पसूत्रना त्रीजा खंडमां आवे छे जेनो गूजराती अनुवाद अमे सौनी जाण खातर अहीं आपीए छीए—

"हवे शिष्यने संताडवो–ए द्वारनुं वर्णन करे छे—

कोई राजाना त्रण कुमारोए वैराग्यथी दीक्षा लीधी । तेमना दीक्षा लीधा बाद केटलेक काळे राजा मरण पाम्यो । ते पछी अमात्य आदिए एकठा मळी विद्यमान राजकुमारोमां खूब तपास करी पण तेमांथी राजलक्षणयुक्त गादीने लायक कोई कुमार मळ्यो नहि । आ तकनो लाभ लई जैनदर्शनविरोधी बौद्धभिक्षु आदिमांथी कोईए अमात्यने कह्युं के–जे जैन साधुओ पासे तमारा राजाना कुमारोए दीक्षा लीधी छे ते साधुओ विहार करता अहीं आवेला छे अने उद्यानमां रह्या छे (तेमांथी जे राज्यासनने योग्य होय तेने उपाडी लावो अने राजगादीने शोभावो) । आ सांभळी अमात्य आदिए तपास करावी अने छत्र चामर खड्ग आदि राजयोग्य वस्तुओ लई साधुओ पासे आव्या ॥

बौद्ध आदि भिक्षुओ शा माटे उपर प्रमाणे अमात्यादिने कहे ? ए कहे छे—आ राजपुत्रो दीक्षित थवाने लीधे जैन श्रमणोनी लोकोमां घणी ज कीर्ति गवाय छे के–'अहो ! आ श्रमणोनो ज धर्म दीपतो छे ज्यां आवा महापुरुषो दीक्षा ले छे' भावीमां आ लोकोनी शिष्यसंतति अव्यवच्छिन्नपणे चालती रहेशे, धनवान शेठीआ आदि लोको पण आ राजकुमारना प्रभावथी आ श्रमणोनी पूजा करे छे, 'राजपुत्रे अहीं दीक्षा लीधी छे' एम धारी अनेक शेठ शाहुकार आदि अने तेमना पुत्रो अहीं दीक्षा ले छे एथी आ श्रमणोना धर्मनी वृद्धि थाय छे अने तेमने विपुल आहार वस्त्र पात्र आदिनी प्राप्ति थती रहे छे, जो राजकुमार दीक्षा मूकी दे तो आ श्रमणोनी कीर्ति आदि कशुं य न थाय । आ जातना इरादाथी ते बौद्ध आदि भिक्षुओ अमात्य-मंत्री आदिने उपरनी वात कहे ॥

हवे ते दीक्षा लीधेल राजपुत्रो बळात्कारे दीक्षा छोडाववाने आवता मंत्री आदिने सांभळी शुं करे ? ए कहेवामां आवे छे—

पहेलो राजकुमार राजऋद्धिने प्राप्त थती सांभळी परीसहथी कंटाळी आचार्य पासे आवी पूछे के–'भगवन् ! हुं प्रव्रज्या पाळवाने अशक्त छुं' त्यारे आचार्य तेने उपदेश आपे (अने छेवटे न समजे त्यारे कहे) के–सौम्य ! सम्यक्त्वनुं पालन करजे अने मनुष्य जन्मने अतिदुर्लभ जाणी संघ अने चैत्योनी भक्ति रक्षा आदि करजे अर्थात् ओछामां ओछुं सम्यक्त्वधर्मथी पराङ्मुख न थतो ॥

बीजो कुमार–'अमात्य आदि मने शुं करवाना छे ? में कपडा उपर लागेल तणखलानी जेम राज्यनो त्याग कर्यो छे, राज्य आदि वैभवो नरकादि दुर्गतिना कारण छे अने संध्यारंग समान चंचळ छे, माटे आवा दुःखदायी चंचळ वैभवो उपर कोण आसक्त थाय ?' आ प्रमाणे कही धीरताथी जाहेर रीते बेसी उपसर्गोने सहन करवा पूर्वक संयमनुं दृढताथी पालन करे ॥

त्रीजो राजकुमार शुं करे ? ए कहे छे–त्रीजो राजकुमार के जे पोतानी इच्छाथी संयम पाळवामाटे दरेक रीते तैयार छे पण आवी पडता उपसर्गने अर्थात् राज्यतरफनी मुश्केलीओने सहन करवा माटे समर्थ नथी ( अने ते राजकुमारनुं रक्षण करवानो बीजो कोई पण मार्ग नथी ) तेने आचार्ये कह्युं के–आर्य ! साध्वीना उपाश्रयमां जईने संताई जा। राजकुमारे कह्युं–"हुं आपना वचनने मान्य करुं छुं, मने कोई पण रीते आ उपसर्ग-समुद्रथी पार उतारो" । आ प्रमाणे कही ते राजकुमारसाधु आचार्यने नमस्कार करी कृत्रिम रीते मांदो थई साध्वीओना उपाश्रयमां दाखल थाय । जो तेने संताडवामाटे मंत्र तंत्र आदि कोई बीजो इलाज होय तो तेने साधुनी ज वसतिमां राखवो । जो तेवो कोई रस्तो न होय तो तेने साध्वीनो वेश पहेरावी साध्वीना उपाश्रयमां लई जवो । जो ते साधुने दाढी मुंछ होय तो लोच करी आंबलीनां बीज ( कचुका ) वाटी तेना रसथी मोढा उपर लेप करवो अने साध्वीना उपाश्रयमां अंधारावाळा भागमां ते राजपुत्रसाधुने राखवो । त्यां तेने रेच लागे तेवुं औषध आपवुं अने संथारामां सुवाडी फाटेल तूटेल कपडुं ओढाडवुं, तेम ज गंधाती औषधी-ओथी मिश्र पाणीनो सेक करवो । केटलीक साध्वीओ चंदन घसती रहे, केटलीक ओसड वाटती रहे, केटलीक चिंतातुर चहेरे बेसे अने राजक-र्मचारीओ तपास करवा आवे त्यारे कहे के–तमे कोलाहल न करो, अमारां प्रवर्तिनी बीमार छे ए तमारा कोलाहलने सहन करी शकतां नथी । आ प्रमाणे साध्वीनी वसतिमां साध्वीना वेशे ते राजकुमारमुनि उठवुं बेसवुं आदि करे ।"

उपर 'प्रव्रजित राजकुमारने साध्वीना उपाश्रयमां संताडवा'ने लगता पाठनो जे अनुवाद आपवामां आव्यो छे ते उपरथी सौ कोई सहेजे समजी शके तेम छे के–जे राजकुमारने प्रव्रज्या आपवामां आवी छे ते शास्त्रोक्त विधि मुजब आपवामां आवी छे, ते राजकुमारनी प्रव्रज्याने पण वर्षो वही गयां छे, राजकुमारनी प्रव्रज्याने तेनी इच्छाविरुद्ध बीजा तोडाववा आवे छे तेमांथी पोताने बचाववा माटे ते राजकुमारसाधु पोते आचार्यने

बीनवे छे, दर्शनान्तर साथेनी पारस्परिक साठमारीना जमानामां राजकुमारसाधुना पाछा जवाथी जैनदर्शननी महान् हानि थवानो संभव छे अने ते महामुनिने बचाववानो बीजो कोई मार्ग रह्यो नथी—आ जातनी विषम परिस्थितिमां केवळ धर्मनी रक्षा खातर उपरोक्त जे विधान करवामां आव्युं छे एमां ए नियम घडनार सूत्रकारादिनी, विज्ञाननी परपार पहोंचेल विशिष्ट विज्ञानशक्तिनो आपणने साक्षात्कार थाय छे; त्यारे श्रीमान् सागरजीनी उपरोक्त हकीकतने प्रतिपादन करवानी शैलीमां अणघडपणानी परपार रहेल ज्ञानशक्तिनो (?) परिचय मळे छे ।

श्रीमान् सागरजी जे जातनी व्यक्तिओने ध्यानमां राखीने उपरोक्त राजकुमारने लगती बाबतनी हिमायत करे छे ए व्यक्तिओ तद्दन साधारणमां साधारण छे, एमने आपवामां आवती दीक्षाओ पण अविधिथी तेम ज अहंतानी पराकाष्टामां खुंची जईने आपवामां आवे छे, दीक्षा लेनारने केटलीक वार तो बळात्कारे गोंधी राखी एना सम्बन्धीओने मळवा देवामां के वातचीत सुद्धां करवा देवामां नथी आवती, तेम ज नथी ए प्रव्रज्यामां के प्रव्रजितने बचाववामां स्वपरकल्याणनी लेश पण आकांक्षा के नथी धर्मवृद्धिनो उद्देश । उपरोक्त राजकुमारनी दीक्षामां राज्य तरफनो उपद्रव अनायासे आवी पड्यो छे ज्यारे अत्यारे जाणी जोईने अयोग्य दीक्षाना प्रसंगो उभा करी राज्यनो उपद्रव वहोरी लेवामां आवे छे । राजकुमारमाटे जे उपाय सूचववामां आव्यो छे ए विधर्मीओ साथेनी पारस्परिक स्पर्धाना जमानामां जैन धर्मने झांखप लागवाथी बचावी लेवा पूरतो अने ते पण छेवटनो इलाज छे त्यारे आजे जे जातना प्रसङ्गमाटे उपरोक्त बाबत लागु पाडवामां आवे छे एमां ए वस्तुनो गंध सरखो य नथी । साचे ज श्रीमान् सागरजी जेवा गीतार्थ उपरोक्त बाबतने आवी कढंगी अने अणघटती रीते प्रतिपादन करे त्यारे आपणने 'गीताने बदले घेटाने उपाडी लावनार' जेवा ज तेओ शुं नथी लागता ? । उपरोक्त शास्त्रीय प्रमाण जेवां प्रमाणोना ओठातळे आजनी उद्धताई भरी अयोग्य दीक्षाने पोषण आपवा मथवुं ए जैन श्रमणसंस्थानी जैन आगमोनी अने जैनधर्मनी अवज्ञा करवा जेवुं तेम ज ए सौने झांखप लगाडवा जेवुं ज छे ।

श्रीमान् सागरजीए उपरोक्त राजकुमारने लगती वस्तुने निर्विचारपणे गोळमाळ गोळारूपे गबडावीने खरे ज जैन साधुओना आन्तर जीवनमाटे लोकोने शंकाशील करवा साथे आपणी जैन साध्वीसंस्थाने कोइक प्रसंगे मुश्केलीमां लावी मूकवा जेवी स्थिति उभी करी छे । कोई वार कोईने नसाडवा भगाडवा जेवो साचो के खोटो प्रसंग उभो थाय त्यारे, सागरजीए जाहेर करेल धार्मिक कायदानो आश्रय लई सरकारी अमलदारो सौ पहेलां साध्वीना उपाश्रयनी ज जडती लेवा धसी आवे ।

श्रीमान् सागरजी अने तेमना जेवी ज दीक्षामाटे घेलछाभरी धमाल करनार तेमना गोठीआओ तरफ नजर करीए त्यारे स्पष्ट जणाय छे के—तेओ शास्त्रीय प्रमाणो आपी,

तेना मनगमता ऊलटासूलटा अर्थ करी तेने नामे केवळ पोतानी कपोलकल्पित मान्यताओनो ज प्रचार करवा कोशीश करी रह्या छे। खरे ज शास्त्रोमां जे बाबतो शास्त्रकारोए मंजूर राखी नथी (जेम के–दीक्षा लेनारा खरीदवामाटे अने अयोग्य दीक्षानिमित्ते उत्पन्न थनार झघडाओने पहोंची वळवामाटे फंडो उघराववां, गलीच गाळागाळी निंदा तेम ज अनेक जातनां जुठाणां फेलावनार साप्ताहिक पेपरो हेंडबीलो अने प्रेसो चलाववामाटे फंडो एकठां करवां, अनेक जातनी द्वेषवृत्तिने पोषनार सोसायटी अने समाजोने नभाववामाटे फंडो एकत्रित करवां, पोतानी अनेक अयोग्य प्रवृत्तिओने जीवती राखवामाटे गामे गाम खानगी पगारदारो मोकली बनावटी तारो अने सहीओ मेळववा साथे ए प्रवृत्तिओने पोषवामाटे फंडो भेगां करवां, साधु-साध्वीओने वस्त्र पात्र आदि उपकरणो पूरां पाडवामाटे फंडो एकत्रित करवां इत्यादि) तेनेमाटे आ धमालीआ मुनिवरो शास्त्रो शोधवा नीकळी पड्या छे तेने बदले ए शास्त्रो द्वारा वास्तविक दीक्षाधर्म प्रगटाववामाटे तेम ज अंतरमां भरायलां शल्योने दूर करवामाटे यत्न कर्यो होत तो जरूर तेओ कांइ करी शक्या होत। पण कदाग्रहमां डूबी गयेलाओने ए सन्मार्ग जडे ज शी रीते ? अने तेम थाय तो पोतानी असत् प्रवृत्तिओने जीवती राखी तेना उपर ढांकपीछोडो पण शी रीते करी शकाय ?।

आजनी आ उच्छृंखलताभरी दीक्षाप्रवृत्ति बाळक युवान आदिने नसाडवाथी ज नथी अटकती पण स्त्रीओ अने बाळाओने सुद्धां नसाडवा सुधीनी निंद्य हदे ए पहोंची गई छे। स्त्रीओ अने बाळाओने एक गामथी बीजे गाम लई जवामाटे जे रीतो अखत्यार करवामां आवे छे अने एमने एक बीजा गृहस्थोना घरमां संताडवामाटे जे संताकुकडीओ रमाय छे एनुं परिणाम नजीकना ज भविष्यमां अत्यंत बीभत्स अति निंदनीय तेम ज जैनश्रीसंघने नीचुं जोवडावनारुं आववानुं छे। माटे जैन समाजना हितैषीओए जेम बने तेम जलदी आ कोयडाने उकेली एने रोकवा माटे योग्य मार्ग लेवो जोईए। आवी एकांत निंद्य प्रवृत्ति करनार अने तेमां भाग लेनारा खरे ज जैन समाजमां कलंकरूप छे।

छेदसूत्रना प्रारम्भमां ज तेना व्याख्याता भाष्यकार महाराजे 'छेदसूत्रोना पठन पाठनना अधिकारी कोण ?' ए माटे खूब विस्तारथी ऊहापोह कर्यो छे त्यां जणाव्युं छे के—"छेदसूत्रना पठनपाठननो अधिकारी खास करीने **अपरिस्रावी** एटले तेमां आवती वातोने गंभीरपणे पचावी शके एवो होवो जोईए"। आम होवा छतां **सागरजी** जेवा मनाता विद्वान् व्याख्याननना व्यासपीठ उपर विराजी गंभीरताने एकबाजुए मूकी पूर्वापर सम्बन्धने समजाव्या सिवाय छेदशास्त्रोमांनी वातोने एक पछी एक जेम आवे तेम कही नाखे ए खरे ज तेमनुं छीछरापणुं छे अने शास्त्रकारोनी परिभाषा मुजब छेदशास्त्रना अध्ययन-वाचनमाटेनुं तेमनुं अनधिकारिपणुं सूचवे छे। नहि तो छेदसूत्रोमांनी अत्यन्त आपवादिक बाबतोने सप्रसंग अथवा तेना आंतरिक आशयनो खुलासो कर्या सिवाय

लोकोमां गेरसमज पेदा थवा साथे मान्य आचार्यवरोनी प्रामाणिकताने धक्को पहोंचे एवी बेहुदी रीते तेमांनां कथनोने मरडीने के ऊलटावीने तेओ न ज कहे ।

उपर अमे जे कारणो बतावी गया ते कारणोसर अमारी ए दृढ मान्यता छे के-प्रस्तुत ग्रन्थनुं सम्पादन अने प्रकाशन अति आवश्यक छे । आ सिवाय १ जैन भिक्षु-संस्था, तेनी व्यवस्था अने कायदाओ २ जैन भिक्षुसंस्थाना व्यवस्थापकोनी व्यवस्थापकशक्ति अने तेमनी दीर्घदर्शिता ३ जैन भिक्षुसंस्थानो गौरवभर्यो इतिहास ४ जैन भिक्षुसंस्था उपर अथवा जैनसंघ उपर वैदिक तांत्रिक आदि युगोनी तेम ज दुष्काल आदिनी शी शी असरो थई छे अने तेने लीधे जैन संघना नेता आचार्योने शा शा नियमो घडवा पड्या छे अने मौलिक मनाता बंधारणमां केवा केवा फेरफारो करवा पड्या छे ? ५ वैदिकादिदर्शन उपर जैनधर्मनी शी शी असर थई छे ? ६ प्राचीन काळमां जैन-धर्मनुं भारतवर्षमां शुं स्थान हतुं ? ७ नाना जथामां रहेला जैनधर्मे दर्शनान्तर साथेनी भीषण साठमारीना जमानामां पोतानुं अस्तित्व कई निपुणताने आधारे टकावी राख्युं हतुं ? ८ दर्शनान्तर साथे भळी जई तेना नियमो अने मान्यताओने जैनधर्मे पोताना देहमां केवी अजब रीते समावी लीधेल छे ? ए सर्वनो विगतवार इतिहास ९ अने सूत्रकार निर्युक्तिकार भाष्यकार चूर्णिकार आदिना जमानानी तेम ज ते पहेलांनी जैन भिक्षुसंस्था अने जैन संघने लगती अने ते सिवायनी बीजी अनेक महत्त्वभरी ऐतिहासिक बाबतो छेदग्रन्थोमां भरी पडी छे-ए बधायनुं अन्वेषण थवामाटे आ ग्रन्थोनुं प्रकाशन जेटलुं जलदी थाय तेटलुं ज गौरवभर्युं छे । जैन श्रमणसंघना विशिष्ट इतिहासना अभ्या-सीने माटे आ ग्रन्थोनुं सांगोपांग अध्ययन अने अवलोकन एकान्त अनिवार्य छे ।

प्रस्तुत "प्रासङ्गिक निवेदन"ने लगतुं वक्तव्य पूर्ण करवा पहेलां अमे एटलुं ज कही दईए छीए के-कोई पण वस्तु सदा य एकसरखी रीते एकान्त लाभदायक के एकान्त नुकशानकर्ता होय छे के थाय छे एम मानवाने कशुं ज कारण नथी । प्रस्तुत प्रकाशन जेवां प्रकाशनोथी जैन धर्मने लगती तेम ज इतर अनेक महत्त्वनी बाबतो प्रकाशमां आवशे एमां जरा य शक नथी । तेम ज जे मुनिवरो छेदग्रन्थोना स्वाध्यायथी वंचित छे तेओ आ प्रकाशनथी महान् लाभ उठावशे ए पण एटलुं ज सत्य छे । माटे कोई पण महाशयने प्रस्तुत ग्रन्थना प्रकाशनथी लेश पण गभरावाने कारण नथी । अमे तो इच्छीए छीए अने जो ज्ञानिदृष्ट हशे तो समग्र छेदग्रन्थसाहित्यने प्रकाशमां मूकवानो अमारो दृढ संकल्प छे अने ते पार पाडवा अमे बनतुं करीशुं ।

निवेदक—**पुण्यविजय.**

# लिखित प्रतिओनो परिचय ।

प्रस्तुत बृहत्कल्पसूत्रना संशोधनमाटे एकठी करेल प्रतिओनो परिचय आपवा पहेलां अमे एना खण्डो–विभागो–ने अंगे टुंकमां कांइक निवेदन करीए छीए । प्रस्तुत सम्पूर्ण ग्रन्थनी कागळ उपर एक ज विभागमां लखायेल केटलीक प्रतिओ मळे छे, तेम छतां मोटे भागे **पाटण खंभात लींबडी जेसलमेर** आदिना भंडारोमांनी ताडपत्र उपर लखायेल प्रतिओ त्रण खंडमां अने कागळ उपर लखायेल प्रतिओ चार खंडमां लखायेल नजरे पडे छे । आ विभागो पोथी बांधवानी अने पुस्तक वांचवानी सुगमता खातर प्रतिना लखनार-लखावनाराओए पाडेला छे, भाष्य-चूर्णी-टीकाकारोए पाडेला नथी । जो के भाष्य चूर्णी विशेषचूर्णी टीका आदिमां पीठिका, प्रलम्बप्रकृत, मासकल्पप्रकृत आदि अनेक विभागो पाडवामां आव्या छे पण ते बधा य उपर जणाव्युं तेम पोथी बांधवानी सुगमता के ग्रन्थवाचननी अनुकूलता खातर नहि परन्तु ते ते अर्थाधिकार अथवा विषयनी समाप्तिने ध्यानमां राखीने पाडवामां आव्या छे । अमारा चालु सम्पादनमां अमे ते ते खण्डो साथे सम्बन्ध न राखतां मुद्रित ग्रन्थना कद अने अर्थाधिकारनी समाप्तिने लक्ष्यमां राखीने प्रस्तुत ग्रन्थना विभागो पाडीशुं; तेम छतां संशोधनमाटे एकठी करेल प्रतिओनो परिचय आपवानी सुगमता खातर तेम ज विद्वान शोधकोनी सुगमता खातर जे जे ठेकाणे ए खण्डो पूर्ण थशे त्यां अमे तेनो उल्लेख करवा चूकीशुं नहि ।

## प्रतिओ

प्रस्तुत ग्रन्थना संशोधनमाटे अमे जुदा जुदा गामोना भंडारोमांथी एना प्रथम खण्डनी बधी मळी एकंदर बार प्रतो मेळवी हती, परन्तु तेमांथी पसंद करीने अमे छ प्रतो ज कायम राखी छे अने बाकीनी प्रतोनो आ छ प्रतिओमां समावेश थई जतो होवाथी एमने जती करवामां आवी छे । जे प्रतिओनो प्रस्तुत सम्पादनमां संशोधनमाटे उपयोग करवामां आव्यो छे तेमनो परिचय आ नीचे आपवामां आवे छे—

**१ भा० प्रति**—आ प्रति **पाटणना भाभाना पाडामांना विमळना** भंडारनी छे । तेनां पानां ३०१ छे, दरेक पानानी पुठीदीठ सत्तर सत्तर पंक्तिओ छे अने पंक्तिदीठ ४८ थी ५० अक्षरो छे । प्रतिनी लंबाई साडा अगीआर इंचनी छे अने पहोळाई साडा चार इंचनी छे । प्रतिना अंतमां नीचे प्रमाणेनी लेखकनी पुष्पिका छे—

"॥ इति श्रीकल्पाध्ययनटीकायां प्रथमखंडं संपूर्णमिति ॥ छ ॥ शुभमस्तु ॥ मांगल्यं शुभहेतवे ॥ सं० १६......वर्षे महाकार्त्तिके मासे शुक्लपक्षे त्रयोदशीदिने बृहस्पतिवारे ..................................लिखितं.........ग्रंथाग्रं० सहस्र १५००० ॥

३०० ऊपरि सही ॥ यादृशं पुस्तके दृष्ट्वा तादृशं लिखितं मया । यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ १ ॥............नगरमध्ये शास्त्र लिखितोयं ॥ श्री ॥ ॥"

आ उल्लेखमां ज्यां मींडां मूक्यां छे ते अक्षरोने प्रतिना उठाउगीर कोई शयताने भूसी नाख्या छे । आमां संवतना पाछळना बे आंकडाओ, लखावनार आदिनां नामो अने जे नगरमां प्रति लखाई तेनुं नाम आदि भूसी नाखवामां आव्युं छे । संवतना प्रारंभना बे आंकडाओ कायम राख्या छे ते जोतां प्रति सत्तरमी सदीमां लखायेली छे ए वात स्पष्ट छे । प्रति भाभाना पाडाना भंडारनी होवाथी अमे एनी भा० संज्ञा राखी छे । आ प्रति अमे भंडारना वहीवट कर्त्ता शेठ उत्तमचंद नागरदास द्वारा मेळवी छे ।

२ त० प्रति—आ प्रति पाटणना फोफलीयावाडानी आगली सेरीमां रहेल तपागच्छीय भंडारनी छे । आ प्रतिनां पानां २२१ छे, पानानी पुठीदीठ सत्तर सत्तर पंक्तिओ छे अने पंक्तिदीठ ७० थी ७५ अक्षरो छे । प्रतिनी लंबाई सवा तेर इंचनी छे अने पहोळाई पांच इंचनी छे । प्रतिना अंतमां तेना लेखनसमय आदिने सूचवतो कशो य उल्लेख नथी, तेम छतां प्रत जोतां ते सोळमी सदीमां लखाई होय तेम लागे छे । प्रति तद्दन सारामां सारी स्थितिमां छे; मात्र तेनुं छेल्लुं पानुं कोई खराब शाहीथी लखायेल प्रतिना संसर्गने लीधे जीर्ण जेवुं थई गयुं छे । प्रति तपागच्छीय भंडारनी होवाथी तेनी संज्ञा अमे त० राखी छे । आ प्रतिनो उपयोग अमे मुद्रित पुस्तकना ८९ मा पानाथी कर्यो छे । आ प्रति अमने भंडारना वहीवटदार शेठ मलुकचंद दोलाचंद द्वारा मळी छे ।

३ डे० प्रति—आ प्रति अमदावादमांना डेलाना भंडारनी छे । आ प्रति बीजी प्रतिओनी जेम प्रथमखंडरूप नथी पण आखा ग्रन्थनी सळंग लखायेल प्रति छे । तेनां ६०० पानां छे, पानानी पुठीदीठ पंदर पंदर पंक्तिओ छे अने पंक्तिदीठ ७५ थी ८० अक्षरो छे । प्रतिनी लंबाई १३ इंचनी छे अने पहोळाई ४॥ इंचनी छे । प्रतिना अंतमां लेखनसमयादिने लगतो कशो उल्लेख छे के नहि ए अमे अत्यारे कही शकता नथी; कारण के आ प्रति अमारा पासे अर्धी आवी छे । प्रति अनुमान सोळमी शताब्दीमां लखायेली होय तेम लागे छे अने सारामां सारी स्थितिमां विद्यमान छे । प्रति डेलाना भंडारनी होवाथी अमे एने डे० नामथी ओळखावी छे । आ प्रति अमे भंडारना कारभारी शेठ भोगीलाल ताराचन्द पासेथी मेळवी छे ।

४ मो० प्रति—आ प्रति पाटणना सागरगच्छना उपाश्रयमां मूकेल शेठ मोंका मोदीना भंडारनी छे । एनां पानां २४२ छे, दरेक पानानी पुठीदीठ सत्तर सत्तर पंक्तिओ छे अने पंक्तिदीठ ६६ थी ७० अक्षरो छे । प्रतिनी लंबाई १३॥। इंचनी अने पहोळाई ५। इंचनी छे । प्रतिना पहेला पानामां "आचार्य व्याख्यान करे छे अने तेने साधु साध्वी श्रावक श्राविकारूप चतुर्विध संघ सांभळे छे" ए भावने दर्शावतुं एक सुंदर चित्र छे । चित्रमां लाल लीला धोळा अने आसमानी रंगनो उपयोग करवामां

आव्यो छे तेम छतां सोनेरी रंगनो उपयोग बधा य रंगो करतां वधारे प्रमाणमां करवामां आव्यो छे। चित्रमांनो लीला रंगवाळो भाग, ते रंगमां जंगाल पडतो होवाथी, खवाई गयो छे। प्रतिने छेडे नीचे प्रमाणेनो टुंक उल्लेख छे—

"श्रीकल्पप्रथमखंडपुस्तकं ॥ छ ॥ ॥ ॥ संवत् १५७३ वर्षे अषाढ वदि १३"

प्रतिनी स्थिति एकंदर सारी गणाय। प्रति मोदीना भंडारनी छे माटे तेनी संज्ञा अमे मो० राखी छे।

५ **ले० प्रति**—आ प्रति पण उपरोक्त **पाटणना सागरगच्छना** उपाश्रयमां रहेल **लेहेरु** वकीलना भंडारमांनी छे। तेनां पानां २०७ छे, दरेक पानानी पुठीदीठ सत्तर सत्तर पंक्तिओ छे अने पंक्तिदीठ ६९ थी ७४ अक्षरो छे। प्रतिनी लंबाई १३॥ इंच अने पहोळाई ५ इंच छे। प्रति एक बाजुना बे खूणेथी उंदरे करडेली छे तेथी तेना आरंभनां ४० पानां सुधीमां एक एक बे बे लीटीओना केटलाक अक्षरो खवाई गया छे। प्रतिने अंते आ प्रमाणेनो उल्लेख छे—

"श्रीकल्पप्रथमखंडपुस्तकं ॥ छ ॥ ॥ कल्याणमस्तु ॥ सं० १५७८ वर्षे अश्वयुजि शुक्लपंचम्यां बुधे लिखितमिदं वाच्यमानं चिरं नंद्यात् ॥"

प्रतिनी स्थिति जीर्ण छे। प्रति **लेहेरु** वकीलना भंडारनी होवाथी अमे एनी संज्ञा ले० राखी छे।

उपरोक्त **मोंका मोदीनो** अने **लेहेरु** वकीलनो ए बन्ने य भंडारो श्रीहेमचन्द्र जैन **लाइब्रेरीनी** देखरेखमां छे। एटले उपरोक्त बन्ने य प्रतिओ अमे तेना सेक्रेटरी श्रीयुत **लेहेरुभाई भोगीलाल** द्वारा मेळवी छे।

६ **कां० प्रति**—आ प्रति अमारा परम उपास्य गुरुदेव पूज्यपाद **प्रवर्तक** श्री १०८ **श्रीकांतिविजयजी** महाराजना **वडोदरा** नजीक आवेला **छाणीना** पुस्तकसंग्रहमांनी छे। आ प्रति डे० प्रतिनी पेठे संपूर्ण ग्रन्थनी छे। आनां पानां ६८६ छे, दरेक पानानी पुठीदीठ सोळ सोळ पंक्तिओ छे अने पंक्तिदीठ ६१ थी ६९ अक्षरो छे। प्रतिनी लंबाई १२। इंचनी अने पहोळाई ५॥ इंचनी छे। प्रतिना अंतमां नीचे प्रमाणेनो उल्लेख छे—

"॥ श्रीगूर्जरेलावनिताविभूषणं लक्ष्मीविलासास्पदमङ्घ्रिमण्डितम्।
**प्रह्लादन**श्रीजिनपार्श्वभूपितं **प्रह्लादना**ख्यं पुरमस्ति विश्रुतम् ॥ १ ॥
प्रजासु निखिला**स्वोशवंशो**ऽस्ति तत्र विश्रुतः।
तत्रास्ति श्रावकश्रेष्ठः **कोठारी**कुलभूषणः ॥ २ ॥
तस्य सूनुरनूनश्री**र्यशस्करण** इत्यभूत्।
भार्यासीद् **यमुना** तस्य शीलैकचारुभूषणा ॥ ३ ॥
पुत्रौ द्वौ स्तस्तयोराद्यः **केशवलाल**नामकः।
द्वितीयो**ऽमृतलाला**ख्यः कनिष्ठोऽप्यकनिष्ठधीः ॥ ४ ॥

सवृत्तिको बृहत्कल्पः छेदग्रन्थः सुशोभनः ।
तेनायं लेखयांचक्रे स्वपितुः पुण्यहेतवे ॥ ५ ॥
गच्छे स्वच्छतरे तपोऽभिधगणे विज्ञा बभूवुस्त्विह
प्रख्याता भुवने सदैव विजयानन्दाभिधाः सूरयः ।
श्रीमन्तो विजयाभिधाः कमलयुग्वाचंयमा निर्ममा
वर्तन्ते भुवि सूरयः सुविदितास्तेषां पदे साम्प्रतम् ॥ ६ ॥
विक्रमसंवत्सरतो नेत्रकायाङ्कोडुपेषु वर्षेषु ।
भूपतिशेरमहम्मदखानेत्याख्यस्य शुभराज्ये ॥ ७ ॥
तेन मुदा शुचिमासे विजयानन्दानूचानशिष्यस्य ।
पठनकृते सूत्रमिदं समर्पितं कान्तिविजयस्य ॥ ८ ॥ आर्यायुग्मम् ॥"

पुष्पिका जोतां जणाय छे के–प्रति विक्रमसंवत् १९६२ मां लखायली छे, अने ते पालनपुरनिवासी ओसवालज्ञातीय कोठारी चेलु महेताना सुपुत्र भाई अमृतलाले पोताना पिताश्रीना कल्याणनिमित्ते लखावीने भणवामाटे श्रीकान्तिविजयजी महाराजने अर्पण करी छे ।

प्रति उंची जातना काश्मीरी कागळ उपर लखायली छे, तेम ज नवी लखायेल होइ तद्दन सारामां सारी स्थितिमां छे । आ प्रति प्रवर्तक श्रीकान्तिविजयजी महाराजना ज्ञानभंडारनी होवाथी तेनी संज्ञा अमे कां० राखी छे ।

उपर जणावेल छ ये प्रतिओ कागळ उपर सुंदरमां सुंदर लिपिथी लखायेल छे । कां० प्रति सिवायनी बधी ये प्रतिओ त्रण सो अने चार सो वर्ष पहेलानी लखायेल छे अने तेना वचमां ताडपत्रनी प्रतिओनी जेम दोरो परोववामाटे खाली जगा राखवामां आवी छे । छ ये प्रतो सूत्र निर्युक्ति भाष्य अने तेनी टीकासाथेनी छे ।

छ प्रतो पैकी ले० त० अने कां० प्रति जो के शुद्ध तो न कही शकाय तो पण बीजी प्रतोने मुकाबले एकंदर ठीक गणाय । मो० डे० प्रतिओ अशुद्ध छे परन्तु आ बन्ने य प्रतो करतां भा० प्रति घणी ज अशुद्ध छे; तेम छतां साथे साथे ए ध्यानमां राखवुं जोईये के ज्यारे बधी ये प्रतिओमां अशुद्ध पाठ होय तेवे वखते भा० प्रति केटलीक वार शुद्धमां शुद्ध पाठ पूरो पाडे छे ।

## प्रतिओनी परस्पर समानता अने विशेषता ।

**संशोधनमां प्रतिओनो उपयोग**—प्रस्तुत ग्रन्थना प्रथम खंडना संशोधनमाटे अमे उपर जणावेल छ प्रतो काममां लीधी छे । ग्रन्थना आरम्भमां पाठान्तरो एकंदर घणा ज ओछा अथवा नहि जेवा आवता होवाथी बधी ये प्रतो लगभग एकसरखी लागी; परन्तु पूज्यपाद आचार्य श्रीमलयगिरि सूरिकृत पीठिकाटीकाना अनुसंधानरूपे

तथा आचार्य श्रीक्षेमकीर्तिविरचित टीकानी शरूआत थतां ( जुओ पत्र १७७ ) उपरोक्त छ ए प्रतिओ आश्चर्य पमाडे तेवी रीते त्रण वर्गमां वहेंचाई गई छे। पहेलो वर्ग त० अने डे० प्रतिनो, बीजो वर्ग मो० ले० अने कां० प्रतिनो अने त्रीजो वर्ग भा० प्रतिनो। आ रीते उपरोक्त छ प्रतिओना त्रण विभाग पडी गया छे।

**प्रतिओनी समानता असमानता**—त० प्रति अने डे० प्रति कोई आपवादिक स्थळ बाद करी लईए तो सर्वथा समानता धरावती प्रतो छे। ए ज रीते मो० ले० अने कां० ए त्रणे प्रतो परस्पर समानता धरावती प्रतो छे तेम छतां कां० प्रति मो० ले० प्रतिओ करतां केटलीक वार जुदुं वलण ले छे पण ते बहु ज ओछा प्रमाणमां। आनुं कारण अमने ए जणाय छे के–कां० प्रतिनी नकल जे प्रति उपरथी करवामां आवी छे तेमां ते प्रतिना विद्वान वाचके त० प्रतिने मळती कोई प्रति साथे सरखावतां नजरे पडेल वधाराना पाठो कोइक कोइक ठेकाणे उमेर्या छे ए छे। जुओ पृष्ठ २११ पंक्ति ४, पृ. २१२ पं. २४, पृ. २२३ पं. ९, पृ. २३३ पं. ३ इत्यादि। आ उमेराने आपणे बाद करी लईए तो कां० प्रति मो० ले० प्रतिओने मळती प्रति गणी शकाय। भा० प्रति बधी ये प्रतो करतां जुदुं वलण धरावती प्रत होवा छतां त० डे० प्रति साथे एनुं साम्य वधारे छे।

**प्रतिओनी विशेषता अने तेमां थयेल परिवर्त्तन**—भा० त० डे० प्रतिओमां मो० ले० कां० प्रतिओ करतां ठेकठेकाणे वधाराना पाठो आवे छे, ए करतां य वधारे आश्चर्यकारक वात तो ए छे के एकली भा० प्रतिमां डगले ने पगले टीकाना संदर्भोना संदर्भो ज जुदा जुदा प्रकारना गुंथायेला आव्या करे छे। आ बधा य संदर्भोने अमे पाठान्तररूपे टिप्पणमां आप्या छे।

भा० प्रतिमां थयेल टीकानुं आ महान् परिवर्तन खुद टीकाकार महाराजे करेल छे के ते पछीना कोई विद्वान आचार्ये कर्युं छे ए निर्णय करवा माटेनां कशां य निश्चित प्रमाणो अमारा पासे नथी; तो पण भा० प्रतिमां तूटी गयेल अक्षरो अने पंक्तिओने सूचववामाटे ठेकठेकाणे खाली जगा मूकवामां आवी छे ए उपरथी एटलुं स्पष्ट रीते जाणी शकाय छे के–भा० प्रति कोई जीर्ण प्राचीन ताडपत्रीय अथवा कागलना पुस्तकादर्श उपरथी लखाई छे। अने ते उपरथी एम कही शकाय के–भा० प्रतिमां थयेल टीकानुं परिवर्तन ए आधुनिक नथी पण टीकाकारना जमानाना लगभगमां ज थयेल छे।

भा० त० डे० प्रतोमां वधारे पडता जे पाठो छे, जे मो० ले० कां० प्रतिमां नथी, तेमांना केटलाक पाठो तो एवा छे के जेना अभावमां टीकाना अर्थनुं अनुसंधान जरा य तूटे नहि; परन्तु केटला एक पाठो एवा छे के जेना विना आपणे चलावी न शकीए; अर्थात् ए पाठो माटे आपणे एम खातरीथी मानी शकीए के ए पाठो लेखकना प्रमादथी ज पडी गया छे। जुओ पृष्ठ २३१ पंक्ति ३, पृ० २४० पं० ५,

पृ० २४१ पं० १३ मां ☞ ☜ आवा हस्तचिह्नना वचमांना पाठो अने पृ० २३५ प० १८, पृ० २३७ पं० ७ मां ◁ ▷ आवा चिह्नना वचमांना पाठो।

भा० त० डे० प्रतोमां जे वधाराना पाठो छे तेम ज एकली भा० प्रतमां जे तद्दन जुदा प्रकारना अने वधाराना टीकासंदर्भो छे तेमांना केटलाक तो चूर्णि अने विशेषचूर्णिने अनुसरता छे, जे अमे तुलना माटे ते ते स्थळे टिप्पणमां आप्या छे। जुओ पृ० १९३ टि० १, पृ० २०० टि० ६, पृ० २०८ टि० ८, पृ० २२३ टि० ३–६, पृ० २२८ टि० २, पृ० २३१ टि० २–८, पृ० २३५ टि० ६, पृ० २४५ टि० १, पृ० २४६ टि० ३, पृ० २९५ टि० २, पृ० ३०६ टि० १–२, पृ० ३१३ टि० २ इत्यादि। विशेषचूर्णिनी प्रति माटे अमे घणे य स्थळे तपास करी तेम छतां तेनी मात्र एक बे प्रतिओ ज अमे मेळवी शक्या छीए अने ते पण आरम्भथी नहि परन्तु पीठिका अने प्रलम्बप्रकृत समाप्त थया पछीनो भाग एटले के प्रथम उद्देशनां पांच सूत्र समाप्त थया बाद मासकल्पप्रकृत शरु थाय छे त्यांथी छे। आ कारणथी पीठिकाविभागमां तुलना माटे अमे तेना पाठो आपी शक्या नथी, पण मासकल्पप्रकृतथी अमे ते पाठो दाखल कर्या छे जेने वाचको आ ग्रन्थना बीजा विभागमां जोई शकशे।

उपर अमे संशोधन माटे एकत्रित करेल प्रतोनी समानता आदि विषे जे कांइ लख्युं छे ते मोटा भागे आवता पाठान्तरोने ध्यानमां राखीने लख्युं छे; नहि तो एक बीजा वर्गनी प्रतो एक बीजा वर्गनी प्रतो साथे घणी वार अनियमित रीते सेळभेळ थई जाय छे अने जुदी पण पडी जाय छे। तेथी केटलीक वार अमुक पाठ भा० त० डे० प्रतिमां होय अने केटलीक वार त० डे० प्रतिमां होय तो केटलीक वार भा० त० प्रतिमां होय अने केटलीक वार वळी भा० डे० प्रतिमां होय ज्यारे केटलीक वार भा० कां० प्रतिमां ज होय एम बने छे। आ ज रीते केटलीक वार अमुक पाठ मो० ले० कां० प्रतिमां होय तो केटलीक वार भा० मो० ले० प्रतिमां होय तो केटलीक वार मो० ले० मां ज होय एम पण बने छे। घणी वार एम पण बने छे के—अमुक पाठ भा० सिवायनी बधी ये प्रतिओमां एक सरखो होय अने मात्र भा० प्रति ज जुदी पडी जाय छे। ज्यारे आ समान वर्गनी प्रतो आपस आपसमां जुदाई धारण करे छे त्यारे जुदाई धारण करनार प्रतो सिवायनी शेष प्रतो मोटे भागे बीजा वर्गनी प्रतो साथे सरसाई धरावती थई जाय छे। आ बधुं य अमे टिप्पणमां आपेल पाठान्तरो जोवाथी सहेजे समजी शकाय तेम छे।

प्रस्तुत ग्रन्थमां डगले ने पगले जे पाठान्तरो, फेरफारवाळा पाठो अने वधाराना टीकासंदर्भो आवता रह्या छे ए उपरथी अमे एम मानीए छीए के प्रस्तुत ग्रन्थनी टीका रचाया पछी तेमां विद्वानोए घणो ज हस्तक्षेप कर्यो छे। आ हस्तक्षेप योग्य गणाय के अयोग्य एनो निर्णय करवानुं काम विद्वानोनुं छे; तेम छतां अमने ए अनुभव केटले य

ठेकाणे थयो छे के–आ हस्तक्षेप करनाराओए केटलीक वार भूलो पण करी छे, जेने विद्वानो अमे आपेल पाठान्तरो–टिप्पणो उपरथी जोई शकशे ।

आ स्थळे अमने कोई प्रश्न करे के–आ बधी प्रतो पैकी मौलिकता शामां देखाय छे ? एना उत्तरमां अमे एटलुं चोक्कस कही शकीए छीए के–भा० प्रतिमां थयेल परिवर्त्तन गमे तेटलुं प्राचीन होय तेम छतां ते मौलिक नथी ज । कारण के–एना वर्गनी प्रति ए पोते ज देखाय छे, तेम ज एनी भाषा शैली आदि मूल टीकांश करतां तद्दन जुदां पडी जाय छे । आ सिवायनी बीजी पांच प्रतो पैकी **मो० ले०** प्रतोमां अमने विशेष मौलिकता जणाय छे अने ए ज कारणथी अमे मोटे भागे ए प्रतिना पाठोने आखा ग्रन्थमां मुख्य स्थान आप्युं छे तेम छतां एनो सविशेष निर्णय करवानुं काम आ ग्रन्थना भाविमां सम्पादित थनार भागो उपर छोडीए छीए ।

अहीं अमे प्रतिओनी समानता विशेषता आदिमाटे जे कांइ लख्युं छे ए बधुं य मोटे भागे पीठिका विभागने लक्षीने ज लख्युं छे ।

## पाठान्तरोनी पद्धति ।

सामान्य रीते आ ग्रन्थमां आचार्य श्री**मलयगिरि**कृत **पीठिकावृत्तिना** अंशमां पाठान्तरो बहु ज थोडा अथवा नहि जेवा ज आव्या छे, एटले प्रारम्भमां पाठान्तरो लेवामाटे अमे कोई खास पद्धति अखत्यार करी नथी । परन्तु आचार्य **श्रीक्षेमकीर्ति**कृत **पीठिकावृत्तिमां** अने आगळ उपर ज्यां मोटा प्रमाणमां पाठान्तरो आव्यां छे त्यां अमे ते माटे केवो क्रम राख्यो छे ए अमारे अहीं जणाववानुं छे ।

आचार्य श्रीक्षेमकीर्तिकृत पीठिकाटीकाना अंशमां प्रारम्भमां तो पाठान्तरो अस्तव्यस्त ज आवता रह्या छे । अर्थात् अमुक पाठ नियमित रीते अमुक प्रतोमां ज आवे तेम न हतुं एटले प्रारम्भमां ते माटेनो कशो ज क्रम रह्यो नथी के रखायो नथी । परन्तु आगळ चालतां अमने **मो० ले० कां०** प्रतिओ करतां **भा० त० डे०** प्रतिओ वधारे ठीक अने विशेष प्रामाणिक जणाई एथी अमे ए त्रण प्रतोने मुख्य राखीने काम लीधुं छे । तेम छतां ज्यारे मात्र **भा०** प्रतिमां टीकानो अमुक संदर्भ वधारे पडतो जुदो आवे त्यारे **त० डे०** प्रतिने मुख्य राखीने काम लीधुं छे अने **भा०** प्रतिना जुदाई धरावता टीका-संदर्भने टिप्पणमां पाठान्तररूपे आपेल छे । जो के **भा०** प्रतिमांना आ पाठो केटलीक वार वधारे स्पष्ट अने विशदभाषामय होय छे तथापि सामान्य रीते टीकानी चालु भाषा करतां तेनी भाषा तद्दन जुदी पडती होई 'ते पाठो कोई विद्वान महाशये बदली नाखेला तेम ज उमेरेला होवा जोईए' एम अमे मानता होवाथी ए पाठोने मूळमां स्थान न आपता तेमने पाठान्तररूपे टिप्पणमां मूकवानुं योग्य मान्युं छे ।

जेम **भा० त० डे०** प्रतिओमां घणे ठेकाणे वधाराना पाठो आवे छे तेम कोई कोई

वार मो० ले० प्रतिओमां पण वधारे पडता पाठो आवे एम पण बन्युं छे । आ पाठोमांना जे पाठो अमने उपयोगी जणाया तेने अमे मूळमां आप्या छे, जुओ पृ० २४४ पं० ३०, पृ० २४५ पं० ११, पृ० २६१ पं० २३, पृ० २९४ पं० १, पृ० २९८ पं० २६, पृ० ३१३ पं० ४ इत्यादिमां ◁ ▷ आवा चिह्नना वचमांना पाठो; अने जे पाठो अमने क्षेपक जणाया छे ते पाठोने मूळमां स्थान न आपतां टिप्पणमां ज आपवामां आव्या छे । कोई कोई वार एम पण बन्युं छे के अमुक वधारानो पाठ अमुक एक ज प्रतिमां होय तेम छतां ते उपयोगी जणाता एक प्रतिना पाठने अमे मूळमां दाखल करेल छे पण ए दरेके दरेक ठेकाणे अमे टिप्पणमां जणाव्युं छे के आ पाठ अमुक प्रतिमांनो छे ।

जे पाठो अमने अमारी (गुरु–शिष्यनी) विचारणाने अंते तद्दन अशुद्ध के निरर्थक जणाया छे तेने अमे कोई कोई वार जाणवा खातर टिप्पणमां आप्या छे तेम छतां मोटे भागे तेवा पाठान्तरोने अमे टिप्पणमां य स्थान आप्युं नथी । जे पाठान्तरो प्रतोमां अशुद्ध होय तेम छतां तेने सुधारीने ठीक करी शकाय तेम होय तो ते पाठोने अमारी कल्पनावडे सुधारेल पाठ साथे टिप्पणमां आपेल छे । अमारा सुधारेल ए पाठोने अमे आवा ( ) गोळ अने [ ] चोरस कोष्ठकमां मूकेला छे । जुओ पृ० १७ टि० १, पृ० ३१ टि० ६, पृ० ३८ टि० २, पृ० ८१ टि० २, पृ० १९३ टि० ६, पृ० २३१ टि० ३, पृ० २३२ टि० ३, पृ० २३४ टि० १, पृ० २४० टि० २ इत्यादि ।

## वधारानी प्रतो ।

उपर जणावेल छ प्रतो सिवाय मूलसूत्र, भाष्य, बृहद्भाष्य, चूर्णि अने विशेषचूर्णीनी जे प्रतोनो अमे आ संशोधनमां उपयोग कर्यो छे तेनो परिचय अहीं आपीए छीए—

१ बृहत्कल्पसूत्र पत्र १–१३ अने बृहत्कल्पलघुभाष्य पत्र १–२१६ । आ बन्ने य ग्रन्थो एक ज पोथीमां छे । आ पोथी ताडपत्रीय छे । दरेक पानानी एक बाजुनी पुठीमां ३ थी ५ लीटीओ छे अने दरेक आखी लीटीमां १०८ थी १४१ सुधी अक्षरो छे । प्रतिनी लंबाई ३४ इंच अने पहोळाई २ इंचनी छे । प्रतिना अंतमां लेखकनी पुष्पिका आदि कांइ नथी । प्रति सारी स्थितिमां छे अने संपूर्ण छे । पुस्तकनी लिपि सामान्य रीते सुंदर छे पण अक्षरो नाना मोटा बहु ज थया करे छे । प्रति अशुद्धप्राय छे ।

२ बृहत्कल्पचूर्णी पत्र १–३८४ अने बृहत्कल्पसूत्र पत्र ३८५ थी ३९३ । आ बन्ने य ग्रन्थो एक ज पोथीमां छे । आ पोथी पण ताडपत्र उपर लखायेल छे । दरेक पानानी एक बाजुनी पुठीमां ५ थी ७ लीटीओ छे अने दरेक लीटीमां १२३ थी १४८ अक्षरो छे । प्रतिनी लंबाइ ३३। इंचनी अने पहोळाई २। इंचनी छे । प्रतिना अंतमां आ प्रमाणे लेखकनी पुष्पिका छे—

"संवत् १२९१ वर्षे पोष सुदि ४ सोमे"

प्रति सारी स्थितिमां छे अने संपूर्ण छे । प्रतिनी लिपि घणी ज सुंदर छे । ३६२ मा

पानानी प्रतिने कोई बीजा लेखके पूर्ण करी छे। लिपि अतिसुंदर होवा छतां लेखक एक सरखा अक्षरो लखी शक्यो नथी। कोई ठेकाणे नाना तो कोई ठेकाणे मोटा एम अक्षरो नाना मोटा थता रह्या छे। प्रति अशुद्धप्राय छे।

३ कल्पबृहद्भाष्य पत्र २०७। आ प्रति कागळ उपर लखायेली छे। दरेक पानानी एक बाजुनी पुठीमां १३ लीटीओ छे अने दरेक लीटीमां ५३ थी ५८ अक्षरो छे। प्रतिनी लंबाई १:॥ इंचनी अने पहोळाई ४॥ इंचनी छे। प्रति सुंदर लिपिथी लखायेल छे। आ प्रति संपूर्ण नथी पण लखतां अधुरी रही गई छे एटले त्रीजा उद्देशमां कांइ अपूर्ण सुधीनी छे। प्रति लखवामां कागळो बे जातना वपराया छे तेथी तेनां अर्धां पानां जीर्ण थई गयां छे अने अर्धां सारी स्थितिमां छे। प्रति घणी ज अशुद्ध छे।

उपरनी त्रणे य प्रतो पाटणना वखतजीनी सेरीमां रहेल संघना भंडारनी छे। जे शेठ धर्मचंद अभेचंदनी पेढी द्वारा मेळवी छे।

४ कल्पचूर्णी पत्र २१२। आ प्रति कागळ उपर लखेली छे। दरेक पानानी एक बाजुनी पुठीमां १७ लीटीओ छे। अने दरेक लीटीमां ६२ थी ६६ अक्षरो छे। प्रतिनी लंबाई १३॥। इंच अने पहोळाई ५। इंचनी छे। प्रतिना अंतमां नीचेनी पुष्पिका छे—

"संवत् १५७४ वर्षे श्रीपत्तने मार्गशिर सुदि ७ बुधवासरे एवं पुस्तिकं परिपूर्ण"

प्रतिनी लिपि सुंदर छे। प्रति साधारण स्थितिमां अने अशुद्धप्राय छे। आ प्रति मोंका मोदीना भंडारनी छे।

५ कल्पविशेषचूर्णी पत्र १५२। आ प्रति कागळ उपर लखायली छे। तेना दरेक पानानी एक बाजुनी पुठीमां १६ लीटीओ लखेली छे अने दरेक लीटीमां ७८ थी ८५ अक्षरो छे। प्रतिनी लंबाई १३॥। इंचनी अने पहोळाई ५। इंचनी छे। प्रतिनी लिपि सुंदर छे अने ते सारी स्थितिमां छे। आ प्रति घणी ज अशुद्ध छे। प्रति लहेरु वकीलना भंडारमांनी छे।

उपर जणावेली प्रतो अमने जे जे महाशयो द्वारा मळी छे अने ते सौए पोतपोताना भंडारनी प्रतो माटे अखूट धीरज राखी अमारा संशोधनकार्यमां जे कीम्मती सुगमता करी आपी छे तेमनो, धन्यवाद आपवा पूर्वक अमे आभार मानीए छीए।

उपर जणावेल अगीआर अथवा तेर प्रतोनी मददथी अत्यंत काळजी पूर्वक प्रस्तुत ग्रन्थनुं संशोधन अमे गुरु-शिष्योए मळीने कर्युं छे, तेम छतां अमारा संशोधनमां स्खलनाओ थवानो जरूर संभव छे। जे महानुभावो अमने अमारी त्रुटिओ सूचवशे ते सौनो अमे आभार मानीशुं अने तेमनी उपयोगी जणाती सूचनाओनो आ पछी प्रसिद्ध थनार बीजा भागोमां योग्य उपयोग करीशुं।

निवेदको—गुरु-शिष्य

मुनि चतुरविजय तथा पुण्यविजय.

॥ अर्हम् ॥

# बृहत्कल्पसूत्रनी पीठिकानो विषयानुक्रम


| गाथा | विषय | पत्र |
|---|---|---|
| | इंग्लीश मुखपृष्ठ | |
| | संस्कृत मुखपृष्ठ | |
| | श्रीविजयानन्दसूरिनो फोटो | |
| | वन्दन | |
| | बृहत्कल्पसूत्रसंशोधनकृते सङ्गृहीतानां प्रतीनां सङ्केताः | ५ |
| | टीकाकृताऽस्माभिर्वा निर्दिष्टानामवतरणानां स्थानदर्शकाः सङ्केताः | ६ |
| | प्रमाणत्वेनोद्धृतानां प्रमाणानां स्थानदर्शकग्रन्थानां प्रतिकृतयः | ७ |
| | प्रासङ्गिक निवेदन | ९ |
| | बृहत्कल्पसूत्रना संशोधनमां कामे लीधेली लिखित प्रतिओनो परिचय | २० |
| | बृहत्कल्पसूत्रनी पीठिकानो विषयानुक्रम | २९ |
| | वृत्तिकारे करेल मंगलाचरण अने शास्त्रनो उपोद्घात | १ |
| १–३ | मंगलाचरण अने शास्त्रना विषयनो निर्देश | ३ |
| **४–२३** | **१ मंगलवाद** | **५–११** |
| ४ | नंदी अने मंगलनुं अपेक्षाकृत भेदाभेदपणुं | ५ |
| ५–१० | 'मङ्गल'पदना निक्षेपो | ५–७ |
| ११ | पदार्थ मात्रमां चार निक्षेप उतारवानो निर्देश | ७ |
| १२–१५ | 'इन्द्र'पदना निक्षेपो [ गाथा १३—नाम अने स्थापनानो फरक. गाथा १४ टीका—द्रव्य निक्षेपनुं लक्षण ] | ७–८ |
| १६–१८ | 'इन्द्र'पदना भावनिक्षेपमां विरोध अने तेनुं समाधान | ८–९ |
| १९ | नामइन्द्र अने स्थापनाइन्द्रनो तथा द्रव्यइन्द्र अने भाव-इन्द्रनो आपसमां फरक | ९ |
| २०–२१ | मंगलाचरण करवानुं प्रयोजन अने तेनी सिद्धिमाटे नृप निधि विद्या मन्त्र आदि दृष्टांतो | ९–१० |

| गाथा | विषय | पत्र |
|---|---|---|
| २२ | ग्रन्थना आदि मध्य अने अंतमां मंगल करवामां शिष्ये देखाडेल विप्रतिपत्ति अने तेनुं समाधान | १० |
| २३ | मंगल करवामां शिष्ये बतावेल अनवस्थादोष अने तेनुं समाधान | ११ |
| **२४–१४८** | **२ नन्दी–ज्ञानपञ्चक** | **११–४६** |
| २४ | 'नन्दी' पदना निक्षेपो<br>[ बार प्रकारनां वादित्रो ] | ११–१२ |
| २५ | प्रत्यक्ष अने परोक्षनुं लक्षण | १२ |
| २६–२७ | वैशेषिकादिकोए स्वीकारेल प्रत्यक्षना लक्षणमां दूषण | १२–१३ |
| २८ | इन्द्रियथी थतुं लैङ्गिकज्ञान | १३ |
| २९–३० | प्रत्यक्ष अने परोक्षनी व्याख्या अने तेना भेदो | १३ |
| **३१–३४** | **अवधिज्ञान**<br>द्रव्य क्षेत्र काल भावथी अवधिज्ञाननुं स्वरूप | **१३–१४** |
| **३५–३६** | **मनःपर्यवज्ञान** | **१४–१५** |
| **३७–३८** | **केवलज्ञान** | **१५** |
| **३९–४०** | **आभिनिबोधिकज्ञान** | **१५–१६** |
| **४१–१४७** | **श्रुतज्ञान** | **१६–४६** |
| ४१–४२ | श्रुतज्ञाननुं लक्षण अने तेना भेदो | १६ |
| **४३–७५** | **अक्षरश्रुतनुं स्वरूप** | **१६–२६** |
| ४४ पूर्वार्ध | संज्ञाक्षरनुं स्वरूप | १७ |
| ४४ उ०–४५ | लब्ध्यक्षरनुं स्वरूप अने तेना भेदो | १७ |
| ४६–५३ | अत्यन्तानुपलब्धि, सामान्यानुपलब्धि अने विस्मृत्यनुपलब्धि ए त्रण अनुपलब्धिनुं तथा सादृश्यत उपलब्धि, विपक्षत उपलब्धि, उभयधर्मदर्शनत उपलब्धि, औपम्यत उपलब्धि अने आगमत उपलब्धि ए पांच उपलब्धिनुं स्वरूप | १७–१९ |
| ५४ | पांच उपलब्धिओ संज्ञीने होय छे अने त्रण अनुपलब्धिओ असंज्ञिने होय छे | १९ |
| ५५–५७ | व्यञ्जनाक्षरनुं स्वरूप अने तेना जुदी जुदी रीते बे बे प्रकारो | १९–२० |
| ५८–५९ | व्यञ्जनाक्षरनुं अभिधेयथी भिन्नाभिन्नपणुं | २० |
| ६०–६४ | व्यञ्जनाक्षरना स्व-परपर्यायो अने तेमनुं परस्पर संबद्धासंबद्धपणुं | २१–२२ |

| गाथा | विषय | पत्र |
|---|---|---|
| ६५–७० | अक्षरनुं प्रमाण अने तेने समजवा लाववामाटे आकाशना गुरु, लघु, गुरुलघु अने अगुरुलघु पर्यायोनुं निरूपण. | |
| | प्रसंगोपात पुद्गलास्तिकायना गुरु, लघु आदि पर्यायोनो विचार अने तेमनुं अल्पबहुत्व. | |
| | धर्मास्तिकायादि अरूपी द्रव्योना अगुरुलघु पर्यायोनो विचार | २२–२५ |
| ७१–७५ | ज्ञाननुं सर्वाकाशप्रदेशोथी अनन्तगुणपणुं | २५–२६ |
| ७६–७७ | **अनक्षरश्रुत** | २७ |
| ७८–८७ | **संज्ञिश्रुत अने असंज्ञिश्रुत** | २७–२९ |
| | [ गाथा ७९–८४—कालिकीसंज्ञाने आश्री संज्ञी असंज्ञीनुं निरूपण. ८५—हेतुवाद अने दृष्टिवाद संज्ञाने आश्री संज्ञी असंज्ञीनुं निरूपण. ] | |
| ८८–१३४ | **सम्यक्श्रुत अने मिथ्याश्रुत** | २९–४१ |
| | * * * * * | |
| ९०–१३१ | **सम्यक्त्वनुं निरूपण** | ३०–४१ |
| ९० | सम्यक्त्वना पांच प्रकार | ३० |
| ९१–११७ | **सम्यक्त्वनी प्राप्तिनो क्रम** | ३०–३७ |
| ९१–९३ | क्षायिकादिसम्यक्त्वनी प्राप्ति थया पछी कर्मोनी स्थिति आदिनुं प्रमाण | ३०–३१ |
| ९४–१११ | यथाप्रवृत्तिकरण, अपूर्वकरण अने अनिवृत्तिकरण ए त्रण करणोनी प्राप्तिनो क्रम अने ते विषये गिरिसरित्प्रस्तर, पथ, ज्वर, वस्त्र, जल, पिपीलिका–कीडीओ, पुरुष अने कोद्रवानां दृष्टान्तो | |
| | अधिगमजनित–परोपदेशजनित अने नैसर्गिक सम्यक्त्व | ३१–३६ |
| | [ गाथा १०५—ग्रन्थिस्थानमां रहेल भव्य अने अभव्यने द्रव्यश्रुतनो लाभ ] | |
| ११२–१७ | सम्यक्त्व, मिश्र अने मिथ्यात्वनां पुद्गलोनो परस्पर संक्रम अने असंक्रम | ३६–३७ |
| ११८–२६ | **औपशमिक सम्यक्त्व** | ३७–३९ |
| | [ गाथा १२५–२६—सम्यक्त्वनी प्राप्ति थाय त्यारे केटलां अने कयां ज्ञान प्राप्त थाय ? ] | |
| १२७–२८ | **सासादन सम्यक्त्व** | ४० |

| गाथा | विषय | पत्र |
|---|---|---|
| १२९ | **क्षायोपशमिक सम्यक्त्व** | ४० |
| १३० | **वेदक सम्यक्त्व** | ४० |
| १३१ | **क्षायिक सम्यक्त्व** | ४१ |

* * * * *

| | | |
|---|---|---|
| १३२ | सम्यक्श्रुत अने मिथ्याश्रुतनो विभाग | ४१ |
| १३३–३४ | सम्यग्दर्शन अने सम्यग्ज्ञाननो विशेष | ४१ |
| १३५–३९ | **सादिश्रुत अने अनादिश्रुत** | ४२–४३ |
| १४०–४२ | **सपर्यवसितश्रुत अने अपर्यवसितश्रुत** | ४३–४४ |
| १४३ | **गमिकश्रुत अने अगमिकश्रुत** | ४४ |
| १४४–४६ | **अंगश्रुत अने अंगबाह्यश्रुत** [ दृष्टिवादना अध्ययन माटे स्त्रीओनुं अनधिकारिपणुं अने तेनां कारणो. पत्र ४४–४५ टिप्पणमां—पांच सो आदेश पैकीना केटलाएक आदेशोनो संग्रह ] | ४४–४६ |

## १४९–८०५ अनुयोगाधिकार ४६–२५४

| | | |
|---|---|---|
| १४९ | अनुयोगाधिकार द्वारगाथा | ४६ |
| १५०–७२ | **१ निक्षेपद्वार** | ४७–५८ |
| १५० | निक्षेपना एकार्थिक शब्दो | ४७ |
| १५१–५२ | अनुयोगनो सात प्रकारे निक्षेप अने तेना भेदो | ४७ |
| १५३–६८ | द्रव्यानुयोग, क्षेत्रानुयोग, कालानुयोग, वचनानुयोग अने भावानुयोगनुं स्वरूप [ गाथा १६०–६१—पृथ्वीजीवोनुं परिमाण. १६४—लिङ्गत्रिक वचनत्रिक इत्यादि सोळ प्रकारनां वचनो ] | ४७–५१ |
| १६९–७० | द्रव्यादि निक्षेपोनो एक बीजामां समवतार–समावेश | ५१–५२ |
| १७१–७२ | **द्रव्यादिना अनुयोग अने अननुयोग विषयक दृष्टान्तो** | ५२–५८ |
| १७१ | १ द्रव्यना अनुयोग अने अननुयोग विषये **वत्स-गोणीनुं-वाछरडुं अने गायनुं** उदाहरण | ५२ |
| | २ क्षेत्रना अनुयोग अने अननुयोग विषये **कुब्जानुं** उदाहरण | ५२ |
| | ३ कालना अननुयोग अने अनुयोग विषये **स्वाध्यायनुं** उदाहरण | ५३ |

| गाथा | विषय | पत्र |
|---|---|---|
| | ४ वचनना अनुयोग अने अननुयोग विषये **बधिर कुटुंबना वार्त्तालापनुं** उदाहरण | ५३ |
| १७२ | भावानुयोग अने अननुयोग विषयक सात उदाहरणो | ५४–५८ |
| | १ **श्रावकभार्यानुं** उदाहरण | ५४ |
| | २ **साप्तपदिकनुं** उदाहरण | ५५ |
| | ३ **कोंकणदेशवासी बाळकनुं** उदाहरण | ५५ |
| | ४ **नकुल–नोळीआनुं** उदाहरण | ५६ |
| | ५ **कमलामेलानुं** उदाहरण | ५६ |
| | ६ **शाम्बनुं** उदाहरण | ५७ |
| | ७ **श्रेणिकनो कोप** उदाहरण | ५७ |
| **१७३–८७** | **२ एकार्थिक द्वार** | **५८–६१** |
| १७३ | एकार्थिक कथनना गुणो | ५८ |
| १७४ | श्रुत, सूत्र, सिद्धान्त, शासन इत्यादि सूत्रना एकार्थिको | ५८ |
| १७५–७७ | श्रुतना निक्षेपो | ५८–५९ |
| १७८ | सूत्र अने ग्रन्थना निक्षेपो | ५९ |
| **१७९** | **सिद्धान्तना निक्षेपो अने तेना प्रकारो** | **५९** |
| १८० | सर्वतन्त्र सिद्धान्तनुं स्वरूप | ५९ |
| १८१ | प्रतितन्त्र सिद्धान्तनुं स्वरूप | ६० |
| १८२ | अधिकरणसिद्धान्तनुं स्वरूप | ६० |
| १८३ | अभ्युपगमसिद्धान्तनुं स्वरूप | ६० |
| १८४ | शासन अने आज्ञाना निक्षेपो | ६० |
| १८५ | वचनना निक्षेपो | ६० |
| १८६ | उपदेश, प्रज्ञापना अने आगमना निक्षेपो | ६१ |
| १८७ | अनुयोग, नियोग, भाषा इत्यादि अर्थना एकार्थिको | ६१ |
| **१८८–२०७** | **३ निरुक्तद्वार** | **६१–६७** |
| १८८ | 'निरुक्त'नो अर्थ | ६१ |
| १८९ | अर्थनुं–अनुयोग नियोग भाषा आदिनुं निरुक्त अने तद्विषयक दृष्टान्तो | ६१ |
| १९०–९३ | अनुयोगनुं निरुक्त अने अणुत्व बादरत्व विषये **पेटा** आदि दृष्टांतो | ६२ |
| १९४–९५ | नियोगनुं निरुक्त अने तद्विषये **उंडिकापत्रकनुं** दृष्टान्त | ६३ |

| गाथा | विषय | पत्र |
|---|---|---|
| १९६ | भाषानुं निरुक्त अने तद्विषये **प्रतिश्रुत–प्रतिशब्दनुं दृष्टान्त** | ६३ |
| १९७–९८ | विभाषानुं निरुक्त अने तद्विषये **अभ्रपटलनुं दृष्टान्त** | ६४ |
| १९९–२०० | वार्तिकनुं निरुक्त अने तद्विषये **चार मंखोनुं दृष्टान्त** | ६४ |
| २०१ | व्यक्तिकर अथवा वार्तिककारनी योग्यता | ६५ |
| २०२–७ | निक्षेप, निरुक्त, अनुयोगद्वार आदि द्वारा पदार्थनुं व्याख्यान अने अंग उपांग आदि आगमोनुं निरूपण श्रीऋषभ तीर्थकरे कर्युं छे तेम ज श्रीमहावीरदेवे कर्युं छे ? के ते करतां जुदी रीते ? ए प्रश्ननो उत्तर अने ते विषये **वर्त्तिनीनुं–गाडाना चीलानुं** दृष्टान्त | ६५–६७ |
| **२०८–३३** | **४ विधिद्वार** | **६७–७२** |
| २०८ | विधिना एकार्थिको | ६७ |
| २०९–१० | बुद्धिशाळी अने मंदमति शिष्योने लक्षीने अनुयोग आपवानो अर्थात् सूत्रनुं व्याख्यान करवानो विधि | ६७ |
| २११–१४ | बुद्धिमान् अने मंदमति शिष्योने अनुयोग–सूत्रनी वाचना आपवामाटे प्रतिपादन करेल भिन्न भिन्न विधिमाटे आचार्य उपर रागद्वेष आदि दोषोनो आरोप अने तेनुं समाधान | ६७–६८ |
| २१५–२३ | अतिपरिणामक, अपरिणामक आदि एकांत अयोग्य शिष्योने अनुयोग अर्थात् सूत्रार्थनी वाचना नहि आपवामां राग-द्वेषनो अभाव अने तद्विषये **दारु–लाकडुं, धातु, व्याधि, बीज, काकडुक, लक्षण, स्वप्न** आदि दृष्टान्तो | ६९–७० |
| २२४–३३ | कालान्तरमां योग्यता प्राप्त करी शके एवा शिष्योने क्रमसर अनुयोग आपी योग्यता प्राप्त कराववामां राग-द्वेषनो अभाव अने तद्विषये **अग्नि, बालक, ग्लान, सिंह, वृक्ष, करील, हस्ती, शरवेध, पत्रच्छेद्य, प्लवक, घटकार, पटकार, चित्रकार, धमक** आदि दृष्टांतो अने तेनो उपनय | ७०–७२ |
| **२३४–४०** | **५ प्रवृत्तिद्वार** | **७२–७४** |
| २३४–३७ | अनुयोगनी प्रवृत्ति क्यारे थाय ? ते विषये चतुर्भंगी अने **गोणुं–गायनुं दृष्टान्त** | ७२ |
| २३८–३९ | उद्यमी आचार्य प्रमादी शिष्योने अनुयोगमां प्रवृत्त करे छे तद्विषये **आर्यकालकनुं दृष्टान्त** | ७३ |

| गाथा | विषय | पत्र |
|---|---|---|
| २४१–४५ | ६ 'केन वा' द्वार | ७५–७६ |
| | अनुयोगदाताना गुणो अने तेमनी योग्यता | |
| २४६–५५ | ७ 'कस्य वा' द्वार | ७६–७८ |
| | अनुयोग कया सूत्रनो करवो? अनुयोग दरेक सूत्रनो थइ शके छे पण अत्यारे कल्प-व्यवहारसूत्रनो अनुयोग प्रस्तुत छे. कल्प-व्यवहार ए अंग के अंगो, श्रुतस्कंध के श्रुतस्कन्धो, अध्ययन के अध्ययनो, उद्देश के उद्देशा ए पैकी शुं छे? एनुं निरूपण | |
| २५६–५७ | ८ अनुयोगद्वारद्वार | ७८ |
| | उपक्रम, निक्षेप, अनुगम अने नय ए चार अनुयोगनां द्वारो अने ए द्वारो निरूपण करवानुं कारण | |
| २५८–७५ | ९ भेदद्वार | ७८–८३ |
| २५८–७० | उपक्रमद्वार | ७८–८२ |
| २५८–६४ | लौकिक उपक्रम | ७९–८१ |
| | [ २५८–५९—लौकिक द्रव्योपक्रम<br>२६०—लौकिक क्षेत्रोपक्रम २६१—लौकिक कालोपक्रम<br>२६२—लौकिक अप्रशस्त भावोपक्रम अने तद्विषये गणिका, ब्राह्मणी अने अमात्यनां दृष्टान्तो<br>२६३–६४—लौकिक प्रशस्त भावोपक्रम ] | |
| २६५–७० | छ प्रकारनो शास्त्रीय उपक्रम अने तेमां प्रस्तुत अध्ययननो यथायोग्य समवतार | ८०–८२ |
| २७१–७५ | निक्षेपद्वार | ८२–८३ |
| | ओघनिष्पन्न, नामनिष्पन्न अने सूत्रालापकनिष्पन्न निक्षेपनुं स्वरूप | |
| २७६–३२९ | १० लक्षणद्वार | ८३–१०० |
| २७६–७७ | अल्पग्रंथ, महार्थ आदि सूत्रनां लक्षणो | ८३ |
| २७८–८१ | अलीक, उपघातजनक, अपार्थक आदि सूत्रना बत्रीस दोषो | ८४ |
| २८२–८७ | निर्दोष, सारवत्, हेतुयुक्त, अलङ्कृत आदि सूत्रना आठ गुणो अने बीजा विशेष गुणो | ८५–८६ |
| २८८ | हीनाक्षर, अधिकाक्षर आदि उच्चारना दोषोथी रहित यथावस्थित सूत्रने बोलवानी रीत | ८७ |

| गाथा | विषय | पत्र |
|---|---|---|
| २८९ | द्रव्यहीन अने द्रव्याधिकमां हानि दर्शावतुं **अविरतिकानुं**—एक बाईनुं उदाहरण | ८७ |
| २९०–९४ | हीनाक्षर—अक्षरो पडी जाय तेम के अधिकाक्षर—नकामा अक्षरो वधारीने सूत्र बोलवामां प्रायश्चित्त अने तेथी हानि दर्शावतुं **विद्याधर अने अभयकुमारनुं** अने **अशोक-कुणाल-संप्रतिराजनुं** उदाहरण अने ए ज आशयने मळतुं लोकप्रसिद्ध **कामियसरोवरवासी वांदरानुं** उदाहरण | ८८–९० |
| २९६ | व्यत्याम्रेडित अने व्याविद्ध दोषनुं स्वरूप अने ए माटे अनुक्रमे **पायस—खीरनुं** अने **आवलीनुं** उदाहरण | ९० |
| २९७ | स्खलित, मिलित आदि दोषोनुं स्वरूप | ९० |
| २९८ | व्यत्याम्रेडितादि दोषोनुं प्रकारान्तरे स्वरूप | ९१ |
| २९९–३०१ | हीनाक्षरादिदोषयुक्त सूत्र उच्चारवामां प्रायश्चित्तो | ९१–९२ |
| ३०२–८ | संहिता, पद, पदार्थ आदि सूत्रव्याख्याना छ प्रकारो, तेनुं स्वरूप अने ए व्याख्यानी सूत्र साथे घटना करवानी रीत | ९२–९४ |
| ३०९ | सूत्र, पद, पदार्थ, पदनिक्षेप आदि सूत्रव्याख्याना रूपान्तरे पांच प्रकारो | ९४ |
| **३१०–१५** | **सूत्रपदनुं निरुक्त अने तेना संज्ञासूत्र आदि भेदो** | **९४–९५** |
| ३१६ | संज्ञासूत्रनुं स्वरूप | ९६ |
| ३१७ | कारकसूत्रनुं स्वरूप | ९६ |
| ३१८ | प्रकरणसूत्रनुं स्वरूप | ९७ |
| | [ उत्सर्गसूत्र अपवादसूत्र उत्सर्गापवादसूत्र अपवादोत्सर्गसूत्रनुं स्वरूप ] | |
| ३१९–२४ | उत्सर्ग अने अपवादनो भावार्थ, उत्सर्गने लीधे अपवाद ? के अपवादने लीधे उत्सर्ग ?, उत्सर्ग केटला ? अने अपवाद केटला ? उत्सर्ग श्रेयस्कर अने बलवान् ? के अपवाद ? | ९८ |
| ३२५ | नाम, नैपातिक, उपसर्ग आदि पदोनुं स्वरूप | ९८ |
| ३२६–२७ | सामासिक, ताद्धितिक, धातुकृत आदि पदार्थनुं स्वरूप | ९८–९९ |
| ३२८–२९ | निर्णयप्रसिद्धिनुं स्वरूप | ९९ |
| **३३०–३३** | **११ तदर्हद्वार** | **१००** |
| | कल्प-व्यवहारना अनुयोगने लायक शिष्यो | |
| **३३४–८०९** | **१२ पर्षद्द्वार** | **१०१–२५४** |

| गाथा | विषय | पत्र |
|---|---|---|
| ३३४–६१ | **अनुयोगने लायक पर्षदनी अर्थात् शिष्योनी परीक्षा करवा माटे मुद्गशैलादि दृष्टांतो** | १०१–८ |
| ३३५–३७ | मुद्गशैल-पुष्करावर्त्तमेघनुं दृष्टांत अने मुद्गशैल जेवा शिष्यने अनुयोग आपवामां दोषो | १०१ |
| ३३८ | काळी जमीननुं उदाहरण | १०२ |
| ३३९–४२ | कुटनुं–घडानुं दृष्टान्त | १०२ |
| | चालणीनुं दृष्टान्त | १०३ |
| ३४३–४५ | मुद्गशैल, काणो घडो अने चालणी समान शिष्योनो 'अनुयोग सांभळ्या पछी पोते केटलुं अने क्यां सुधी याद राखी शके छे' ए अर्थने सूचवतो परस्परनो वार्त्तालाप | १०३ |
| ३४५–६१ | परिपूणक, हंस, महिष, मेष, मशक–मच्छर, जळो, बीलाडी, जाहक, कोई यजमाने चार ब्राह्मणो वच्चे आपेली एक गाय, कृष्णनी अशिवोपशमनी भेरी, आभीरी–भरवाडणनां दृष्टांतो | १०४–८ |
| ३६२–६३ | योग्य शिष्यने सूत्रार्थनी वाचना नहि आपवामां अने अयोग्यने आपवामां प्रायश्चित्त | १०८ |
| ३६४–७७ | **प्रकारान्तरे जाणकार अज्ञान अने दुर्विदग्ध एम त्रण प्रकारनी पर्षदा** | १०९–१२ |
| ३६५–६६ | जाणकार पर्षदानुं स्वरूप | १०९ |
| ३६७–६८ | अज्ञान पर्षदानुं स्वरूप | १०९–११० |
| ३६९–७२ | दुर्विदग्ध पर्षदानुं स्वरूप अने त्वरितग्राही–उतावळीया दुर्विदग्धवैयाकरणनुं दृष्टांत | ११० |
| ३७३–७५ | **भाष्यकारे पोताना जमानाना आचार्योनी परिस्थितिनुं करेलुं तटस्थ सूचन** | १११ |
| ३७६–७७ | दुर्विदग्ध वैद्यपुत्रनुं दृष्टांत अने तेनो दुर्विदग्ध शिष्यो साथे उपनय | ११२ |
| ३७८–९९ | **त्रीजी रीते लौकिक लोकोत्तर एम बे प्रकारनी पर्षदा** | ११२-१६ |
| ३७९–९८ | पूरयन्ती, छत्रांतिका, बुद्धि, मन्त्री अने राहस्यिकी एम पांच प्रकारनी लौकिक लोकोत्तर पर्षदा अने तेनुं वर्णन | ११२–१६ |
| ३९९ | कल्प-व्यवहारना अनुयोगमाटे लोकोत्तर छत्रांतिक पर्षदानुं अधिकारिपणुं | ११६ |

| गाथा | विषय | पत्र |
|---|---|---|
| | ❀ ❀ ❀ ❀ ❀ | |
| ४००–८०५ | **कल्प-व्यवहारना अनुयोगमाटे लायक गणेल छत्रांतिक पर्षदाना गुणो** | ११७–२५४ |
| ४००–१ | छत्रान्तिक पर्षदाना गुणोनी द्वारगाथा | ११७ |
| ४०२ | १ बहुश्रुतद्वार | ११७ |
| | जघन्य, मध्यम अने उत्कृष्ट बहुश्रुतनुं स्वरूप | |
| ४०३–४ | २ चिरप्रव्रजितद्वार | ११७ |
| | जघन्य, मध्यम अने उत्कृष्ट चिरप्रव्रजितनुं स्वरूप | |
| ४०५–७१४ | ३ कल्पिकद्वार | ११७–२१७ |
| | * * * * * | |
| ४०५ | **कल्पिकद्वारनी द्वारगाथा** | ११७ |
| ४०६–७ | सूत्रकल्पिक द्वार | ११८ |
| | सूत्रोना अध्ययनमाटे अधिकारी अने तेनी मर्यादा | |
| ४०८ | अर्थकल्पिकद्वार | ११८ |
| | सूत्रोना अर्थने शीखवामाटे अधिकारी | |
| ४०९–१० | तदुभयकल्पिकद्वार | ११८–१९ |
| | एकी साथे सूत्र अने अर्थना अध्ययनमाटे अधिकारी | |
| ४११–१४ | उपस्थापनाकल्पिकद्वार | ११९–२० |
| | उपस्थापना अर्थात् छेदोपस्थापनचारित्रने योग्य कोण? शिष्यनी परीक्षा कर्या सिवाय उपस्थापना करनारने प्रायश्चित्तादि. षड्जीवनिकाअध्ययनना अर्थाधिकारो. छ प्रकारनो द्रव्यकल्प. उपस्थापनानो क्रम | |
| ४१५–७० | विचारकल्पिकद्वार | १२१–३८ |
| ४१५ | विचारभूमीमां अर्थात् स्थंडिलभूमीमां एकलो जवा माटे अधिकारी कोण? अधिकारीने एकला मोकलवामाटे प्रायश्चित्त आदि | १२१ |
| | × × × × × | |
| ४१७–६९ | **स्थंडिलभूमीनुं निरूपण** | १२१–३८ |
| ४१७ | स्थंडिल निरूपणानां द्वारो | १२१ |
| ४१८–२४ | भेदद्वार | १२१–२३ |
| | स्थंडिलभूमीना प्रकारो. आपातसंलोक आदि स्थंडिलोनुं वर्णन | |

| गाथा | विषय | पत्र |
|---|---|---|
| ४२५–२९ | **शोधिद्वार** | १२३–२५ |
| | अस्थंडिलनो उपयोग करवाथी लागतां प्रायश्चित्तो | |
| ४३०–५५ | **अपायद्वार** | १२५–३२ |
| ४३०–३७ | स्थंडिलभूमीमां स्त्री, पुरुष, नपुंसक, पशु आदिना आपातथी–आव-जाथी उभी थती अडचणो अने तेवी स्थंडिलभूमीनो उपयोग करवामां लागता दोषो | १२५–२७ |
| ४३८–४२ | संज्ञाभूमी जवानो वखत. वखतसर अने विना वखते संज्ञा-भूमी जवानो विधि अने प्रायश्चित्त वगेरे | १२७–२८ |
| ४४३–४४ | विशुद्ध स्थंडिलभूमीनां लक्षणो | १२९ |
| ४४५ | स्थंडिलभूमीना १०२४ भांगाओ–प्रकारो | १२९ |
| ४४६–५१ | औपघातिक, विषम, शुषिर, चिरकालीन, विस्तीर्ण, दूर, नजीक, बिलवाळी आदि स्थंडिलभूमीओनुं वर्णन | १३०–१३१ |
| ४५२–५५ | अविधिथी अस्थंडिलमां संज्ञाभूमी जवाथी लागतां अन्य आचार्यना मतथी प्रायश्चित्तो | १३१–३२ |
| ४५६–६१ | **वर्जनाद्वार** | १३२–३४ |
| | संज्ञाभूमी जवामाटे त्याज्य दिशा वगेरेनुं निरूपण. "अणुजाणह जस्सुग्गहो" बोलीने स्थंडिलभूमीनो उपयोग. संज्ञाभूमि जतां रजोहरण, दंड, जलपात्र आदि पकडी राखवानो विधि. संज्ञाभूमी गया पछी आचमननो विधि. सचित्त आदि स्थंडिलभूमीनो उपयोग करवामाटे प्रायश्चित्तो | |
| ४६२ | **अनुज्ञाद्वार** | १३५ |
| | विचारभूमीमाटे अनुज्ञात स्थंडिलभूमीओ | |
| ४६३–६९ | **कारणविधि यतनाद्वारो** | १३५–३८ |
| | विचारभूमीमाटे कारणो, अनुज्ञात स्थंडिलभूमीओ अने तेमाटेनी यतनाओ | |
| | × × × × × | |
| ४७० | विचारभूमीमां स्वतंत्रपणे जवामाटे अधिकारी | १३८ |
| ४७१–५३० | **लेपकल्पिकद्वार** | १३८–५४ |
| ४७१ | पात्रने लेप करवामाटे ( रंगवामाटे ) लेप लाववानो अधिकारी | १३८ |
| ४७२ | पात्रलेप शास्त्रविहित तेम ज तीर्थंकरोए उपदिष्ट छे | १३९ |
| ४७३–७६ | 'पात्रनो लेप करवामां अनेक दोषो होइ तीर्थंकरोए ते माटे उपदेश करेल न होवो जोइए' ए शंकानुं समाधान | १३९ |

| गाथा | विषय | पत्र |
|---|---|---|
| ४७७–८१ | पात्रने लेप नहि करवामां नुकशान अने छकायनी विराधना आदि दोषो | १४० |
| ४८२–८७ | शिष्ये पोतानी मतिकल्पनाथी सूचवेल पात्रने माटे लेप लाववानो, तेने लेप करवानो अने ते लेप करेल पात्रने सूकाववानो विधि अने ते सामे आचार्यनो विरोध | १४१–४३ |
| ४८८ | पात्रने लेप करवा अगाउ आचार्यनी ते माटे आज्ञा लेवी, तेम न करनारने प्रायश्चित्त अने दोषो | १४३ |
| ४९१–९५ | पात्रने लेप करवा माटे लेप लेवानो विधि | १४४ |
| ४९६–९९ | पात्र माटे लेप लेवा अगाउ गाडाने हांकनारनी रजा लेवी | १४५ |
| ५००–१० | पात्रमाटे लेप लेतां छकायानी जयणा. पोते अगर जे गाडानो लेप लेवो ते वनस्पतिकाय आदि उपर होय ते रीते लेप लेवामां प्रायश्चित्तो. लेप लावीने गुरुने निवेदन करवुं. गुरुने तेम ज बीजा साधुओने लेपनी आवश्यकता होय तो तेमाटे निमंत्रण | १४५–४९ |
| ५११–२२ | पात्रने लेप करवानो अने तेने सूकववा वगेरेनो विधि | १४९–५२ |
| | पात्रने लेप करवामाटे आणेल गाडानी मळीने मजबूत कपडामां नाखी, तेने अंगुठो, तर्जनी अने वचली आंगळीनी मददथी गाळी, तेनाथी पात्रने एक बे अगर त्रण वार लेप करवो. वधाराना लेपने भांगेल तूटेल पात्राने अट्टक अर्थात् कूटो लगाडवा माटे रू साथे मेळववो. एम करतां य वधे तो ते लेपनुं परिष्ठापन करवामाटे तेने रू साथे राखमां मेळववो. लेप करेल पात्रने लेप मजबूत थाय ते माटे घुंटवा लायक पाषाण वगेरेथी घुंटवुं. लेप करेल पात्र सूकायुं न होय अथवा हवावाळुं होय त्यारे शुं करवुं ?. लेप करेल पात्रने जीवादिनी हिंसा न थाय ते माटे राख लगाडवी. ओस धुमस वगेरे अप्कायादिनी रक्षामाटे कइ ऋतुमां पात्रने सूकववामाटे खुल्लामां क्यां सुधी राखवुं ? अने क्यारे न राखवुं ? | |
| ५२३ | पात्रने केटला लेप करवा ? अने लेप करवानुं कारण | १५२ |
| ५२४–२९ | तज्जातलेप, युक्तिलेप अने खंजनलेप एम त्रण प्रकारना लेपोनुं अने भांगेल पात्रने सांधवामाटेना मुद्रित- | |

| गाथा | विषय | पत्र |
|---|---|---|
| | नौबन्ध अने स्तेनकबन्धनुं तेम ज जघन्य मध्यम अने उत्कृष्ट लेपोनुं स्वरूप | १५२–५३ |
| ५३० | स्वतंत्रपणे लेप लाववा माटेनो अधिकारी | १५३ |
| **५३१–४०** | **पिण्डकल्पिकद्वार** | **१५४–५८** |
| ५३१–३२ | पिण्ड अर्थात् गौचरचर्यामाटे अधिकारी | १५४ |
| ५३३–४० | पिण्ड लेतां उद्गम उत्पादना एषणा वगेरे दोषो पैकीना जे दोषो लागे तेमाटेनां प्रायश्चित्तो | १५४–५८ |
| | ✻ ✻ ✻ ✻ ✻ | |
| **५४१–६०२** | **शय्याकल्पिकद्वार** | **१५८–७४** |
| ५४१–४३ | शय्या अर्थात् वसतिना रक्षणमाटे अने ग्रहणमाटे अधिकारी अने अनधिकारी तेम ज प्रायश्चित्तो | १५८ |
| **५४४–७९** | **रक्षणकल्पिक** | **१५८–६८** |
| ५४४–५३ | वसतिने सूनी मूकीने जवाथी उत्पन्न थता दोषो | १५८–६१ |
| ५५४–७९ | बाळसाधुने वसति सोंपीने जवाथी उत्पन्न थता दोषो | १६१–६८ |
| **५८०–६०२** | **ग्रहणकल्पिक** | **१६८–७४** |
| ५८० | वसतिना ग्रहणमाटे अधिकारी | १६८ |
| ५८१–८७ | सात सात प्रकारना मूलगुणकरण अने उत्तरगुणकरण आदि वसतिना उपघातो–दूषणो अने प्रायश्चित्तो | १६९–७० |
| ५८८ | संसक्त वसति | १७० |
| ५८८ उ०-९२ | ब्रह्मचर्यप्रत्यवाया, आत्मप्रत्यवाया अने दर्शनप्रत्यवाया एम त्रण प्रकारना प्रत्यवाय–हरकतवाळी वसति अने प्रायश्चित्तो | १७१ |
| ५९३–६०२ | कालातिक्रान्त, उपस्थान, अभिक्रान्त, अनभिक्रान्त, वर्ज्य, महावर्ज्य वगेरे नव प्रकारनी वसतिओ, तेमाटेनां प्रायश्चित्तो अने तेने लगती यतनाओ | १७१–७४ |
| | ✻ ✻ ✻ ✻ ✻ | |
| **६०३–४८** | **वस्त्रकल्पिकद्वार** | **१७४–९३** |
| ६०३–५ | 'वस्त्र' पदना निक्षेपो | १७४–७५ |
| | द्रव्यवस्त्रनो अधिकार अर्थात् प्रकृत प्रसङ्गमां उपयोग | |
| ६०६ | वस्त्र लेवामां विधिनुं पालन न करे ते माटे प्रायश्चित्तो | १७६ |
| | **मलयगिरिकृत पीठिकाटीकानो विभाग समाप्त** | **१७६** |

| गाथा | विषय | पत्र |
|---|---|---|
| | **आचार्य श्रीक्षेमकीर्तिए अनुसंधान करेल पीठिकाटीका** | १७७ |
| | आचार्य श्रीक्षेमकीर्तिए करेल टीकानुं मंगलाचरण, उपोद्घात अने टीकाना अनुसंधाननो निर्देश (वस्त्रकल्पिकद्वार चालु) | १७७–७८ |
| ६०७–८ | वस्त्र लेवामाटेनां ६०६ गाथाथी चालु प्रायश्चित्तो | १७८–७९ |
| ६०९–१४ | वस्त्र लेवा माटे औद्देशिक, प्रेक्षा, अन्तर अने उज्झितधर्मा ए चार प्रतिमाओ अने तेनुं स्वरूप | १७९–८२ |
| **६१५–४८** | **वस्त्र लेवामाटे गच्छवासीओनी सामाचारी** | **१८२–९३** |
| ६१५–६१८ | गच्छवासीने वस्त्र लेवानो विधि | १८२–८३ |
| ६१९–२४ | गच्छवासीने वस्त्र लेवा जवानो विधि अने एथी विरुद्ध वर्त्तनारने तेम ज वस्त्र लेवामाटे वस्त्रदाताने दबावनारने, तेनी स्तुति वगेरे करनारने तेम ज वस्त्र लेवा पहेलां 'ए कोनुं छे? पहेलां ए शुं हतुं?' इत्यादि नहिं पूछनारने लागता दोषो अने प्रायश्चित्तो | १८३–८६ |
| ६२५–३१ | वस्त्र लेवा पूर्वे 'ए कोनुं छे?' ए पूछवानुं कारण | १८६–८८ |
| ६३२–४२ | वस्त्र लेवा अगाउ 'ए कोनुं छे?' ए प्रश्न सांभळी गरीब, दुर्भग, पदभ्रष्ट राजा, मंत्री, चोर, स्त्री, पुरुष, नपुंसक, धावमाता, आदिने थयेल अप्रीतिने–रीसने शांत करवानो इलाज | १८८–९१ |
| ६४३–४८ | वस्त्र लेवा अगाउ 'ए वस्त्रने तमे शा उपयोगमां लेशो? अथवा ए शा उपयोगमां आवतुं हतुं?' ए पूछवानुं कारण अने ते न पूछवाथी उत्पन्न थता पुरःकर्मादि दोषो | १९१–९३ |
| **६४९–६८** | **पात्रकल्पिकद्वार** | **१९३–९८** |
| ६४९ | पात्र लाववा माटे अधिकारी | १९३ |
| ६५० | 'पात्र'ना निक्षेपो | १९३ |
| ६५१ | द्रव्यपात्र भावपात्रनुं स्वरूप | १९४ |
| ६५२–५३ | अलाबुनां, लाकडानां अने माटीनां एम त्रण प्रकारनां पात्रो अने तेना उत्कृष्ट मध्यम अने जघन्य आदि प्रकारो अने तेना लेवामां विपर्यास थतां लागतां प्रायश्चित्तो | १९४ |
| ६५४–६८ | पात्र लेवामाटेनी चार प्रतिमाओनुं स्वरूप अने तेमाटे विशेष विधि | १९५–९८ |
| **६६९–८७** | **अवग्रहकल्पिकद्वार** | **१९९–२०६** |
| ६६९–७१ | देवेन्द्रावग्रह, राजावग्रह, गाथापत्यवग्रह आदि अवग्रहना पांच | |

| गाथा | विषय | पत्र |
|---|---|---|
| | प्रकार अने तेना बळवान् अबळवान् पणानो निर्देश अने ते दरेकना द्रव्य क्षेत्र काल भाव एम चार चार प्रकारो | १९९–२०० |
| ६७२–८० | देवेन्द्रक्षेत्रावग्रह, चक्रवर्तिक्षेत्रावग्रह, गाथापतिक्षेत्रावग्रह, सागारिकक्षेत्रावग्रह अने साधर्मिकक्षेत्रावग्रहनुं स्वरूप | २००–३ |
| ६८१–८७ | देवेन्द्र चक्रवर्ती आदिना द्रव्य काल अने भावावग्रहनुं स्वरूप | २०३–६ |
| **६८८–७१४** | **विहारकल्पिकद्वार** | **२०६–१६** |
| ६८८ | गीतार्थविहार अने गीतार्थनिश्रित विहार | २०६ |
| ६८९–९२ | गीतार्थनो अर्थ अने गीतार्थ अने गीतार्थनिश्रितनुं स्वरूप | २०६–८ |
| ६९३ | जघन्य मध्यम उत्कृष्ट गीतार्थनुं स्वरूप | २०८ |
| ६९४–९५ | एकलविहारना दोषो अने प्रायश्चित्त | २०८ |
| ६९६–९७ | एकलविहारीनुं मंदपणुं अने मंदपणानुं स्वरूप | २०९ |
| ६९८–७०२ | एकलविहारीना ज्ञान दर्शन चारित्रनी भयंकर हानिनुं स्वरूप | २१०–१२ |
| ७०३–७ | अयोग्यने आचार्य करवामां आवे अथवा अयोग्य पोते आचार्य पदने धारण करे ते माटेनां प्रायश्चित्तो | २१२–१४ |
| ७०८–१२ | आचार्यपदने योग्यनुं स्वरूप | २१५–१६ |
| ७१३–१४ | कल्पिकद्वारनो उपसंहार | २१६ |
| | * * * * * | |
| **७१५–५०** | **उत्सारकल्पिकद्वार** | **२१७–३३** |
| ७१५–१६ | उत्सारकल्प करनार-करावनारने प्रायश्चित्त अने लागता दोषो | २१७ |
| ७१७ | उत्सारकल्प करनार-करावनार द्वारा थती मिथ्यात्वनी वृद्धि अने ते विषये **परमाणुपुद्गलने पंचेन्द्रिय तरीके ओळखावनार उत्सारकल्पिक आचार्यनुं** दृष्टान्त | २१७–१९ |
| ७१८ | उत्सारकल्पिकने लागतो संयमविराधना दोष | २१९ |
| ७१९–२३ | उत्सारकल्पिकने लागतो योगविराधना दोष अने तद्विषये **घण्टाशृगालनुं** दृष्टान्त | २२०–२२ |
| ७२४–२६ | उत्सारकल्पिकने लागतो स्व, पर अने प्रवचननी हानिनो दोष | २२३–२४ |
| ७२७–२८ | क्रमसर सूत्रोनो अभ्यास करवामां थता लाभो | २२४–२५ |
| ७२९–३१ | उत्सारकल्पिकने उपर जणाव्युं तेम दोषो अने प्रायश्चित्त लागतां होय तो उत्सारकल्पनुं नाम वर्णन आदि शा माटे ? ए प्रकारनी शिष्यनी शंकानो उत्तर | २२५–२६ |
| ७३२ | उत्सारकल्पने करावनारनुं स्वरूप | २२६ |
| ७३३–३६ | उत्सारकल्पनी लायकात सूचवता गुणो | २२७ |

| गाथा | विषय | पत्र |
|---|---|---|
| ७३७–३८ | अन्य आचार्यनी मान्यता मुजब उत्सारकल्पनी लायकात सूचवता गुणो | २२८ |
| ७३९ | अयोग्यने उत्सारकल्प करावबामां प्रायश्चित्त | २२८ |
| ७४० | उत्सारकल्प करवानां कारणो | २२९ |
| ७४१–४३ | उत्सारकल्पिकने अधिकार. | |
| | बीजाना पुण्यने ढांकी देनार रक्तपटभिक्षुनुं उदाहरण | २३० |
| ७४४ | दृष्टिवादनो उत्सार करवामाटे कारणो | २३१ |
| ७४५–५० | उत्सारकल्प करनार माटे काल, अकाल, स्वाध्याय, अस्वाध्याय आदिनो अभाव | २३१–३३ |
| ७५१–६५ | **४ अचंचलद्वार** | २३३–३५ |
| | गतिचंचल स्थानचंचल भाषाचंचल अने भावचंचलनुं स्वरूप | |
| ७५७–५८ | **५ अवस्थितद्वार** | २३६ |
| | लिङ्गानवस्थित अने चारित्रानवस्थितनुं स्वरूप | |
| ७५९ | **६ मेधावीद्वार** | २३७ |
| | अवग्रहणमेधावी धारणामेधावी अने मर्यादामेधावीनुं स्वरूप | |
| ७६० | **७ अपरिस्रावीद्वार** | २३७–३८ |
| | लौकिक लोकोत्तरिक भावपरिस्रावी अपरिस्रावीनुं स्वरूप अने ते विषे अनुक्रमे अमात्य अने बटुकीनां दृष्टान्तो | |
| ७६१ | **८ 'यश्च विद्वान्' द्वार** | २३८ |
| ७६२–९० | **९ 'पत्त' द्वार** | २३८ |
| | तिंतिणिक, चलचित्त, गाणङ्गणिक, दुर्बलचारित्र, आचार्यपरिभाषी, वामावर्त्त, पिशुन, आदिअदृष्टभाव, अकृतसामाचारी, तरुणधर्मा, गर्वित वगेरे छेदसूत्रार्थने अयोग्यनुं स्वरूप | २३८–४८ |
| ७९१ | **अनुज्ञातद्वार** | २४८ |
| ७९२–८०५ | **परिणामकद्वार** | २४९–५४ |
| ७९२–९७ | परिणामक, अपरिणामक अने अतिपरिणामक शिष्योनुं स्वरूप अने तेमनी समज अने अणसमजनुं स्वरूप | २४९–५० |
| ७९८–८०२ | परिणामक, अपरिणामक वगेरे शिष्योनी परीक्षामाटे आम्र, वृक्ष, बीज वगेरे दृष्टांतो | २५१–५२ |
| ८०३–४ | छेदसूत्रोना अर्थने सांभळवानो विधि | २५२ |
| ८०५ | परिणामकद्वारनो उपसंहार अने पीठिकानी समाप्ति | २५३ |

पूज्यश्रीभद्रबाहुस्वामिविनिर्मितस्वोपज्ञनिर्युक्त्युपेतं

# बृहत् कल्पसूत्रम् ।

श्रीसङ्घदासगणिक्षमाश्रमणसूत्रितेन लघुभाष्येण भूषितम् ।

आचार्यश्रीमलयगिरिपादविरचितयाऽर्धपीठिकावृत्त्या तपाश्रीक्षेमकीर्त्या-
चार्यवरानुसन्धितया शेषसमग्रवृत्त्या समलङ्कृतम् ।

## पीठिका ।

॥ अर्हम् ॥

# बृहत्कल्पसूत्रस्य पीठिकायाः शुद्धिपत्रम् ।

| पृष्ठम् | पङ्क्तिः | अशुद्धिः | शुद्धिः |
|---|---|---|---|
| २ | १० | -णिउत्त- | -णिउणत्त- |
| २ | ३३ | आतथा | अतथा |
| १२ | १६ | "अशौड् | "अशौङ् |
| १७ | २४ | सा पञ्च- | सा 'पञ्चधा' पञ्च- |
| २३ | १७ | -लघुप्रतिषेधितानि | -लघुप्रतिषेधानि |
| ४२ | २४ | संमरइ | संभरइ |
| ४५ | ३४ | सयंभू- | सयंभु- |
| ४९ | ३२ | त्° | °त् |
| ५४ | २ | -कारणं | -कारण- |
| ६१ | २४ | ३८१ | ३११ |
| ६३ | ३० | नि० | नि° |
| ६४ | २७ | मरइ | भरइ |
| ६८ | १ | 'समर्थे'- | 'समर्थे' |
| ७० | ९ | -न्तमा (न्ताना)ह | -न्तमाह |
| ७० | १५ | -माह | -मा(न्ताना)ह |
| ७५ | ३४ | -स्यतिव्य- | -स्यभिव्य- |
| ९० | ३२ | पच्छितं | पच्छित्तं |
| ११० | ३४ | अनुयु- | अनुप्रयु- |
| १२३ | १३ | -येऽऽपा- | -ये आपा- |
| १९५ | २२ | द७ | दट्ठु |
| २१० | १९ | अपुव्व- | अप्पुव्व- |
| २२८ | २७ | अपरिण तस्य | अपरिणतस्य |
| २२८ | ३३ | वि पा | वि ण |
| २४५ | ३३ | ल्याः, | °ल्याः, |

॥ णमो त्थु णं समणस्स भगवओ महावीरस्स ॥

पूज्यश्रीभद्रबाहुस्वामिविनिर्मितस्वोपज्ञनिर्युक्त्युपेतं

# बृहत्कल्पसूत्रम् ।

श्रीसङ्घदासगणिक्षमाश्रमणसङ्कलितभाष्योपबृंहितम् ।

आचार्यश्रीमलयगिरिपादविरचितया पीठिकावृत्त्या तपाश्रीक्षेमकीर्त्याचार्यविहितया शेषवृत्त्या समलङ्कृतम् ।

## पीठिका ।

वृत्तिकृद्विहितं मङ्गलम्

प्रकटीकृतनिःश्रेयसपदहेतुस्थविरकल्प-जिनकल्पम् ।
नम्राशेषनरा-ऽमरकल्पितफलकल्पतरुकल्पम् ॥ १ ॥
नत्वा श्रीवीरजिनं, गुरुपदकमलानि बोधविपुलानि ।
कल्पाध्ययनं विवृणोमि लेशतो गुरुनियोगेन ॥ २ ॥
भाष्यं क चाऽतिगम्भीरं ?, क चाऽहं जडशेखरः ? ।
तदत्र जानते पूज्या, ये मामेवं नियुञ्जते ॥ ३ ॥
अद्भुतगुणरत्ननिधौ, कल्पे साहायकं महातेजाः ।
दीप इव तमसि कुरुते, जयति यतीशः स चूर्णिकृत् ॥ ४ ॥

वृत्तिकृद्विहितः शास्त्रस्योपोद्घातः

इह शिष्याणां मङ्गलबुद्धिपरिग्रहाय शास्त्रस्याऽऽदौ मध्येऽवसाने चावश्यं मङ्गलमभिधातव्यम्, यत आदिमङ्गलपरिगृहीतानि शास्त्राणि पारगामीनि भवन्ति, मध्यमङ्गलपरिगृहीतानि शिष्यबुद्धिष्वारोपितानि स्थिरपरिचितान्युपजायन्ते, पर्यन्तमङ्गलसमलङ्कृतानि शिष्य-प्रशिष्यपरम्परागमनतः स्फातीभवन्ति । उक्तं च—

तं मंगलमादीए, मज्झे पज्जंतए य सत्थस्स ।
पढमं सत्थत्थाविग्घपारगमणाय निद्दिट्ठं ॥
तस्सेव य थेज्जत्थं, मज्झिमयं अंतिमं पि तस्सेव ।
अव्वोच्छित्तिनिमित्तं, सिस्स-पसिस्सादिवंसस्स ॥

तत्राऽऽदिमङ्गलं पापप्रतिषेधकत्वादिदं सूत्रम्—"नो कप्पइ निग्गंथाण वा निग्गंथीण वा आमे तालपलंबे अभिन्ने पडिगाहित्तए" ( उद्देशः १ सूत्रं १ ) इति, मध्यमङ्गलं "कप्पति निग्गंथाण वा निग्गंथीण वा पुरत्थिमेणं जाव अंगमगहातो इत्तए" ( उ० १ सू० ५१ ) एवमादि, पर्यवसान-मङ्गलं "छव्विहा कप्पट्ठिती पण्णत्ता" ( उ० ६ सू० १४ ) इत्यादि । तच्च मङ्गलं चतुर्धा वक्ष्यमाणस्वरूपम् । तत्र यद् नोआगमतो भावमङ्गलं तद् द्विविधं सूत्रभणितं सूत्रस्पर्शिकनिर्युक्तिभणितं च, भाष्यभणितमित्यर्थः, सूत्रस्पर्शिकनिर्युक्तेर्भाष्यस्य च सम्प्रत्येकग्रन्थत्वेन जातत्वात् । अथ कः सूत्रमकार्षीत् ? को वा निर्युक्तिम् ? को वा भाष्यम् ? इति, उच्यते—इह पूर्वेषु यद् नवमं प्रत्याख्याननामकं पूर्वं तस्य यत् तृतीयमाचाराख्यं वस्तु तस्मिन् विंशतितमे प्राभृते मूलगणेषूत्तरगुणेषु चापराधेषु दशविधमालोचनादिकं प्रायश्चित्तमुपवर्णितम्, कालक्रमेण च दुःषमानुभावतो धृति-बल-वीर्य-बुद्धया-ऽऽयुःप्रभृतिषु परिहीयमानेषु पूर्वाणि दुरवगाहानि जातानि, ततो 'मा भूत् प्रायश्चित्तव्यवच्छेदः' इति साधूनामनुग्रहाय चतुर्दशपूर्वधरेण भगवता **भद्रबाहुस्वामिना कल्पसूत्रं व्यवहारसूत्रं** चाकारि, उभयोरपि च सूत्रस्पर्शिकनिर्युक्तिः । इमे अपि च **कल्प-व्यवहारसूत्रे** सनिर्युक्तिके अल्पग्रन्थतया महार्थत्वेन च दुःषमानुभावतो हीयमानमेधा-ऽऽयुरादिगुणानामिदानीन्तनजन्तूनामल्पशक्तीनां दुर्ग्रहे दुरवधारे जाते, ततः सुखग्रहण-धारणाय **भाष्यकारो भाष्यं** कृतवान्, तच्च सूत्रस्पर्शिकनिर्युक्त्यनुगतमिति **सूत्रस्पर्शिकनिर्युक्तिर्भाष्यं चैको ग्रन्थो जातः** । एष शास्त्रस्योपोद्घातः । अनेन चोपोद्घातेनाभिहितेन सूत्रादयोऽर्था अतिव्यक्ता भवन्ति, यथा दीपेनाऽपवरके तमसि । उक्तं च—

वत्तीभवंति दव्वा, दीवेणं अप्पगासे उवरए ।
वत्तीभवंति अत्था, उवघाएणं तहा सत्थे ॥

उपोद्घाताभिधानमन्तरेण पुनः शास्त्रं स्वतोऽतिविशिष्टमपि न तथाविधमुपादेयतया विराजते, यथा नभसि मेघच्छन्नश्चन्द्रमाः । उक्तं च—

मेघच्छन्नो यथा चन्द्रो, न राजति नभस्तले ।
उपोद्घातं विना शास्त्रं, न राजति तथाविधम् ॥

तत्र सूत्रभणितं "नो कप्पति निग्गंथाण वा निग्गंथीण वा आमे तालपलंबे" ( उ० १ सू० १ ) इत्यादि । सूत्रस्पर्शिकनिर्युक्तिभणितमिदम्—

---

१ "तं च मंगलं चउव्विहं, णाममंगलं ठवणामंगलं दव्वमंगलं भावमंगलमिति । एयाणि **आवस्सए** पुव्वं वण्णियाणि (पुव्वभणियाणि प्र०) । णवरं भावमंगले इमो विसेसो—जं तं णोआगमओ भावमंगलं तं दुविहं, सुत्तभणियं च **सुत्तप्फासियणिज्जुत्तिभणियं च, भाष्यभणितमित्यर्थः** । तत्थ सुत्तभणियं "णो कप्पइ णिग्गंथाण वा णिग्गंथीण वा आमे तालपलम्बे अभिण्णे पडिग्गाहेत्तए" इच्चेवमादि प्रागभिहितं । सुत्तप्फासियणिज्जुत्तिभणियं पुण इमाणं दोण्हं अज्झयणाणं अप्पग्गंथ-महत्थाणं सुहुम-णिउणत्तणेण य दुग्गहण-दुद्धराणं 'दुस्समाणुभावेण य अप्पसत्तिणो पुरिस' त्ति काउं सुहगहण-धारणा-संति-मंगलणिमित्तं **आयरियो भासं** (भस्सं प्र०) **काउकामो** आदावेव ( आदाविदं प्र० ) गाथासूत्रमाह—काऊण णमोक्कारं गाहा ।" इति **चूर्णिः** ॥ २ °र्युक्ती इ° मो ३ ॥ ३ °ति आत्था दी° मो ३ ॥

निर्युक्तिकृतो मङ्गलम्

**काऊण नमोकारं, तित्थयराणं तिलोगमहियाणं ।**
**कप्पव्ववहाराणं, वक्खाणविहिं पवक्खामि ॥ १ ॥**

'कृत्वा' विधाय 'नमस्कारं' प्रणामम्, केभ्यः ? इत्याह–'तीर्थकरेभ्यः' तीर्यते संसारसमुद्रोऽनेनेति तीर्थं–द्वादशाङ्गं प्रवचनं तदाधारः सङ्घो वा, तत्करणशीलास्तीर्थकरास्तेभ्यः। गाथायां षष्ठी चतुर्थ्यर्थे प्राकृतत्वात् । उक्तं च—

छट्ठिविभत्तीए भन्नइ चउत्थी इति ।

किंविशिष्टेभ्यः ? इत्याह–'त्रिलोकमहितेभ्यः' त्रयो लोकाः समाहृताः, समवसरणे त्रयाणामपि सम्भवात् । तथाहि–समागच्छन्ति भगवतां तीर्थकृतां समवसरणेष्वधोलोकवासिनो भवनपतयः, तिर्यग्लोकवासिनो वानमन्तर-तिर्यक्पञ्चेन्द्रिय-[मनुष्य-]ज्योतिष्काः, ऊर्ध्वलोकवासिनः कल्पोपपन्नका देवाः । त्रिलोकेन महिताः–पूजिताः त्रिभिर्वा लोकैर्महितास्त्रिलोकमहितास्तेभ्यः । नमस्कारं कृत्वा किम् ? इत्याह–कल्पश्च व्यवहारश्च कल्प-व्यवहारौ तयोः 'व्याख्यानविधिम्' अनुयोगविधिं प्रकर्षेण भृशं वा वक्ष्यामि प्रवक्ष्यामि ॥ १ ॥

ननु कल्पो व्यवहारश्चेति द्वौ ग्रन्थौ, ततः 'कल्प-व्यवहारयोः' इति प्राप्तम्, कथमुच्यते 'कल्प-व्यवहाराणाम्' ? इति, अत आह भाष्यकृत्—

**सक्कयपाययवयणाण विभासा जत्थ जुज्जते जं तु ।**
**अज्झयणनिरुत्ताणि य, वक्खाणविही य अणुओगो ॥ २ ॥**

**मलयगिरि**प्रभृतिव्याकरणप्रणीतेन लक्षणेन संस्कारमापादितं वचनं संस्कृतम्, प्रकृतौ भवं प्राकृतं स्वभावसिद्धमित्यर्थः, तेषां संस्कृत-प्राकृतवचनानां 'विभाषा' वैविक्त्येन भाषणं कर्त्तव्यम् । तच्चैवम्—

प्राकृत-संस्कृतयोरुपलक्षणम्

ए-ओकारपराइं, अंकारपरं च पायए नत्थि ।
व-सगारमज्झिमाणि य, क-चवग्ग-तवग्गनिहणाइं ॥

अस्या इयमक्षरगमनिका–एकारपर ऐकारः, ओकारपर औकारः, अंकारपर अः इति विसर्जनीयाख्यमक्षरम्, तथा वकार-सकारयोर्मध्यगे ये अक्षरे श-षाविति, यानि च कवर्ग-चवर्ग-तवर्गनिधनानि ङ-ञ-ना इति, एतान्यक्षराणि प्राकृते न सन्ति ॥

तत एतैरक्षरैर्विहीनं यद् वचनं तत् प्राकृतमवसातव्यम् । एभिरेव ऐ औ अः श ष ङ ञ न इत्येवंरूपैरुपेतं संस्कृतम् । एषां संस्कृत-प्राकृतवचनानां विभाषा "जत्थ जुज्जते जं तु" 'यत्र' प्राकृते संस्कृते वा 'यद्' वचनम्–एकवचन-द्विवचनादि 'युज्यते' घटामटति तद् वक्तव्यम् । तत्र संस्कृते एकवचनं द्विवचनं बहुवचनं च भवति, यथा–वृक्षः वृक्षौ वृक्षाः; प्राकृते त्वेकवचनं बहुवचनं वा, न तु द्विवचनम्, तस्य बहुवचनेनाभिधानात्, "बहुवयणेण दुवयण"मिति वचनात् । ततः 'कप्पव्ववहाराण'मित्यदोषः ॥

अथ कल्पशब्दस्य व्यवहारशब्दस्य च कोऽर्थः ? को वा तयोः कल्प-व्यवहाराध्ययनयोः प्रतिविशेषः ? तत आह–'अध्ययननिरुक्तानि च' वक्तव्यानि, निश्चितमुक्तं निरुक्तम्, अक्षरार्थ इत्यर्थः, अध्ययनयोः निरुक्तानि अध्ययननिरुक्तानि, तानि च वक्तव्यानि । तद्यथा—

कल्पश-ब्दस्य वि-वरणम्

कल्पशब्दोऽनेकार्थाभिधायी—क्वचित् सामर्थ्ये, यथा—वर्षाष्टप्रमाणश्चरणपरिपालने कल्पः, समर्थ इत्यर्थः। क्वचिद् वर्णनायाम्, यथा—अध्ययनमिदमनेन कल्पितम्, वर्णितमित्यर्थः। क्वचिच्छेदने, यथा—केशान् कर्तर्या कल्पयति, छिनत्तीत्यर्थः। क्वचित् करणे क्रियायाम्, यथा—कल्पिता मयाऽस्याऽऽजीविका, कृता इत्यर्थः। क्वचिदौपम्ये, यथा—सौम्येन तेजसा च यथाक्रममिन्दु-सूर्यकल्पाः साधवः। क्वचिदधिवासे, यथा—सौधर्मकल्पवासी शक्रः सुरेश्वरः। उक्तं च—

सामर्थ्ये वर्णनायां च, छेदने करणे तथा।
औपम्ये चाऽधिवासे च, कल्पशब्दं विदुर्बुधाः॥

इह सर्वेष्वप्यर्थेषु गृह्यते, सर्वत्रापि घटमानत्वात्। तथाहि—सामर्थ्ये तावदेवम्—कल्पाध्ययनमधीत्यतीचारमलिनस्य साधोः समर्थः प्रायश्चित्तेन विशोधिमापादयितुम्। वर्णनेऽपि—यावन्तः प्रायश्चित्तप्रकारास्तान् वर्णयतीदमध्ययनम्; अथवा मूलगुणान् उत्तरगुणांश्च कल्पयति वर्णयतीति कल्पः। उक्तं च—

कप्पम्मि कप्पिया खलु, मूलगुणा चेव उत्तरगुणा य।
ववहारे ववहरिया, पायच्छित्ता-ऽऽभवंते य॥ [व्य० भा० पी० गा० १५४]

छेदनेऽपि—तपःशोधिमतिक्रान्तस्य पञ्चकादिच्छेदनेन पर्यायं छिनत्ति। करणेऽपि—यद् दत्तं प्रायश्चित्तं तत्र तथा प्रयत्नं करोति कल्पाध्ययनवेत्ता यथा तत् पारं नयति; अथवा कल्पयति जनयत्याचार्यकमिति कल्पः, तथाहि—करोत्याचार्यकं कल्पाध्ययनवेत्ता सम्यगिति। औपम्येऽपि—कल्पाध्ययनवेदनाद् भवति पूर्वधराणां कल्पः सदृश इति कल्पः, तथाहि—कल्पाध्ययनेऽधीते भवति पूर्वधरसदृशः प्रायश्चित्तविधावाचार्यः। अधिवासेऽपि—कल्पाध्ययनवेत्ता कल्पे मासकल्पे वर्षाकल्पे वा कारणमन्तरेण परिपूर्णं कारणवशत ऊनमतिरिक्तं वा, अथवा कल्पे स्थविरकल्पे जिनकल्पे वाऽधिवसतीति कल्पः॥

व्यवहा-रशब्दस्य निरुक्तम्

तथा विधिवद् अवहरणाद् व्यवहारः, यदि वा विधिवद्वपनाद् हरणाच्च व्यवहारः; यस्य नाऽऽभवति तस्य हापयति, यस्याऽऽभवति तस्मै ददाति व्यवहाराध्ययनवेत्तेति व्यवहार इत्यर्थः। उक्तं च—

अत्थिय-पच्चत्थीणं, हाउं एक्कस्स ववति बीयस्स।
एएण उ ववहारो, अहिगारो एत्थ उ विहीए॥ [व्य० भा० पी० गा० ५]

तदेवं कल्पस्य व्यवहारस्य च पृथग् विभिन्नं निरुक्तमिति महान् प्रतिविशेषः॥

"वक्खाणविहि" इत्यस्य व्याख्यानम् अनुयोग इति॥ २॥

तत्र तस्यैव व्याख्यानविधिमभिधातुकाम इदमाह—

नंदी य मंगलट्ठा, पंचग दुग तिग दुगे य चोद्दसए।
अंगणयमणंगगए, कायव्व परूवणा पययं॥ ३॥

अनुयोगारम्भाय प्रथमतो मङ्गलार्थं नन्दिर्वक्तव्यः। स च "पंचग" त्ति ज्ञानपञ्चकात्मकः। तच्च ज्ञानपञ्चकं द्विकेन भेदेन व्यवस्थितम्, तद्यथा—प्रत्यक्षं च परोक्षं च। प्रत्यक्षस्य त्रिको भेदोऽवधि-मनःपर्याय-केवलभेदात्, परोक्षस्य द्विक आभिनिबोधिक-श्रुतभेदात्। तत्र श्रुतस्य चतुर्दशको

भेदः । तथा कुतोऽपि विशेषात् श्रुतं 'अङ्गगतमनङ्गगतं' अङ्गप्रविष्टमङ्गबाह्यं चेत्यर्थः । एतेषां पदानां प्ररूपणा कर्तव्या । ततः प्रकृतमभिधातव्यम् ॥ २ ॥

तत्र "नंदी य मंगलट्ठा" ( गाथा ३ ) इत्यस्य भावार्थमाह—

[ म ङ्ग ल वा दः ]

**नंदी मंगलहेउं, न यावि सा मंगलाहि वइरित्ता ।**
**कज्जाभिलप्पनेया, अपुहो य पुहो य जह सिद्धा ॥ ४ ॥**

नन्दीमङ्गलयोरपेक्षया भेदाभेदौ

'नन्दिः' ज्ञानपञ्चकरूपः 'मङ्गलहेतोः' मङ्गलनिमित्तं वक्तव्यः । आह यदि मङ्गलनिमित्तं नन्दिर्वक्तव्यः ततः स मङ्गलादेकान्तेन भिन्नः प्राप्तः, अन्यथा 'तदुत्पादननिमित्तं तस्योपादान'मिति व्यवहारानुपपत्तेः; उपादानं हि तस्य सिद्धस्य सतो भवति, उत्पाद्यं चाद्याप्यसिद्धम्, ततः कथमनयोरभेदः ? किन्तु भेद एव; तत आह—न चापि 'सः' नन्दिर्मङ्गलाद् व्यतिरिक्तः, अपिशब्दाद् व्यतिरिक्तोऽपि स्यादव्यतिरिक्त इत्यर्थः । कथमेतच्छ्रद्धेयम् ? इति चेत्, अत आह—"कज्जे"त्यादि । यथा कार्या-ऽभिलाप्य-ज्ञेयानि कारणा-ऽभिलाप-ज्ञानेभ्यः पृथक्त्वा-ऽपृथक्त्वसिद्धानि तथा नन्देर्मङ्गलमपि । तथाहि—कार्यं पटः, कारणं तन्तवः, तत्र तन्तव एव पुरुषव्यापारमपेक्ष्याऽऽतान-वितानभावेन परिणममानाः पटकार्यरूपतया परिणमन्ते, तेषु च तथापरिणतेषु सत्सु न कार्य-कारणयोर्भेदः किन्तु अभेदः; एवमिहापि नन्दिर्ज्ञानपञ्चकाभिधानरूप उत्तरोत्तरशुभाध्यवसायविशेषसम्भवसव्यपेक्षतर-तमभावेन परिणममानो वाञ्छिताधिगतिलक्षणमङ्गलरूपतया परिणमत इति नन्दि-मङ्गलयोरभेदः । प्राचीनां त्ववस्थामपेक्ष्य भेदः, यथा तन्तुभ्यः पटस्य । तथाऽभिलापशब्देन कदाचिदभिलाप्यस्याभिलाप्यमानता उच्यते, 'अभिलपनमभिलापः' इति व्युत्पत्तेः; कदाचित् तद्वाचकशब्दः, 'अभिलाप्यते वस्त्वभिलाप्यमनेने'ति व्युत्पादनात् । तत्र यदाऽभिलाप्यमानतोच्यते तदाऽभिलापा-ऽभिलाप्ययोरभेदः, धर्म-धर्मिभावात्; यदा तु तद्वाचकशब्दस्तदा भेदः, शब्दा-ऽर्थयोर्भिन्नदेशस्थत्वाद् भिन्नस्वरूपत्वाच्च । ज्ञानशब्देनापि कचिद् ज्ञेयस्य ज्ञानमत्तोच्यते, 'ज्ञातिर्ज्ञान'मिति भावे व्युत्पादनात्; कदाचिदात्मधर्मः, 'ज्ञायतेऽनेनेति ज्ञान'मिति करणे व्युत्पत्तेः । तत्र यदा ज्ञायमानता तदा ज्ञान-ज्ञेययोरभेदः, धर्मि-धर्मभावात्; यदा त्वात्मधर्मस्तदा भेदः, भिन्नस्वरूपत्वात् । एवमिहापि नन्दिशब्दो यदा भाववचनः 'नन्दनं नन्दि'रिति तदा नन्दनं-समृद्धीभवनं वाञ्छितस्याधिगतिरित्यनर्थान्तरम्, मङ्गलमपि चैवंस्वरूपमिति परस्परमभेदः; यदा तु प्राचीनावस्थामपेक्ष्य करणसाधनो नन्दिशब्दः 'नन्द्यतेऽनेनेति नन्दि'रिति तदा भेदः, कालभेदेन भेदादिति ॥४॥ सम्प्रति नन्देर्मङ्गलस्य च प्ररूपणा कर्तव्या, तत्र मङ्गलशब्दोच्चारणमिति स्पष्टं मङ्गलबुद्धिहेतुर्भवतीति प्रथमतो मङ्गलशब्दस्य प्ररूपणामाह—

मङ्गलपदनिक्षेपाः

**नामं ठवणा दविए, भावम्मि य मंगलं भवे चउहा ।**
**एमेव होइ नंदी, तेसिं तु परूवणा इणमो ॥ ५ ॥**

मङ्गलं 'चतुर्धा' चतुःप्रकारं भवति, तद्यथा—नाममङ्गलं स्थापनामङ्गलं द्रव्यमङ्गलं भावमङ्गलं

---

१ 'अङ्गगतम्' अङ्गप्रविष्टम् 'अनङ्गगतम्' अङ्गबाह्यं चेत्यर्थः भा० ॥ २ °म भवति चं° ता० ॥

च । 'एवमेव' नामादिभेदेन चतुःप्रकारो भवति नन्दिः । 'तेषां च' नाममङ्गलादीनाम् 'इयं' वक्ष्यमाणस्वरूपा प्ररूपणा ॥ ५ ॥ तामेवाह—

नाममङ्गलम्

**एगम्मि अणेगेसु वं, जीवद्व्वे वे तव्विवक्खे वा ।**
**मंगलसन्ना नियता, तं सन्नामंगलं होइ ॥ ६ ॥**

एकस्मिन् जीवद्रव्ये 'तद्विपक्षे वा' अजीवद्रव्ये अनेकेषु वा जीवद्रव्येष्वजीवद्रव्येषु वा या मङ्गलमिति संज्ञा 'नियता' नियमिता तद् नाम-नामवतोरभेदोपचारात् 'संज्ञामङ्गलं' नाममङ्गलं भवति ॥ ६ ॥ उक्तं नाममङ्गलम्, स्थापनामङ्गलमाह—

स्थापनामङ्गलम्

**जा मंगल त्ति ठवणा, विहिता सब्भावतो व असतो वा ।**
**तत्थ पुण असब्भावे, मंगलठवणागतो अक्खो ॥ ७ ॥**
**जे चित्तभित्तिविहिया, उ घडादी ते य हुंति सब्भावे ।**
**तत्थ पुण आवकहिया, हवंति जे देवलोगेसु ॥ ८ ॥**

या मङ्गलमिति स्थापना 'सद्भावतो वा' सद्भूताकारनिवेशनेन 'असतो वा' सद्भूताकारस्याभावतो विहिता सा स्थापनामङ्गलम् । तत्र पुनरसद्भावे स्थापना मङ्गलस्थापनागतोऽक्षः, उपलक्षणमेतद्, वराटकादिर्वा । इयमत्र भावना—अक्ष-वराटकादिषु या मङ्गलमिति स्थापना विहिता, न तत्र कश्चिन्मङ्गलानुगत आकार इत्यसद्भावतः स्थापनामङ्गलम् ॥ ७ ॥

ये तु चित्रभित्तौ—चित्रकुड्ये विहिता घटादयः, आदिशब्दात् स्थालादिपरिग्रहः, ते 'सद्भावे' सद्भावतः स्थापनामङ्गलानि भवन्ति । तत्र ये देवलोकेषु चित्रभित्तौ विहिता घटादयस्ते स्थापनामङ्गलानि यावत्कथिकानि भवन्ति, अर्थादापन्नं यानि मनुष्यलोके तानीत्वराणि । यावत्कथिकानि नाम शाश्वतिकानि, इत्वराण्यशाश्वतानि ॥ ८ ॥ द्रव्यमङ्गलमाह—

द्रव्यमङ्गलम्

**उत्तरगुणनिप्फन्ना, सलक्खणा जे उ होंति कुंभाई ।**
**तं दव्वमंगलं खलु, जह लोए अट्ठ मंगलगा ॥ ९ ॥**
**णेगंतियं अणच्चंतियं च दव्वे उ मंगलं होइ ।**

इह उत्तरगुणनिष्पन्नत्वं मूलगुणनिष्पन्नापेक्षया, ततः प्रथमतस्तद् भाव्यते—मूलो नाम पृथिवीकायादिजीवः, तस्य गुणात्—प्रयोगात् पुद्गलानां द्रव्यादित्वेन व्यापारणाद् निष्पन्नं मूलगुणनिष्पन्नं मृद्रव्यादि । तस्मादुत्तरगुणेन—परापरप्रयोगेण चक्र-दण्ड-सूत्रोदकादि-पुरुषप्रयत्नेनेत्यर्थः, ये निष्पन्नाः 'सलक्षणाः' लक्षणसम्पन्नाः "अच्छिद्रा अखण्डा वारिपूर्णाः पद्मोत्पलप्रतिच्छन्नाः" इत्यादिलक्षणोपेताः कुम्भादयः, आदिशब्दात् स्थालादिपरिग्रहः, तद् द्रव्यमङ्गलं भवति । यथा लोकेऽष्टौ मङ्गलानि ॥ ९ ॥ तत् पुनरनन्तरोक्तं द्रव्यमङ्गलमनैकान्तिकमनात्यन्तिकं च भवति । तथाहि—न पूर्णकलश एकान्तेन सर्वेषां मङ्गलम्, येन चौरस्य कर्षकस्य च शकुनतया रिक्तं घटं प्रशंसन्ति शकुनविदः, गृहप्रवेशे पुनः पूर्णम् । उक्तं च—

१-२ य ता० विना ॥ ३ °णाकयो अ° ता० ॥ ४ °त्तिलिहिया तु घ° ता० ॥ ५ °ष्पन्ना मूल° मो २ ॥ ६ "ते णं चंदणकलसा वरकमलपइट्ठाणा सुरभिवरवारिपडिपुण्णा चंदणकयचच्चागा आविद्धकंठेगुणा पउमुप्पलपिहाणा सव्वरयणामया अच्छा जाव पडिरूवा ॥" **राजप्रश्नीये** पत्र ६३-१ । **जीवाभिगमे** ३ प्रतिपत्तौ पत्र २०२-२ ॥

चोरस्स करिसगस्स य, रित्तं कुडयं जणो पसंसेइ ।
गेहपवेसे मज्जइ, पुन्नो कुंभो पसत्थो उ ॥

तत एवमनैकान्तिकम् । नाप्यात्यन्तिकम्, यथा कोऽपि शोभनैर्द्रव्यमङ्गलैर्विनिर्गतः, तेन चाग्रे किञ्चिदशोभनं दृष्टम्, येन तानि सर्वाण्यपि माङ्गलानि प्रतिहतानि, तत एवमनात्यन्तिकमिति ।

उक्तं द्रव्यमङ्गलम्, अधुना भावमङ्गलमाह—

भावमङ्गलम्

तव्विवरीयं भावे, तं पि य नंदी भगवती उ ॥ १० ॥

'तद्विपरीतम्' ऐकान्तिकमात्यन्तिकं च 'भावे' भावविषयं मङ्गलम् । तथाहि—न तद् भावमङ्गलं कस्यचिद्भवति कस्यचिन्न भवति, किन्तु सर्वस्याविशेषेण भवतीत्यैकान्तिकम्; न च केनाप्यन्येन प्रतिहन्यत इत्यात्यन्तिकम् । 'तच्च' भावमङ्गलं भगवान् नन्दिर्वक्ष्यमाणोऽवगन्तव्यः । गाथायां स्त्रीत्वं प्राकृतत्वात् ॥ १० ॥

आह यथा नामादीनि चत्वारि मङ्गले समवतारितानि तथा किमन्येष्वप्यवतार्यन्ते? किं वा न? इति, उच्यते—अवतार्यन्ते, सर्वस्यापि चतुःप्रत्यवतारान्तर्गतत्वात् । एतदेवाह—

प्रतिवस्तु निक्षेपचतुष्कावतारः

जह इंदो त्ति य एत्थं, तु मग्गणा होति[1] नाममादीणं ।
सव्वाणुवाथि सण्णा, ठवणादिपया उ पत्तेयं ॥ ११ ॥

यथा इन्द्र इति उक्ते 'अत्र' इन्द्रे नामादीनां चतुर्णां मार्गणा भवति । तथाहि[2]—किमनेन नामेन्द्र उक्तः? उत स्थापनेन्द्रः? आहोस्विद् द्रव्येन्द्रः? उताहो भावेन्द्रः? इति । तथा सर्वत्रापि द्रष्टव्या । उक्तं च—

जत्थ य जं जाणिज्जा, निक्खेवं निक्खिवे निरवसेसं ।
जत्थ वि य न जाणिज्जा, चउक्कयं निक्खिवे तत्थ ॥ [अनुयो० पत्र १०]

तत्र 'संज्ञा' नाम सर्वेषु—नाम-स्थापना-द्रव्य-भावेषु अनुपाति—अनुवर्तनशीलम् । तथाहि—नामेन्द्रोऽपि स्थापनेन्द्रोऽपि द्रव्येन्द्रोऽपि भावेन्द्रोऽपि च इन्द्र इत्यभिधानेनाविशेषत उच्यते । स्थापनादीनि तु पदानि 'प्रत्येकं' स्वस्वव्यवस्थितानि, न परस्परमनुगमनशीलानि, ततो न नामप्रवृत्तिमात्रदर्शनतो नामेन्द्रप्रतिपत्तयः किन्तु भिन्नलक्षणवशात् ॥ ११ ॥ अतस्तल्लक्षणमाह—

नामेन्द्रः

अत्ताभिप्पायकया, सण्णा चेयणमचेयणे वा वि ।
ठवणादीनिरविक्खा, केवल सण्णा उ नामिंदो ॥ १२ ॥

चेतनेऽचेतने वा द्रव्ये या आत्माभिप्रायेण—स्वेच्छया इन्द्रप्रभृतिः संज्ञा कृता, साऽपि स्थापनादिसापेक्षा स्यादत आह—स्थापनादीनां—स्थापना-द्रव्य-भावानां निरपेक्षा, किमुक्तं भवति?—यत्र स्थापनादीनामेकमपि नास्ति किन्तु 'केवला' एका संज्ञा तदर्थनिरपेक्षा स नामेन्द्रः ॥ १२ ॥

उक्तं नामेन्द्रलक्षणम्, अधुना स्थापनेन्द्रलक्षणमाह—

स्थापनेन्द्रः

सब्भावमसब्भावे, ठवणा पुण इंदकेउमाईया[3] ।

'स्थापना' स्थापनेन्द्रः पुनः सद्भावेऽसद्भावे च 'इन्द्रकेत्वादिका' इन्द्रकेतुप्रभृतिको द्रष्टव्यः,

---

१ °ति ठवणमा° ता० ॥ २ यथा किमनेन कां २ ॥ ३ °मादीसु ता० ॥ ४ "इन्द्रकेतुः केतुरुच्छ्रये, इन्द्रोच्छ्रय इत्यर्थः । आदिशब्दाद् ( आदिग्रहणाद् प्र० ) इन्द्रप्रतिमा ।" इति चूर्णौ ॥

अत्राऽऽदिशब्दादिन्द्रप्रतिमा-ऽक्ष-वराटकादिपरिग्रहः । इयमत्र भावना—या इन्द्र इति स्थापना अक्ष-वराटिकादिषु असद्भावेन, या चेन्द्रकेत्विन्द्रप्रतिमादिषु सद्भावतः स स्थापनेन्द्रः ॥

आह नाम-स्थापनयोः कः प्रतिविशेषः? उच्यते—

**नामस्थापनयोर्विशेषः**

**इत्तरमणित्तरा वा, ठवणा नामं तु आवकहं ॥ १३ ॥**

"इत्तर" इत्यादि । स्थापना इत्वरा अनित्वरा च भवति, यावद्द्रव्यभाविनी अयावद्द्रव्यभाविनी चेत्यर्थः; नाम पुनर्नियमात् 'यावत्कथिकं' यावद्द्रव्यभावि; एष प्रतिविशेषः ॥ १३ ॥

द्रव्येन्द्रमाह—

**द्रव्येन्द्रः**

**दव्वे पुण तल्लद्धी, जस्सातीता भविस्सते वा वि ।**
**जो वा वि अणुवउत्तो, इंदस्स गुणे परिकहेइ ॥ १४ ॥**

'द्रव्ये' द्रव्यविषयः पुनः इन्द्रो यस्य 'तल्लब्धिः' इन्द्रलब्धिः अतीता भविष्यति च स प्रतिपत्तव्यः । किमुक्तं भवति?—यः पूर्वमिन्द्रत्वं प्राप्तो यश्च प्राप्स्यति स यथाक्रमं भूतभावत्वाद् भाविभावत्वाच्च द्रव्येन्द्रः । उक्तं च—

**द्रव्यनिक्षेपलक्षणम्**

भूतस्य भाविनो वा, भावस्य हि कारणं तु यल्लोके ।
तद् द्रव्यं तत्त्वज्ञैः, सचेतना-ऽचेतनं कथितम् ॥

यो वाऽपि इन्द्रस्य गुणान् परस्मै परिकथयति, परमनुपयुक्तः, सोऽपि द्रव्येन्द्रः, "अनुपयोगो द्रव्य"मिति वचनात् ॥ १४ ॥ उक्तो द्रव्येन्द्रः, सम्प्रति भावेन्द्रमाह—

**भावेन्द्रः**

**जो पुण जहत्थजुत्तो, सुद्धनयाणं तु एस भाविंदो ।**
**इंदस्स व अहिगारं, वियाणमाणो तदुवउत्तो ॥ १५ ॥**

यः पुनः 'यथार्थेन' यथावस्थितेनार्थेन परमैश्वर्यलक्षणेन "इदु परमैश्वर्ये" इति वचनात् साक्षादिन्द्रनाम-गोत्राणि कर्माणि वेदयेत इत्यर्थः, स भावेन्द्रः । एषः 'शुद्धनयानां' शब्दादीनां यथावस्थितार्थग्राहकाणां वर्तमानविषयिकाणां सम्मतः, न शेषो नामेन्द्रादिः । अथवा 'इन्द्रस्य' इन्द्रशब्दस्य 'अधिकारम्' अर्थं जानन् 'तदुपयुक्तः' तस्मिन्—इन्द्रशब्दार्थे उपयुक्तो भावेन्द्रः, "उपयोगो भावनिक्षेपः" इति वचनात् ॥ १५ ॥ अत्र पर आह—

**न हि जो घडं वियाणइ, सो उ घडीभवइ नेय वा अग्गी ।**
**नाणं ति य भावो त्ति य, एगट्ठमतो अदोसो त्ति ॥ १६ ॥**

न हि यो घटं विजानाति स घटीभवति, यस्य वा अग्निविज्ञानं सोऽग्निः, प्रत्यक्षविरोधात्; ततो यदुक्तं "इंदस्स वाऽहिगारं विजाणमाणो तदुवउत्तो" (गाथा १५) इति तन्मिथ्या । अत्र सूरिराह—ज्ञानमिति भाव इति वा, चशब्दादध्यवसाय इति वा उपयोग इति वा एकार्थम्, अतोऽदोषः । इयमत्र भावना—अर्था-ऽभिधान-प्रत्ययास्तुल्यनामधेयाः, तथाहि—घटोऽपि बाह्यो घट इत्युच्यते, घटशब्दोऽपि घट इति, घटज्ञानमपि घट इति; ज्ञानं च ज्ञानिनोऽपृथग्भूतम्, अतो घटज्ञान्यपि घट इत्युच्यते; अग्निज्ञान्यपि अग्निरित्यदोषः ॥ १६ ॥ एतदेव भावयति—

---

१ "अणुवओगो दव्वमिति कट्टु" अनुयोगद्वारसूत्रे पत्र १५-१ ॥ २ अविकारं ता० ॥ ३ °वउत्तो ता० ॥ ४ °वमान इ° मो २ ॥ ५ सो त घ° ता० ॥ ६ सो उ ता० ॥

**जमिदं नाणं इंदो, न व्वतिरिच्चति ततो उ तन्नाणी ।**
**तम्हा खलु तब्भावं, वयंति जो जत्थ उवउत्तो ॥ १७ ॥**

यद् इदं इन्द्र इति ज्ञानं तस्मात्र 'ज्ञानी' इन्द्रज्ञानी व्यतिरिच्यते। तस्माद् यो 'यत्र' इन्द्रादौ उपयुक्तः तस्य 'तद्भावं' इन्द्रादिभावं तत्त्वविदस्सूरयो वदन्ति ॥ १७ ॥ ज्ञान-ज्ञानिनोरभेद एव कथं सिद्धः? इति चेत्, उच्यते—विपक्षेऽनेकदोषप्रसङ्गात् । तमेवाह—

**चेयण्णस्स उ जीवा, जीवस्स उ चेयणाओ अन्नत्ते ।**
**दविर्यं अलक्खणं खलु, हविज्ज ण य बंधमोक्खा उ ॥ १८ ॥**

चैतन्यस्य जीवात् जीवात् चेतनाया अन्यत्वे 'द्रव्यं' जीवद्रव्यं 'अलक्षणं' "चेतनालक्षणो जीवः" इतिलक्षणरहितं भवेत् । चेतनाया घटादिवज्जीवादप्येकान्तव्यतिरिक्तत्वात् "लक्षणाभावे च लक्ष्यस्याऽप्यभावः" इति खरशृङ्गवदत्यन्तासन् जीवः । यश्चाऽत्यन्तासन् स न बध्यते, बन्धस्य वस्तुधर्मत्वात्; नाऽपि मुच्यते, बन्धाभावादिति बन्ध-मोक्षावपि न स्याताम् । अथ मन्येथाः 'अचेतनोऽपि स बध्यते मुच्यते च' इति तदप्ययुक्तम्, अचेतनानामप्येवं धर्मास्तिकायादीनां बन्ध-मोक्षप्रसक्तेः । तस्मात्साधूक्तम् "इन्द्रशब्दार्थं जानन् तदुपयुक्तो भावेन्द्रः" ( गाथा १५ ) इति ॥ १८ ॥ सम्प्रति नामेन्द्र-स्थापनेन्द्रयोः प्रकारान्तरेण प्रतिविशेषमभिधित्सुराह—

**जह ठवणिंदो थुव्वइ, अणुग्गहत्थीहिँ तह न नामिंदो ।** नामेन्द्र-स्थापनेन्द्रयोर्द्रव्येन्द्रभावेन्द्रयोश्च विशेषः
**एमेव दव्वभावे, पूयाथुतिलद्धिनाणत्तं ॥ १९ ॥**

यथा स्थापनेन्द्रो अनुग्रह एवार्थोऽनुग्रहार्थः स येषामस्ति तेऽनुग्रहार्थिनस्तैः वाग्भिः स्तूयते पुष्पादिभिरर्च्यते च, न तथा नामेन्द्रो माणवकः । ततो महान् नामेन्द्र-स्थापनेन्द्रयोः प्रतिविशेषः । 'एवमेव' अनेनैव प्रकारेण द्रव्येन्द्रे भावेन्द्रे च पूजा-स्तुति-लब्धिभिर्नानात्वमवसातव्यम् । तद्यथा—द्रव्येन्द्रोऽपि नामेन्द्र इवाऽनुग्रहार्थिभिः न स्तूयते नाऽपि पूज्यते, यस्तु भावेन्द्रः स स्थापनेन्द्र इव स्तूयते पूज्यते च; ततो द्रव्येन्द्र-भावेन्द्रयोरपि महान् प्रतिविशेषः । अन्यच्च द्रव्येन्द्र इन्द्रलब्धिहीनः, यस्तु भावेन्द्रः स तल्लब्धिसम्पन्नः । तथाहि—स सामानिकत्रायस्त्रिंशकादिपरिवृतो विशिष्टद्युतिमान् स्फीतं राज्यमनुभवति । उपयोगचिन्तायामपि भावेन्द्र उपयोगलब्धिमान्, द्रव्येन्द्र उपयोगलब्ध्या परित्यक्तः ॥ १९ ॥

तदेवमुक्तः सर्वत्र चतुष्कनिक्षेपप्रदर्शनायेन्द्रशब्दस्य निक्षेपः । सम्प्रति प्रस्तुतमुच्यते—तत्र परः प्रश्नयति 'किमर्थं मङ्गलग्रहणम्?' इति, आह—

**विग्घोवसमो सद्धा, आयर उवयोग निज्जराऽधिगमो ।** मङ्गलग्रहणप्रयोजनम्
**भत्ती पभावणा वि य, निवनिहिविज्जाइ आहरणा ॥ २० ॥**

मङ्गले प्रकृते सति रोगादिविघ्नोपशमो भवति । तदुपशमे च प्रतिबन्धकाभावान्महता प्रबन्धेनाऽऽचार्येणाऽनुयोगः प्रारभ्यते । तथाऽनुयोगप्रारम्भे च शिष्यस्य शास्त्रग्रहणे महती श्रद्धोप-

---

१ जमियं पगयं णाणं इंदो न वतिरित्त त्ति ततो ता० । "जमितं पगतं गाधा कंठा" इति चूर्णौ ॥ २ °श्चित्ति ता० विना ॥ ३ °क्खो वा ता० ॥ ४ जध ठ° ता० ॥ ५ आतर° ता० ॥

जायते । श्रद्धावतश्च शास्त्रावधारणे महानाऽऽदरः । कृतादरस्य शास्त्रविषयेऽनवरतमुपयोगः । यदा यदा चोपयोगस्तदा तदा सम्यग्ज्ञानत्वान्महती ज्ञानावरणीयस्य कर्मणो निर्जरा । ज्ञानावरणकर्मनिर्जरणाच्च स्फुटः स्फुटतरः शास्त्रस्याधिगमः । अधिगतशास्त्रस्य च गुरौ शास्त्रे प्रवचने च निःकृत्रिमा भक्तिरुल्लसति । ततः प्रभावना, तां दृष्ट्वाऽन्येषामपि तथा श्रद्धादीनां करणात् । यदि पुनर्न क्रियते मङ्गलं तत एषां विघ्नोपशमादिभावानामप्रसिद्धिः । अत्र 'उदाहरणानि' दृष्टान्ता नृप-निधि-विद्यादयः, आदिशब्दाद् योगो मन्त्राश्च परिगृह्यन्ते ।

नृपोदाहरणम्

**तत्रेयं नृपदृष्टान्तस्य भावना,** यथा—कोऽपि पुरुषः कार्यार्थी राजानमधिगन्तुकामो मङ्गलभूतानि पुष्पादीन्यादाय तत्समीपमुपगच्छति । उक्तं च—

पुप्फपुडियाइ[1] जं पइ, गोरसघडओ करेइ कज्जाइं ।
मणिबंधम्मि पयलिते, साणुग्गह होंति सव्वगहा ॥

उपगत्य चाऽञ्जलिं करोति, पादयोश्च प्रणिपतति, ततो राजा तुष्यति, तुष्टे च तस्मिन् यस्तदधीनोऽर्थः स सिध्यति । अथैवमुपचारं न करोति तदा न तुष्यति, तोषाभावे च तदधीनस्या[र्थस्या]प्रसिद्धिः ॥

निधिविद्यामन्त्रदृष्टान्तभावना

एवं निधिमुत्खनितुकामो विद्यां मन्त्रं वा साधयितुकामो यदि द्रव्य-क्षेत्र-काल-भावयुक्तमुपचारं करोति, तद्यथा—द्रव्यतः पुष्पादिषु, क्षेत्रतः स्मशानादिषु, कालतः कृष्णपक्षचतुर्दश्यादिषु, भावतः प्रतिलोमा-ऽनुलोमोपसर्गसहिते, तदा निधिं विद्यां मन्त्रं वा साधयति । द्रव्याद्युपचाराभावे ते निध्यादयो न सिध्यन्ति । तस्माद् यो यत्रोपचारः स तत्र कर्त्तव्यः ॥ २० ॥

एतदेवाह—

**जो जेण विणा अत्थो, न सिज्झई तस्स तव्विहं करणं ।**
**विवरीय अभावेण य, न सिज्झई सिज्झई इहरा[2] ॥ २१ ॥**

योऽर्थो येन विना न सिध्यति तस्य निष्पत्तये तद्विधं करणमवश्यमुपादातव्यम्, यथा घटं साधयितुकामेन चक्र-दण्ड-मृत्पिण्डादिकम् । यतो विपरीतैः करणैः सर्वथा करणानामभावेन च सोऽधिकृतोऽर्थो न सिध्यति, यथा घटं साधयितुकामस्य विपरीततुरि-वेमाद्युपकरणोपादाने सर्वथा चक्र-दण्ड-सूत्रोदकादीनामुपकरणानामभावे वा घटः । 'इतरथा' अविपरीतोपकरणसद्भावे सिध्यति, यथा घटं साधयितुकामस्य यथावस्थितानां चक्र-दण्ड-सूत्रोदकादीनामुपादाने घटम् (घटः) । न सिध्यन्ति च मङ्गलमन्तरेण विघ्नोपशमादयो भावा इति मङ्गलोपादानं पुनरपि ॥ २१ ॥

आह यदि शास्त्रस्याऽऽदि-मध्या-ऽवसानेषु मङ्गलम्, ततः सामर्थ्यादिदमायातम् 'अपान्तरालद्वयममङ्गलम्' इति, अत्राह—

**जं[3]यवि य तिट्ठाण कयं, तह वि हु दोसो न बाहए इयरो[4] ।**
**तिसमुब्भवदिट्ठंता, सेसं पि हु मंगलं होइ ॥ २२ ॥**

यद्यपि 'त्रिषु स्थानेषु' आदि-मध्या-ऽवसानरूपेषु कृतं मङ्गलं तथापि 'इतरः' अपान्तरालद्वयामङ्गलत्वलक्षणो दोषो न बाधते, तस्यैवाभावात् । कथमभावः ? इति चेत्, अत आह—"तिस-

१ चूर्णिप्रत्यन्तरे "गंधपुडिआइ" इति पाठः ॥ २ इयरा ता० ॥ ३ जति वि ता० ॥ ४ य ता० ॥

मुक्खभवे''त्यादि । त्रिभ्यः–गुड-समिति-घृतेभ्यः समुद्भवो यस्य स मोदकः तद्दृष्टान्तात् शेषमपि 'हु:' निश्चितं मङ्गलं भवति । इयमत्र भावना–मोदक इव सकलं शास्त्रं त्रिधा विभज्यते, तत्राऽऽदिमो भाग आदिमङ्गलेन मङ्गलीकृतः, मध्यमो मध्यमङ्गलेन, अन्तिमोऽन्तमङ्गलेन, ततः कुतोऽपान्तरालद्वयामङ्गलत्वप्रसङ्गः ? ॥ २२ ॥

स्यादेतत्, यदिदं शास्त्रमारब्धमेतदाऽऽदि-मध्या-ऽवसानेषु सर्वात्मना मङ्गलम् ततो यदन्यत् तस्य मङ्गलमुपादीयते तदाऽनवस्थाप्रसङ्गः–कृतेऽपि मङ्गले पुनरन्यन्मङ्गलमुपादेयम् विशेषाभावात्, तत्राऽप्यन्यदित्येवं मङ्गलानन्त्यप्रसक्तेः । अथ नन्दी मङ्गलम्, शास्त्रं पुनरमङ्गलम्, केवलं तद् नन्द्या मङ्गलीक्रियते, नन्वेवं तर्हि यदा नन्दीव्याख्यानमकृत्वा शास्त्रं व्याख्यातुमारभ्यते तदा शास्त्रममङ्गलम्, अमङ्गलत्वाच्च न ज्ञानम्, ज्ञानाभावाच्च न कर्त्तव्यस्तस्याऽनुयोग इति, अत्राह–

**न वि य हु होयऽणवत्था, न वि य हु मंगलममंगलं होइ ।**
**अप्पपराभिव्वत्तिय, लोणुण्हपदीवमादि व्व ॥ २३ ॥**

नाऽपि च 'हु:' निश्चितं भवत्यनवस्था, यतो नन्दी शास्त्रादनर्थान्तरभूता, शास्त्रं च स्वतः समस्तं मङ्गलम्, न च तस्य मङ्गलभूतस्य सतोऽन्यन्मङ्गलमुपादीयते, ततो नाऽनवस्थाप्रसङ्गः । यदापि नन्द्या व्याख्यानमकृत्वा शास्त्रमारभ्यते तदापि तच्छास्त्रं मङ्गलमिति तदमङ्गलं न भवति । एवं तावन्नन्द्या अनर्थान्तरतायाममङ्गलत्वमनवस्था च परिहृता । सम्प्रत्यर्थान्तरत्वमधिकृत्य परिह्रियते–यद्यपि शास्त्रादर्थान्तरभूता नन्दी तथाप्यमङ्गलत्वमनवस्था च न भवति, कथम्? इत्याह–"अप्पपर" इत्यादि । नन्दी आत्मनापि मङ्गलं शास्त्रमपि च मङ्गलीकरोति, शास्त्रमप्यात्मनाऽपि मङ्गलं नन्दीमपि च मङ्गलीकरोति । एवमात्म-पराभिव्यक्तितो[3] द्वयोरपि मङ्गलयोरेकीभूतयोः सुष्ठुतरो मङ्गलभावो भवति । कथमिव? इत्यत आह–"लोणुण्हपदीवमादि व्व" । यथा द्वयोर्लवणयोरेकीभूतयोः सुष्ठुतरो लवणभावः, द्वयोर्वा उष्णयोरेकत्र मिलितयोः सुष्ठुतर उष्णतरभावः, यथा वा द्वयोः प्रदीपयोः समीचीनतरः प्रकाशभावः, आदिशब्दान्मधुर-शीतल-स्नेहादिद्रव्याणां परिग्रहः; एवमिहापि द्वयोर्मङ्गलयोरेकीभूतयोः सुष्ठुतरो मङ्गलभावः । स्यादेतत्, एवमपि प्रसजत्यनवस्था, तृतीयादिमङ्गलोपादाने सुष्ठुतरमङ्गलभावोपपत्तेः; न प्रसजति, प्रयोजनाभावात्, तथा लोकव्यवहारदर्शनात् । तथाहि–लोके कस्यचिदातुरस्य शर्करापलद्वयमौषधं केनाऽपि भिषग्वरेणोपादेशि, तत्र यद्यपि तृतीयादिशर्करापलप्रक्षेपे विशिष्टतमो मधुरभावो भवति तथापि तन्न प्रक्षिप्यते, प्रयोजनाभावात् । मङ्गल-वाद-समाप्तिः
एवमिहाप्यन्यत् तृतीयादिकं मङ्गलं नोपादीयते, प्रयोजनाभावादिति ॥ २३ ॥

तदेवं "नंदी य मंगलट्ठा" ( गाथा ३ ) इति व्याख्यातम् । अधुना मङ्गलस्येव नन्द्या अपि चतुःप्रकारं निक्षेपमाह–

## [ नन्दी–ज्ञानपञ्चकम् ]

**[4]नंदी चतुक दव्वे, संखबारसग तूरसंघातो ।** नन्दी-पदस्य निक्षेपाः
**भावम्मि नाणपणगं, पच्चक्खियरं च तं दुविहं ॥ २४ ॥**

१ "त्रिसमुद्भवः, कश्चासौ? मोदकः, त्रिभिः–गुड-घृत-समितैरुद्भूतः" इति चूर्णौ ॥ २ व्वत्ती, लो° ता० ॥ ३ °क्तिता द्वयो° कां २ विना । "एवं अप्पपराभिवत्तितो दोण्हं पि मंगलाणं एक्कीभूयाणं सुट्ठुयरं मंगलभावो भवति ।" इति चूर्णिः ॥ ४ नंदि चउक्कं ता० ॥

नन्द्याश्चतुष्को निक्षेपः, तद्यथा–नामनन्दी स्थापनानन्दी द्रव्यनन्दी भावनन्दी च। तत्र नाम-स्थापने सुप्रतीते। द्रव्यनन्दी द्विधा–आगमतो नोआगमतश्च। तत्राऽऽगमतो नन्दिशब्दार्थज्ञाता तत्र चाऽनुपयुक्तः, "अनुपयोगो द्रव्यम्" इति वचनात्। नोआगमतस्त्रिधा–ज्ञशरीरं भव्यशरीरं तद्व्यतिरिक्ता च। तत्र यद् नन्दीशब्दार्थज्ञस्य शरीरं जीवविप्रमुक्तं तद् भूतभावत्वाद् ज्ञशरीर-द्रव्यनन्दी। यस्तु बालको नेदानीं नन्दीशब्दार्थमवबुध्यतेऽथ चाऽवश्यमायत्यां भोत्स्यते स भाविभावत्वाद् भव्यशरीरद्रव्यनन्दी। तद्व्यतिरिक्ता शङ्खद्वादशकस्तूर्यसङ्घातः। स चायम्—

तूर्यद्वादशकम्

भंभा मुकुंद मद्दल, कडंब झल्लरि हुडुक्क कंसाला।
काहल तलिमा वंसो, पणवो संखो य बारसमो ॥

भावतो द्विधा–आगमतो नोआगमतश्च। तत्राऽऽगमतो नन्दिशब्दार्थस्य ज्ञाता तत्र चोपयुक्तः। तत्र मूलद्वारगाथायां यत् "पंचके"ति ( गाथा ३ ) भणितं तस्य व्याख्यानमाह–भावे नोआगमतो नन्दी 'ज्ञानपञ्चकं' पञ्चविधं ज्ञानम्–आभिनिबोधिकज्ञानं श्रुतज्ञानमवधिज्ञानं मनःपर्यवज्ञानं केवलज्ञानं च। "दुग"त्ति ( गाथा ३ ) अस्य व्याख्यानम्–'तद्' ज्ञानपञ्चकं द्विविधं प्रज्ञप्तम्, तद्यथा–प्रत्यक्षम् 'इतरच्च' परोक्षम् ॥ २४ ॥ सम्प्रति प्रत्यक्ष-परोक्षयोः स्वरूपमाह—

प्रत्यक्ष-परोक्षयोः स्वरूपम्

**जीवो अक्खो तं पइ, जं वट्टति तं तु होइ पच्चक्खं।**
**परतो पुण अक्खस्सा, वट्टंतं होइ पारुक्खं ॥ २५ ॥**

"अश् भोजने" अश्नाति–भुङ्क्ते यथायोगं सर्वानर्थानिति अक्षः, यदि वा "अशौङ् व्याप्तौ" अश्नुते–ज्ञानेन व्याप्नोति सर्वान् ज्ञेयानिति अक्षः–जीवः, उभयत्राऽप्यौणादिकः सक्प्रत्ययः, तं प्रत्यव्यवधानेन यद् वर्त्तते ज्ञानं तद् भवति प्रत्यक्षम्। तथा द्रव्येन्द्रिय-मनांसि पुद्गलमयत्वात् पराणि, तेभ्यः पुनरक्षस्य वर्त्तमानं ज्ञानं भवति परोक्षम्। किमुक्तं भवति ?–यदिन्द्रियद्वारेण मनोद्वारेण वाऽऽत्मनो ज्ञानमुपजायते तत् परोक्षम्, पृषोदरादित्वात् परशब्दात् परः सकारागमः। यदि वा परैर्द्रव्येन्द्रिय-मनोभिरक्षसम्बन्धो यस्मिंस्तत् परोक्षमिति व्युत्पत्तिः ॥ २५ ॥

अत्रैव मतान्तरं दूषयितुमाह—

वैशेषिकाद्युक्तस्य प्रत्यक्षलक्षणस्य दूषितत्वम्

**केसिंचि इंदियाइं, अक्खाइं तदुवलद्धि पच्चक्खं।**
**तं तु न जुंजइ[1] जम्हा, अग्गाहगमिंदियं विसए ॥ २६ ॥**

'केषाञ्चिद्' वैशेषिकादीनामक्षाणीन्द्रियाण्यभिप्रेतानि, तेषामुपलब्धिः प्रत्यक्षम्, एवं च "चाक्षुषादिविज्ञानं प्रत्यक्षम्" इत्यापन्नम्। एतद् दूषयति–"तं तु" इत्यादि। 'तद्' वैशेषिकाद्युक्तं 'न युज्यते' न घटामञ्चति, यस्माद् 'इन्द्रियं' चक्षुरादि पुद्गलमयत्वेनाचेतनत्वात् स्वरूपेणाग्राहकं 'विषयस्य' रूपादेः। ततः कथमुपपद्यते 'तदुपलब्धिः प्रत्यक्षम्'? उपलब्धेरेवाभावात् ॥ २६ ॥

तमेवोपलब्ध्यभावं भावयति—

**न वि इंदियाइँ उवलद्धिमंति विगतेसु विसयसंभरणा।**
**जह गेहगवक्खाइं, जो अणुसरिया स उवलद्धा ॥ २७ ॥**

---

१ युञ्जति ता० ॥

न वै इन्द्रियाण्युपलब्धिमन्ति, तेषु विगतेष्वपि तद्विषयस्य संस्मरणात्, यथा गेहगवाक्षाः । किमुक्तं भवति?—यथा गेहगवाक्षैरुपलब्धेष्वर्थेषु गेहगवाक्षाणामुपरमेऽपि पुरुषस्य संस्मरणभावान्न ते गवाक्षा उपलब्धारः, तथा विगतेष्वपीन्द्रियेषु तद्विषय उपलभ्यत आत्मनेति व्यापकविरुद्धोपलब्धिः, 'तस्योपलम्भः' इतिव्यवस्था हि तस्य स्मरणेन व्याप्ता, अन्यथा तद्व्यवस्थायाः कर्तुमशक्यत्वात्, तद्विरुद्धं चात्रान्यस्य स्मरणमुपलभ्यत इति । कथम्? कस्तत्रोपलब्धा? इति चेत्, अत आह—योऽनुस्मर्ता स तत्रोपलब्धा, आत्मा उपलब्धा इत्यर्थः । तथा च प्रयोगः—येषु विगतेष्वपि यद्विषयो येन स्मर्यते स तत्रोपलब्धा, यथा गेहगवाक्षेषु पुरुषः, विगतेष्वपि चेन्द्रियेषु तद्विषयः स्मर्यत आत्मना । स्मरणं हि प्रतिनियतत्वान्निमित्तवत्त्वेन संव्याप्तम्, न चोपलम्भादन्यन्निमित्तमस्ति, ततो विपक्षाद् व्यापकानुपलब्ध्या निवर्त्तमानमुपलम्भपूर्वकत्वेन व्याप्यत इति प्रतिबन्धसिद्धिः ॥ २७ ॥ सम्प्रतीन्द्रियाश्रितस्य लैङ्गिकत्वं व्यवस्थापयति—

इन्द्रियज्ञानस्य लैङ्गिकत्वम्

**धूमनिमित्तं नाणं, अग्गिम्मि लिंगियं जहा होइ ।**
**तह इंदियाइलिंगं, तं नाणं लिंगियं न कई ॥ २८ ॥**

यथा 'धूमनिमित्तं' धूमाल्लिङ्गादुपजायमानमग्नौ लिङ्गिनि ज्ञानं लैङ्गिकं भवति, तथा 'इन्द्रियादिलिङ्गं' इन्द्रियादिभिर्लिङ्गैरुपजायमानं रूपादिषु चाक्षुषादि विज्ञानं कथं लैङ्गिकं न भवति? तदपि लैङ्गिकमेवेति भावः ॥ २८ ॥ अन्यच्च—

प्रत्यक्षपरोक्षयोर्व्याख्या तत्प्रभेदाश्च

**अपरायत्तं[1] नाणं, पच्चक्खं तिविहमोहिमाईयं[2] ।**
**जं परतो आयत्तं, तं पारोक्खं हवइ सव्वं ॥ २९ ॥**

यद् ज्ञानम् 'अपरायत्तं' नोत्पत्तौ परस्य वशवर्त्ति तत् प्रत्यक्षम् । तच्च वक्ष्यमाणं त्रिविधमवध्यादिकम् । यच्चोत्पत्तौ 'परतः' परस्याऽऽयत्तं तत् सर्वं भवति परोक्षम् । चाक्षुषादिकमपि च विज्ञानमुत्पत्तौ परस्य चक्षुरादेरायत्तम् अतः परोक्षम् ॥ २९ ॥

सम्प्रति त्रिविधं प्रत्यक्षं द्विविधं च परोक्षमुपदर्शयति—

**ओहि मणपज्जवे या, केवलनाणं च होंति पच्चक्खं ।**
**आभिणिबोहियनाणं, सुयनाणं चेव पारोक्खं ॥ ३० ॥**

अवधिज्ञानं मनःपर्यवज्ञानं केवलज्ञानं च भवति प्रत्यक्षम् । आभिनिबोधिकज्ञानं श्रुतज्ञानं च परोक्षम् ॥ ३० ॥

## अवधिज्ञानम्

तत्राऽवधिज्ञानं चतुर्विधम्, तद्यथा—द्रव्यतः क्षेत्रतः कालतो भावतश्च, तत्र द्रव्यतस्तावदाह—

द्रव्यतोऽवधिज्ञानम्

**विवरीयवेसधारी[3], विज्जंजणसिद्ध देवताए वा[4] ।**
**छाइय सेवियसेवी, बीयादीओ वि पच्चक्खा ॥ ३१ ॥**
**पुढवीइं तरुगिरिया सरीरादिगया य जे भवे दव्वा ।**
**परमाणू सुहदुक्खादओ य ओहिस्स पच्चक्खा ॥ ३२ ॥**

१ °रायत्तं ता० ॥ २ °मोधिमातीयं ता० ॥ ३ गाथायुगलमिदं चूर्णिकृद्भिः "अचंतमणुवलद्धा०" ३३ गाथाया अनन्तरं व्याख्यातम् ॥ ४ य ता० ॥ ५ °बीय त° ता० ॥

नेपथ्यपरावर्त्ततो गुटिकाप्रयोगतः स्वरपरावर्त्ततो वर्णपरावर्त्ततो विपरीतं वेषं धारयन्तीति विपरीतवेषधारिणस्ते, तथा ये विद्यासिद्धा अञ्जनसिद्धा देवतया वा च्छादिताः, ये च तैः सेवितसेविनः, ये च बीजादयः कुशूलादिन्यस्तास्ते सर्वेऽवधिज्ञानिनः प्रत्यक्षाः ॥ ३१ ॥

तथा—यानि पृथिव्यां यानि तरुषु यानि च गिरिषु, गाथायामेकवचनं समाहारत्वात्, द्रव्याणि, यानि च शरीरादिगतानि द्रव्याणि, ये च परमाणवः, ये 'सुख-दुःखादयः' इन्द्रिय-मनः-शरीरस्वास्थ्या-ऽस्वास्थ्यरूपास्तेऽप्यवधेः प्रत्यक्षाः ॥ ३२ ॥

**अच्चंतमणुवलद्धा, वि ओहिनाणस्स होंति पच्चक्खा ।**
**ओहिन्नाण परिगया, दव्वा असमत्तपज्जाया ॥ ३३ ॥**

अत्यन्तं चक्षुरादिनाऽनुपलब्धा अपि पदार्था अवधिज्ञानस्य भवन्ति प्रत्यक्षाः । अवधिज्ञानेन च द्रव्याणि 'परिगतानि' परिज्ञातानि भवन्ति असमासपर्यायाणि, न समस्ताः पर्याया द्रव्याणां ज्ञातुं शक्यन्त इति भावः । यदि हि समस्तानपि पर्यायान् जानीयात्ततः स केवली भवेत् ॥ ३३ ॥

उक्तं द्रव्यतोऽवधिज्ञानम्, अधुना क्षेत्रादित आह—

क्षेत्रादितोऽवधिज्ञानम्

**खित्तम्मि उ जावइए, पासइ दव्वाइँ तं न पासइ या ।**
**काले नाणं भइयं, को सो दव्वं विणा जम्हा ॥ ३४ ॥**

क्षेत्रे जघन्यत उत्कर्षतो वा यावन्ति ( यावति ) द्रव्याणि पश्यति तत् क्षेत्रं न पश्यति, अवधिज्ञानस्य मूर्त्तविषयत्वात्, "रूपिष्ववधेः" (तत्त्वार्थ० १-२८) इति वचनात्, क्षेत्रस्य चामूर्त्तत्वात् । तत्र जघन्यतः क्षेत्रपरिमाणं "जावतिया तिसमयाऽऽहारगस्स०" ( आव० नि० गाथा ३० ) इत्यादिना, उत्कर्षतः "सव्वबहुअगणिजीवा०" ( आव० नि० गाथा ३१ ) इत्यादिनाऽभिहितम् । शेषं तु तदन्तर्गतं मध्यममिति । तथा 'काले' कालविषये ज्ञानं 'भक्तं' विकल्पितम्, भवति वा न वेति भावः । कथम्? इति चेत्, उच्यते—इह यदि कालद्रव्यं समयक्षेत्रभावि समयमात्रं परिणाम्यभ्युपगम्यते तदा तदमूर्त्तत्वान्नाऽवधिज्ञानविषयः । यदि पुनः कोऽसौ नाम 'द्रव्यं' द्रव्यपर्यायं विनाऽन्यः कालः? यस्माद् द्रव्यस्यैवाऽवस्थाविशेषः कालः, यत उक्तम्—

दव्वस्स चेव सो पज्जातो इति ।

तदा सोऽवधिज्ञानिनः प्रत्यक्षः, पर्यायाणामपि कतिपयानामवधिज्ञानगोचरत्वात् । भावतोऽनन्तान् भावान् जानाति सर्वभावानामनन्तभागम् । शेषं तु वक्तव्यमावश्यकटीकातोऽवसातव्यम् ( मल० पत्र ५०-१ ) ॥ ३४ ॥ उक्तमवधिज्ञानम्, अधुना मनःपर्यवज्ञानमाह—

## मनःपर्यवज्ञानम्

**तं मणपज्जवनाणं, जेण वियाणाइ सन्निजीवाणं ।**
**दट्ठुं मणिज्जमाणे, मणदव्वे माणसं भावं ॥ ३५ ॥**

---

१ "अच्चंतं सव्वकालं" इति चूर्णौ ॥ २ °यात् नूनं स भा० डे० ॥ ३ दव्वाइ तं ता० । चूर्णिकृद्भिरेतत्पाठानुसारेण व्याख्यातम्—"खेत्तम्मि पुव्वद्धं । जावतिए जहण्णेणं तिसमयाहारगसुहुमपणगजीवावगाहणामेत्ते उक्कोसेणं सव्वबहुअगणिजीवपरिच्छित्ते पासइ दव्वादि, आदिग्गहणेणं वण्णादि, तम्मिति खेत्तं ण पेच्छइ, यस्मादुक्तम्—"रूपिष्ववधेः" तच्चारूपि खेत्तं, अतो ण पेच्छति ।" इति चूर्णौ ॥ ४ भतियं ता० ॥ ५ °नन्तभावान् मो ३ ॥

येन संज्ञिजीवानां मनोद्रव्याणि "मणिज्जमाणे" इति 'मन्यमानानि' मननेन व्यापार्यमाणानि दृष्ट्वा 'मानसं भावं जानाति' चिन्तितमर्थमवबुध्यते तन्मनःपर्यवज्ञानम् ॥ ३५ ॥

एतदेव सनिदर्शनं भावयति—

**जाणइ य पिहुजणो वि हु, फुडमागारेहिँ माणसं भावं ।**
**एमेव य तस्सुवमा, मणदव्वपगासिए अत्थे ॥ ३६ ॥**

'पृथग्जनोऽपि' लोकः 'हुः' निश्चितं [ स्फुटम् ] आकारैर्मानसं भावं जानाति, एवमेव 'तस्यापि' मनःपर्यवज्ञानिनो मनोद्रव्यप्रकाशितेऽर्थे उपमा द्रष्टव्या । किमुक्तं भवति ?—यथा प्राकृतो लोकः स्फुटमाकारैर्मानसं भावं जानाति तथा मनःपर्यवज्ञान्यपि मनोद्रव्यगतानाकारानवलोक्य तं तं मानसं भावं जानातीति । एतदपि द्रव्य-क्षेत्र-काल भावैर्यथा **नन्द्यध्ययने** ( मल० पत्र ९९-२ ) तथा चिन्तनीयम् ॥ ३६ ॥ गतं मनःपर्यवज्ञानम्, अधुना केवलज्ञानमाह—

**केवलज्ञानम्**

**पंकसलिले पसाओ, जह होइ कमेण तह इमो जीवो ।**
**आवरणे झिज्जंते, विसुज्झए केवलं जाव ॥ ३७ ॥**

यथा पङ्ककलुषिते सलिले कतकचूर्णयोगतः 'प्रसादः' प्रसन्नता क्रमेण भवति, तथाऽयं जीवोऽपूर्वकरणगुणस्थानकादारभ्य क्षपकश्रेणिमारूढो विशुद्ध-विशुद्धतराध्यवसायप्रभावतः क्षीयमाणे आवरणे तावद् विशुध्यति यावत् क्षीणकषायगुणस्थानकचरमसमये ज्ञानावरणपञ्चकाऽन्तरायपञ्चक-दर्शनावरणचतुष्टयक्षयं कृत्वाऽनन्तरसमये केवलज्ञानमासादयति ॥ ३७ ॥

कथम्भूतं यत्केवलम् ? इत्याह—

**दव्वादिकसिणविसयं, केवलमेगं तु केवलन्नाणं ।**
**अणिवारियवावारं, अणंतमविकप्पियं नियतं ॥ ३८ ॥**

केवलज्ञानं 'द्रव्यादिकृत्स्नविषयं' द्रव्यादीनि कृत्स्नानि—समस्तानि विषयो यस्य तत्तथा, 'केवलम्' असहायं मत्यादिज्ञाननिरपेक्षत्वाद्, 'एकम्' असाधारणमनन्यसदृशत्वात्, अनिवारितव्यापारं अविरहितोपयोगत्वात्, अनन्तं ज्ञेयानन्तत्वाद्, 'अविकल्पितं' विकल्परहितं—भेदरहितमित्यर्थः, प्रथमत एवाशेषतदावरणविगमात्, 'नियतं' सर्वकालभावि ॥ ३८ ॥

उक्तं केवलज्ञानम्, अधुना परोक्षमाभिनिबोधिकज्ञानमभिधित्सुराह—

**आभिनिबोधिकज्ञानम्**

**पच्चक्ख परोक्खं वा, जं अत्थं ऊहिऊण निद्दिसइ ।**
**तं होइ अभिणिबोहं, अभिमुहमत्थं न विवरीयं ॥ ३९ ॥**

---

१ °णई पिधुज° ता० ॥ २ °णे खिज्जं° ता० ॥ ३ "तस्स य इमाणि एगट्ठियाणि—दव्वादिक० गाहा । दव्वादिकसिणविसयं ति वा, केवलं ति वा, एगं ति वा, केवलणाणं ति वा, अणिवारियवावारं ति वा अविरहितोवयोगमित्यर्थः, अणंतं ति वा ज्ञेयं प्रति, अविकप्पितं ति वा निर्भेदं हीनोत्कर्षत्वं प्रति, कियन्तं कालमविकल्पितम् ? इति चेत्, उच्यते—नियतं नित्यमित्यर्थः ।" इति चूर्णौ ॥ ४ °व्वातिक° ता० ॥ ५ °मेक्कं तु ता० ॥

'प्रत्यक्षम्' इन्द्रियविषयं 'परोक्षम्' इन्द्रियविषयातिक्रान्तं यद् अर्थमूहित्वा 'निर्दिशति' निर्णयपुरस्सरं ब्रूते 'एष एवंभूतोऽर्थः' इति, तद् अर्थं प्रति 'अभिमुखं' यथार्थविषयं आभिनिबोधिकम्, 'न विपरीतं' नाऽनर्थाभिमुखम्, तस्यायथार्थतया मिथ्यारूपत्वात् ॥ ३९ ॥

तच्च द्विधा—इन्द्रियनिश्रितमनिन्द्रियनिश्रितं च। अनिन्द्रियं मनः। सम्प्रतीन्द्रिया-ऽनिन्द्रिययोर्विषयविभागमाह—

इन्द्रिय-मनसोर्विषयः

**अत्थाणंतरचारिं, नियतं चित्तं तिकालविसयं तु।**
**अत्थे य पडुप्पण्णे, विणियोगं इंदियं लहइ ॥ ४० ॥**

अर्थे—शब्दादाविन्द्रियव्यापारादनन्तरं चरति—व्याप्रियत इत्येवंशीलमर्थानन्तरचारि, इन्द्रिये प्रथमं व्यापृते पश्चान्मनो व्याप्रियत इति भावः; 'नियतं' नियतार्थविषयम्, नैककालमनेकविषयमित्यर्थः, 'चित्तं' मनः। पुनः कथम्भूतम्? इत्याह—'त्रिकालविषयं' त्रिष्वपि कालेषु यथायोग्यं विषयो यस्य तत्तथा। 'इन्द्रियं पुनः' चक्षुरादिकं 'विनियोगं' व्यापारं लभते 'प्रत्युत्पन्ने' वर्त्तमानेऽर्थे, वर्त्तमानार्थविषयम् नाऽतीता-ऽनागतार्थविषयमिति भावः ॥ ४० ॥

## श्रुतज्ञानम्

**मतिविसयं मतिनाणं, मतिपुव्वं पुण भवे सुयन्नाणं।**
**तं पुण समतिसमुत्थं, परोवदेसा व सव्वं पि ॥ ४१ ॥**

मतिज्ञानं 'मतिविषयं' मत्यनुसारि, यस्य यादृशी मतिस्तस्य तदनुसारं मतिज्ञानं प्रवर्त्तत इत्यर्थः। श्रुतज्ञानं पुनर्भवति 'मतिपूर्वं' मतिकारणकम्, श्रुतज्ञानं हि वाच्य-वाचकभावेन शब्दप्लावितस्याऽर्थस्य ग्रहणम्, वाच्य-वाचकभावेन च शब्दः प्रवर्त्तते मत्यवधारितेऽर्थ इति। 'तत् पुनः' श्रुतज्ञानं सर्वमपि मूलभेदापेक्षया द्विविधम्, तद्यथा—स्वमतिसमुत्थं 'परोपदेशाद्वा' परोपदेशसमुत्थं चेत्यर्थः। तत्र स्वमतिसमुत्थं प्रत्येकबुद्धानां पदानुसारिप्रज्ञानां वा, परोपदेशसमुत्थमस्मदादीनाम् ॥ ४१ ॥ तत् कतिविधम्? इति तद्भेदप्रदर्शनार्थमाह—

श्रुतस्य भेदाः

**अक्खर सण्णी सम्मं, साईयं खलु सपज्जवसियं च।**
**गमियं अंगपविट्ठं, सत्त वि एए सपडिवक्खा ॥ ४२ ॥**

अक्षरश्रुतं संज्ञिश्रुतं सम्यक्श्रुतं सादिश्रुतं सपर्यवसितं गमिकम् अङ्गप्रविष्टमिति। एतानि सप्ताऽपि पदानि सप्रतिपक्षाण्यवगन्तव्यानि, ततश्चतुर्दशप्रकारं भवति। तद्यथा—अक्षरश्रुतमनक्षरश्रुतं संज्ञिश्रुतमसंज्ञिश्रुतं सम्यक्श्रुतं मिथ्याश्रुतं सादिश्रुतमनादिश्रुतं सपर्यवसितमपर्यवसितं गमिकमगमिकम् अङ्गप्रविष्टमनङ्गप्रविष्टं च ॥ ४२ ॥ तत्राऽक्षरश्रुतप्रतिपादनार्थमाह—

अक्षर-श्रुतम्

**अक्खरतिगरूवणया, पढमनयादेसतो न तं खरति।**
**अभिलप्पा पुण भावा, हौंति खरा अक्खरा चेव ॥ ४३ ॥**

अक्षरत्रिकस्य—संज्ञाक्षरस्य लब्ध्यक्षरस्य व्यञ्जनाक्षरस्य चेत्यर्थः रूपणका—प्ररूपणा कर्त्तव्या।

---

१ "परोक्खं जं अणुमाणोवम्मेहिं गेण्हति, अणुमाणेण जधा—णदीपूरएणं वासं, सद्देण संखं, ओवम्मेणं—गाईओ (गावीए प्र०) गवयं" इति चूर्णौ ॥ २ उ ता० ॥ ३ °सारि मति° कां० ॥ ४ सातीयं ता० ॥ ५ पुण अत्था, हौंति ता० ॥

तत्र यद् व्यञ्जनाक्षरं तत् प्रथमनयः—नैगमनयस्तस्याऽऽदेशेन 'न क्षरति' न स्वभावाच्चलति, नित्यमित्यर्थः । तथा च तन्मतानुसारिणो **मीमांसका** नित्यं शब्दमातिष्ठमानाः प्रतीता एव । ये पुनरभिलाप्या भावास्ते क्षराश्च भवन्त्यक्षराश्च । तत्र क्षरा घटादयः, अक्षरा धर्मास्तिकायादयः ॥ ४३ ॥ अथ कीदृशं संज्ञाक्षरम्? इति तत्प्रतिपादनार्थमाह—

**संठाणमगाराई, अप्पाभिप्पायतो वै जं जस्स ।**

संज्ञाक्षरम्

यद् लिपिभेदतः संस्थानमकारादेः, यथा—कैलशाकृतिष्टकारः, तत् तथासंस्थानविशिष्टमकारादि संज्ञाक्षरम् । अथवा 'आत्माभिप्रायतः' आत्मेच्छया यद् यस्य संस्थानं चिह्नविशेषरूपं क्रियते तत् संज्ञाक्षरम् ॥ सम्प्रति लब्ध्यक्षरमाह—

**लद्धी पंचविगप्पा, जस्सुवलब्भो उ जो अत्थो ॥ ४४ ॥**

लब्ध्यक्षरम्

लब्धिः 'पञ्चविकल्पा' पञ्चभेदा । अत्र 'लब्धिः' इति पदैकदेशे पदसमुदायोपचाराद् 'लब्ध्यक्षरम्' इति प्रतिपत्तव्यम् । ततोऽयमर्थः—पञ्चविधं लब्ध्यक्षरम्, तद्यथा—श्रोत्रेन्द्रियलब्ध्यक्षरं जिह्वेन्द्रियलब्ध्यक्षरं चक्षुरिन्द्रियलब्ध्यक्षरं घ्राणेन्द्रियलब्ध्यक्षरं स्पर्शनेन्द्रियलब्ध्यक्षरं च । उपलक्षणमेतत्, तेन षष्ठं नोइन्द्रियलब्ध्यक्षरमप्यवगन्तव्यम् । अथ कीदृशं षट्प्रकारमपि लब्ध्यक्षरम्? अत आह—'यस्य' श्रोत्रादेः श्रोत्र-चक्षु-र्घ्राण-जिह्वा-स्पर्शनेन्द्रियाणां मनसश्च य उपलभ्यः 'अर्थः' शब्दादिस्तमुपलभ्य याऽक्षराणां लब्धिरुपजायते तत् श्रोत्रेन्द्रियादिलब्ध्यक्षरम् । किमुक्तं भवति?—श्रोत्रेण शङ्खशब्दमुपलभ्य तदनन्तरं 'शङ्ख' इत्येवंरूपयोर्द्वयोरक्षरयोर्या लब्धिस्तत् श्रोत्रेन्द्रियलब्ध्यक्षरम् ॥ ४४ ॥ प्रकारान्तरेण लब्ध्यक्षरभेदानाह—

**सामन्न विसेसेण य, दुविहुवलद्धी उ पढमिय अभेया ।**
**तिविहा य अणुवलद्धी, उवलद्धी पंचहा बिइया ॥ ४५ ॥**

प्रकारान्तरेण लब्ध्यक्षरभेदाः

अथवा 'उपलब्धिः' उपलब्ध्यक्षरं 'द्विविधं' द्विप्रकारम्, तद्यथा—'सामान्येन विशेषेण च' सामान्यलब्ध्यक्षरं विशेषलब्ध्यक्षरं चेति भावः । तत्र 'प्रथमिका' सामान्योपलब्धिः—सामान्योपलब्ध्यक्षरं अभेदम्, सामान्ये भेदाभावात् । इहोपलब्धिरनुपलब्ध्यपेक्षा, ततस्तस्या अपि प्ररूपणा कर्त्तव्येत्यत आह—'त्रिविधा' त्रिप्रकाराऽनुपलब्धिः । या पुनः 'द्वितीया' विशेषोपलब्धिः—विशेषोपलब्ध्यक्षरं सा पञ्चप्रकारा ॥ ४५ ॥ तानेव त्रीन् पञ्च च भेदानाह—

**अच्चंता सामन्ना, य विस्सुती होइ अणुवलद्धीओ ।**
**सारिक्ख विवक्खोभय, उवमाऽऽगमतो य उवलद्धी ॥ ४६ ॥**

अनुपलब्धित्रिकं विशेषोपलब्धिपञ्चकं च

अनुपलब्धिरेवं त्रिधा भवति । तद्यथा—'अत्यन्ताद्' एकान्तेनानुपलब्धिः सामान्याद् विस्मृतेश्च । उपलब्धिरपि पञ्चप्रकारैवम्—सादृक्षतो विपक्षतः 'उभयतः' उभयधर्मदर्शनत औपम्यत आगमतश्च ॥ ४६ ॥ तत्र प्रथमतोऽत्यन्तानुपलब्धिमाह—

---

१ **यउ(यत्त)दुक्कं व्य°** भा० डे० ॥ २ **अत्ताभि°** ता० ॥ ३ **य** ता० ॥ ४ **तस्स** ता० कां० विना ॥ ५ "वज्राकृतिर्मकारः" इति **चूर्णौ** । "कस्मिंश्चिल्लिपिविशेषेऽर्धचन्द्राकृतिष्टकारः, घटाकृतिष्ठकारः" इति **विशेषावश्यकटीकायां** पृ. २५६ मलधारी **हेमचन्द्रसूरिः** ॥ ६ "यथा **पुष्करसार्यां** लिप्यां वज्रमित्यादि" **इति चूर्णौ** ॥ ७ नाऽत्रेन्द्रियक्रमभेदः कारणिकः किन्तु स्वाभाविकः ॥ ८ **सामाम** ता० ॥ ९ **बीया** ता० ॥

अत्यन्ता-नुपलब्धिः

**अत्थस्स दरिसणम्मि वि, लद्धी एगंततो न संभवइ ।**
**दट्ठुं पि न याणंते, बोहिय पंडा फणस सत्तू ॥ ४७ ॥**

**अर्थस्य** दर्शनेऽपि कस्यचित्तदर्थविषया 'लब्धिः' अक्षराणां लब्धिरेकान्ततो न सम्भवति । तथा च '**बोधिकाः**' पश्चिमदिग्वर्तिनो म्लेच्छाः पनसं दृष्ट्वाऽपि 'पनसः' इत्येवं न जानते, तेषां पनसस्याऽत्यन्तपरोक्षत्वात्, न हि तद्देशे पनसः सम्भवति । तथा '**पाण्डाः**' पाण्डुमथुरावासिनः सक्तून् दृष्ट्वाऽपि 'सक्तवोऽमी' इति न जानते, तेषां हि सक्तवोऽत्यन्तपरोक्षाः, ततो न तद्दर्शनेऽपि तदक्षरलाभः ॥ ४७ ॥ सम्प्रति सामान्यादनुपलब्धिमाह—

सामान्या-दनुप-लब्धिः

**अत्थस्स[2] उग्गहम्मि वि[3], लद्धी एगंततो न संभवति ।**
**सामन्ना बहुमज्झे, मासं पडियं जहा दट्ठुं ॥ ४८ ॥**

अर्थस्यावग्रहेऽपि तदन्येनार्थेन 'सामान्यात्' सादृश्यादेकान्ततः 'लब्धिः' अक्षरलब्धिर्न सम्भवति । यथा बहुमध्ये पतितं माषं दृष्ट्वाऽपि तदन्येन सामान्यान्न तदक्षरे लभते ॥ ४८ ॥

विस्मृतेरनुपलब्धिमाह—

विस्मृते-रनुप-लब्धिः

**अत्थस्स वि[4] उवलंभे, अक्खरलद्धी न होइ सव्वस्स ।**
**पुव्वोवलद्धमत्थे, जस्स उ नामं न संभरति ॥ ४९ ॥**

अर्थस्य पूर्वं पश्चाच्चोपलम्भेऽपि सर्वस्य 'अक्षरलब्धिः' तद्विषयाऽक्षरलब्धिर्न सम्भवति । कस्य न भवति ? इत्यत आह—यस्याऽर्थे विवक्षितार्थविषयं पूर्वोपलब्धं नाम न संस्मरति ॥ ४९ ॥

तदेवमुक्ता त्रिविधाऽप्यनुपलब्धिः । अधुना सादृक्षतो विपक्षतश्चोपलब्धिमाह—

सादृक्ष-तो विप-क्षतश्चो-पलब्धिः

**सारिक्ख-विवक्खेहि य, लभति परोक्खे[5] पि अक्खरं कोइ ।**
**सबलेर-बाहुलेरा, जह अहि-नउला य अणुमाणे ॥ ५० ॥**

कश्चित् परोक्षेऽप्यर्थे दृश्यमानार्थसादृश्यादक्षरं लभते, यथा 'शाबलेय-बाहुलेयाः' शाबलेय-बाहुलेयाक्षराणि । तथाहि—कश्चित् शाबलेयं दृष्ट्वा तत्सादृश्यात् परोक्षेऽपि बाहुलेये तदक्षराणि लभते 'ईदृशो बाहुलेयः' इति । तथा कश्चिद् वैपक्ष्येण परोक्षेऽर्थे तदक्षरं लभते, यथा—अहिदर्शनान्नकुलानुमाने नकुलदर्शनाद्वा सर्पानुमाने ॥ ५० ॥

सम्प्रत्युभयधर्मदर्शनत उभयाक्षरलब्धिमाह—

उभय-धर्मद-र्शनत उपल-ब्धिः

**एगत्थे उवलद्धे, कम्मि वि उभयत्थ पच्चओ होइ ।**
**अस्सतरि[6] खर-ऽस्साणं, गुल-दहियाणं सिहरिणीए ॥ ५१ ॥**

'कस्मिंश्चिद्' उभयधर्मयोगिनि उभयावयवयोगिनि वा एकस्मिन्नर्थे उपलब्धे उभयत्र परोक्षे 'प्रत्ययः' तदक्षरलाभो भवति । यथा 'अश्वतरे' वेगसरे दृष्टे खरस्याऽश्वस्य च प्रत्ययः—तदक्षरलाभः । यथा वा शिखरिण्यामुपलब्धायां गुड-दध्नोः प्रत्ययः—गुड-दध्यक्षरलाभः ॥ ५१ ॥

औपम्यत उपलब्धिमाह—

---

१ पणस° ता० ॥ २ °स्सुवग्ग° भा० डे० । °स्स उवग्ग° मो० कां० छे० ॥ ३-४ य ता० ॥ ५ °क्खेण वि ल° ता० ॥ ६ °तरे खरऽस्साणं ता० विना ॥

औपम्यत उपलब्धिः

**पुव्वं पि अणुवलद्धो, घिप्पइ अत्थो उ कोइ ओवम्मा ।**
**जह [1]गोरेवं गवयो, किंचिविसेसेण परिहीणो ॥ ५२ ॥**

पूर्वमनुपलब्धोऽपि कोऽप्यर्थ औपम्याद् गृह्यते, यथा गौरेवं गवयः, नवरं किञ्चिद्विशेषेण परिहीनः, कम्बलकविरहित इत्यर्थः । अत्रेयं भावना–'यथा गौस्तथा गवयः' इति श्रुत्वा कालान्तरेणाटव्यां पर्यटन् गवयं दृष्ट्वा 'गवयोऽयम्' इति यदक्षरजातं लभते एषा औपम्योपलब्धिः ॥ ५२ ॥ इदानीमागमत उपलब्धिमाह—

आगमत उपलब्धिः

**अत्तागमप्पमाणेण अक्खरं किंचि अविसयत्थे वि ।**
**भवियाऽभविया कुरवो, नारग दियलोय मोक्खो य ॥ ५३ ॥**

आप्ताः–सर्वज्ञाः तत्प्रणीत आगम आप्तागमः, स एव प्रमाणमाप्तागमप्रमाणम्, तेन अविषयेऽप्यर्थे किञ्चिदक्षरं लभते । यथा–भव्योऽभव्यो देवकुरव उत्तरकुरवो नारका देवलोको मोक्षः, चशब्दादन्ये च भावाः । इयमत्र भावना–आप्तागमप्रामाण्यवशात् तस्मिंस्तस्मिन् वस्तुनि योऽक्षरलाभः, यथा–भव्य इति अभव्य इति देवकुरव इत्यादि, सा आगमोपलब्धिः ॥ ५३ ॥

एषा सर्वाऽप्युपलब्धिः संज्ञिनां भवति, असंज्ञिनां तु का वार्त्ता ? इत्यत आह—

असंज्ञिनामक्षरानुपलब्धिः

**ओस[2]न्नेण असन्नीण अत्थलंभे वि अक्खरं नत्थि ।**
**अत्थो च्चिय सन्नीणं, तु अक्खरं निच्छए भयणा ॥ ५४ ॥**

असंज्ञिनाम् 'अर्थलाभेऽपि' अर्थदर्शनेऽपि 'उत्सन्नेन' एकान्तेन 'नास्त्यक्षरं' नैवाक्षरलाभः । तथाहि–शङ्खशब्दं श्रुत्वाऽपि न तेषामेषा लब्धिरुपजायते, यथा 'अयं शङ्खशब्दः' इति । एवं शेषेन्द्रियेष्वपि भावनीयम् । संज्ञिनां पुनः 'अर्थ एवाक्षरं' अर्थोपलम्भकाल एवाक्षरलाभः, यथा शङ्खशब्दश्रवणकाल एव 'शङ्खशब्दः' [3]इति । 'निश्चये पुनः भजना' 'शङ्खशब्द एवायम्, शार्ङ्गशब्द एवायम्' इति वा निश्चयगमनं स्याद्वा न वा । एवं शेषेन्द्रियेष्वपि भावनीयम् ॥ ५४ ॥

गतं लब्ध्यक्षरम्, अधुना व्यञ्जनाक्षरमाह—

व्यञ्जनाक्षरम्

**अत्थाभिवंजगं वंजणक्खरं इच्छितेतरं वदतो ।**
**रूवं व पगासेणं, [4]वंजेंति अत्थो [5]जेओ तेणं ॥ ५५ ॥**

इह यद् विवक्षितं तदेव यदि वदति, यथा 'अश्वं भणिष्यामि' इति तदेव ब्रूते, तदा तद् ईप्सितम् । अन्यद् वि[6]वक्षित्वाऽन्यच्चेदुच्चरति तदा तद् 'इतरद्' अनीप्सितम् । ईप्सितमितरद्वा वदतो यद् अर्थाभिव्यञ्जकमभिधानं तद् व्यञ्जनाक्षरम् । अथ कस्माद् व्यञ्जनाक्षरमुच्यते ? नाऽभिधानाक्षरम् ? अत आह–'रूपमिव' घटादिकमिव 'प्रकाशेन' दीपादिना तमसि वर्त्तमानम् 'अर्थः' घटादिः 'यतः' यस्माद् 'व्यज्यते' प्रकटीक्रियते 'तेन' कारणेन व्यञ्जनाक्षरमित्युच्यते ॥ ५५ ॥

व्यञ्जनाक्षरस्य भिन्नभिन्नप्रकारैः द्वैविध्यम्

**तं पुण जहत्थनियतं, अजहत्थं वा वि वंजणं दुविहं ।**
**एगमणेगपरि[7]ययं, एमेव य अक्खरेसुं पि ॥ ५६ ॥**

१ गो एवं ता० ॥ २ उस्सन्ने° ता० ॥ ३ इत्यादि कां २ ॥ ४ वज्जति ता० विना ॥ ५ जओ ता० ॥ ६ अत्र "विवक्ष्य" इति स्याच्चेत् साधु ॥ ७ परिगयं ता० विना ॥

**सक्कय-पाययभासाविणिजुत्तं देसतो अणेगविहं ।**

**अभिहाणं अभिधेयातो होइ भिण्णं अभिण्णं च ॥ ५७ ॥**

'तत् पुनः' व्यञ्जनं द्विविधम्—यथार्थनियतमयथार्थं वा । यथार्थनियतं नाम अन्वर्थयुक्तम्, यथा—क्षपयतीति क्षपणः, तपतीति तपन इत्यादि । अयथार्थं यथा—नेन्द्रं गोपयति तथापीन्द्रगोपकः, न पलमश्नाति तथापि पलाश इत्यादि । अथवा तद् व्यञ्जनं द्विधा—एकपर्यायमनेकपर्यायं च । एकः पर्यायः—अभिधेयो यस्य तदेकपर्यायम्, यथा—अलोकः स्थण्डिलमित्यादि, अलोकशब्देन ह्यलोकत्वलक्षण एक एव पर्यायोऽभिधीयते, स्थण्डिलशब्देन स्थण्डिलत्वमेकमिति । अनेके पर्यायाः—अभिधेया यस्य तदनेकपर्यायम्, यथा—जीव इति, जीवशब्देन हि जीवोऽप्युच्यते सत्त्वोऽपि प्राण्यपि भूतोऽपि च, जीवादयश्च प्रतिनियतविशेषाः । तथा चोक्तम्—

प्राणा द्वि-त्रि-चतुः प्रोक्ताः, भूताश्च तरवः स्मृताः ।
जीवाः पञ्चेन्द्रिया ज्ञेयाः, शेषाः सत्त्वा उदीरिताः ॥

ततो भवति सामान्येन जीवशब्दस्यानेकपर्यायाभिधायकत्वमिति । 'एवमेव' एका-ऽनेकभेदेनाक्षरेष्वपि द्रष्टव्यम् । तद्यथा—द्विविधं व्यञ्जनम्, एकाक्षरमनेकाक्षरं च । एकाक्षरं धीः श्रीरित्यादि, अनेकाक्षरं वीणा लता माला इत्यादि ॥ ५६ ॥

अथवा द्विप्रकारम्—संस्कृतभाषाविनिर्युक्तम्, यथा—वृक्ष इति, प्राकृतभाषाविनिर्युक्तं च, यथा—रोक्खो इति । 'देशतः' नानादेशानाश्रित्यानेकविधम्, यथा—**मगधानाम्** ओदनः, **लाटानां** कूरः, **द्रमिलानां** चौरः, **अन्ध्राणाम्** इडाकुरिति । तथा तद् 'अभिधानं' व्यञ्जनाक्षरम् अभिधेयाद् भिन्नमभिन्नं च । तत्र भिन्नं प्रतीतम्, तादात्म्याभावात् ॥ ५७ ॥

तमेव तादात्म्याभावमाह—

व्यञ्जनाक्षरस्याभिधेयाद् भिन्नाभिन्नत्वम्

**खुर-अग्गि-मोयगोच्चारणम्मि जम्हा उ वयण-सवणाणं ।**

**ण वि छेदो ण वि दाहो, णं वि पूरण तेण भिण्णं तु ॥ ५८ ॥**

यस्मात् क्षुरशब्दोच्चारणेऽग्निशब्दोच्चारणे मोदकशब्दोच्चारणे च यथाक्रमं वदतो वदनस्य शृण्वतः श्रवणस्य न च्छेदो नाऽपि दाहो नाऽपि पूरणम्, अतो ज्ञायतेऽभिधेयादभिधानं भिन्नम्, अन्यथा तादात्म्यसम्बन्धात् क्षुरादयोऽपि तत्र सन्तीति वदनस्य श्रवणस्य च च्छेदादिप्रसङ्गः ॥ ५८ ॥ अभिन्नत्वं नाम सम्बद्धत्वम्, तथा च लोकेऽप्यभिन्नशब्दः सम्बद्धवाची व्यवह्रियते, यथा—अयमस्माकं खादन-पानेनाऽभिन्नः, सम्बद्ध इत्यर्थः । ततस्तदेव सम्बद्धत्वं भावयति—

**जम्हा उ मोयगे अभिहियम्मि तत्थेव पच्चओ होइ ।**

**ण य होइ सो अणत्ते, तेण अभिण्णं तदत्थातो ॥ ५९ ॥**

यस्मान्मोदकेऽभिहिते 'तत्रैव' मोदके प्रत्ययो भवति नाऽन्यत्र । न च 'सः' नियमेन तत्र प्रत्ययः 'अन्यत्वे' असम्बद्धत्वे सति भवति, सम्बन्धाभावतो नियामकाभावेनाऽन्यत्रापि तत्प्रत्ययप्रसक्तेः । 'तेन' कारणेन ज्ञायते 'तद्' अभिधानम् 'अर्थादभिन्नम्' अर्थेन सह वाच्य-वाचकभावसम्बद्धम् ॥ ५९ ॥

१ ण पूरणं तेण ता० ॥ २ य ता० ॥ ३ इ ता० ॥ ४ °त्थाओ ता० ॥

व्यञ्जनाक्षराणां स्वपरपर्यायाः तेषां परस्परं सम्बद्धासम्बद्धत्वं च

**एक्केक्कमक्खरस्स उ, सप्पज्जाया हवंति इयरे य ।**
**संबद्धमसंबद्धा, एक्केका ते भवे दुविहा ॥ ६० ॥**

व्यञ्जनस्य यान्यक्षराणि तस्याक्षरस्यैकैकस्य द्विविधाः पर्यायाः, तद्यथा—स्वपर्यायाः 'इतरे च' परपर्यायाः । तत्र अवर्णस्त्रिधा—ह्रस्वो दीर्घः प्लुतश्च, पुनरेकैकस्त्रिधा—उदात्तोऽनुदात्तः स्वरितश्च, पुनरेकैको द्विधा—सानुनासिको निरनुनासिकश्च, एवमष्टादशप्रकारो अवर्णः । उक्तञ्च—

ह्रस्व-दीर्घ-प्लुतत्वाच्च, त्रैस्वर्योपनयेन च ।
अनुनासिकभेदाच्च, सङ्ख्यातोऽष्टादशात्मकः ॥

(ग्रन्थाग्रम्—१००) एते अवर्णस्य स्वपर्यायाः । तथा ये एकैकाक्षरसंयोगतो द्विव्यक्षरसंयोगत एवं यावन्तो घटन्ते संयोगास्तावत्संयोगवशतो येऽवस्थाविशेषा ये च तत्तदर्थाभिधायकत्वस्वभावास्तेऽपि तस्य स्वपर्यायाः । इतरे च तत्रासन्तः परपर्यायाः । एवमिवर्णादीनामपि स्वपर्यायाः परपर्यायाश्च वक्तव्याः । येऽपि परपर्यायास्तेऽपि तस्येति व्यपदिश्यन्ते, व्यवच्छेद्यतया तेषां तद्विशेषकत्वात्, यथा—अयं मे पर इति । 'ते च' स्वपर्यायाः परपर्यायाश्च ऐकैके द्विविधा भवन्ति, तद्यथा—सम्बद्धा असम्बद्धाश्च ॥ ६० ॥ एतदेव भावयति—

**अत्थित्ते संबद्धा, होंति अकारस्स पज्जया जे उ ।**
**ते चेव असंबद्धा, णत्थित्तेणं तु सव्वे वि ॥ ६१ ॥**

ये अकारस्य 'पर्यायाः' स्वपर्यायास्ते तत्रास्तित्वेन सम्बद्धा भवन्ति । नास्तित्वेन पुनस्त एव सर्वेऽप्यसम्बद्धाः, तत्र तेषां नास्तित्वाभावात् ॥ ६१ ॥

**एमेव असंता वि उ, णत्थित्तेणं तु होंति संबद्धा ।**
**ते चेव असंबद्धा, अत्थित्तेणं अभावत्ता ॥ ६२ ॥**

'एवमेव' अनेनैव प्रकारेण असन्तः परपर्याया अपि नास्तित्वेन भवन्ति सम्बद्धाः, ते चैव परपर्याया अस्तित्वेनासम्बद्धाः, तेषामस्तित्वस्य तत्राभावत्वात् ॥ ६२ ॥ अत्रैव निदर्शनमाह—

**घडसद्दे घ-ड-ऽकारा, हवंति संबद्धपज्जया एते ।**
**ते चेव असंबद्धा, हवंति रहसद्दमादीसु ॥ ६३ ॥**

[3]घटशब्दे ये घकार-टकारा-ऽकारास्तेषां ये पर्यायास्त एते भवन्ति तत्रास्तित्वेन सम्बद्धाः, तेषां तत्र विद्यमानत्वात् । त एव घकार-टकारा-ऽकारपर्याया रथशब्दादिषु भवन्त्यस्तित्वेनाऽसम्बद्धाः, तेषां तत्राऽभावात् । तदेवमस्तित्वेन स्वपर्यायास्तत्र सम्बद्धाः अन्यत्र चाऽसम्बद्धा उपदर्शिताः । एतदुपदर्शने चैतदर्थादापन्नम्—ते स्वपर्यायास्तत्र नास्तित्वेनाऽसम्बद्धाः, अन्यत्र तु सम्बद्धाः । तथा ये रथशब्दस्य स्वपर्यायास्ते तत्रास्तित्वेन सम्बद्धाः, तेषां तत्र विद्यमानत्वात्, घटशब्देनाऽसम्बद्धाः, तेषां तत्रासत्त्वात् । त एव च रथशब्दे नास्तित्वेनाऽसम्बद्धाः, घटशब्दे तु सम्बद्धा इति ॥ ६३ ॥ तदेवं स्वपर्यायाः परपर्यायाश्च प्रत्येकं सम्बद्धा असम्बद्धाश्च निदर्शिताः । अधुना स्वपर्यायान् दर्शयति—

---

१ °या य होंति इतरे या ता० ॥ २ एकैकं भा० ॥ ३ "घडसद्दे० गाधा । घडसद्दे त्ति घडाभिधाणे घकार-डकारा संबद्धपज्जव त्ति घटेऽभिधेये । ते चेव त्ति घकार-डकारा असंबद्धा रहसद्दमादीसु रहस्साभिधेयादिसु ॥" इति चूर्णिः ॥

**संजुत्ता-ऽसंजुत्तं, इय लभते जेसु जेसु अत्थेसु ।**
**विणिओगमक्खरं ते, सि होंति सब्भावपज्जाया ॥ ६४ ॥**

'इति' एवं घटशब्द-रथशब्दादिगतेन प्रकारेण संयुक्तमसंयुक्तं वा 'अक्षरम्' अकारादिकं येषु येष्वर्थेषु विनियोगं लभते ते तेषां 'सद्भावपर्यायाः' स्वपर्याया भवन्ति । अर्थादिदमायातम्—अपरे परपर्याया इति ॥ ६४ ॥

अक्षरस्य प्रमाणम् तत्स्वरूपनिरूपणार्थं चाकाशस्य गुरु-लघु-गुरुलघु-अगुरुलघुपर्यायाणां निरूपणम्

तदेवमभिहितं व्यञ्जनाक्षरम्, तदभिधानाच्चाभिहितं त्रिविधमप्यक्षरम् । तत्र न केवलमप्यक्षरं संज्ञाक्षराद्युच्यते किन्तु ज्ञानमपि । तत्र शिष्यः प्रश्नयति—कियत्प्रमाणं तदक्षरम् ? उच्यते, सर्वाकाशप्रदेशेभ्योऽनन्तगुणम् । कथमेतावत्प्रमाणम् ? उच्यते—इहैकैक आकाशप्रदेशः खल्वनन्तैरगुरुलघुपर्यायैः संयुक्तः, ते च सर्वेऽप्यगुरुलघुपर्याया ज्ञानेन ज्ञायन्ते; न च येन स्वभावेनैको ज्ञायते तेनापरोऽपि, तयोरेकत्वप्रसङ्गात्, किन्त्वन्येन स्वभावेन, ततो यावन्तोऽगुरुलघुपर्यायास्तावन्तो ज्ञानस्वभावाः; उक्तञ्च—

जावइय पज्जवा ते, तावइया तेसु नाणभेया वि ।

इति भवति सर्वाकाशप्रदेशेभ्योऽनन्तगुणम् । आह च बृहद्भाष्यम्—

अक्खरमुच्चइ नाणं, तं पुण होज्जाहि किंपमाणं तु ? ।
भण्णइ अणंतगुणियं, सव्वागासप्पएसेहिं ॥
किह होइ अणंतगुणं, सव्वागासप्पदेसरासीतो ? ।
भन्नइ जं एक्केक्को, आगासस्सा पदेसो उ ॥
संजुत्तोऽणंतेहिं, अगुरुलघुपज्जवेहिं नियमेण ।
तेण उ अणंतगुणियं, सव्वागासप्पएसेहिं ॥

पुनरपि शिष्यः प्राह—कथमेतदवसीयते 'एकैक आकाशप्रदेशोऽनन्तैरगुरुलघुपर्यायैरुपेतः' ? उच्यते—इह द्विविधं वस्तु, रूपिद्रव्यमरूपिद्रव्यं च । तत्र रूपिद्रव्यं चतुर्द्धा, तद्यथा—गुरु लघु गुरुलघु अगुरुलघु च । एतदप्युच्यते व्यवहारतः, निश्चयतः पुनर्द्विविधमेव गुरुलघु अगुरुलघु च । तथा चाह—

पुद्गलास्तिकायमाश्रित्य गुरु-लघ्वादिपर्यायाणां विचारः

**णिच्छयतो सव्वगुरुं, सव्वलहुं वा ण विज्जते दव्वं ।**
**ववहारतो तु जुज्जति, बादरखंधेसु णऽण्णेसु ॥ ६५ ॥**

'निश्चयतः' निश्चयनयमतेन न किञ्चिद् द्रव्यं 'सर्वगुरु' एकान्तगुरु, यदि स्यादेकान्तगुरु ततः एकान्तेनैव पतनधर्मि स्यात्, न च पतति, तस्मान्न विद्यते सर्वगुरु; नाऽपि 'सर्वलघु' एकान्तलघु, यदि स्यादेकान्तलघु ततो न कदाचित् पतति, अथ कदाचित् पतति तस्मान्न सर्वलघ्वपि । 'व्यवहारतः' व्यवहारनयमतेन पुनर्युज्यते सर्वगुरु सर्वलघु च । केषु ? इत्याह—'बादरस्कन्धेषु' बादरत्वपरिणामपरिणतेष्वनन्तप्रादेशिकेषु स्कन्धेषु, 'नान्येषु' सूक्ष्मपरिणामप-

---

१ से हुंति सभाव° ता० ॥ २ "संजुत्त त्ति द्व्यक्षरादि अभिधाणं, जहा—कण्णा मीणा (वीणा प्र०) इत्यादि । असंजुत्तं एगक्खरमभिधाणं, जहा—धीः श्रीरित्यादि । इय त्ति एवं लभति त्ति पावति भावेसु त्ति अभिधेयेसु विणियोगम्ति अभिधानत्वम्, ते से होंति सब्भावपज्जाया संबद्धा इति वाक्यशेषः ॥" इति चूर्णी ॥ ३ °लघुत्वात् ततो कां० मो० ॥

रिष्यतेषु । तत्र गुरु द्रव्यं यथा—अयस्पिण्डः, लघु[1] यथा—अर्कतूलम्, गुरुलघु यथा—वायुः, अगुरुलघु परमाण्वादि । निश्चयतः[2] पुनरेवं द्विविधद्रव्यभावना—परमाण्वादेरारभ्य सङ्ख्यातप्रदेशात्मकोऽसङ्ख्यातप्रदेशात्मको यश्चानन्तप्रदेशात्मकः सूक्ष्मस्कन्धः कार्मणप्रभृतिक एते अगुरुलघवः, बादराः स्कन्धा औदारिक-वैक्रिया-ऽऽहारक-तैजसरूपा गुरुलघवः । सम्प्रति गुरुलघुद्रव्याणामगुरुलघुद्रव्याणां चाऽल्पबहुत्वेन वर्गणाश्चिन्त्यन्ते—तत्र बादरस्कन्धेषु जघन्य-मध्यमो-त्कृष्टभेदभिन्नेष्वेकोत्तरवृद्ध्या प्रवर्धमाना[3] वर्गणा अनन्ता भवन्ति, ताश्च तावद् द्रष्टव्या यावत् सर्वोत्कृष्टो बादरस्कन्धः ॥ ६५ ॥

**तत्तो य वग्गणाओ, सुहुमाण भवंतऽणंतगुणियाओ ।**
**परमाणूण य एक्का, संखे संखेयरेऽसंखा ॥ ६६ ॥**

'ताभ्यः' समस्तबादरस्कन्धगताभ्यो वर्गणाभ्यः 'सूक्ष्माणाम्' सूक्ष्मानन्तप्रदेशकस्कन्धानामनन्तगुणिता वर्गणाः । तथा परमाणूनां समस्तानामेका वर्गणा । 'संखे संखे'त्ति सङ्ख्येयप्रदेशेषु द्व्यादिप्रभृति उत्कृष्टं सङ्ख्यातं यावत्सङ्ख्याताः, सङ्ख्यातस्य सङ्ख्यातभेदभावात् । 'इतरस्मिन्' असङ्ख्येयप्रदेशेऽसङ्ख्येया वर्गणाः, असङ्ख्यातस्याऽसङ्ख्यातभेदभिन्नत्वात् ॥ ६६ ॥

**ईय पोग्गलकायम्मी, सव्वत्थोवा उ गुरुलहू दव्वा ।**
**उभयपडिसेहिया पुण, अणंतकप्पा बहुवियप्पा ॥ ६७ ॥**

'ईति' एवमुपदर्शितेन प्रकारेण 'पुद्गलकाये' पुद्गलास्तिकाये गुरुलघुद्रव्याणि सर्वस्तोकानि । 'उभयप्रतिषेधितानि' सञ्जातगुरुलघुप्रतिषेधितानि अगुरुलघूनीत्यर्थः पुनर्द्रव्याणि 'अनन्तकल्पानि' अनन्तभेदानि । तत्रानन्तभेदत्वं गुरुलघुद्रव्येष्वप्यस्ति, तत आह—'बहुविकल्पानि' विकल्पातिशयेन बहुभेदानि ॥ ६७ ॥

रूपिद्रव्यगतगुरुलघ्वादिपर्यायाणामल्पबहुत्वम्

सम्प्रति पर्यायपरिमाणमल्पबहुत्वेन चिन्त्यते—इह पञ्च राशयः क्रमेण स्थाप्यन्ते, तद्यथा—परमाणुराशिः सङ्ख्यातप्रदेशकस्कन्धराशिः असङ्ख्यातप्रदेशकस्कन्धराशिः सूक्ष्मानन्तप्रदेशकस्कन्धराशिः बादरानन्तप्रदेशकस्कन्धराशिश्च । तत्र बादरानन्तप्रदेशस्कन्धराशौ योऽन्तिमः स-

---

१ "लघु यथा—उलूकपत्रम् । गुरुलघु यथा—वायुः । अगुरुलघु आकाशम्" इति चूर्णौ ॥

२ "निश्चयात्तु गुरु-लघवः सर्वे पुद्गलाः, यस्मात् परमाणोरपि गुरु-लघुभावो विद्यते । कथम् ? यदि तस्यैकान्तेन गुरुभावो न स्यात् ततोऽनन्तपरमाणुसमवायेऽपि गुरुत्वं न स्यात्, ततश्चासत्कार्यप्रसङ्गः, असत्कार्ये च वैशेषिकादिसिद्धान्तप्रसङ्गः, यस्मादमी दोषास्तस्मात् परमाणौ गुरुत्वं विद्यते । एवं लघुत्वमपि । अगुरुलघवश्च सर्वेऽमूर्तास्तिकायाः । अतो आवेक्खिता पसिद्धी एतेसिं ॥" इति चूर्णौ ॥

३ एतद्गाथानन्तरं चूर्णिकृद्भिः "पोग्गलत्थिकायगुरुलहुपज्जवाणं परिमाणं भण्णति" इत्यवतीर्य "ते गुरुलहु०" गाथा ६८ तथा टीकाकृद्भिरनादृता "णंतपएसाणं०" इति गाथा व्याख्याताऽस्ति । दृश्यतां चतुर्विंशतितमे पत्रे टिप्पणी ३ ॥ ४ °णूणं य° ता० ॥ ५ इति पो° ता० ॥

६ "इति पोग्गल० गाधा । उभयपडिसेधिया णाम अगुरुलहू, ते णयमयाउ अत्थि अवसिद्धंते, इह ण भणिया चुण्णिकारेण, सिद्धंते य "बादरमिह गुरुलहुयं, अगुरुलहुं सेसयं सव्वं ।" इह पुण पगए बादरीहोंताणं पोग्गलाणं गुरुपज्जाया वड्ढंति लहुपज्जाया हायंति, सुहुमीहवंताण पुण लहुपज्जवा वड्ढंति गुरुपज्जाया हायंति ॥ केण० गाहा ।" इति चूर्णौ ॥

र्वोत्कृष्टो बादरस्कन्धस्तत्र बहवो गुरुलघुपर्यायाः सर्वस्तोका अगुरुलघुपर्यायाः । इह बादरस्कन्धेष्वप्यगुरुलघवः पर्यायाः सन्ति, परमुत्कलिता गुरुलघुपर्याया इति त एव तत्र शेषकालं गण्यन्ते । सम्प्रति तु वस्तुस्थितिश्चिन्त्यते इत्यल्पबहुत्वचिन्तायां ते चिन्तिताः । तस्मात्सर्वोत्कृष्टाद् बादरस्कन्धाद् येऽधस्तना बादरस्कन्धास्तेषु गुरुलघुपर्यायाः क्रमेणानन्तगुणहान्या द्रष्टव्याः, अगुरुलघुपर्यायाः पुनरनन्तगुणवृद्ध्या । एवं च तावज्ज्ञातव्यं यावत्सर्वजघन्यो बादरस्कन्धः । उक्तञ्च—

परमाणु संखऽसंखा, सुहुमाणंताण बायराणं च ।
एएसिं रासीतो, कमेण सव्वे ठवेऊणं ॥
तेसिं जो अंतिमओ, सव्वुक्कोसो य बायरो खंधो ।
तस्स बहू गुरुलहुया, अगुरुलहू पज्जवा थोवा ॥
तत्तो हिट्ठाहुत्ता, अणंतहाणीएँ गुरुलहू नेया ।
अगुरुलहू वुड्ढीए, एवं ता जाव उ जहन्नो ॥

एतदेवाह—

**ते गुरुलहुपज्जाया, पण्णाछेदेण वोकसित्ताणं ।**
**जा बायरो जहण्णो, अणंतहाणीए हायंता ॥ ६८ ॥**

[3]ते गुरुलघुपर्यायाः प्रज्ञाच्छेदनकेनाऽगुरुलघुपर्यायेभ्यः 'व्युत्कृष्य' पृथक् कृत्वा सर्वोत्कृष्टाद् बादरस्कन्धादधस्तनेषु बादरस्कन्धेष्वनन्तगुणहान्या हीयमानास्तावद्द्रष्टव्या यावज्जघन्यो बादरस्कन्धः, अगुरुलघुपर्यायास्तु क्रमेणानन्तगुणवृद्ध्या प्रवर्धमानाः । ततः परं सूक्ष्मानन्तप्रदेशादिषु स्कन्धेषु केवला अगुरुलघुपर्याया एव क्रमेणानन्तगुणवृद्ध्या प्रवर्धमाना द्रष्टव्याः, ते च तावद् यावत् परमाणवः । उक्तञ्च—

तेण परं सुहुमाओ, अणंतवुड्ढीएँ नवर वड्ढंता ।
अगुरुलहो च्चिय केवल, जा परमाणू य ता नेया ॥ ॥ ६८ ॥

---

१ °**बहुचिन्ता**° कां २ भा० ॥ २ **थूरदव्विएसु जाव तु, अणंतहाणीय परमाणू** इत्युत्तरार्धं ता० । **चूर्णिकृतै**ष एव पाठ आदृतः । दृश्यतां टिप्पणी ३ ॥

३ गाथेयं **चूर्णिकृतै**वं व्याख्याता–"ते गुरु० गाधा । ते गुरुपज्जाया लघुपज्जाया य प्रज्ञाच्छेदेन अवणिज्जंति थूलदविएहिं आढवेत्ता जाव परमाणू । थूला–बादरपरिणता अणंतपदेसिता खंधा, तेसिं गुरुपज्जाएहिंतो लघुपज्जाया अणंतगुणहीणा । तदणंतरा सुहुमपरिणया अणंतपएसिया खंधा, तेसिं बादरपरिणताणंतपएसियखंधलघुपज्जाएहिंतो अणंतगुणहीणा गुरुपज्जाया, तग्गुरुपज्जाएहिंतो य अणंतगुणवड्ढिया लहुपज्जाया । एवं जहा जहा सुहुमा तहा तहा गुरुपज्जाया अणंतहाणीए हायंति, लहुपज्जाया अणंतवुड्ढीए वड्ढंति, जाव दुपएसियलहुपज्जएहिंतो अणंतगुणहीणा परमाणुगुरुपज्जाया, तग्गुरुपज्जाएहिंतो य अणंतगुणवड्ढिया लहुपज्जाया" ।

एतद्गाथानन्तरमेव **टीकाकृद्भि**रनादृता "णंतपएसाणं" इति गाथा **चूर्णौ** व्याख्याताऽस्ति । तथाहि—
"आह भणिया पोग्गलाणं गुरु-लहुपज्जायाण हाणी वुड्ढी य । एतेसिं पुण के कतो बहुया थोवा वा ? उच्यते—सव्वथोवा अणंतपएसिया खंधा—

**णंतपएसाणं पि य, सव्वत्थोवा उ बादरा खंधा ।**
**तेसिं पि वग्गणाओ, हवंति णंताओ सट्ठाणे ॥**

णंतप० गाहद्धं । ते केवतिया भेदेणं ?-तेसिं० पच्छद्धं । जहा कुविकण्णस्स गावीणं (?) ॥ तत्तो य० पुव्वद्धं" ॥

अरूपिणो धर्मास्तिकायादीनाश्रित्य अगुरुलघुपर्यायाणां विचारः

तदेवं पर्यायपरिमाणमप्यल्पबहुत्वेन चिन्तितम् । साम्प्रतमरूपिद्रव्यं चिन्त्यते । तच्चतुर्धा, तद्यथा—धर्मास्तिकायः अधर्मास्तिकायः आकाशास्तिकायः जीवास्तिकायश्च । एतेषां किम-गुरुलघुपर्यायपरिमाणम् ? अत आह—

केण हवेज विरोहो[1], अगुरुलहूपजवाण उ अमुत्ते ।
अच्चंतमसंजोगो, जेहियं पुण[2] तव्विवक्खस्स ॥ ६९ ॥

यत्र 'अमूर्त्ते' धर्मास्तिकायादौ 'तद्विपक्षस्य' गुरुलघुपर्यायजातस्य 'अत्यन्तम्' एकान्तेन 'असंयोगः' अघटना तत्रागुरुलघुपर्यायाणां केन 'विरोधः' विनाशनं भवेत् ? नैव केनचित् । ततः केनापि विनाशाभावात् सदैव प्रतिप्रदेशमनन्ता अगुरुलघुपर्यायाः ॥ ६९ ॥ तथा चाऽऽह—

एवं तु अणंतेहिं, अगुरुलहूपजवेहिं संजुत्तं ।
होइ अमुत्तं दव्वं, अरूविकायाण उ चउण्हं ॥ ७० ॥

एवं तु सति चतुर्णामपि 'अरूपिकायानाम्' अरूपिणामस्तिकायानां धर्मास्तिकायप्रभृतीनामेकैकाख्यं यदमूर्त्त(र्त्तं) द्रव्यं तद् भवति प्रत्येकमनन्तैरगुरुलघुपर्यायैः संयुक्तम् ॥ ७० ॥

तदेवं भावित एकैक आकाशप्रदेशोऽनन्तैरगुरुलघुपर्यवैरुपेतः । सम्प्रति यथा ज्ञानं सर्वाकाशप्रदेशेभ्योऽनन्तगुणं भवति तथा दर्शयति—

उवलद्धी[3] अगुरुलहू, संजोग-सरादिणो य पजाया ।
एतेण हुंतऽणंता, सव्वागासप्पएसेहिं[4] ॥ ७१ ॥

चतुर्णामप्यस्तिकायानां पुद्गलास्तिकायस्य च ये अगुरुलघवः पर्यायाः, उपलक्षणमेतत्, बादरस्कन्धानां गुरुलघुपर्यायाश्च, यावन्तश्चाक्षरेषु स्वरूपतोऽभिलाप्यभेदतो वा संयोगाः, यैश्चोदात्तादिभिः स्वैरैरभिलप्यन्ते भावाः, आदिशब्दाद् ये चान्ये शकुनरुतादिगताः स्वरविशेषाः, ये च जीव-पुद्गलगताश्चेष्टाविशेषास्ते सर्वेऽपि गृह्यन्ते, एतेषां सर्वेषामप्युपलब्धिर्भवति । न च येन स्वभावेनैकस्य तेनैवान्यस्य किन्तु भिन्नेन । तत एतेन प्रकारेण ज्ञानस्य स्वभावाः सर्वाकाशप्रदेशेभ्योऽनन्तगुणाः ॥ ७१ ॥[5] तदेवमुक्तं सर्वाकाशप्रदेशेभ्योऽनन्तगुणं ज्ञानम् । इदानीं यथा तदक्षरमुच्यते तथा भावयति—

णाणं तु अक्खरं जेण खरति ण कयाइ तं तु जीवातो ।
तस्स उ अणंतभागो, न वरिज्जति सव्वजीवाणं ॥ ७२ ॥

---

१ निरोहो ता० । "निरुंभणं निरोहो" इति चूर्णौ ॥ २ जहेय पुण ता० ॥

३ "उवलद्धी० गाहा । उपलम्भनमुपलब्धिः ज्ञानमित्यर्थः । कस्य ? इति, अत्रोच्यते—धर्मा-धर्म-जीव-पोग्गलत्थिकाय-अद्धासमयाणं सव्वपगारेहिं उवलंभणं उपलब्धिः । अगुरुलहु त्ति सव्वागासपदेसाणं एक्केक्कस्स आगासपदेसस्स अणंता अगुरुलहुपज्जाया । संजोग त्ति ते भावा जावतिएहिं अक्खरसंजोगेहिं अभिलप्पंति त्रिकालविषये । सरादि त्ति त एव भावा उदात्तादिभिः स्वैरैरभिलप्यन्ते, आदिग्रहणाद् या चान्या काचिच्चेष्टा, शकुनरुताद्या वा स्वरा गृह्यन्ते । पर्यायशब्दः अन्तेऽभिहितः प्रतिपदमुपतिष्ठते, यथा—उपलब्धिपर्यायः, एवं सर्वत्रानेन करणेनानन्ता ज्ञानपर्यायाः सर्वाकाशप्रदेशेभ्यः ॥" इति चूर्णौ ॥

४ सव्वाकासप्पदेसेहिं ता० ॥ ५ एतद्गाथाया अनन्तरं चूर्णिकृता "अविभागेहिं" गाथा ७२ व्याख्याताऽस्ति । दृश्यतां चतुर्थास्मिन् पत्रे टिप्पणी २ ॥

'येन' कारणेन न कदाचिदपि 'तद्' ज्ञानं जीवात् 'क्षरति' अंशमुपयाति तेन कारणेन ज्ञानमक्षरमुच्यते । कथमेतदवसीयते 'न कदाचिदपि ज्ञानं जीवात् क्षरति'? इति, अत आह—'तस्य' अक्षरस्यानन्तभागोऽतिप्रबलेनापि ज्ञानावरणोदयेन संसारस्थानां सर्वजीवानां नाऽऽव्रियते । उक्तञ्च—

सव्वजीवाणं पि य णं अक्खरस्स अणंतो भागो निच्चुग्घाडिओ ( नन्दीसूत्रे सूत्र ४२ पत्र १९५ ) इति । नित्योद्घाटो नाम नित्यापावृतः ॥ ७२ ॥

केन पुनराच्छाद्यते येन ज्ञानस्यानन्तभागो नि[1]त्यापावृतः? इत्याह—

**[2]एकेको जियदेसो, णाणावरणस्स हुंतऽणंतेहिं ।**
**अविभागेहाऽऽवरितो, सव्वजियाणं जिणे मोत्तुं ॥ ७३ ॥**

'जिनान्' केवलज्ञानिनो मुक्त्वा शेषाणां सर्वजीवानाम् एकैको जीवप्रदेशो ज्ञानावरणीयस्य कर्मणोऽनन्तैः 'अविभागैः' अविभागपरिच्छेदैः, येषां ततोऽप्यधो विभागः कर्तुं न शक्यते तेऽविभागपरिच्छेदाः, तैरावृतः ॥ ७३ ॥

यद्येवं कथमनन्तभागो ज्ञानस्य नित्यापावृतः? इत्याह—

**[3]जंति पुण सो वि वरिजेज्ज तेण जीवो अजीवयं गच्छे ।**
**सुट्ठु वि मेहसमुदए, होंति पभा चंद-सूराणं ॥ ७४ ॥**

यथा 'सुष्ठ्वपि' अतिशयेनापि मेघसमुदये जाते तथास्वभावत्वात् चन्द्र-सूर्याणां प्रभा भवति, तथा प्रत्यक्षत उपलब्धेः; एवमेकैकस्य जीवप्रदेशस्यानन्तैर्ज्ञानावरणाविभागपरिच्छेदैरावरणेऽपि तथास्वभावत्वाद् ज्ञानस्यानन्तभागो नित्योद्घाटित एव । यदि पुनः सोऽ[4]प्याव्रियेत तत एकान्ततो निश्चेतनत्वाज्जीवः 'अजीवतां गच्छेत्' अजीवो भूयात्, घटवत् ॥ ७४ ॥

ननु कथमुच्यते 'अनन्तभागो नित्योद्घाटः'? यावता समस्ति पृथिव्यादीनां सर्वथा ज्ञानमावृतम्, अत आह—

**अव्वत्तमक्खरं पुण, पंचण्ह वि थीणगिद्धिसहिएणं ।**
**णाणावरणुदएणं, बिंदियमाई कमविसोही ॥ ७५ ॥**

---

१ °त्यामावृ° भा० । एवमग्रेऽपि ॥

२ गाथेयं मूलपुस्तकादर्शेष्वित्थंरूपोपलभ्यते—

**अविभागेहिँ अणंतेहिँ णाणावरणस्स एक्कमेक्को उ ।**
**होति पतेसो वरितो, सव्वजियाणं जिणे मोत्तुं ॥**

चूर्णिकृद्भिरेतदनुसारेणैव व्याख्यातम् । तथाहि—"अविभागेहिं० गाहा । अविभागेहिं ति न सक्कंति छउमत्थेणं चक्खुणा विभयितुं पलिच्छेदा इति वाक्यशेषः, अंसा भेदा उत्तरपगडीओ इत्यनर्थान्तरम् । तैरविभागैरनन्तैर्ज्ञानावरणीयस्य कर्मणः सर्वजीवानामेकैकः प्रदेश आवृतो जिनान् मुक्त्वा ॥ अक्षरमित्येतस्याभिधानस्येयं व्याख्या—णाणं तु अक्खरं० गाथा । कहमजीवत्तं गच्छेत्? अज्ञत्वात् । यश्चाज्ञः स निश्चेतनो भवति, घटवत् । तस्मात् सुष्ठ्वप्याऽऽवृतोऽसौ, न निश्चेतनः । कथम्? यथा सुट्ठु वि मेहसमुदओ ॥ आह णणु पुढविमादीणं पंचण्हं सव्वहा आवरितं णाणं? उच्यते—अव्वत्तमक्खरं० गाधा ।" इति ॥

३ गाथेयमनादृता चूर्णिकृद्भिः । दृश्यतां टिप्पणी २ ॥ ४ °प्याव्रियते तत भा० विना ॥

'पञ्चानामपि' पृथिवीकायिकादीनां वनस्पतिकायपर्यन्तानां स्त्यानगृद्धिनिद्राहितेन ज्ञानावरणोदयेन 'अक्षरं' ज्ञानम् 'अव्यक्तं' सुप्त-मत्त-मूर्च्छितादेरिवास्फुटम्, अतो न तत्रापि सर्वथा ज्ञानमावृतम्, तथापि पृथिवीकायिकानामत्यस्फुटम्, ततोऽप्कायिक-तेजस्कायिक-वायुकायिक-वनस्पतिकायिकानां क्रमेण विशुद्धतरम् । इदं [1]चूर्णिकारवचनाल्लिखितम् । ततः क्रमेण द्वीन्द्रियादावक्षरस्य विशुद्धिस्तावद्द्रष्टव्या यावदनुत्तरोपपातिनाम्, ततोऽपि चतुर्दशपूर्विणाम् ।

उक्तञ्च—

तं चिय विसुज्झमाणं, बिंदियमादी कमेण विन्नेयं ।
जा होंतऽणुत्तरसुरा, सव्वविसुद्धं तु पुव्वधरे ॥

इह यद्यपि प्रागक्षरं सर्वाकाशप्रदेशेभ्योऽनन्तगुणं केवलममिप्रेतम्, नित्यापावृतोऽप्यनन्तभागस्तस्यैव, तथापि केवलज्ञानस्येव श्रुतज्ञानस्याप्यनन्तभागो नित्यापावृत इति तेनान्ते योजना कृता ॥ ७५ ॥ उक्तमक्षरश्रुतम् । इदानीमनक्षरश्रुतमाह—

अनक्षर-श्रुतम्

**ऊ[2]ससियं नीससियं, णिच्छूढं खा[3]सियं च छीयं च ।**
**णिस्सिंघियमणुसारं, अणक्खरं छेलिआदीयं ॥ ७६ ॥**

ऊर्ध्वं श्वसनमुच्छ्वसितम्, अधः श्वसनं निःश्वसितम्, निष्ठ्यूतं कासितं क्षुतं निस्सिङ्घितं च प्रतीतम्, 'अनुस्वारम्' अनुस्वारवत्, 'शेण्टितम्' गोपजनस्य प्रतीतम् । आदिशब्दाद् जृम्भित-भणितादिपरिग्रहः । एतद् 'अनक्षरम्' अनक्षरश्रुतम् । उच्छ्वसितादिभ्योऽपि हि विवक्षितार्थ-प्रतिपत्तिर्भवति, न च तदक्षरात्मकम्, अतोऽनक्षरश्रुतम् ॥ ७६ ॥

तत्र यथाऽनक्षरादप्यर्थप्रतिपत्तिरुपजायते तथा निदर्शनेन प्रतिपादयति—

**[4]टिट्टि त्ति नंदगोवस्स बालिया वच्छए निवारेइ ।**
**[5]टिट्टि त्ति य मुद्धए, सेसे लट्ठीनिवाएणं ॥ ७७ ॥**

नन्दगोपस्य बालिका क्षेत्रादिकं रक्षन्ती 'वत्सकान्' बालगोरूपान् 'टिट्टि' इति अनुकरणानुरूपमनुकार्यमुच्चरन्ती निवारयति । तथा ये मुग्धाः-हरिणादयः तानपि 'टिट्टि' इत्येवं निवारयति । 'शेषांस्तु' षण्डप्रभृतीन् यष्टिनिपातेन निवारयति । अत्र 'टिट्टि' इत्येतदनक्षरमपि वत्सादीनां प्रतिषेधलक्षणार्थप्रतिपत्तिहेतुरुपजायत इत्यनक्षरश्रुतं निदर्शितम् । एवं शेषमपि भावनीयम् ॥७७॥

उक्तमनक्षरश्रुतम् । अधुना संज्ञिश्रुतमाह—

संज्ञ्यसंज्ञिश्रुते

**सं[6]भाणेणं सण्णी, कालिय हेऊ य दिट्ठिवाए य ।**
**आदेसा तिण्णि भवे, तेसिं च परूवणा इणमो ॥ ७८ ॥**

संज्ञानेन संज्ञी, 'संज्ञानं संज्ञा, सा यस्यास्ति स संज्ञी' इति व्युत्पत्तेः । तत्र त्रय आदेशा भवन्ति, तद्यथा—"कालिय" त्ति पदैकदेशे पदसमुदायोपचारात् कालिक्युपदेशेन हेतूपदेशेन दृष्टिवादोपदेशेन च ॥ ७८ ॥

---

१ "तं च सव्वथोवं पुढविकाइयाणं, कस्मात्? निश्चेष्टत्वात् । ततः क्रमाद् यावद् वनस्पतिकाइयाणं विसुद्धतरम् ।" इति चूर्णिः ॥ २ **उस्सासि°** ता० ॥ ३ **कासि°** ता० ॥ ४ **तिसि त्ति** ता० ॥ ५ **छच्छ त्ति** ता० ॥ ६ **संजाणणेण स°** ता० ॥

तत्र कालिक्युपदेशेन संज्ञा यस्य ईहा-ऽपोह-मार्गण-गवेषणादयो मनोव्यापारास्ते कथं भवन्ति? इत्यत आह—

कालिक्यु-पदेशेन संज्ञ्यसं-ज्ञिनो

**खंधेऽणंतपएसे, मणजोगे गिज्झ गणणतोऽणंते।**
**तल्लद्धि मणेति तहा, भासादव्वे व भासंते ॥ ७९ ॥**

यथा भाषालब्धिसमेतो भाषाद्रव्याण्युपादाय भाषते, [तथा] तस्मिन्—मनसि लब्धिर्यस्य सः 'तल्लब्धिः' मनोलब्ध्युपेतो मनोयोग्यान् स्कन्धाननन्तप्रदेशान् 'गणनया' सङ्ख्यानेनानन्तान् गृहीत्वा मनुते। किमुक्तं भवति?—तैर्मनोद्रव्यैरीहा-ऽपोह-मार्गणातस्तांस्तान् भावान् जानाति ॥७९॥

कथम्? इत्याह—

**रूवे[3] जहोवलद्धी, चक्खुमतो दंसिए पगासेण।**
**इय छव्विहमुवओगो, मणदव्वपगासिए अत्थे ॥ ८० ॥**

यथा चक्षुष्मतः 'रूपे' घटादौ 'प्रकाशेन' प्रदीपादिना 'दर्शिते' प्रकाशिते चक्षुषा उपलब्धिः 'इति' एवम्—उक्तेन प्रकारेण मनोद्रव्यैः प्रकाशिते—मनितेऽर्थे 'षड्विधः' शब्द-रूप-रस-गन्ध-स्पर्शा-ऽतीता-ऽनागतभावविषयः स्पष्टतर उपयोगो भवति। यश्च ईहा-ऽपोहादिकरणतः स्पष्टतर उपयोगः स दीर्घकालिक्युपदेशेन संज्ञिश्रुतम्। यस्य तु मनोद्रव्याभावतो नेहादि सोऽसंज्ञी ॥८०॥

अथ मनोद्रव्याभावे कथमसंज्ञिनामर्थावगमः? तत आह—

**एसेव य दिट्ठंतो, नातिफुडे खलु जहा पगासेणं[6]।**
**होउवलद्धी रूवे, असण्णीणं तहा विसए ॥ ८१ ॥**

'एष एव' चक्षुर्लक्षणो दृष्टान्तोऽसंज्ञिनोऽर्थावगमे द्रष्टव्यः। यथा खलु चक्षुष्मतो रूपे 'प्रकाशेन' प्रदीपादिना मन्दतया नातिस्फुटे प्रकाशिते उपलब्धिर्मन्दा भवति तथा 'विषये' शब्दादौ असंज्ञिनां विशिष्टमनोद्रव्यलब्ध्यभावे उपयोगो मन्दो भवति ॥ ८१ ॥

अथवाऽन्यो दृष्टान्तः—

**अहवा मुच्छित मत्ते, पासुत्ते वा वि[7] होइ उवलंभो।**
**इय होति असण्णीणं, उवलंभो इंदियां जेसिं ॥ ८२ ॥**

'अथवा' इति दृष्टान्तस्य प्रकारान्तरोपदर्शने। मूर्च्छिते मत्ते प्रसुप्ते वा यथा अव्यक्त उपलम्भो भवति 'इति' एवं यति येषामिन्द्रियाणि तेषामसंज्ञिनां ततिविध उपयोगः स्फुटो भवति ॥ ८२ ॥ अथ तुल्ये चेतनत्वे किमिति संज्ञिनां प्रागल्भ्येन चैतन्यम्? अव्यक्तमसंज्ञिनाम्? इति, अत आह—

**तुल्ले छेयणभावे, जं सामत्थं तु चक्करयणस्स।**
**तं तु जहक्कमहीणं, न होइ सरपत्तमादीणं ॥ ८३ ॥**

---

१ तओ भा° ता० ॥ २ वि ता० विना ॥ ३ रूवे होउवलद्धी चक्खुमतोवदंसि° ता० ॥ ४ "एवं सद्द-फरिस-रस-रूव-गंधेसु छट्ठो य सुमिणादिसु उवयोगो भवति मणदव्वपगासिते अत्थे" इति चूर्णौ ॥ ५ नेहा-ऽपोहादि भा० ॥ ६ पतासेणं ता० ॥ ७ वि अत्थउव° ता० ॥ ८ °याणि जइ ता०। "इय होइ असण्णीणं उवलंभो अव्वत्तो इंदियाणि जति तेसिं ततिविधो" इति चूर्णिः ॥

**एवं मणविसई[1]णं, जा पडुया होइ उग्गहाईसु[2] ।**
**तुल्ले चेयणभावे, न होइ अस्सण्णिणं सा तु ॥ ८४ ॥**

यथा तुल्ये 'छेदनभावे' छेदनत्वे यत् सामर्थ्यं चक्ररत्नस्य तद् यथाक्रमहीनं, हेतौ प्रथमा, यथाक्रमहीनत्वात् शरपत्रादीनाम्, आदिशब्दाद्दर्भादिपरिग्रहः, न भवति ॥ ८३ ॥

एवम् 'मनोविषयिणां' मनोग्राह्यो विषयो येषामस्ति ते मनोविषयिणस्तेषाम् अवग्रहादिषु या पटुता भवति सा तुल्येऽपि चेतनभावे न भवत्यसंज्ञिनाम्, मनोद्रव्यलब्ध्यभावात् ॥ ८४ ॥

उक्तः कालिक्युपदेशेन संज्ञी असंज्ञी च । अधुना हेतूपदेशतस्तमाह—

हेतुवादोपदेशेन संज्ञ्यसंज्ञिनौ

**जेसिं पवित्ति-निवित्ती, इट्ठा-ऽणिट्ठेसु होइ विसएसु ।**
**ते हेउवा[3]उ सन्नी, वे[4]हम्मेणं घडो ना[5]यं ॥ ८५ ॥**

'येषां' द्वीन्द्रियादीनां इष्टेषु विषयेषु प्रवृत्तिः अनिष्टेषु निवृत्तिः ते हेतुवादतः संज्ञिनः । अत्र वैधर्म्येण 'ज्ञातं' दृष्टान्तो घटः, अनेन प्रयोगः सूचितः । स चायम्—द्वीन्द्रियादयः संज्ञिनः, इष्टा-ऽनिष्टविषयेषु यथाक्रमं प्रवृत्ति-निवृत्तिदर्शनात्, पुरुषवत्; ये तु न संज्ञिनस्तेषामिष्टा-ऽनिष्टविषयेषु प्रवृत्ति-निवृत्ती अपि न स्तः, यथा घटस्य, तथा च पृथिव्यादीनामपि न स्त इष्टा-ऽनिष्टविषयेषु प्रवृत्ति-निवृत्ती, तस्मादसंज्ञिनस्त इति ॥ ८५ ॥

दृष्टिवादोपदेशेन संज्ञ्यसंज्ञिनौ

उक्तो हेतुवादतोऽपि संज्ञी असंज्ञी च । सम्प्रति दृष्टिवादोपदेशेनोच्यते—ये सम्यग्दृष्टयस्ते दृष्टिवादोपदेशेन संज्ञिनः, शेषाः सर्वेऽपि मिथ्यादृष्टयोऽसंज्ञिनः । उक्तञ्च—

सम्मद्दिट्ठी सन्नी, दिट्ठीवायस्स होंति उवएसा ।
सेसा होंति असन्नी, कालिय तह हेउसन्नी य ॥

ननु सम्यग्ज्ञानं मिथ्याज्ञानं च द्वे अपि क्षायोपशमिके, ततः कस्मादेकः संज्ञी अपरोऽसंज्ञी ? इति, अत आह—

**होइ असीला नारी, जा खलु पतिणो न रक्खए सेज्जं ।**
**तं पि[6] य हु होति सीलं, असोहणं तेण उ असीला[7] ॥ ८६ ॥**
**एवं खओवसमिए, जे वट्टंते उ नाणविसयम्मि ।**
**ते खलु हवंति सण्णी, अण्णाणी होंति अस्सण्णी ॥ ८७ ॥**

या खलु लोके नारी पत्युः शय्यां न रक्षति सा भवत्यशीला, यतो यद्यपि 'तदपि' पत्युः शय्याया अरक्षणं शीलं तथापि तदशोभनमिति कृत्वा सा अशीला ॥ ८६ ॥ एवं तुल्येऽपि क्षायोपशमिके भावे ये 'ज्ञानविषये' सम्यग्ज्ञाने वर्तन्ते ते संज्ञिनः, 'सम्यग्ज्ञानं[8] संज्ञा, सा येषामस्ति ते संज्ञिनः' इति व्युत्पत्तेः । ये त्वज्ञानिनस्तेऽसंज्ञिनः, कुत्सितसंज्ञकत्वात् ॥ ८७ ॥

तदेवमुक्तं संज्ञिश्रुतमसंज्ञिश्रुतं च । सम्प्रति सम्यक्श्रुत-मिथ्याश्रुते द्वे अपि युगपदाह—

सम्यक्श्रुतं मिथ्याश्रुतं च

**अंगा-ऽणंगपविट्ठं, सम्मसुयं लोइयं तु मिच्छसुयं ।**
**आसज्ज उ सामित्तं, लोइय लोउत्तरे भयणा ॥ ८८ ॥**

---

१ °सतीणं ता० ॥ २ °हातीसु ता० ॥ ३ °वाय स° ता० ॥ ४ वइह° ता० ॥ ५ णाई ता० ॥ ६ पि त हु ता० ॥ ७ °सीलं ता० ॥ ८ °ग्ज्ञानं संज्ञानं संज्ञा वे० ॥

स्वरूपेण लोकोत्तरिकम् अङ्गा-ऽनङ्गप्रविष्टं सम्यक्श्रुतम्, लौकिकं मिथ्याश्रुतम्। स्वामित्वमासाद्य पुनर्लौकिके लोकोत्तरे च 'भजना' लौकिकमपि कदाचित् सम्यक्श्रुतं लोकोत्तरमपि मिथ्याश्रुतमित्यर्थः। तथाहि—लौकिकमपि सम्यग्दृष्टिपरिगृहीतं सम्यक्श्रुतम्, मिथ्यादृष्टिपरिगृहीतं लोकोत्तरमपि मिथ्याश्रुतमिति ॥ ८८ ॥

अथ येन सम्यक्त्वेन परिगृहीतं सम्यक्श्रुतं भवति तत् किंप्रत्ययम्? अत आह—

**आभिणिबोहमवायं, वयंति तप्पच्चयाउ सम्मत्तं।**
**जा मणपज्जवनाणी, सम्मद्दिट्ठी उ केवलिणो ॥ ८९ ॥**

'आभिनिबोधिकः' आभिनिबोधिकभेदो योऽपायो यद्वशाद् यथावस्थितार्थविनिश्चयस्तं सम्यक्त्वस्य प्रत्ययं वदन्ति पूर्वसूरयः, सम्यग्ज्ञाने सम्यक्श्रद्धानभावात्। 'तत्प्रत्ययाच्च' अपायप्रत्ययाच्च सम्यक्त्वं तावदवसेयं यावन्मनःपर्यायज्ञानिनः, ततः परमपायस्याभावात्। केवलिनः केवलज्ञानप्रत्ययादेव सम्यग्दृष्टयः ॥ ८९ ॥ अथ तत् सम्यग्दर्शनं कतिविधम्? अत आह—

सम्यक्त्वस्वरूपम्

पञ्चधा सम्यक्त्वम्

**उवसमियं सासायण, खओवसमियं च वेदगं खइयं।**
**सम्मत्तं पंचविहं, जह लब्भइ तं तहा वोच्छं ॥ ९० ॥**

सम्यक्त्वं पञ्चविधम्। तद्यथा—औपशमिकं सासादनं क्षायोपशमिकं वेदकं क्षायिकं च। एतत् पञ्चप्रकारमपि यथा लभ्यते तथा वक्ष्यामि ॥ ९० ॥ तदेवाह—

सम्यक्त्वप्राप्तिक्रमः

**बंधट्ठितीपमाणं, सामित्तं चेव सव्वपगडीणं।**
**को केवइयं बंधइ, खवेइ वा कित्तियं कोइ ॥ ९१ ॥**

सम्यक्त्वं कर्मणां क्षयत उपशमतः क्षयोपशमतश्चोपजायते। क्षयादयश्च त्रयः प्रकारा बद्धानां कर्मणां नाबद्धानामिति प्रथमतो बन्धतः स्थितिप्रमाणं जघन्यत उत्कर्षतश्च वक्तव्यम्, तच्चैवम्—ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां त्रिंशत्सागरोपमकोटीकोट्य उत्कृष्टं स्थितिपरिमाणम्, मोहनीयस्य सप्ततिसागरोपमकोटीकोट्यः, नाम-गोत्रयोर्विंशतिसागरोपमकोटीकोट्यः, आयुषस्त्रयस्त्रिंशत्सागरोपमाणि; तथा जघन्यं वेदनीयस्य द्वादश मुहूर्ताः, नाम-गोत्रयोरष्टौ, शेषाणामन्तर्मुहूर्त्तम्। तथा सर्वप्रकृतीनां सत्तामधिकृत्य स्वामित्वं वक्तव्यम्, तच्चैवम्—मिथ्यादृष्टि-सास्वादन-मिश्रा-ऽविरतसम्यग्दृष्टि-देशविरत-प्रमत्ता-ऽप्रमत्ता-ऽपूर्वकरणा-ऽनिवृत्तिबादर-सूक्ष्मसम्परायो-पशान्तमोहा अष्टानामपि प्रकृतीनां स्वामिनः, मोहनीयवर्जानां सप्तानां क्षीणमोहाः, वेद्या-ऽऽयु-र्नाम-गोत्राणां सयोग्य-ऽयोगिकेवलिनः। तथा कः कियद् बध्नाति? इति वक्तव्यम्, तत्र—मिथ्यादृष्टयोऽप्रमत्तान्ताः सप्तविधबन्धका वाऽष्टविधबन्धका वा, अपूर्वकरणा-ऽनिवृत्तिबादराः सप्तविधबन्धकाः, सूक्ष्मसम्परायाः षड्विधबन्धकाः, उपशान्तमोह-क्षीणमोह-सयोगिकेवलिनः सातवेदनीयैकबन्धकाः, अबन्धका अयोगिकेवलिनः। तथा को वा कियत्

१ °वायं तु स° ता० ॥ २ °नाणी स° ता० ॥ ३ उवसामग सासाणं ता० ॥ ४ को उ ता० ॥ ५ °र्विंशति° कां० विना ॥

क्षपयति? इति वक्तव्यम्, तत्र—मिथ्यादृष्टय उपशान्तमोहपर्यन्ता अक्षीणाष्टप्रकृतिकाः, क्षीणमोहाः क्षीणं मोहनीयमित्यक्षीणसप्तप्रकृतिकाः, सयोग्य-ऽयोगिकेवलिनः क्षीणघातिकर्माणः॥९१॥

अथ कस्य कर्मण उत्कृष्टायां स्थितौ कस्य नियमत उत्कृष्टा स्थितिः? कस्य वा भजनया? इति; अत आह—

**आउयवज्जा उ ठिई, मोहोक्कोसम्मि होइ उक्कोसा ।**
**मोहविवज्जुक्कोसे, मोहो सेसा य[1] भइयाउ ॥ ९२ ॥**

'मोहोत्कर्षे' मोहनीयस्योत्कृष्टायां स्थितौ सत्यां नियमत आयुर्वर्जयित्वा शेषाणां कर्मणामुत्कृष्टा स्थितिर्भवति। मोहविवर्जस्य—ज्ञानावरणीयादेरुत्कर्षे—उत्कृष्टायां स्थितौ 'मोहः' मोहनीयं शेषाश्च प्रकृतयः 'भक्ताः' विकल्पिताः, कदाचिदुत्कृष्टस्थितिका भवन्ति कदाचिन्नेति भावः ॥

तत्र सर्वेषां कर्मणामुत्कृष्टस्थितौ वर्त्तमानः प्रबलमोहाच्छादितत्वान्न किमपि सम्यग्दर्शनं लभते, उक्तञ्च—

अट्ठण्ह वि पगडीणं, उक्कोसठिईए वट्टमाणो उ ।
ण लभति सम्मद्दंसण, मिच्छत्तेणं विमोहाओ ॥

किन्तु सप्तानामायुर्वर्जानामभ्यन्तरकोटीकोट्यां[2] वर्त्तमानाः(नः) । तथा चाह—

**अंतिमकोडाकोडी[3]एँ होइ सव्वासि कम्मपगडीणं ।**
**पलियँ[4]असंखभागे, खीणे सेसे हवइ गंठी ॥ ९३ ॥**

आयुर्वर्जानां सर्वाणां (सर्वासां) कर्मप्रकृतीनामन्तिमायां कोटीकोट्यां स्थितायां तत्रापि पल्योपमस्यासङ्ख्येयतमे भागे क्षीणे शेषे स्थितिदलिके सति सम्यग्दर्शनलाभो भवति। केवलं तदानीं सम्यग्दर्शनलाभान्तरायभूतः कर्कश-घन-रूढ[5]-गुपिलवल्कग्रन्थिरिव दुर्भेदो घनराग-द्वेषपरिणामरूपो ग्रन्थिर्भवति, ततस्तस्मिन् भिन्ने प्रतिपत्तव्यः ॥ ९३ ॥

तस्य च भेदः करणवशात्, अतः करणवक्तव्यतामाह—

त्रिविधं करणम्

**तिविहं च होइ[6] करणं, अहापवत्तं तु भव्व-ऽभव्वाणं ।**
**भवियाण इमे अन्ने, अपुव्वकरणाऽनियट्टी[7] य ॥ ९४ ॥**

'करणं' नाम परिणामविशेषः । तत् 'त्रिविधम्' त्रिप्रकारं भवति । तद्यथा—प्रथमं यथाप्रवृत्ताख्यं भव्यानामभव्यानां च साधारणम् । भव्यानां पुनः इमे द्वे अन्ये करणे, अपूर्वकरणम् 'अनिवृत्तिश्च' अनिवृत्तिकरणं च ॥ ९४ ॥

साम्प्रतमेतेषामेव त्रयाणां करणानां कालविभागमाह—

करणानां स्थिति-कालः

**जा गंठी ता पढमं, गंठिं समतिच्छंतो[8] अपुव्वं तु ।**
**अनियट्टीकरणं पुण, सम्मत्तपुरक्खडे[9] जीवे ॥ ९५ ॥**

यावद् ग्रन्थिस्तावत् 'प्रथमम्' यथाप्रवृत्ताख्यं करणम् । ग्रन्थिं 'समतिक्रामतः' भिन्दानस्य-

---

१ उ ता० विना ॥ २ °ट्या ब° डे० विना ॥ ३ °डीय हो° ता० ॥ ४ °यामसं° ता० विना ॥ ५ °रूढगूढगुपि° भा० ॥ ६ °मे ब्व(ब)ऽण्णे ता० ॥ ७ °ट्टीयं ता० ॥ ८ °तो भवे बीयं ता० विना ॥ ९ °पुरेक्ख° ता० ॥

त्यर्थः पुनः 'अपूर्वम्' अपूर्वकरणम् । अनिवृत्तिकरणं तु सम्यक्त्वं पुरस्कृतं येन स सम्यक्त्वपुरस्कृतः तस्मिन् जीवे, सम्यक्त्वाभिमुखे इत्यर्थः ॥ ९५ ॥

अथ यावद्ग्रन्थिस्तावन्निर्गुणस्य सतः कथं कर्मराशेः क्षपणम्? उच्यते—गिरिसरित्प्रस्तरदृष्टान्तात् । ततस्तमेव दृष्टान्तं तत्प्रसङ्गतः शेषकरणयोरपि दृष्टान्तानभिधित्सुर्द्वारगाथामाह—

सम्यक्त्वलाभेऽष्टावुदाहरणानि

**नदि पह जर वत्थ जले, पिवीलिया पुरिस कोद्दवा चेव ।**
**सम्मद्दंसणलंभे, एते[1] अट्ठ उ उदाहरणा ॥ ९६ ॥**

करणवशात् सम्यग्दर्शनलाभे एतान्यष्टावुदाहरणानि । तद्यथा—"नदि"त्ति गिरिनदीप्रस्तरोदाहरणम् १ पथदृष्टान्तः २ ज्वरोदाहरणम् ३ वस्त्रोदाहरणम् ४ जलोदाहरणम् ५ पिपीलिकोदाहरणम् ६ पुरुषोदाहरणम् ७ कोद्रवोदाहरणम् ८ ॥ ९६ ॥

तत्र प्रथमतो गिरिसरित्प्रस्तरोदाहरणं भावयति—

गिरिसरित्प्रस्तरदृष्टान्तः

**गिरिसरियपत्थरेहिं, आहरणं होइ पढमए करणे ।**
**एवमणाभोगियकरणसिद्धितो खवण जा गंठी ॥ ९७ ॥**

गिरिसरित्प्रस्तरैः 'आहरणं' दृष्टान्तः 'प्रथमे' यथाप्रवृत्ताख्ये करणे भवति । तच्चैवम्—यथा गिरिसरित्प्रस्तरा गिरिसरिज्जलावेगतो घर्षण-घोलनादिना केचिद्वर्तुला भवन्ति केचित्त्र्यस्राः केचिच्चतुरस्राः, एवम् 'अनाभोगकरणसिद्धितः' यथाप्रवृत्तकरणप्रभावतः सुदीर्घाया अपि कर्मस्थितेस्तावत् क्षपणं यावद्ग्रन्थिरिति ॥ ९७ ॥

अथ "अनिवृत्तिकरणं सम्यक्त्वपुरस्कृते जीवे भवति" ( गाथा ९५ ) इत्युक्तं तत् सम्यक्त्वं कथं लभते? उच्यते—उपदेशतः स्वयं वा । तथा चात्र पथदृष्टान्तः—

पथ-दृष्टान्तः

**उवएसेण सयं वा, नट्ठपहो कोइ मग्गमोतरति ।**

नष्टपथः कोऽपि पुरुषः 'उपदेशेन' अन्यं पृष्ट्वा[2] तस्योपदेशेन मार्गमवतरति, कश्चिन्मार्गानुसारिप्रज्ञतया स्वयमेवेहा-ऽपोहं कृत्वा । एवमिहापि कोऽपि सम्यग्दर्शनमाचार्यादीनामुपदेशतो लभते, कश्चित्स्वयमेव जातिस्मरणादिना ॥ अत्रैव ज्वरदृष्टान्तमाह—

ज्वर-दृष्टान्तः

**जरितो य ओसहेहिं, पउणइ कोई विणा तेहिं ॥ ९८ ॥**

ज्वरितोऽपि कश्चिदौषधैः 'प्रगुणति' प्रगुणीभवति, कश्चित्पुनः 'तैः' औषधैः 'विना' एवमेव । एवमत्रापि कस्यचिद्दर्शनमोह आचार्याद्युपदेशतोऽपगच्छति, कस्यचित्पुनरेवमेव मार्गानुसारितया तत्त्वपर्यालोचनतः । इह ज्वरस्थानीयो दर्शनमोहः, औषधस्थानीय आचार्याद्युपदेशः ॥ ९८ ॥

इह यस्तत्प्रथमतया क्षायोपशमिकसम्यग्दृष्टिरुपजायते सोऽपूर्वकरणवशान्मिथ्यात्वदलिकं त्रिधा करोति । तद्यथा—मिथ्यात्वं सम्यग्मिथ्यात्वं सम्यक्त्वं च । अत्र वस्त्रदृष्टान्तं जलदृष्टान्तं चाऽऽह—

वस्त्रजलदृष्टान्तौ

**मइल[3] दरसुद्ध सुद्धं, जह वत्थं होइ किंचि सलिलं वा[4] ।**
**एसेव य दिट्ठंतो, दंसणमोहम्मि तिविहम्मि ॥ ९९ ॥**

---

१ एते खलु अट्ठुदा° ता० ॥ २ °न्यं दृष्ट्वा भा० बिना ॥ ३ मतिल ता० ॥ ४ च कां० ता० विना ॥

यथा किञ्चिद् वस्त्रं सलिलं वा मलिनं भवति, किञ्चिद् 'दरशुद्धम्' ईषद्विशुद्धम्, किञ्चित् शुद्धम् । एष एव दृष्टान्तो दर्शनमोहे त्रिविधे भावनीयः—तदप्यपूर्वकरणवशात् किञ्चित् शुद्धं सम्यक्त्वरूपम्, किञ्चिदीषद्विशुद्धं सम्यग्मिथ्यात्वरूपम्, किञ्चित्तथैव मलिनं मिथ्यात्वरूपं स्थितमिति भावः ॥ ९९ ॥

अत्राह—कथमभव्यास्तस्मिन् ग्रन्थिदेशेऽवतिष्ठन्ते? कथं वा ततः प्रतिपतन्ति? भव्या वा कथं ग्रन्थिं विभिद्य ततः परतो गच्छन्ति? उच्यते—पिपीलिकादृष्टान्तात् । तमेवाह—

करण-त्रिकासौ पिपीलिकादृष्टान्तः

**अहभावेण पसरिया, अपुव्वकरणेण खाणुमारूढा ।**
**चिट्ठंति तत्थ काई, पिपीलिया काइ उड्डंति ॥ १०० ॥**
**पच्चोरुहणट्ठा खाणुआतो चिट्ठंति तत्थ एवावि ।**
**पक्खविहूणातो पिवीलियातो उड्डंति उ सपक्खा ॥ १०१ ॥**

काश्चित्पिपीलिकाः 'यथाभावेन' अनाभोगतः 'प्रसरिताः' बिलान्निर्गत्य इतस्ततो गन्तुं प्रवृत्ताः । काश्चित्पुनरपूर्वकरणेन स्थाणुमारूढाः । तासामपि मध्ये काश्चित् 'तत्र' स्थाणावेव तिष्ठन्ति याः पक्षविहीनाः । काश्चित्सञ्जातपक्षास्ततः 'उड्डयन्ते' ऊर्ध्वमाकाशेन गच्छन्ति ॥ १०० ॥

उत्तरार्द्धस्यैव व्याख्यानार्थमनन्तरगाथा "पच्चोरुहणट्ठा" इत्यादि । काश्चित् पक्षविहीनाः पिपीलिकाः स्थाणोः प्रत्यवरोहणार्थं 'तत्रैव' स्थाणावेव तिष्ठन्ति, अपिशब्दात् प्रत्यवरोहन्ति च । यास्तु सपक्षास्ता उड्डीयन्ते । इह पिपीलिकानामितस्ततः प्रसरणं यथाप्रवृत्तकरणतः, स्थाण्वारोहणमपूर्वकरणतः, उड्डयनमनिवृत्तिकरणेन; एवमत्रापि ग्रन्थिदेशगमनं यथाप्रवृत्तिकरणेन, ग्रन्थिभेदनमपूर्वकरणतः, सम्यग्दर्शनमनिवृत्तिकरणेन । यथा च काश्चन पिपीलिकाः पक्षविहीनत्वात् स्थाणावेव स्थिताः, स्थित्वा च ततः प्रत्यवतीर्णाः, तथा कोऽपि मन्दाध्यवसायतया तीव्रविशोधिरहितोऽपूर्वकरणेन ग्रन्थिभिदामाधातुमुद्यतः समुच्छलितघनराग-द्वेषपरिणामस्तत्रैव तिष्ठति, स्थित्वा च पुनः पश्चात्ततः प्रतिनिवर्त्तते ॥ १०१ ॥ अत्रैवार्थे पुरुषदृष्टान्तमाह—

करण-त्रिकासौ द्वितीयः पुरुष-दृष्टान्तः

**जह वा तिण्णि मणूसा, सभयं पंथं भएण वच्चंता ।**
**वेलाइक्कमतुरिया, वयंति पत्ता य दो चोरा ॥ १०२ ॥**
**तत्थेगो उ नियत्तो, एगो थद्धो अतिच्छितो एको ।**
**कम्मगति अद्दापवत्तं, भिन्नेयर धावणं तइए ॥ १०३ ॥**

वाशब्दो दृष्टान्तान्तरसमुच्चये । यथा त्रयो मनुष्याः सभयं पन्थानं भयेन **पाठान्तरं क्रमेण** व्रजन्तः 'वेलातिक्रमत्वरिताः' सन्ध्यासमापतनेन गमनवेलातिक्रमतस्त्वरमाणा व्रजन्ति । अत्रान्तरे चोभयपार्श्वतः प्राप्तौ पाणिकृपाणकरालौ द्वौ चौरौ । तौ च हक्कयन्तावेवमाक्षिपतः—क यास्यथ यूयम्? मरणमेव युष्माकमिदानीं समापतितमिति ॥ १०२ ॥

तत्र 'एकः' पुरुषस्तौ समापतन्तौ दृष्ट्वा प्रथमत एव निवृत्तः । 'एकः' पुनर्द्वितीयो हक्काश्रवणत उद्गीर्णकृपाणदर्शनतश्च भयेन 'स्तब्धः' तत्रैव स्थितः । 'एकः' तृतीयः पुनः परमसाहसिकः प्रत्युद्गीर्णखड्गस्तौ द्वावपि चौरौ पश्चात्कृत्य तत्स्थानमतिक्रान्तः । इह या त्रयाणामपि पुरुषाणां

१ **कादी** ता० ॥ २ **°त्ति अग्गओ पासे । पक्ख°** ता० ॥ ३ **°मति य अ°** ता० ॥

प्रथमतः क्रमेण गतिः सा यथाप्रवृत्तिकरणम्, यत् पुनस्तद्वयं भित्त्वं तद् 'इतरद्' अपूर्वकरणम्, यत्तु ततः परतो धावनं तत् 'तृतीये' अनिवृत्ताख्ये करणे द्रष्टव्यम् ॥ १०३ ॥

तदेवं दृष्टान्तद्वयमभिधाय साम्प्रतमुपनयन्नाह—

**एवं संसारीणं, जोएं[1] सव्वाइं तिन्नि करणाइं ।**
**भवसिद्धिसलद्धीण य, पक्खाल[2]पिवीलिया उवमा ॥ १०४ ॥**

'एवम्' अमुना दृष्टान्तगतेन प्रकारेण यानि त्रीणि करणानि प्रागभिहितानि तानि सर्वाणि संसारिणां योजयेत् । तत्र पिपीलिका दृष्टान्तमधिकृत्य प्रागेव योजिताः । नवरं याः पक्षवत्यः पिपीलिका उक्तास्ताभिरुपमा भवसिद्धिसलब्धिकानां द्रष्टव्या । भवैः सिद्धिर्येषां ते भवसिद्धिकाः—कतिपयभवमोक्षगामिन इत्यर्थः, तेऽपि कदाचित् प्रतिपतन्ति तत आह—सलब्धिः-उत्तरोत्तरविशुद्धाध्यवसायप्राप्तिर्येषां ते सलब्धिकाः, ततो विशेषणसमासस्तेषाम् । किमुक्तं भवति ?—सपक्षपिपीलिका इव केचित् संसारिणो भवसिद्धिकाः सलब्धिकाः स्थाणोरिव ग्रन्थिदेशादपि परतो गच्छन्ति, केचित् पुनरभव्या भव्या वा केचन पक्षविहीनपिपीलिका इव स्थाणोरिव ग्रन्थिदेशात् प्रतिपतन्ति । पुरुषदृष्टान्तमधिकृत्यैवं योजना—पुरुषस्थानीयाः संसारिजीवाः, कर्मक्षपणस्थानीयः पन्थाः, भयस्थानीयो ग्रन्थिः, द्वौ चौरौ राग-द्वेषौ; यस्तु मन्दपराक्रमो न पुरतो न मार्गतः किन्तु भयेन तत्रैव स्थितस्तत्सदृशो ग्रन्थिदेशे वर्त्तमानो भव्योऽभव्यो वा, स च तत्र सङ्ख्येयमसङ्ख्येयं वा कालं तिष्ठति ॥ १०४ ॥

तत्र स्थितस्य को लाभः ? इति चेत्, उच्यते—श्रुतलाभः । तथा चाह—

ग्रन्थिगतस्याभव्यस्य भव्यस्य च श्रुतलाभः

**दट्ठूण जिणवराणं, पूयं अण्णेण वा वि कज्जेण ।**
**सुयलंभो उ अभव्वे, हविज्ज थंभेण[3] उवणीए ॥ १०५ ॥**

यः स्तम्भेन 'उपनीतः' उपनयं प्रापितस्तस्मिन् अभव्ये तुशब्दाद् भव्ये च भवति 'श्रुतलाभः' द्रव्यश्रुतलाभः । कथम् ? इति चेत्, अत आह—"दट्ठूणे"त्यादि । स हि ग्रन्थिकसत्त्वो भव्योऽभव्यो वा भगवतां जिनवराणां पूजां दृष्ट्वा 'अहो ! कीदृशं तपसः फलम् ?' इति परिभाव्य तदर्थिकतया अन्येन वा कार्येण स्वर्गसुखार्थित्वादिना प्रव्रज्यामभ्युपगच्छति, ततः सामायिकादिद्रव्यश्रुतलाभः । ग्रन्थौ चैवं कियन्तं कालं स्थित्वा पुनः पश्चात् प्रतिनिवर्त्तते ॥ १०५ ॥

येनाप्यनिवृत्तिकरणतः सम्यक्त्वमासादितं तस्यापि द्वौ प्रकारौ—केचित् परिणामतो वर्धन्ते, केचिद् हानिमुपगच्छन्ति । तत्र ये हानिं गच्छन्ति ते प्रतिपतन्ति, इतरे श्रावकत्वादीनि पदानि लभन्ते । तत्र जघन्यतः समकमेव, यत उक्तम्—

सम्मत्त-चरित्ताइं, जुगवं पुव्वं व सम्मत्तं ।

उत्कर्षतः पुनरेवम्—

**सम्मत्तम्मि[4] उ लद्धे, पलियपुहुत्तेण सावगो होज्जा ।**
**चरणोवसम-खयाणं[5], सागरसंखंतरा होंति ॥ १०६ ॥**

---

१ ओपयब्वाति त्ति° भा० ता० ॥ २ पक्खा° ता० ॥ ३ थद्धेण ता० ॥ ४ °म्मत्ते पुण लं° ता० ॥ ५ °या पुण सा° ता० ॥

**एवं अप्परिवडिए, सम्मत्ते देव-मणुयजम्मेसु ।**
**अन्नयरसेढिवज्जं, एगभवेणं च सव्वाइं ॥ १०७ ॥**

सम्यक्त्वे लब्धे 'पल्यपृथक्त्वेन' पल्योपमपृथक्त्वे गते 'श्रावकः' देशविरतो भवति । ततश्चरणोपशम-क्षयाणामन्तराणि सङ्ख्यातानि सागरोपमानि भवन्ति । इयमत्र भावना—देशविरतिप्राप्त्यनन्तरं सङ्ख्यातेषु सागरोपमेषु गतेषु चरणलाभः, तदनन्तरं भूयः सङ्ख्यातेषु सागरोपमेषु गतेषूपशमश्रेणिलाभः, ततोऽपि परतः सङ्ख्येयेषु सागरोपमेष्वतिक्रान्तेषु क्षपकश्रेणिः, ततस्तद्भवे मोक्षः ॥ १०६ ॥

'एवं' अमुना प्रकारेणाप्रतिपतितसम्यक्त्वे देव-मनुजजन्मसु वर्त्तमानस्य प्रतिपत्तव्यम् । यदि वा 'अन्यतरश्रेणिवर्जं' उपशमश्रेणिवर्जं क्षपकश्रेणिवर्जं वा एकभवेन सर्वाणि देशविरत्यादीनि प्रतिपद्यते, श्रेणिद्वयप्रतिपत्तिस्त्वेकस्मिन् भवे न भवति । यत उक्तम्—

मोहोपशम एकस्मिन्, भवे द्विः स्यादसन्ततः ।
यस्मिन् भवे तूपशमः, क्षयो मोहस्य तत्र न ॥ ॥ १०७ ॥

सम्प्रति यदुक्तं प्राग् "मिथ्यात्वमपूर्वकरणेन त्रिधा करोति" ( गाथा ९९ ) तत्र कोद्रवदृष्टान्तमाह—

मिथ्यात्वस्य त्रिपुञ्जकरणे कोद्रवदृष्टान्तः

**अप्पुव्वेण तिपुंजं, मिच्छं[1] काऊण कोद्दवोवमया ।**
**तिन्नि वि अवेययंतो, उवसामगसम्मदिट्ठीओ ॥ १०८ ॥**

'कोद्रवोपमया' कोद्रवदृष्टान्तेन अपूर्वकरणेन मिथ्यात्वं त्रिपुञ्जं कृत्वाऽनिवृत्तिकरणेन तत्प्रथमतया क्षायोपशमिकं सम्यक्त्वमासादयति । ततः परिणामवशतः कालान्तरेण मिश्रं मिथ्यात्वं वा गच्छति । यस्त्वपूर्वकरणमारूढोऽपि मन्दाध्यवसायतया मिथ्यात्वं त्रिपुञ्जीकर्तुमसमर्थः सोऽनिवृत्तिकरणमुपगतोऽन्तरकरणं कृत्वा तत्र प्रविष्टो न किञ्चिदपि वेदयते, स च 'त्रीण्यपि' त्रयाणामन्यतमदप्यवेदयमान उपशमकः सम्यग्दृष्टिरुच्यते ॥ १०८ ॥

"कोद्रवोपमया" ( गा० १०८ ) इत्युक्तम्, अतस्तामेव कोद्रवोपमां भावयति—

**जह मयणकोद्दवा ऊ, दरनिव्वलिया य निव्वलीया[2] य ।**
**एमेव मिच्छ मीसं, सम्मं वा होति जीवाणं ॥ १०९ ॥**

यथा कोद्रवास्त्रिविधा भवन्ति, तद्यथा—मदनकोद्रवाः 'दरनिर्म्मलिताः' ईषदपगतमदनभावाः 'निर्वलिताः' सर्वथाऽपगतमदनभावाः । एवं जीवानां मिथ्यात्वं त्रिधा भवति—मिथ्यात्वं 'मिश्रं' सम्यग्मिथ्यात्वं सम्यक्त्वं वा ॥ १०९ ॥

अधिगमजं नैसर्गिकं च सम्यक्त्वम्

**कालेणुवक्कमेण व, जह नासति कोद्दवाण मदभावो ।**
**अहिगमसम्मं नेसग्गियं च तह होइ जीवाणं ॥ ११० ॥**

यथा कोद्रवाणां मदनभावः केषाञ्चित् 'कालेन' एवमेवापगच्छति, केषाञ्चिद् गोमयादिभिरुपक्रमतः; एवं केषाञ्चिद् जीवानामुपक्रमसदृशमधिगमसम्यक्त्वं भवति, केषाञ्चित् कालेन

१ °च्छत्तं काउ कोद्दवे उवमा ता० ॥ २ °लियगा य ता० ॥

स्वत एवापगतमदनभावकोद्रवाणां सदृशं नैसर्गिकसम्यक्त्वम् । किमुक्तं भवति?—केषाञ्चिद्-धिगमतो मिथ्यात्वपुद्गलाः सम्यक्त्वीभवन्ति, केषाञ्चित् स्वत एव तथापरिणामविशेषभावतः ॥ ११० ॥

एतदेव स्पष्टयति—

**सोऊण अहिसमेच्चे व, करेइ सो वड्ढमाणपरिणामो ।**
**मिच्छे सम्मामिच्छे, सम्मे वि य पोग्गले समयं ॥ १११ ॥**

श्रुत्वा केवलिप्रभृतीनां वचः 'अभिसमेत्य वा' जातिस्मरणादिना सम्यक्त्वमवगम्य 'सः' अपूर्वकरणे वर्त्तमानो वर्धमानपरिणामः 'समकं' एककालं मिथ्यात्वपुद्गलान् त्रिधा करोति । तद्यथा—'मिच्छे' इति मिथ्यात्वपुद्गलान् सम्यग्मिथ्यात्वपुद्गलान् सम्यक्त्वपुद्गलानिति ॥१११॥

अथैषां पुद्गलानां परस्परं सङ्क्रमो भवति? किं वा न? इति, उच्यते—भवतीति ब्रूमः । तथा चाह—

**मिच्छत्ताओ मीसे, मीसस्स उ होज्ज संकमो दोसुं ।**
**सम्मे वा मिच्छे वा, सम्मा मिच्छं न पुण मीसं ॥ ११२ ॥**

'मिथ्यात्वात्' मिथ्यात्वदलिकात् सम्यग्दृष्टिः प्रवर्धमानपरिणामः पुद्गलानाकृष्य मिश्रे उपलक्षणमेतत् सम्यक्त्वे च सङ्क्रमयति । मिश्रस्य पुद्गलानां सङ्क्रमो द्वयोर्भवति । तद्यथा—सम्यक्त्वे मिथ्यात्वे च । तत्र सम्यग्दृष्टिः सम्यक्त्वे सङ्क्रमयति मिथ्यादृष्टिर्मिथ्यात्वे । 'सम्यक्त्वात्' सम्यक्त्वदलिकात् पुनः पुद्गलान्मिथ्यात्वं सङ्क्रमयति न पुनर्मिश्रमिति ॥ ११२ ॥

साम्प्रतममुमेवार्थं प्रकारान्तरेणाह—

**मिच्छत्ताओ अहवा, मीसं सम्मं च कोइ संकमइ ।**
**मीसाओ वा सम्मं, गुणवुड्ढी हायतो मिच्छं ॥ ११३ ॥**

'अथवा' इत्युक्तस्यैवार्थस्य भणनप्रकारान्तरद्योतने । 'मिथ्यात्वात्' मिथ्यात्वदलिकात् पुद्गलानाकृष्य कश्चिन्मिश्रं सम्यक्त्वं च सङ्क्रमयति । यदि वा कश्चिद्गुणैर्वृद्धिर्यस्य स गुणवृद्धिः—प्रवर्धमानपरिणामः सम्यग्दृष्टिरित्यर्थः 'मिश्रात्' मिश्रदलिकात् पुद्गलानादाय सम्यक्त्वं सङ्क्रमयति । 'हायकः' हीनपरिणामो मिथ्यादृष्टिरित्यर्थः मिश्रात् पुद्गलानाकृष्य मिथ्यात्वं सङ्क्रमयति ॥ ११३ ॥

**मिच्छत्ता संकंती, अविरुद्धा होति सम्म-मीसेसु ।**
**मीसातो वा दुण्णि वि, ण उ सम्मा परिणमे मीसं ॥ ११४ ॥**

मिथ्यात्वात् पुद्गलसङ्क्रान्तिः सम्यक्त्व-मिश्रयोरविरुद्धा । 'मिश्रतो वा' सम्यग्मिथ्यात्वतो

---

१ "सोऊण०" गाथामारीकृत्य "चोद्दस दस य अभिन्ने०" १३२ गाथापर्यन्ता गाथाश्चूर्णिकृद्भिः क्रमभेदेन व्याख्याताः । तथाहि तत्क्रमः—सोऊण० गाथा । उवसामग० । खीणम्मि० । ऊसरदेसं० । झीमीभवंति० । उववाएण० । वाही असव्व० । आलंबण० । मिच्छत्तम्मि० । उवसमसम्मा० । आसादेउं० । जो उ उदिण्णे० । जो चरिम० । दंसणमोहे० । मिच्छत्तातो मीसे० । मिच्छत्तातो अहवा० । मिच्छत्ता संकंती० । हायंते परिणामे० । सम्मत्तपोग्गलाणं० । विब्भंगी० । अण्णाणमती० । चोद्दस दस० ॥ २ °च्चा क° ता० विना ॥ ३ मीसे वि य पोग्गले सम्मे ता० ॥ ४ °मीसे तु भा० ता० विना ॥ ५ °णमति मी° ता० ॥

वा पुद्गलानादाय द्वावपि सङ्क्रमयति । तद्यथा—मिथ्यात्वं सम्यक्त्वं च । यथोक्तमनन्तरम् । 'सम्यक्त्वात्' सम्यक्त्वदलिकात् पुनः पुद्गलानादाय न 'मिश्रं' मिश्रभावं परिणमयति ॥११४॥

हायंते परिणामे, न कुणति मीसे उ पोग्गले सम्मे ।
न य सोहिया सि विज्जंति केइ जे दाणि वेएज्जा ॥ ११५ ॥
सम्मत्तपोग्गलाणं, वेदेउं[1] सो य अंतिमं गासं ।
पच्छाकडसम्मत्तो, मिच्छत्तं चेव संकमति ॥ ११६ ॥

यस्य तु सम्यग्दर्शनलाभे हीयमानः परिणामः स तस्मिन् हीयमाने परिणामे न मिश्रान् पुद्गलान् तुशब्दात् मिथ्यात्वपुद्गलांश्च सम्यक्त्वपुद्गलान् करोति । न च 'से' तस्य 'शोधिताः' पूर्वशोधिताः केचिदन्ये पुद्गला विद्यन्ते यान् 'इदानीम्' अधिकृतसम्यक्त्वपुञ्जनिष्ठाकाले वेदयेत् ॥ ११५ ॥ ततः सम्यक्त्वपुद्गलानामन्तिमग्रासं वेदयित्वा पश्चात्कृतसम्यक्त्वोऽपि मिथ्यात्वमेव सङ्क्रामति ॥ ११६ ॥

मिच्छत्तम्मि अ[2]खीणे, तेपुंजी सम्मदिट्ठिणो नियमा ।
खीणम्मि उ[3] मिच्छत्ते, दु-एकपुंजी व खवगो वा ॥ ११७ ॥

अक्षीणे मिथ्यात्वे ये सम्यग्दृष्टयस्ते नियमात् त्रिपुञ्जिनः । क्षीणे तु मिथ्यात्वे द्विपुञ्जी मिथ्यात्वपुञ्जस्य क्षीणत्वाद्, एकपुञ्जी वा मिश्रपुञ्जक्षये । यदि वा क्षपकः सम्यक्त्वपुञ्जस्यापि क्षये ॥ ११७ ॥

तदेवं त्रयाणामपि पुञ्जानां दृष्टान्तेन निर्णयः कृतः स्वरूपं च व्यावर्णितम्, साम्प्रतं पुञ्जत्रयस्याप्यवेदनत औपशमिकसम्यग्दृष्टिमाह—

औपशमिकं सम्यक्त्वम्

उवसामगसेढिगयस्स होति उवसामियं तु सम्मत्तं ।
जो[4] वा अकयतिपुंजो, अखवियमिच्छो लहइ सम्मं ॥ ११८ ॥

उपशमकश्रेणिगतस्य भवति सम्यक्त्वमौपशमिकम्, यो वा 'अकृतत्रिपुञ्जः' अपूर्वकरणे पुञ्जत्रयाकरणतः । तत्र क्षपकोऽपि दर्शनसप्तकस्यापूर्वकरणमारूढः पुञ्जत्रयं न करोति ततस्तद्व्यवच्छेदार्थमाह—अक्षपितमिथ्यात्वो यल्लभते सम्यक्त्वं तदौपशमिकं सम्यक्त्वमिति ॥११८॥

एतौ च द्वावप्यौपशमिकसम्यग्दृष्टी सम्यक्त्वमौपशमिकमन्तर्मुहूर्त्तमनुभूय तदनन्तरमवश्यं प्रतिपततः, तत्र दृष्टान्तद्वयमाह—

वाही असव्वछिन्नो, कालाविक्खंकुरु व्व दड्ढदुमो ।
उवसामगाण दोण्ह वि, एते खलु होंति दिट्ठंता ॥ ११९ ॥

यथा व्याधिरसर्वच्छिन्नः 'कालापेक्षं' क्रियाविशेषणमेतत् कालमपेक्ष्येत्यर्थः पुनरुद्भवति, दग्धो वा द्रुमः कालापेक्षं यथाङ्कुरं मुञ्चति; एवमुपशमितमपि मिथ्यात्वं कालमपेक्ष्य पुनरुद्रिक्तीभवतीति द्वयोरपि प्रतिपातः । तथा चाह—द्वयोरप्युपशमकयोरेतौ भवतो दृष्टान्तौ ॥११९॥

तत्रोपशमश्रेणिगत औपशमिकसम्यग्दर्शनी देशप्रतिपातेन वा प्रतिपतति सर्वप्रतिपातेन वा । इतरोऽवश्यमेव सर्वप्रतिपातेन प्रतिपतति, मिथ्यात्वं गच्छतीत्यर्थः । तत्र दृष्टान्तमाह—

---

१ °देउं सो भा० ॥ २ अखविए ते° ता० ॥ ३ य ता० ॥ ४ जो वि य अकयतिपुंजी ता० ॥

**आलंबणमलहंती, जह सट्ठाणं न मुंचए इलिया ।**
**एवं अकयतिपुंजो[1], मिच्छं चिय उवसमी एति ॥ १२० ॥**

इह या तृणादिषु मुखप्रदेशेन सर्वतोऽग्रेतनं स्थानं परिभाव्य ततोऽग्रेतनं स्थानं सङ्क्रामति अन्यथा पश्चाद्वलते सा इलिका यथा पुरत आलम्बनमलभमाना स्वस्थानं न मुञ्चति; एवमकृतत्रिपुञ्जो गत्यन्तराभावाद् मिथ्यात्वमेवोपशमी याति । इयमत्र भावना—द्विविधस्तत्प्रथमतया सम्यग्दर्शनप्रतिपत्ता, अतिविशुद्धो मन्दविशुद्धश्च । तत्र योऽतिविशुद्धः सोऽपूर्वकरणमारूढो मिथ्यात्वं त्रिपुञ्जीकरोति, कृत्वा चानिवृत्तिकरणे प्रविष्टस्तत्प्रथमतया क्षायोपशमिकं सम्यग्दर्शनमासादयति सम्यक्त्वपुञ्जोदयात् । यस्तु मन्दविशुद्धः सोऽपूर्वकरणमप्यारूढस्तीव्राध्यवसायाभावात् न मिथ्यात्वं त्रिपुञ्जीकर्त्तुमलम्, ततोऽनिवृत्तिकरणमुपगतोऽन्तरकरणं कृत्वा तत्र प्रविष्टस्तत्प्रथमतया औपशमिकसम्यग्दर्शनमनुभवति, अन्तरकरणं चान्तर्मुहूर्त्तप्रमाणम्, अतस्तदद्धाक्षयेऽन्येषां पुद्गलानामभावे[2]तो मिथ्यात्वमेति ॥ १२० ॥ एतदेवाह—

**खीणम्मि उदिन्नम्मी[3], अणुइज्जंते य सेसमिच्छत्ते[4] ।**
**अंतोमुहुत्तकालं, उवसमसम्मं लहइ जीवो[5] ॥ १२१ ॥**

अनिवृत्तिकरणे प्रविष्टस्य यद् मिथ्यात्वं उदीर्णम्—उदयावलिकाप्रविष्टं तस्मिन् क्षीणे शेषे च मिथ्यात्वेऽपान्तरालेऽन्तरकरणतोऽनुदीयमानेऽन्तर्मुहूर्त्तं कालमौपशमिकं सम्यक्त्वं जीवो लभते, मिथ्यात्वदर्शनवेदनाऽभावात् ॥ १२१ ॥ सोऽपि कथम्? इत्यत आह—

**ऊसरदेसं दड्ढेल्लयं च विज्झाइ वणदवो पप्प ।**
**इय मिच्छस्स अणुदए, उवसमसम्मं मुणेयव्वं ॥ १२२ ॥**

यथा वनदवः 'ऊसरदेशं'[6] तृणादिरहितं प्रदेशं दग्धं वा प्राप्य विध्यायति, 'इति' एवमन्तरकरणे प्रविष्टस्य मिथ्यात्वपुद्गलाभावात् 'मिथ्यात्वस्य' मिथ्यादर्शनस्य अनुदयः—अवेदनम् ततस्तस्मिन् सत्यौपशमिकं सम्यक्त्वं ज्ञातव्यम् ॥ १२२ ॥ किञ्च—

**जिम्हीभवंति[7] उदया, कम्माणं अत्थि सुत्त उवदेसो ।**
**उववायादी सायं, जह नेरइया अणुभवंति ॥ १२३ ॥**

द्विविधेऽप्यौपशमिकसम्यग्दृष्टौ शेषाणामपि कर्मणामुदया जिह्मीभवन्ति । न चैतद्वचनमात्रम्, यतोऽस्त्येव[8] 'सूत्रे' ग्रन्थान्तररूपे साक्षादुपदेशः, यथा—नैरयिका उपपातादौ सातमनुभवन्तीति ॥ १२३ ॥ एनमेव दर्शयति—

**उववाएण व सायं, नेरइओ[9] देवकम्मुणा वा वि ।**
**अज्झवसाणनिमित्तं, अहवा कम्माणुभावेणं ॥ १२४ ॥**

---

१ °पुंजी मिच्छम्मि उ उव° ता० ॥ २ °वतो मिथ्यात्वपुद्गलवेदना[त्] मिथ्या° भा० ॥ ३ °म्मि य अ° ता० ॥ ४ °समिसं उव° ता० विना ॥ ५ °म्मं लभति जीवो ता० ॥ ६ °देसं तृ° भा० कां० ॥ ७ झीमीभवंति ता० । "झीमीभवंति त्ति मंदीभवंति" इति चूर्णौ ॥ ८ यथाऽस्त्येव भा० ॥ ९ °इया वे° ता० ॥

नैरयिक उपपातेन सातमनुभवति । किमुक्तं भवति ?—उपपातकाले सातं वेदयते, तदानीं हि न तस्य क्षेत्रजा वेदना न परस्परोदीरिता नापि परमाधार्मिकोदीरितेति । अथवा 'देवकर्मणा' देवक्रियया सातमनुभवति, देवो हि कश्चिन्महर्द्धिकः पूर्वभवस्नेहतस्तत्र गत्वा कस्यापि कंचित्कालं वेदनामुपशमयति, ततः सातं वेदयते । अथवा 'अध्यवसाननिमित्तं' तथाविधशुभाध्यवसायप्रवृत्तिनिमित्तं सातमासादयति, यथा सम्यग्दर्शनं लभमानः, सम्यग्दर्शनलाभे हि जात्यन्धस्य चक्षुर्लाभ इव जायते महान् प्रमोद इति । "अहवा कम्माणुभावेणं"ति अथवा तीर्थकरजन्माद्यधिकृत्य यः कर्मणां—सातवेदनीयप्रभृतीनां शुभानाम् अनुभावः—अनुभवनम् उदयेन वेदनं तेन सातमनुभवति । तथाहि—भगवतां तीर्थकृतां जन्मनि दीक्षायां ज्ञाने च तत्प्रभावतो नरकेऽप्यालोको जायते, नैरयिकाणामपि च शुभकर्मोदयप्रसरतः सातमिति ॥१२४॥

अथ मिथ्यादृष्टिर्यदा सम्यक्त्वं सङ्क्रामति तदा स तत्समयं कति ज्ञानानि लभते ? उच्यते—द्वे त्रीणि वा । तथा चाह—

सम्यक्त्वलाभे ज्ञानलाभः

**विब्भंगी उ परिणमं, सम्मत्तं लहति मति-सुतोहीणि ।**
**तइभावम्मि मति-सुते, सुतलंभं केइ उ भयंति ॥ १२५ ॥**

'विभङ्गी' विभङ्गज्ञानी सम्यक्त्वं परिणमयन् तत्समयं मति-श्रुता-ऽवधीन् लभते । 'तदभावे' तस्य—विभङ्गस्याभावे मिथ्यादर्शनी सम्यक्त्वं परिणमयन् तत्कालं 'मति-श्रुते' मतिज्ञान-श्रुतज्ञाने लभते । केचित् पुनः श्रुतलाभं 'भजन्ति' विकल्पयन्ति, 'यस्याधीतं श्रुतं स लभते श्रुतज्ञानम्, इतरो न लभते' इत्याचक्षत इति भावः । तथाहि—ये स्वयम्भूरमणसमुद्रे मत्स्यास्ते प्रतिमासंस्थितान् मत्स्यान् उत्पलानि वा दृष्ट्वेहा-ऽपोहादि कुर्वन्तो जातिस्मरणतः सम्यक्त्वमासादयन्ति आभिनिबोधिकज्ञानं च, यत्तु श्रुतज्ञानं तन्नासादयन्ति, अनधीतश्रुतत्वात् । ये त्वधीतश्रुतास्ते त्रीण्यपि युगपदासादयन्ति ॥ १२५ ॥ एतद् दूषयितुमाह—

**अन्नाण मती मिच्छे, जढम्मि मतिणाणतं जहा एइ ।**
**एमेव य सुयलंभो, सुयअन्नाणे परिणयम्मि ॥ १२६ ॥**

यथा मिथ्यात्वे त्यक्ते मतिः 'अज्ञानम्' अज्ञानस्वरूपा मतिज्ञानतामेति एवमेव श्रुताज्ञाने 'परिणते' अपगते श्रुतलाभो भवति । किञ्च ते प्रष्टव्याः—सम्यक्त्वलाभसमये श्रुताज्ञानमस्ति ? किं वा न ?, तत्र यद्याद्यः पक्षस्तर्हि तस्याज्ञानित्वान्मिथ्यादृष्टित्वप्रसङ्गः; अथ नास्ति तर्हि श्रुताज्ञानमपि केवलमाभिनिबोधिकज्ञानी स्यात्; न चैतदुपपन्नम्, श्रुतज्ञानमन्तरेण केवलस्याऽऽभिनिबोधिकज्ञानस्याभावात् "जत्थ मतिनाणं तत्थ सुयनाणं, जत्थ सुयनाणं तत्थ मतिनाणं, दो वि एयाइं अण्णोण्णमणुगयाइं" इति वचनादिति ॥ १२६ ॥

---

१ किञ्चि° डे० मा० ॥ २ "य एव मतिज्ञानस्य स्वामी स एव श्रुतज्ञानस्यापि, 'जत्थ मइनाणं तत्थ सुयनाणं, जत्थ सुयनाणं तत्थ मइनाणं' इत्यादिवक्ष्यमाणवचनप्रामाण्यात्" इत्युल्लिखन्ति स्म **नन्दीवृत्तौ** (पत्र ७०-१) श्रीमन्तो **मलयगिरिपूज्याः**, किन्तु नेक्ष्यतेऽयं पाठो मुद्रितनन्द्याम्, परं "जत्थ आभिणिबोहियणाणं तत्थ सुयणाणं, जत्थ सुयणाणं तत्थ आभिणिबोहियणाणं, दो वि एयाइं अण्णमण्णमणुगयाइं" (पत्र १४०-१) इतिरूपः पाठो दृश्यते ॥

तदेवमुक्तमौपशमिकं सम्यक्त्वम्, अधुना सासादनसम्यक्त्वमाह—

सासादनं सम्यक्त्वम्

**उवसमसम्मा पडमाणतो उ मिच्छत्तसंकमणकाले ।**
**सासायणो[1] छावलितो, भूमिमपत्तो व पवडंतो ॥ १२७ ॥**

'मिथ्यात्वसङ्क्रमणकाले' मिथ्यात्वसङ्क्रमणाभिमुख उपशमसम्यक्त्वात् प्रतिपतन् जघन्यत एकसामयिक उत्कर्षतः षडावलिकः सासादनो भवति । किंरूपः सः? इत्याह—भूमिमप्राप्त इव प्रपतन् । यथा मालात् प्रपतन् भूमिमप्राप्तोऽपान्तराले वर्त्तते तथोपशमसम्यक्त्वात् प्रपतन् मिथ्यात्वमद्याप्यप्राप्तोऽपान्तराले वर्त्तमानः सासादन इति ॥ १२७ ॥

अथ कथं स सम्यग्दृष्टिः उपशमसम्यक्त्वतः प्रच्यवमानत्वात्? उच्यते—च्यवनेऽप्यव्यक्तमुपशमगुणवेदनात् । अत्रैव दृष्टान्तमाह—

**आसादेउं व गुलं, ओहीरंतो[2] न सुट्ठु जा सुयति[3] ।**

यथा कश्चित् पुरुषो गुडमास्वाद्य तदनन्तरं 'ओहीरति' निद्रायते, न पुनः सुष्ठु अद्यापि स्वपिति, स च निद्रायमाणोऽव्यक्तमास्वादितगुडमाधुर्यमनुभवति; एवमुपशमसम्यक्त्वात् प्रच्यवमानो मिथ्यात्वमद्याप्यप्राप्तोऽव्यक्तमुपशमगुणं वेदयत इति सम्यग्दृष्टिः ॥

सम्प्रति सासादनशब्दव्युत्पत्तिमाह—

सासादनशब्दस्य व्युत्पत्तिः

**सं आयं सायंतो, सस्सादो वा वि सासाणो ॥ १२८ ॥**

'स्वं' आत्मीयम् आयं सातयन् "सासादो वा वि सासाणो" 'सास्वादः' अव्यक्तोपशमगुणास्वादसहित इति कृत्वा 'सास्वादनः' सह आस्वादनं यस्य स तथेति व्युत्पत्तेः ॥ १२८ ॥

अधुना क्षायोपशमिकं सम्यक्त्वमाह—

क्षायोपशमिकं सम्यक्त्वम्

**जो उ उदिन्ने खीणे, मिच्छे अणुदिन्नगम्मि[4] उवसंते ।**
**सम्मीभावपरिणतो, वेयंतो पोग्गले मीसो ॥ १२९ ॥**

यस्तु 'उदीर्णे' उदयावलिकाप्रविष्टे मिथ्यात्वे क्षीणे 'अनुदीर्णे' अनुदयप्राप्ते च 'उपशान्ते' उपशान्तं नाम किञ्चिन्मिथ्यात्वरूपतामपनीय सम्यक्त्वरूपतया परिणतं किञ्चिन्मिथ्यात्वरूपमेव सद् भस्मच्छन्नाग्निरिवानुद्रेकावस्थामासम्, तस्मिन् तथारूपे सति 'पुद्गलान्' सम्यक्त्वरूपान् 'वेदयमानः' सम्यग्भावपरिणतः सः 'मिश्र(श्रः)' क्षायोपशमिकसम्यग्दृष्टिः । सम्यक्त्वरूपधर्मनिर्देशप्रक्रमेऽपि धर्मिणा निर्देशो धर्म-धर्मिणोः कथञ्चिदभेदख्यापनार्थः । एवं पूर्वत्र परत्र च भावनीयम् ॥ १२९ ॥ इदानीं वेदकं सम्यक्त्वमाह—

वेदकं सम्यक्त्वम्

**जो चरमपोग्गले पुण, वेदेती वेयगं तयं बिंति ।**
**केसिंचि अणादेसो, वेयगदिट्ठी खओवसमो ॥ १३० ॥**

'यः' दर्शनसप्तकक्षपको यतोऽनन्तरसमये क्षीणसम्यक्त्वो भविष्यति तस्मिन् समये वर्त्तमानः सम्यग्दर्शनस्य चरमान् पुद्गलान् वेदयते, तस्य 'तत्' चरमपुद्गलवेदनं वेदकसम्यक्त्वं पूर्व-

---

१ °यण छा° ता० ॥ २ टीकाकृता "ओहीरेति" इति पाठानुसारेण व्याख्यातम् । "ओहीरंतो निद्दायंतो" इति चूर्णौ ॥ ३ सुयति ता० ॥ ४ °च्छत्ते अणुदयम्मि ता० ॥

सूरयो ब्रुवते । 'केषाञ्चित् पुनः' **बोटिकानामयमादेशः**–'वेदकदृष्टिः' वेदकसम्यग्दर्शनं क्षायोपशमिकं सम्यग्दर्शनम्, सोऽनादेशः, सम्यक्त्वापरिज्ञानादिति ॥ १३० ॥

सम्प्रति क्षायिकदर्शनमाह—

क्षायिकं सम्यक्त्वम्

**दंसणमोहे खीणे, खयदिट्ठी होइ निरवसेसम्मि ।**
**केण उ सम्मो[१] मोहो, पडुच्च पुव्वं तु पण्णवणं ॥ १३१ ॥**

दर्शनमोहे 'निरवशेषे' त्रिप्रकारेऽपि क्षीणे 'क्षयदृष्टिः' क्षायिकं सम्यग्दर्शनं भवति । आह यद् मिथ्यात्वदर्शनं तद् मोहः स्यात्, तस्य सम्यग्दर्शनमोहकत्वात्, यत् 'सम्यक्' सम्यग्दर्शनं तत् केन कारणेन मोहः? सूरिराह–पूर्वां प्रज्ञापनां प्रतीत्य । किमुक्तं भवति?–यथा मदनकोद्रवाणां निर्मदनीकृतानामप्योदनः स एष मदनकोद्रवौदन इति व्यपदिश्यते, तेषां पूर्वं समदनत्वात्; एवं तेऽपि सम्यक्त्वपुद्गलाः पूर्वं मिथ्यात्वपुद्गला आसीरन्, ते च दर्शनमोहकाः, अतः पूर्वभावप्रज्ञापनामधिकृत्य तेऽपि दर्शनमोह इति व्यपदिश्यन्ते ॥ १३१ ॥

आह पूर्वमिदमुक्तम्–"आसज्ज उ सामित्तं, लोइय लोउत्तरे भयणा" (गा० ८८) तत्र किं सर्वमेव द्वादशाङ्गं गणिपिटकं मिथ्यादृष्टिपरिगृहीतं भवति? किं वा किञ्चिद्? इत्यत आह—

**चोद्दस दस य अभिन्ने, नियमा सम्मं तु सेसए भयणा ।**
**मति-ओहिविवच्चासो, वि होति मिच्छे ण उण सेसे ॥ १३२ ॥**

यस्य चतुर्दश पूर्वाणि यावद् दश च पूर्वाणि 'अभिन्नानि' परिपूर्णानि सन्ति तस्मिन् नियमात् सम्यक्त्वम् । 'शेषे' ('शेषके') किञ्चिदूनदशपूर्वधरादौ 'भजना' सम्यक्त्वं वा स्यान्मिथ्यात्वं वेत्यर्थः । किञ्च मतेरवधेश्च मिथ्यात्वे विपर्यासो भवति । तद्यथा–मतेर्मत्यज्ञानम्, अवधेश्च विभङ्गज्ञानमिति । श्रुतज्ञानस्य तु विपर्यासो दर्शित एव, "सेसए भयणा" इति वचनात् । 'शेषके' ('शेषे') मनःपर्यवज्ञाने केवलज्ञाने च नास्ति विपर्यासः ॥ १३२ ॥

अथ 'यदेवेदं भगवद्भिरुपदिष्टं तदेव तत्त्वम् युक्तियुक्तत्वाद् नेतरत्' इति सम्यग्दर्शनम् ज्ञानमप्येवंरूपमेवेति कः सम्यग्दर्शन-ज्ञानयोः प्रतिविशेषः? उच्यते—

सम्यग्दर्शनसम्यग्ज्ञानयोर्विवेकः

**दंसणमोग्गह ईहा, नाणमवातो उ धारणा जह उ ।**
**तह तत्तरुई सम्मं, रोइज्जइ[२] जेण तं नाणं ॥ १३३ ॥**

यथा तुल्येऽवबोधे दर्शन-ज्ञानयोर्भेदः–अवग्रह ईहा दर्शनम्, सामान्यावबोधात्मकत्वात्; अपायो धारणा च ज्ञानम्, विशेषावबोधरूपत्वात्; तथा यस्तत्त्वानामवगमः स ज्ञानम्, या त्ववगतेषु तत्त्वेषु रुचिः–परमा श्रद्धा आत्मनः परिणामविशेषरूपा सा सम्यग्दर्शनम्, येन तद् ज्ञानं 'रोच्यते' रुच्यात्मकं क्रियते ॥ १३३ ॥ एतदेव स्पष्टयति—

**सोच्चा व अभिसमेच्च व, तत्तरुई चेव होइ सम्मत्तं ।**
**तत्थेव य जा विरुई[३], इतरत्थ रुई[४] य मिच्छत्तं ॥१३४॥ सम्मत्तं गतं ॥**

श्रुत्वा केवलिप्रभृतीनामुपदेशम् अभिसमेत्य वा जातिस्मरणादिना या तत्त्वेषु रुचिर्भवति सा सम्यक्त्वम् । या तु 'तत्रैव' तत्त्वेषु विरुचिः 'इतरेषु' अतत्त्वेषु रुचिः सा मिथ्यात्वमिति ॥१३४॥

१ सम्मं मोहं प° ता० ॥ २ रोययते जे° ता० ॥ ३-४ °रुयी भा० ॥

उक्तं सम्यक्श्रुतं मिथ्यात्वश्रुतं च । सम्प्रति साधनादिश्रुते आह—

साधना-दिश्रुते

**अव्वोच्छित्तिनयट्ठा, एयं तु अणाइयं जहा लोए ।**
**वोच्छेयनया सादी, पप्प गईतो जहा जीवो ॥ १२५ ॥**

अव्यवच्छित्तिनयो (ग्रन्थाग्रम्—१०००) नाम द्रव्यास्तिकनयः तस्य अर्थाद्—आदेशात् 'एतत्' श्रुतज्ञानमनादिकम् उपलक्षणमेतत् अनिधनं च, यथा लोकस्त्रिष्वपि कालेषु भावादनादिरनिधनश्च; तन्मतेन हि न सतः सर्वथा नाशः, नाऽप्येकान्तेनासत उत्पाद इत्यनाद्यनिधनता । 'व्यवच्छेदनयात्' पर्यायास्तिकमतेन पुनः सादि उपलक्षणमेतत् सपर्यवसितं च, यथा गतीः 'प्राप्य' अधिकृत्य जीवः; तथाहि—नैरयिको नैरयिकत्वेनोत्पद्यमानः सादिः, तद्गतेस्तदानीमेव भावात्; नैरयिकत्वेन तु विनश्यन् सपर्यवसितः, तस्य हि पर्यायाः प्रधानम्, ते चोत्पद्यन्ते विनश्यन्ति चेति सादि-सपर्यवसितता ॥ १२५ ॥

अथवा अन्यथा साधनादित्वम्, तदेवाह—

**दव्वाइचउक्कं वा, पडुच्च सादी[2] व होज्जऽणादी[3] वा ।**
**दव्वम्मि[4] एगपुरिसं, पडुच्च सादी[5] सनिहणं च ॥ १२६ ॥**

वाशब्दः प्रकारान्तरद्योतने । 'द्रव्यादिचतुष्कं' द्रव्य-क्षेत्र-काल-भावान् प्रतीत्य श्रुतज्ञानं सादि वा स्यादनादि वा, उपलक्षणमेतत्, सपर्यवसितमपर्यवसितं च । तत्र द्रव्ये एकं पुरुषं प्रतीत्य सादि-निधनम् । कथम्? इति चेत्, उच्यते—यदा तत्प्रथमतया तदधीते तदा पूर्वमभावात् सादि । सपर्यवसानं पुनरेभिर्वक्ष्यमाणैः पञ्चभिः स्थानैः ॥ १२६ ॥ तान्येवाह—

**पणगं खलु पडिवाए, तत्थेगो देवभावमासज्ज ।**
**मणुये रोग-पमाया, केवल-मिच्छत्तगमणे वा ॥ १२७ ॥**

'प्रतिपाते' प्रतिपातविषयं खलु पञ्चकम्, पञ्चभिः स्थानैः प्रतिपात इत्यर्थः । तत्रैकः प्रतिपातो देवभावमासाद्य वेदितव्यः । द्वितीयो मनुष्ये रोगात् । तृतीयो मनुष्यभवे एव प्रमादात् । चतुर्थः केवलभावे । पञ्चमो मिथ्यात्वगमने ॥ १२७ ॥

तत्र प्रथमं प्रतिपातं देवभावमासाद्य भावयति—

**चउदसपुव्वी मणुओ, देवत्ते तं न संमरइ सव्वं ।**
**देसम्मि होइ भयणा, सट्ठाणभवे वि भयणा उ ॥ १२८ ॥**

चतुर्दशपूर्वी मनुजो देवत्वे प्राप्ते सति 'तत्' श्रुतं सर्वं न संस्मरति, विषय-प्रमादतस्तथाविधोपयोगाभावात्; देशे भवति 'भजना' विकल्पना, सा त्वेवम्—कश्चिद्देशं स्मरति, कश्चिद्देशस्यापि देशम्, कश्चित्पुनरेकादशस्वप्यङ्गेषु सर्वं स्मरति, कश्चित्तेषामपि देशमिति । तदेवं भावितो देवभावमासाद्य प्रथमः प्रतिपातः । सम्प्रति शेषान् भावयति—"सट्ठाणभवे वि भयणा उ" स्वस्थानं—मनुष्यत्वं तस्मिन्नपि भवे रोगादिभिः 'भजना' विकल्पना । तथाहि—रोगे समुत्पन्ने तथाविधपीडावशतः स्मृतेरुपहननान्न स्मरति, प्रमादतो वा गुणनाभावतोऽपगच्छति श्रुतमधीतम्, केवलज्ञानभावे वा श्रुतज्ञानस्य क्षयः, "नट्ठम्मि उ छाउमत्थिए नाणे" ( आव०

१ लोओ ता० ॥ २ सादि ता० ॥ ३ °णादि ता० ॥ ४ °व्वंसि ए° ता० ॥ ५ सादि ता० ॥

नि० गाथा ५३९ ) इति वचनात्, मिथ्यादर्शनगमने वा सर्वश्रुताभावः, अज्ञानीभवनादिति ॥ १३८ ॥ आह श्रुतज्ञानं जीवादन्यत्? अनन्यत्? उच्यते–अनन्यत् । यत आह—

श्रुतस्य जीवाद्-नन्यता

**नियमा सुयं तु जीवो, जीवे भयणा उ तीसु ठाणेसु ।**
**सुयनाणि सुयअनाणी, केवलनाणी व सो होज्जा ॥ १३९ ॥**

श्रुतं नियमाज्जीवः, तत्परिणामत्वात् । जीवे पुनः 'त्रिषु स्थानेषु' त्रीणि स्थानान्यधिकृत्य 'भजना' विकल्पना । तथाहि–स जीवः कदाचित् श्रुतज्ञानी भवति कदाचित् श्रुताज्ञानी कदाचित्केवलज्ञानीति ॥ १३९ ॥ सम्प्रति क्षेत्रतः कालतो भावतश्च सादि-सपर्यवसिततामाह—

श्रुतस्य सादिस-पर्यव-सितत्वम्

**खित्ते भरहेरवए, काले उ समाओ दोण्णि तत्थेव ।**
**भावे पुण पण्णवगं, पण्णवणिज्जे य आसज्जा ॥ १४० ॥**

क्षेत्रतः पञ्च भरतानि पञ्चैरावतान्यधिकृत्य, काले 'तत्रैव' पञ्चसु भरतेषु पञ्चस्वैरावतेषु 'द्वे समे' अवसर्पिणीमुत्सर्पिणीं चाधिकृत्य सादि-सपर्यवसितम्, यावत् तीर्थकृतां तीर्थानुवृत्तिस्तावद् भवति शेषकालं नेति कृत्वा । भावे पुनः प्रज्ञापकं प्रज्ञापनीयांश्च भावानासाद्य सादि पर्यवसितम् ॥ १४० ॥ कथम्? इत्याह—

**उवयोग-सर-पयत्ता, ठाणविसेसा य हुंति पण्णवगे ।**
**गति-ठाण-भेय-संघाय-वन्नमादी य भावम्मि ॥ १४१ ॥**

प्रज्ञापकस्य कदाचिदुपयोगः शुभो भवति कदाचिदशुभः । एकैकोऽपि कदाचित्तीव्रः कदाचिन्मध्यमः कदाचिन्मन्दः । स्वरोऽपि कदाचिदुदात्तः कदाचिदनुदात्तः कदाचित्स्वरितः । प्रयत्नो नाम–आदरः स क्षणे क्षणेऽन्यादृशः । 'स्थानविशेषाः' स्थानप्रकाराः वीरासनाद्याः । एषामुत्पादे प्रज्ञापकस्यापि तेन तेन भावेनोत्पादो विनाशे च विनाशः । प्रज्ञापकस्योत्पादे विनाशे च श्रुतज्ञानस्यापि तदात्मकत्वादुत्पादो विनाशश्च । तत एवं प्रज्ञापकमधिकृत्य सादि-सपर्यवसितम्, अधुना प्रज्ञापनीयान् भावानधिकृत्य तद् भावयति–"गति" इत्यादि । पदैकदेशे पदसमुदायोपचाराद् 'गतिः' इति गतिलक्षणो धर्मास्तिकायः परिगृह्यते । स जीवस्य पुद्गलस्य वा गतिपरिणामपरिणतस्योपग्रहे वर्त्तित्वात् तस्यैव स्थानपरिणामपरिणतस्योपग्रहे न वर्त्तते इत्यसौ सादि-पर्यवसितः । एवमधर्मास्तिकायोऽपि स्थानलक्षणो जीवस्य पुद्गलस्य वा स्थानपरिणतस्योपग्रहे वर्त्तित्वात् तस्यैव गतिपरिणामपरिणतस्योपग्रहे न वर्त्तते इति सादि-सपर्यवसितः । अथवा गतिपरिणतं द्रव्यं भूत्वा स्थानपरिणतं भवति, स्थानपरिणतं भूत्वा गतिपरिणतम् । यदि वा "ठाण"त्ति एकप्रदेशावगाढं भूत्वा द्विप्रदेशावगाढं भवति, द्विप्रदेशावगाढं भूत्वा एकप्रदेशावगाढम्, एवं विस्तरेण सर्वाऽवगाहना द्रष्टव्या । तथा पुद्गलस्कन्धानां तेन तेन प्रकारेण भेदो भवति । तेषामेव च द्विप्रदेशादीनां सङ्घातः । तथा "वण्ण"त्ति परमाणुः कालवर्णपरिणतो भूत्वा नीलवर्णपरिणतो भवति, नीलवर्णपरिणतो भूत्वा कालवर्णपरिणतः, एवं विस्तरेण वर्णपरिणामो वक्तव्यः । आदिशब्दाद् गन्ध-रस-स्पर्श-संस्थानानां[3] परिग्रहः, तेऽप्येवं वक्तव्याः–

---

१ च ता० ॥ २ °सञ्ज कां० डे० भा० ॥ ३ °नादीनां भा० ॥

सुरभिगन्धपरिणतो भूत्वा दुरभिगन्धपरिणतो भवति इत्यादि विस्तरेणोपयुज्य वक्तव्यम् । इत्थं च प्रज्ञापनीयभावानां प्रज्ञापने श्रुतज्ञानमपि तथा तथा परिणमत इति सादि-सपर्यवसितं द्रष्टव्यम् ॥ १४१ ॥ चतुष्कमधिकृत्यानाद्यपर्यवसितत्वमाह—

श्रुतस्यानाद्यपर्यवसितत्वम्

**दव्वे नाणापुरिसे, खेत्ते विदेहाइँ कालो जो तेसु ।**
**खयउवसम भावम्मि य, सुयनाणं वट्टए सयंय[1] ॥ १४२ ॥**

'द्रव्ये' द्रव्यतो नानापुरुषान् प्रतीत्य, क्षेत्रतः पञ्च विदेहान्, 'तेष्वेव च' पञ्चसु विदेहेषु यः कालस्तं कालमधिकृत्य, भावे क्षयोपशमरूपे श्रुतज्ञानं 'सततं' सर्वकालं वर्त्तत इत्यनाद्यपर्यवसितता ॥ १४२ ॥ सम्प्रति गमिकमगमिकं चाह—

गमिकश्रुतमगमिकश्रुतं च

**भंग-गणियादि गमियं, जं सरिसगमं चँ[3] कारणवसेणं ।**
**गाहादि अगमियं खलु, कालिय तह दिट्ठिवाए य ॥ १४३ ॥**

'दृष्टिवादो गमिकम्, कालिकश्रुतमगमिकम्' एतद् बाहुल्येनोच्यते अतोऽपवदति—"भंगगणिये"त्यादि पूर्वार्धम् । कालिकश्रुते दृष्टिवादे वा यत्र भङ्गाः—चतुर्भङ्गादयः गणितं—सङ्कलनादि, आदिग्रहणेन क्रियाविशाले पूर्वे यत् छन्दः प्रकृतं तत् सदृशगममिति तस्य परिग्रहः; यच्च 'कारणवशेन' अर्थवशेन सदृशगमम्, यथा निशीथस्य विंशतितम उद्देशकः, एतद् गमिकम् । शेषं गाथादि आदिशब्दात् श्लोकादिपरिग्रहः अगमिकम् ॥ १४३ ॥

सम्प्रत्यङ्गगतमनङ्गगतं च प्रतिपादयति—

अङ्गश्रुतमनङ्गश्रुतं च

**गणहर-थेरकयं वा, आदेसा मुक्कवागरणतो वा ।**
**धुव-चलविसेसतो वा, अंगा-ऽणंगेसु णाणत्तं ॥ १४४ ॥**

यद् गणधरैः कृतं तदङ्गप्रविष्टम् । यत्पुनर्गणधरकृतादेव स्थविरैर्निर्यूढम्; ये चादेशाः[4], यथा—आर्यमङ्गुराचार्यस्त्रिविधं शङ्खमिच्छति—एकभविकं बद्धायुष्कमभिमुखनामगोत्रं च, आर्यसमुद्रो द्विविधम्—बद्धायुष्कमभिमुखनामगोत्रं च, आर्यसुहस्ती एकम्—अभिमुखनामगोत्रमिति[5]; यानि च मुक्तकानि[6] व्याकरणानि, यथा—"वर्ष देव! कुणालायाम्०" इत्यादि, तथा

१ भावेसु य ता० ॥ २ सततं ता० ॥ ३ तु ता० ॥

४ अत्र हि नयान्तरविकल्पिताः पदार्था आदेशत्वेन निर्दिष्टा अवसातव्याः, अन्यथा "वर्ष देव! कुणालायाम्" इत्यादिकानां पञ्चशतादेशानामत्र मुक्तकव्याकरणत्वेन निर्दिष्टत्वादादेशानां मुक्तकानां चाभेदापत्तेः ॥

५ 'शङ्ख'पदस्य द्रव्यनिक्षेपमधिकृत्यैतदादेशत्रिकम् । एतच्चादेशत्रिकं निर्युक्तिकृता सूत्रकृताङ्गद्वितीयश्रुतस्कन्धे प्रथमे पौण्डरीकाध्ययने द्रव्यपौण्डरीकव्याख्याने सङ्गृहीतम् । तथाहि—

"एतदेव द्रव्यपौण्डरीकं विशेषतरं दर्शयितुमाह—

**एगभविए य बद्धाउए य अभिमुहियनामगोए य ।**
**एते तिन्नि वि देसा, दव्वम्मि य पोंडरीयस्स ॥ १४६ ॥**

वृत्तिः—'एगे'त्यादि । एकेन भवेन गतेनानन्तरभव एव यः पौण्डरीकेषूत्पत्स्यते स एकभविकः । तथा तदासन्नतरः पौण्डरीकेषु बद्धायुष्कः । ततोऽप्यासन्नतमः 'अभिमुखनामगोत्रः' अनन्तरसमयेषु यः पौण्डरीकेषूत्पद्यते । 'एते' अनन्तरोक्तास्त्रयोऽप्यादेशविशेषाः द्रव्यपौण्डरीकेऽवगन्तव्या इति ॥" पत्र २६७-६८ ॥

६ मुक्तकव्याकरणानि किल निर्युक्तिकृद्-भाष्यकृदादिभिरादेशान्तरतया निर्दिष्टानि यानि ग्रन्थान्तरेष्वितस्ततो विप्रकीर्णानि दृष्टिपथमवतीर्णानि तान्यत्र निष्टङ्क्यन्ते—

"**मरुदेवा** भगवती अनादिवनस्पतिकायिका तद्भवेन सिद्धा" इत्यादि; एतत्स्थविरकृतम् आदेशा मुक्तकव्याकरणतश्च अनङ्गप्रविष्टम् । अथवा ध्रुव-चलविशेषतोऽङ्गा-ऽनङ्गेषु नानात्वम् । तद्यथा-ध्रुवं अङ्गप्रविष्टम्, तच्च द्वादशाङ्गम्, तस्य नियमतो निर्यूहणात्; चलानि प्रकीर्णकानि, तानि हि कदाचिन्निर्यूह्यन्ते कदाचिन्न, तान्यनङ्गप्रविष्टमिति ॥ १४४ ॥ आह दृष्टिवादे सर्वमेव वचोगतमवतरति, ततः किमर्थमङ्गगतानां निर्यूहणम्? इति, तत आह—

**जइ वि य भूयावादे, सव्वस्स वयोगयस्स ओयारो ।**
**निज्जूहणा तहा वि य, दुम्मेहे पप्प इत्थी य ॥ १४५ ॥**

यद्यपि च 'भूतवादे' दृष्टिवादे सर्वस्य वचोगतस्यावतारः तथापि शेषाणामङ्गानामनङ्गानां च निर्यूहणा दुर्मेधसः पुरुषान् प्रतीत्य स्त्रियश्च । नहि प्रज्ञावत्योऽपि स्त्रियो दृष्टिवादं पठन्ति ॥ १४५ ॥ किं कारणम्? अत आह—

---

"अत्र **वृद्धसम्प्रदायः**—आरुहए पवयणे **पंच आएससयाणि** जाणि अणिबद्धाणि । तत्थेगं—**मरुदेवा** ण वि **अंगे** ण **उवंगे** पाठो अत्थि जहा—'अच्चंतं थावरा होइऊण सिद्ध' त्ति । बिइयं—**सयंभूरमणे** समुद्दे मच्छाणं पउमपत्ताण य सव्वसंठाणाणि अत्थि वलयसंठाणं मोत्तुं । तइयं—**विण्हुस्स** सातिरेगजोयणसयसहस्सविउव्वणं । चउत्थं—**करड-ओकुरुडा** दोसट्ठियरुवज्झाया, **कुणाला**णयरीए निद्धमणमूले वसही, वरिसासु देवयाणुकंपणं, नागरेहिं निच्छुहणं, **करडेण** रूसिएण वुत्तं-"वरिस देव ! **कुणालाए**," **उकुरुडेण** भणियं—"दस दिवसाणि पंच य ।" पुणरवि **करडेण** भणियं—"मुट्ठिमेत्ताहिं धाराहिं," **उकुरुडेण** भणियं—"जहा रत्तिं तहा दिवं ॥ १ ॥" एवं वोत्तूणमवक्कंता, **कुणालाए** वि पण्णरसदिवसअणुबद्धवरिसणेणं सजाणवया सा जलेण उक्कंता, तओ ते तइयवरिसे **साएए** णयरे दो वि कालं काऊण अहे सत्तमाए पुढवीए **काले** णरगे बावीससागरोवमट्ठिईया णेरइया संवुत्ता । [ पंचमं—] **कुणाला**णयरीविणासकालाओ तेरसमे वरिसे **महावीरस्स** केवलणाणसमुप्पत्ती ।" **आवश्यक हारिभद्री टीका** पत्र ४६५ । **आवश्यक चूर्णी** प्रथमभाग पत्र ६०१ ॥

"वीरो **आदेसंतरतो** आयंगुलेण चुलसीतिमंगुलुच्चिद्धो, उस्सेहंगुलतो पुण सत्तसट्ठसतं ( सतमट्ठसट्ठं ) भवति ।" **अनुयोगद्वार चूर्णी** पत्र ५५ ॥

"यत्र तीर्थकरा विहरन्ति तत्र देशे पञ्चविंशतियोजनानाम् **आदेशान्तरे**ण द्वादशानां मध्ये तीर्थकरातिशयात् न वैरादयोऽनर्था भवन्ति ।" **विपाक टीका** पत्र ६४ ॥

"**आदेसेण** वा गब्भट्ठमस्स दिक्खति त्ति ।" **निशीथचूर्णौ** ॥

"मरुदेवी वि **आएसंतरे**ण नाभिजुल त्ति ।" **सिद्धप्राभृतवृत्तौ** पत्र १० ॥

"बाहुल्लाओ सुत्तम्मि सत्त पंच य जहण्णमुक्कोसं । इहरा हीणब्भहियं, होज्जंगुल-धणुपुहुत्तेहिं ॥
अच्छेरयाई किंचि वि, सामन्नसुए न देसियं सव्वं । होज्ज व अणिबद्धं च्चिय, पंचसयाएसवयणं व ॥"
**विशेषावश्यके** गाथा ३१७०-७१ ॥

"अहवाऽऽउअमुच्चत्तं, च सुत्तभणिअं जहण्णमियरं च । सामण्णं ण विसेसा, पंचसयादेसवयणं व ॥"
**विशेषणवती** गाथा ८१ ॥

"करड-महकरड निरओ, वीरंगुट्ठेण चालिओ मेरू । तह मरुदेवा सिद्धा, अच्चंतं थावरा होउं ॥ १ ॥
वलयागारं मोत्तुं, सयंभूरमणम्मि सव्व आगारा । मीण-पउमाण एवं, बहु आएसा ········ ॥ २ ॥
सुरलोयवाविमज्झे, मच्छाई नत्थि जलयरा जीवा । गेविज्जे न हु वावी, वाविअभावे जलं नत्थि ॥ ३ ॥"
**सिद्धान्तविचारग्रन्थे** ॥

दृष्टिवादाध्ययने स्त्रीणामनधिकारित्वं तत्कारणानि च

तुच्छा गारवबहुला, चलिंदिया दुब्बला[1] य धीईए ।
इति अतिसेसज्झयणा, भूयावादो उ नो थीणं[2] ॥ १४६ ॥

दृष्टिवादे हि बहवो विद्यातिशयाः सर्वकामप्रदा उपवर्ण्यन्ते, सा च स्त्री स्वभावात् 'तुच्छा' अल्पसत्त्वा, तथा 'गौरवबहुला' स्तोकायामप्यर्थवृद्धौ मानातिरेकतो व्यर्थसम्भवात्, 'चलेन्द्रिया' स्वभावत एव तदिन्द्रियाणामतिलम्पटत्वात्, तथा 'धृत्या' मानसेनाऽवष्टम्भेन दुर्बला, 'इति' अस्मात् कारणात् अतिशेषाणि—अतिशायीनि अध्ययनानि—महापरिज्ञा-ऽरुणोपपातादीनि 'भूतवादश्च' दृष्टिवादो न स्त्रीणामनुज्ञातः ॥ १४६ ॥

तदेवमुक्तं चतुर्दशभेदं श्रुतज्ञानम् अङ्गगता-ऽनङ्गगतविशेषश्च । आह परः—केन पुनः कारणेनाक्षरा-ऽनक्षरश्रुते प्रथममुपात्ते ? तत आह—

अक्षरानक्षरश्रुतयोः पूर्वोपादाने कारणम्

सुं[3]णतीति सुयं तेणं, सवणं पुण अक्खरेयरं चेव ।
तेणऽक्खरेयरं वा, सुयनाणे होति पुव्वं तु ॥ १४७ ॥

इह यस्मात् प्रतिपत्ता तद् उच्यमानं शृणोति तेन कारणेन तत् श्रुतमित्युच्यते, 'श्रूयत इति श्रुतम्' इति व्युत्पत्तेः । श्रवणं पुनः 'अक्षरेतरं चैव' अक्षरस्य इतरस्य च—अनक्षरस्य, 'तेन' कारणेन श्रुतज्ञाने प्ररूप्यमाणे पूर्वमक्षरमनक्षरं चोपात्तमिति ॥ १४७ ॥

सम्प्रति यदुक्तं मूलद्वारगाथायां "प्रकृतम्" ( गाथा ३ ) इति तत्प्ररूपणार्थमाह—

अत्र प्रकृते श्रुतज्ञानेनाधिकारः

इत्थं पुण अहिगारो, सुयनाणेणं जतो हवति तेणं ।
सेसाणं[4]मप्पणो वि य, अणुयोग पईव दिट्ठंतो ॥ १४८ ॥

तदेवं मङ्गलनिमित्तं पञ्च ज्ञानानि प्ररूपितानि । एतेषु च पञ्चसु ज्ञानेषु मध्येऽत्राधिकारः श्रुतज्ञानेन । किं कारणम् ? अत आह—'यतः' यस्मात् कारणात् 'तेन' श्रुतज्ञानेन 'शेषाणाम्' आभिनिबोधिका-ऽवधि-मनःपर्याय-केवलानामात्मनश्च 'अनुयोगः' भाषणं भवति । अत्र[5] दृष्टान्तः प्रदीपः—यथा प्रदीपो घटादीनामात्मनश्च प्रकाशकः एवं श्रुतज्ञानं शेषाणामात्मनश्चानुयोगकारकम् । उक्तं च—

सुयनाणं महिड्ढीयं, केवलं तदणंतरं ।
अप्पणो सेसगाणं च, जम्हा तं पविभावगं ॥

तेन कारणेन अत्र श्रुतज्ञानेनाऽधिकारः ॥ १४८ ॥ तस्य च श्रुतज्ञानस्योद्देशक-समुद्देशादि चतुष्टयं भवति, तत्राऽनुयोगेऽधिकारः, स चैतैर्द्वारैरनुगन्तव्यः—

## [ अनुयोगाधिकारः ]

द्वारगाथा

निक्खेवेगट्ठ निरुत्त विहि पवित्ती य केण वा कस्स ।
तद्दार भेय लक्खण, तदरिह परिसा य सुत्तत्थो ॥ १४९ ॥

अनुयोगस्य 'निक्षेपः' नामादिन्यासो वक्तव्यः । तदनन्तरं तस्यैकार्थिकानि । तदनु निरुक्तं वक्तव्यम् । ततः को विधिरनुयोगे कर्त्तव्ये इति विधिर्वक्तव्यः । तथा 'प्रवृत्तिः' प्रसवोऽनुयो-

१ °ला धितीए य ता० ॥ २ °वातो य नो थीए ता० ॥ ३ सुणेती° ता० विना ॥ ४ °ण अप्प° ता० ॥ ५ तत्र कां० डे० ॥

गस्य वक्तव्यः । तदनन्तरं केनाऽनुयोगः कर्त्तव्य इति वक्तव्यम् । ततः परं कस्य शास्त्रस्य कर्त्तव्य इति । तदनन्तरं तस्य—अनुयोगस्य द्वाराणि—उपक्रमादीनि वक्तव्यानि, तत्र तेषामेव भेदः । ततः परं सूत्रस्य लक्षणम् । तदनन्तरं तस्य—सूत्रस्य अर्हाः—योग्याः । ततः परं परिषत् । ततः सूत्रार्थः । एष द्वारगाथासङ्क्षेपार्थः, व्यासार्थस्तु प्रतिद्वारं वक्ष्यते ॥ १४९ ॥ तत्र प्रथमतो निक्षेपद्वारमाह—

**निक्षेपद्वारम्**

निक्षेपस्यै-कार्थिकानि

**निक्खेवो नासो त्ति य, एगट्ठं सो उ कस्स निक्खेवो ।**
**अणुओगस्स भगवओ, तस्स इमे वण्णिया भेया ॥ १५० ॥**

निक्षेपः न्यास इत्येकार्थम् । पर आह—स निक्षेपः कस्य कर्त्तव्यः ? सूरिराह—अनुयोगस्य भगवतः । 'तस्य च' निक्षेपस्य 'इमे' वक्ष्यमाणा वर्णिता भेदाः ॥ १५० ॥ तानेवाह—

अनुयोगस्य निक्षेपाः

**नामं ठवणा दविए, खेत्ते काले य वयण भावे य ।**
**एसो अणुओगस्स उ, निक्खेवो होइ सत्तविहो ॥ १५१ ॥**

नामानुयोगः स्थापनानुयोगो द्रव्यानुयोगः क्षेत्रानुयोगः कालानुयोगो वचनानुयोगो भावानुयोगश्च । एषोऽनुयोगस्य सप्तविधो निक्षेपः ॥ १५१ ॥

तत्र नाम-स्थापने प्रतीते इति ते अनादृत्य शेषाणां द्रव्याद्यनुयोगानां भेदानाह—

द्रव्याद्यनुयोगानां प्रभेदाः

**सामित्त-करण-अहिगरणतो य एगत्त तह पुहत्ते य ।**
**नामं ठवणा मोत्तुं, इति दव्वादीण छब्भेया ॥ १५२ ॥**

'स्वामित्वं' सम्बन्धः 'करणं' साधकतमम् 'अधिकरणं' आधारः, एतैः प्रत्येकमेकत्वेन 'पृथक्त्वेन च' बहुत्वेन पञ्चानां द्रव्यादीनामनुयोगो वक्तव्यः । 'इति' एवं नाम स्थापनां च मुक्त्वा द्रव्यादीनामनुयोगस्य प्रत्येकं षड् भेदा भवन्ति । तद्यथा—द्रव्यस्य वा १ द्रव्याणां वा २ द्रव्येण वा ३ द्रव्यैर्वा ४ द्रव्ये वा ५ द्रव्येषु वा ६ अनुयोगो द्रव्यानुयोगः । एवं क्षेत्र-काल-वचन-भावानुयोगानामपि प्रत्येकं षड्भेदताऽवसेया ॥ १५२ ॥ तत्र प्रथमतो द्रव्यस्यानुयोगमाह—

द्रव्यस्यानुयोगः

**दव्वस्स उ अणुओगो, जीवद्दव्वस्स वा अजीवस्स ।**
**एक्केक्कम्मि य भेया, हवंति दव्वाइया चउरो ॥ १५३ ॥**

द्रव्यस्यानुयोगो द्विधा—जीवद्रव्यस्य वा अजीवद्रव्यस्य वा । एकैकस्मिन्ननुयोगे द्रव्यादिकाश्चत्वारो भेदाः । किमुक्तं भवति ?—जीवद्रव्यानुयोगोऽजीवद्रव्यानुयोगो वा प्रत्येकं द्रव्यतः क्षेत्रतः कालतो भावतश्च भवति ॥ १५३ ॥ तत्र जीवद्रव्यानुयोगं द्रव्यादित आह—

जीवद्रव्यानुयोगः

**दव्वेणिक्कं दव्वं, संखातीतप्पदेसमोगाढं ।**
**काले अणादिनिहणं, भावे नाणाइयाऽणंता ॥ १५४ ॥**

द्रव्यतो जीवद्रव्यमेकम्, क्षेत्रतोऽसङ्ख्येयप्रदेशावगाढम्, कालतोऽनाद्यनिधनम्, भावतो ज्ञानादिकाः पर्याया अनन्ताः, तद्यथा—अनन्ता ज्ञानपर्यायाः, अनन्ता दर्शनपर्यायाः, अनन्ताश्चारित्रपर्यवाः, अनन्ता अगुरुलघुपर्यवाः ॥ १५४ ॥

---

१ °गट्ठा सो ता० ॥ २ °वणं मो° ता० ॥ ३ °व्वेणेगं द° ता० ॥ ४ °खादीत° ता० ॥ ५ °लेऽणादिअणिह° ता० ॥

अधुना द्रव्यादिभिरजीवद्रव्यस्यानुयोगमाह—

अजीव-द्रव्यस्या-नुयोगः

**एमेव अजीवस्स वि, परमाणू दव्वमेगदव्वं तु ।**
**खेत्ते एगपएसे, ओगाढो सो भवे नियमा ॥ १५५ ॥**
**समयाइ ठिति असंखा, ओसप्पिणीओ हवंति कालम्मि ।**
**वण्णादि भावऽणंता, एवं दुपदेसमादी वि ॥ १५६ ॥**

'एवमेव' अनेनैव प्रकारेण 'अजीवस्यापि' अजीवद्रव्यस्याप्यनुयोगो वक्तव्यः । तद्यथा— परमाणुर्द्रव्यत एकं द्रव्यम्, क्षेत्रत एकप्रदेशावगाढः, कालतो जघन्यतः स्थितिः 'समयादि' एको द्वौ त्रयो वा समयाः, उत्कर्षतः 'असङ्ख्याः' असङ्ख्येया[२] अवसर्पिण्य उत्सर्पिण्यश्च भवन्ति, भावतोऽनन्ता वर्णादिपर्यायाः, तद्यथा—अनन्ता वर्णपर्यवाः, अनन्ता गन्धपर्यवाः, यावदनन्ताः स्पर्शपर्यवा इति । एवं 'द्विप्रदेशादेरपि' द्विप्रदेशिकस्य त्रिप्रदेशिकस्य यावदनन्तप्रदेशिकस्योपयुज्य वक्तव्यम्, तद्यथा-द्विप्रदेशिकः स्कन्धो द्रव्यत एकं द्रव्यम्, क्षेत्रत एकप्रदेशावगाढो द्विप्रदेशावगाढो वा, कालतो जघन्यतः स्थितिः समयादिः, उत्कर्षतोऽसङ्ख्येया उत्सर्पिण्यवसर्पिण्य इत्यादि ॥ १५५ ॥ १५६ ॥ सम्प्रति द्रव्याणामनुयोगमाह—

द्रव्याणा-मनुयोगः

**दव्वाणं अणुयोगो, जीवमजीवाण पज्जवा नेया ।**
**तत्थ वि य मग्गणाओ, णेगा सट्ठाण परठाणे ॥ १५७ ॥**

द्रव्याणामनुयोगो द्विधा—जीवद्रव्याणामजीवद्रव्याणां च । किंरूपोऽसौ ? इत्याह—'पर्यायाः' प्ररूप्यमाणा ज्ञेयाः, तथाहि—[३]कतिविधा भदन्त ! पर्यायाः प्रज्ञप्ताः ? गौतम ! द्विविधाः, तद्यथा—जीवद्रव्याणामजीवद्रव्याणां च । तत्राप्यनेकाः स्वस्थाने परस्थाने च मार्गणाः, ताश्चैवम्—नैरयिकाणामसुरकुमाराणां च कति पर्यायाः प्रज्ञप्ताः ? गौतम ! अनन्ताः । अथ केनार्थेनेदमुच्यते ? गौतम ! नैरयिकोऽसुरकुमारस्य द्रव्यार्थतया तुल्यः प्रत्येकमेकद्रव्यत्वात्, प्रदेशार्थतयाऽपि तुल्यः प्रत्येकं लोकाकाशप्रदेशतुल्यप्रदेशत्वात्, स्थित्या चतुःस्थानपतितः, भावतः षट्स्थानपतितः, ततो भवन्ति नैरयिकाणामसुरकुमाराणां च प्रत्येकं पर्याया अनन्ताः । अजीवद्रव्याणां पर्यायेष्वेवं स्वस्थाने परस्थाने च मार्गणा—[४]परमाणुपोग्गलाणं भंते ! दुपएसियाण य खंधाणं केवइया पज्जवा पण्णत्ता ? गोयमा ! अणंता । से केणट्ठेणं भंते ! एवं वुच्चइ ? गोयमा ! परमाणुपोग्गले दुपएसियस्स खंधस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए हीणे, नो तुल्ले नो अहिए, जइ हीणे पएसहीणे ठिईए चउट्ठाणवडिए वण्णादिपज्जवेहिं छट्ठाणवडिए । ततो भवन्ति द्रव्याणामपि प्रत्येकमनन्ताः पर्यायाः । एवमनेकधा जीवद्रव्याणामजीवद्रव्याणां चाऽनुयोगः सूत्रे तत्र तत्र प्रदेशेऽभिहितो भावनीयः ॥ १५७ ॥ तदेवं द्रव्यस्य द्रव्याणां चेति स्वामित्वं गतम्, इदानीं करणे एकत्व-बहुत्वाभ्यामनुयोगमाह—

द्रव्येण द्रव्यैः द्रव्ये द्रव्येष्व-नुयोगः

**वत्तीए अक्खेण व, करंगुलादीण वा वि दव्वेण ।**
**अक्खेहि उ दव्वेहिं, अहिगरणे कप्प कप्पेसु ॥ १५८ ॥**

---

१ दव्वे एकदव्वं तु ता० ॥ २ °या उत्सर्पिण्य अवसर्पिण्यश्च भा० विना ॥ ३-४ एतानि सर्वाण्यपि सूत्राणि प्रज्ञापनोपाङ्गे पञ्चमे पर्यायाख्ये पदे वरीवृत्यन्ते ॥

वर्तिः[1]—नाम खटिका तया कृता शलाका तया, अक्षेण वा कराङ्गुल्या वा, आदिशब्दात् प्रलेपकादिना वा यः क्रियतेऽनुयोगः स द्रव्येणाऽनुयोगः । द्रव्यैरनुयोगो यद्बहुभिरक्षैः क्रियतेऽनुयोगः । 'अधिकरणे'[2] एकस्मिन् द्रव्येऽनुयोगः, यदा एकस्मिन् कल्पे स्थितोऽनुयोगं करोति । यदा तु बहुषु कल्पेषु स्थितस्तदा द्रव्येष्वनुयोगः ॥ १५८ ॥

उक्तो द्रव्यानुयोगः षड्भेदः, सम्प्रति क्षेत्रस्य क्षेत्राणां चानुयोगमाह—

क्षेत्रस्य क्षेत्राणां चानुयोगः

**पन्नत्ति जंबुदीवे, खित्तस्सेमादि होइ अणुयोगो ।**
**खित्ताणं अणुयोगो, दीवसमुद्दाण पन्नत्ती ॥ १५९ ॥**

क्षेत्रस्यानुयोगो भवति जम्बूद्वीपस्य प्रज्ञप्तिः, आदिशब्दादन्यस्यापि द्वीपस्य योऽनुयोगः स क्षेत्रस्यानुयोगः । क्षेत्राणामनुयोगो द्वीपसमुद्राणां प्रज्ञप्तिः, द्वीपसागरप्रज्ञप्तिरित्यर्थः ॥ १५९ ॥

क्षेत्रेणानुयोगमाह—

क्षेत्रेणानुयोगः

**जंबुद्दीवपमाणं, पुढविजियाणं तु पत्थयं काउं ।**
**एवं मविज्जमाणा, हवंति लोगा असंखिज्जा ॥ १६० ॥**

पृथिवीजीवानां परिमाणम्

जम्बूद्वीपप्रमाणं प्रस्थकं पृथिवीकायिकानां मापनाय कृत्वा जम्बूद्वीपप्रमाणेन प्रस्थकेन ते पृथिवीकायिका माप्यन्ते, मापयित्वा मापयित्वा चालोके प्रक्षिप्यन्ते[3], एवं माप्यमाना असङ्ख्येया लोका भवन्ति, असङ्ख्येयलोकाकाशप्रमाणमलोकखण्डमापूरयन्तीत्यर्थः ॥ १६० ॥

क्षेत्रैरनुयोगमाह—

क्षेत्रैरनुयोगः

**खित्तेहिँ बहू दीवे, पुढविजियाणं तु पत्थयं काउं ।**
**एवं मविज्जमाणा, हवंति लोका असंखिज्जा ॥ १६१ ॥**

पृथिवीजीवानां परिमाणम्

क्षेत्रैरनुयोगो यथा—'बहून्' त्रिप्रभृतीन् द्वीपान् पृथिवीकायिकानां मापकरणाय प्रस्थकं कृत्वा तेन पृथिवीकायिकान् मापयेत्, मापयित्वा मापयित्वा चालोके प्रक्षिपेत्, ते चैवं[4] माप्यमाना असङ्ख्येया लोका भवन्ति ॥ १६१ ॥ सम्प्रति क्षेत्रे क्षेत्रेषु चानुयोगमाह—

क्षेत्रे क्षेत्रेषु चानुयोगः

**खित्तम्मि उ अणुयोगो, तिरियंलोगम्मि[5] जम्मि वा खेत्ते ।**
**अड्ढाइयदीवेसुं[6], अद्धछवीसाएँ खित्तेसु ॥ १६२ ॥**

क्षेत्रेऽनुयोगो यथा—तिर्यग्लोकेऽनुयोगो यस्मिन् वा ग्रामे नगरे उपाश्रये वा । क्षेत्रेष्वनुयोगो यथा—अर्द्धतृतीयेषु द्वीपेषु यदि वाऽर्द्धषड्विंशतिषु जनपदेषु ॥ १६२ ॥

अधुना कालस्य कालानां [कालेन कालैः] चानुयोगमाह—

कालस्य कालानां कालेन कालैश्चानुयोगः

**कालस्स समयरूवण, कालाण तदादि जाव सव्वद्धा ।**
**कालेणऽणिलववहारो, कालेहि उ सेसकायाणं ॥ १६३ ॥**

कालस्यानुयोगो यत् समयस्य प्ररूपणा । कालानामनुयोगो यत् समयादीनां—समयाऽऽवलिकाप्रभृतीनां यावत् सर्वाद्धा तावत् प्ररूपणम् । कालेनानुयोगः अनिलानां—वायुकायिका-

१ "वत्ती णाम सेडिया सलागकयल्लिया" इति चूर्णिः ॥ २ "अधिकरणे–दव्वे एगम्मि कप्पे, सामलीए त्ति भणियं होति" इति चूर्णिः ॥ ३ प्रक्षिप्यन्ते ते चै° भा० ॥ ४ तु° तत्रैवं मो० डे० ॥ ५ °रिए लो° ता० ॥ ६ °वेसू ता० ॥

वाय्वादिभिर्बद्धानां देहानां परिमाणम्

नामपहारः, यथा—वायुकायिकवैक्रियशरीराणि बद्धानि पल्योपमस्यासङ्ख्येयभागमात्रेण कालेनापह्रियन्ते । कालैरनुयोगः 'शेषकायानां' पृथिवीकायिकादीनाम्, यथा—औदारिकशरीराणि बद्धानि असङ्ख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरपह्रियन्त इति ॥ १६३ ॥

अधुना काले कालेषु चानुयोगमाह—

काले कालेषु चानुयोगः

**कालम्मि बिइयपोरिसि, समासु तिसु दोसु वा वि कालेसु ।**

कालेऽनुयोगः द्वितीयस्यां पौरुष्याम् । कालेष्वनुयोगः अवसर्पिण्यां तिसृषु समासु, तद्यथा—सुषमदुःषमायाः पश्चिमे भागे दुःषमसुषमायां दुःषमायामिति; उत्सर्पिण्यां द्वयोः समयोः—दुःषमासुषमायां सुषमादुःषमायां च ॥

उक्तः षट्प्रकारोऽपि कालानुयोगः, सम्प्रति वचनस्य वचनानां चानुयोगमाह—

वचनस्य वचनानां चानुयोगः

**वयणस्सेगवयाई, वयणाणं सोलसण्हं तु ॥ १६४ ॥**

"वयणस्से"त्यादि । वचनस्यानुयोगः 'एकवचनादेः' एकवचन-द्विवचन-बहुवचनानामन्यतमस्य, यथा—ईदृशमेकवचनमित्यादि । वचनानामनुयोगः त्रयाणामप्येकवचनादीनां स्वरूपकथनं षोडशानां वा वचनानाम् । तानि च षोडश वचनान्यमूनि—

वचनषोडशकम्

लिंगतियं वयणतियं, कालतियं तह परुक्ख पच्चक्खं ।
उवणय-ऽवणयचउक्कं, अज्झत्थियमं तु सोलसमं ॥

अस्या [अ]क्षरगमनिका—'लिङ्गत्रयम्' इयं स्त्री अयं पुमान् इदं कुलम् । 'वचनत्रिकम्' एकवचनं द्विवचनं बहुवचनमिति । 'कालत्रिकम्' अकरोत् करोति करिष्यति च । परोक्षवचनं यथा स इति । प्रत्यक्षवचनम् एष इति । उपनयः—स्तुतिः अपनयः—निन्दा तयोश्चतुष्कमुपनया-ऽपनयचतुष्कम्, यथा—रूपवती स्त्रीत्युपनयवचनम्, कुरूपा स्त्रीत्यपनयवचनम्, रूपवती स्त्री किन्तु दुःशीलेत्युपनया-ऽपनयवचनम्, कुरूपा स्त्री किन्तु सुशीलेत्यपनयोपनयवचनम् । तथा अन्यच्चेतसि निधाय विप्रतारकबुद्ध्या अन्यद् बिभणिषुरपि सहसा यच्चेतसि तदेव यद् वक्ति तत् षोडशमध्यात्मवचनम् ॥ ॥ १६४ ॥

वचनेन वचनैः वचने वचनेषु चानुयोगः

**वयणेणाऽऽयरियाई, इक्केणुत्तो बहूहि वयणेहिं ।**
**वयणे खओवसमिए, वयणेसु उ णत्थि अणुओगो ॥ १६५ ॥**

वचनेनानुयोगो यथा—कोऽप्याचार्यः केनाऽप्याचार्येण भिक्षुणा श्रावकेण वा भणितः 'अनुयोगमिच्छाकारेण कुरु' ततः सोऽनुयोगं करोति । वचनैरनुयोगः बहुभिराचार्यादिभिर्भणितोऽनुयोगं करोति । अथवा वचनेनानुयोगो नाम आचार्यादीनामन्यतम एकेन वचनेनानुयोगं करोति, यथा—समभावः सामायिकमिति । कश्चिद् बहुभिर्वचनैः सविस्तरमिति । वचने क्षायोपशमिके स्थितस्यानुयोगो वचनेऽनुयोगः । वचनेष्वनुयोगो नास्ति, क्षयोपशमभावस्य सर्वत्राप्येकत्वेन बहुत्वासम्भवात् । यदि वा व्यक्तिविवक्षया बहुष्वाचारादिषु वचनेषु स्थितस्यानुयोगो बहुवचनेष्वनुयोगः ॥ १६५ ॥ सम्प्रति भावानुयोगं षट्प्रकारमाह—

भावस्य भावानां चानुयोगः

**भावस्सेगतरस्स उ, अणुयोगो जो जहट्ठिओ भावो ।**
**दोमाइसन्निकासे, अणुयोगो होति भावाणं ॥ १६६ ॥**

भावस्यानुयोगः औदयिकादीनां भावानामन्यतमो यो यथास्थितो भावस्तस्य कथनम् । भावानामनुयोगो द्विकादीनां भावानां सन्निकाशे–संयोगे यावन्तो भङ्गा भवन्ति तेषां कथनम् ॥ १६६ ॥

**भावेण संगहाईअन्नयरेणं दुगाइभावेहिं ।**
**भावम्मि खओवसमे, भावेसु य नत्थि अणुयोगो ॥ १६७ ॥**

भावेन भावैः भावे भावेषु चानुयोगः

भावेनानुयोगः सङ्ग्रहादीनां पञ्चानां भावानामन्यतमेन । ते च सङ्ग्रहादयः पञ्च भावा इमे— पंचहिं ठाणेहिं सुयं वाइज्जा, तं जहा–संगहट्ठयाए, उवग्गहट्ठयाए, निज्जरट्ठयाए, सुयपज्जवजाएणं, अव्वुच्छित्तीए य । (स्थानाङ्गे ५ स्थाने ३ उद्देशे सूत्रं ४६८ पत्रं ३५०)

तत्र–कथं ममैते शिष्याः सूत्रार्थसङ्ग्राहकाः सम्पत्स्यन्ते? इति सङ्ग्रहार्थता, कथं नु नाम गीतार्था भूत्वा वस्त्राद्युत्पादनेन गच्छस्योपग्रहकरा भविष्यन्ति? इत्युपग्रहार्थता, ममाप्येतान् वाचयतः कर्मनिर्जरा विपुला भविष्यतीति निर्जरार्थता, तथा श्रुतपर्यवजातं–श्रुतपर्यायराशिर्ममापि वृद्धिं यास्यतीति चतुर्थं श्रुतपर्यवजातं कारणम्, श्रुतस्य शिष्यपरम्पराङ्गतया अव्यवच्छित्तिर्भूयादिति पञ्चममव्यवच्छित्तिकारणम् ॥

भावैरनुयोगः एतेषां पञ्चानां भावानां द्वित्र्यादिभिर्भावैः । भावेऽनुयोगः क्षायोपशमिके । भावेषु त्वनुयोगो नास्ति, क्षायोपशमिकभावस्यैकत्वात् ॥ १६७ ॥

**अहवा आयाराइसु, भावेसु उ एस होइ अणुओगो ।**
**सामित्तं आसज्ज व, परिणामेसुं बहुविहेसुं ॥ १६८ ॥**

अथवा भावेष्वप्येषोऽनुयोगो भवति । केषु? इत्याह–आचारादिषु द्वादशस्वङ्गेषु ये भावास्तेषु, अथवा स्वामित्वमासाद्य ये औदयिकादयो बहवः परिणामास्तेषु, यदि वा क्षायोपशमिकोऽपि भावः प्रतिक्षणमन्यथाऽन्यथा परिणमते ततस्तेषु व्यवस्थितस्य व्याख्यां कुर्वतो भावेष्वनुयोगः ॥ १६८ ॥ अथ द्रव्य-क्षेत्र-काल-भावानां परस्परं समवतारोऽस्ति? न वा? अस्तीति ब्रूमः । कथम्? इत्याह—

**दव्वे नियमा भावो, न विणा ते यावि खित्त-कालेहिं ।**
**खित्ते तिण्ह वि भयणा, कालो[2] भयणाय तीसुं पि ॥ १६९ ॥**

द्रव्यादीनां परस्परं समवतारः

द्रव्ये नियमाद्भावः, भावं विना द्रव्यस्याऽसम्भवात्, नहि तदस्ति द्रव्यं यद्भावशून्यमिति । "न विणा ते यावि खित्त-कालेहिं" इति न च 'तावपि' द्रव्य-भावौ क्षेत्र-कालाभ्यां विना । तथाहि–क्षेत्रं विना न द्रव्यम्, आधारमन्तरेणाऽऽधेयस्याऽसम्भवात्; ततस्तद्गतो भावोऽपि न क्षेत्रं विना; कालं विना द्रव्य-भावाभावः समयक्षेत्रापेक्षया, नहि समयक्षेत्रे तदस्ति द्रव्यं भावो वा यः कालं विना । अन्यत्र तु नैष नियमः, तथा चाह–क्षेत्रे 'त्रयाणामपि' द्रव्य-काल-भावानां भजना । तत्र कालः समयक्षेत्रे भवति अन्यत्र नेति कालभजना । द्रव्य-भावावपि

१ "सुत्ते वा मे पज्जवयाते भविस्सति, सुत्तस्स वा अवोच्छित्तिणयट्ठयाते" इति पाठो मुद्रितस्थानाङ्गे ॥
२ °लो नियमा उ तीसुं ता० । "एतेसु पुण दव्व-खेत्त-भावेसु णियमा कालो भवति । आह कथमेतदवगन्तव्यम्? इति, उच्यते—………'कालो णियमा तु तीसुं पि'त्ति समयखेत्तमहिकिच्चा ।" इति चूर्णौ ॥

लोकाकाशे स्तो नाऽलोके । यद्यप्यलोकेऽप्यगुरुलघवः पर्यायाः सन्ति तथापि द्रव्यस्य भावो नाद्रव्यस्य, अलोकाकाशं च क्षेत्रत्वे न विवक्षितमिति भावस्याप्यभाव इति । कालः पुनर्भजनया 'त्रिष्वपि' द्रव्य-क्षेत्र-भावेषु, समयक्षेत्रादन्यत्र कालस्यासम्भवात् ॥ १६९ ॥

साम्प्रतमाधारा-ऽऽधेयभावयोजनामाह—

द्रव्यादीनामाधारा-ऽऽधेयत्वविभागः

**आधारो आधेयं, च होइ दव्वं[1] तहेव भावो य ।**
**खित्तं पुण आधारो, कालो नियमा उ आधेयो ॥ १७० ॥**

द्रव्यं भावश्चाधार आधेयश्च भवति । तत्र द्रव्यमाधारो भावस्य, आधेयं क्षेत्रस्य । भाव आधारः कालस्य, आधेयो द्रव्यस्य । क्षेत्रं पुनर्नियमादाधारः, तस्याऽन्यस्याऽऽधारस्याऽभावात्, "स्वप्रतिष्ठितमाकाशम्" इति वचनात् । कालो नियमादाधेयः, तस्य द्रव्ये क्षेत्रे भावे चावस्थानात् ॥ १७० ॥ उक्तोऽनुयोगः, तद्विपरीतोऽननुयोगः । तत्र दृष्टान्तानभिधित्सुराह—

द्रव्याद्यनुयोगविषयेऽननुयोगविषये च दृष्टान्ताः

**वत्स(च्छ)ग गोणी खुज्जा, सज्झाए चेव बहिरउल्लावे ।**
**गामिल्लए य वयणे, सत्तेव य हुंति भावम्मि ॥ १७१ ॥**

**द्रव्यानुयोगे द्रव्याननुयोगे च वत्स-गावावुदाहरणम्**—जइ गोदोहगो जो पाडलाए वत्सगो तं बाहुलाए मुयइ, बाहुलेयं वा वत्सगं पाडलाए मुयइ तो अणणुयोगो भवइ, दुद्धकज्जस्स य अप्पसिद्धी । एवमिहावि जइ जीवलक्खणेणं दोहयत्थाणीओ साहू अजीवं परूवेइ, अजीवलक्खणेण वा जीवं तो अणणुयोगो । तं भावं अन्नहा गिण्हइ, तेण अत्थो विसंवयइ, अत्थे विसंवइए चरणं विसंवयइ, चरणेणं विसंवइएणं मुक्खाभावो, मोक्खाभावे दिक्खा निरत्थिया । जइ पुण जो जाए वत्सगो तं ताए मुयइ तो अणुयोगो भवइ, तस्स य दुद्धकज्जस्स पसिद्धी । एवमिहावि जइ जीवलक्खणेणं जीवं परूवेइ, अजीवलक्खणेणमजीवं तो अणुयोगो भवइ । तस्स य मुक्खलक्खणस्स कज्जस्स पसिद्धी ॥

क्षेत्रस्याप्यननुयोगोऽनुयोगश्च भवति । **तत्राननुयोगे कुब्जोदाहरणम्—पइट्ठाणं नयरं । सालवाहणो**[2] राया । सो वरिसे वरिसे भरुयच्छे[3] नहवाहणं रोहेइ । जाहे य वरिसारत्तो भवति ताहे सयं नयरं पडियाइ, एवं कालो वच्चइ । अन्नया तेणं रन्ना रोहगेणं गइल्लएणं अत्थाणियमंडवियाए निच्छूढं । तस्स पडिग्गहधारी खुज्जा । सा चिंतेइ—अपरिभोगा एसाऽऽदिट्ठा, नूणमेस राया जाइउकामो । तीसे राउलगो जाणसालिओ परिजियओ । तीए तस्स कहियं । सो पए जाणाइ पमक्खिओ, पयट्टियाणि य । तं दट्ठुं सेसगो वि खंधावारो पयट्टिओ । राया रहसि एकल्लो धूलिभएण पयट्टो, जाव सव्वो खंधावारो पयट्टिओ दिट्ठो । राया चिंतेइ—न मए कस्सइ कहियं, कहमेएहिं नायं ? । गविट्ठं परंपरगेणं जाव खुज्ज त्ति । सा पुच्छिया । तीए तहेव अक्खायं । अत्र यन्मण्डपिकायां निष्ठ्यूतमेषोऽननुयोगः । एवं यदि क्षेत्रं जीवा-धनुःपृष्ठादिभिर्गणितविसंवादेन प्ररूपयति तदाऽननुयोगः, यदा त्वविसंवादि कथयति तदाऽनुयोगः, यथा कुब्जायाः 'अपरिभोगं क्षेत्रं जातम्' इति प्ररूपयन्त्याः ॥

---

१ दव्वे तहेव भावे य ता० ॥ २ °णो नाम रा° मो० डे० ॥ ३ भरुय:ऽऽणं भा० विना । चूर्णौ—"णधवाहणं" इति । आव० मल० वृत्तौ चूर्णौ च "णहवाहणं" इति पाठः ॥

**कालस्यानुयोगेऽननुयोगे च स्वाध्याय उदाहरणम्**—एगो साहू पाओसियं परियट्टंतो रहसेण कालं न याणाति । सम्मदिट्ठिया य देवया तं हियट्ठयाए संबोहेइ मिच्छादिट्ठियाए भएणं । सा तक्कस्स घडं भरेउं महया सद्देणं उग्घोसेइ—महियं महियं ति । सो तीसे कन्नारोडयं असहमाणो भणइ—अहो ! तक्कस्स वेल त्ति । सा भणइ—जहा तुज्झं सज्झायस्स वेला । उवउत्तो 'मिच्छा दुक्कडं' भणइ । देवताए अणुसासिओ—मा एवं काहिसि, मा मिच्छादिट्ठिगाए छलिज्जिहिसि । तस्स अकाले सज्झायंतस्स अणणुयोगो । तम्हा काले पढियव्वं, तो अणुयोगो भवति ॥

**वचनस्यानुयोगेऽननुयोगे च द्वे उदाहरणे—बधिरोल्लापो ग्रामेयकश्च ।**

एगम्मि य गामे बहिरकुडुंबं परिवसइ, थेरो थेरी य । ताणं पुत्तो हलं वाहेइ । अन्नया सो हलं वाहेउं गओ खित्ते हलं वाहेइ । अण्णो य मणूसो तेण पासेणं जाइ । तेण सो पंथं पुच्छिओ । सो बहिरो चिंतेइ—एस बलद्दे सिंगेइ । तओ भणइ—अरे ! मम घरे जाइल्लगा बलद्दा, कहमेए सिंगेसि ? न हवसि—त्ति हलं उवत्तेउं तस्स पहाविओ । इयरो चिंतेइ—गहिलओ एस । संपट्ठिओ । तस्स य भज्जा भत्तं घित्तुमागया । सो भज्जाए कहेइ—बइल्ला सिंगिय त्ति । सा चिंतेइ—एस भणइ 'अलोणयं भत्तं'ति । तओ भणइ—लोणियं भवउ मा वा, ते माऊए सिद्धं । सा घरं गया सासूए कहेइ—'अलोणयं' तव पुत्तो भणइ । सा य कत्तंतिया चिट्ठइ । तओ चिंतेइ—एसा भणइ 'अइथूलं कत्तेसि' । ताए पडिभणियं—थूलं वा भवउ वरडं वा, थेरस्स पुत्तं होहिइ । सा थेरं सद्दावेता भणइ—सव्वं एयं अतिथूलं तो तव पुत्तं होहिइ । तत्थ तिला विसारिया । सो रक्खगो आसि । सो चिंतेइ—एसा भणइ 'तुमे तिला खाइया' । ततो सवहं करेइ—पीएमि ते जीवियं जेइ एगं पि तिलं खाएमि । एवं जइ एगवयणेणं परूवेयव्वं दुवयणेण परूवेइ, दुवयणेण वा एगवयणेणं तो अणणुयोगो । अह तह चेव परूवेइ तो अणुयोगो ॥

**ग्रामेयकोदाहरणमेवम्**—एक्का नागरमहिला भत्तारे मए 'कट्ठाईणि वि ता अकीयाणि घेच्छामु' त्ति अजीवमाणी खुड्डुलयं पुत्तं घेत्तुं गामे पवुत्था । सो दारतो वड्डुंतो मायरं पुच्छइ—कहिं मम पिया ? । तीए भणियं—मओ सो । केण इ जीवियाइओ ? । भणइ—ओलग्गाए । तो खायं अहमवि ओलग्गामि । सा भणइ—न याणसि । तओ पुच्छइ—कहमोलग्गिज्जइ ? । भणिओ—विणयं करेज्जासि । केरिसो विणओ ? । जुक्कारो कायव्वो, नीयं चंकमियव्वं, छंदाणुवत्तिणा भवियव्वं । सो भणइ—एवं काहामो । सो नगरं पहाविओ । अंतरा य तेण वाहा निलुक्का दिट्ठा, वड्डेणं सद्देणं जुक्कारो कओ । तेण सद्देणं मिगा पलाया । तेहिं घेत्तुं पहओ । तेण सब्भावो कहिओ । मुक्को भणिओ य—जया एरिसं पिच्छिज्जासि तया निलुक्कंतेण सणियमागंतव्वं, न उल्लाविज्जइ, सणियं वा । तओ इंतेण रयगा दिट्ठा । ताहे निलुक्कंतो सणियं एइ । तेसिं च रयगाणं दिणे दिणे पुत्ताइं हीरंति । तओ ठाणयं बद्धं रक्खंति इंते चोरे । 'एस चोरो निलुक्कंतो एति' तओ बंधिउं पिट्टिओ । सब्भावे कहिए मुक्को भणिओ य—भणि-

१ माया य डे० ॥ २ जय एगं भा० ॥

ज्जासि 'सुद्धं भवउ, खारो पडउ' । सो नगरसम्मुहं एइ । एगत्थ बीयाणि वाविज्जंति । तेण भणियं–सुद्धाणि हवंतु, खारो पडउ । तओ तेहिं 'किमकारणं वेरिओ एवं भासइ ?'त्ति पिट्टिओ । सब्भावे कहिए मुक्को भणिओ य–एरिसे कज्जे एवं भन्नइ 'एरिसं बहुं हवतु, गड्डाओ भरह एयस्स' । तओ वच्चंतो एगत्थ मयगं निज्जंतं दट्ठूण भणइ–बहुं भवउ एरिसं । तत्थ वि पिट्टिओ । सब्भावे कहिए मुक्को भणिओ य–एरिसे कज्जे एवं भन्नइ 'अच्चंतविओगो भवउ एरिसेणं कज्जेणं' । तओ गच्छंतो एगत्थ विवाहे भणइ–एरिसेणं कज्जेणं अच्चंतवियोगो भवउ । तत्थ वि पिट्टिओ । सब्भावे कहिए मुक्को भणिओ य–एरिसे कज्जे एवं भणियव्वं 'निच्चं एरिसगाणि पिच्छंतया होह, सासयं भवउ' । तओ वच्चंतो एगत्थ नियलबद्धं दंडियं दट्ठूण भणइ–निच्चं एरिसयाणि पिच्छता होह, सासयं च एवं हवउ । तत्थ वि हओ । सब्भावे कहिए मुक्को भणिओ य–एरिसे कज्जे एवं भणिज्जासि 'एयाओ मे लहुं मुक्खो भवउ' । तओ गच्छंतो एगत्थ केइ मित्तसंघाडयं करिंते पिच्छइ । तत्थ भणइ–एयाओ मे लहुं मोक्खो भवउ । तत्थ वि पिट्टिओ । सब्भावे कहिए मुक्को गओ नगरे । तत्थ एगस्स दंडिकुलपुत्तगस्स अल्लीणो सेवंतो अच्छइ । अन्नया दुब्भिक्खे अंबिलजाऊ सिद्धिल्लिया । भज्जाए सो भणिओ–जाहि महायणमज्झाओ सद्दावेहि जेण भुंजइ, सीयला अजोग्गा भविस्सइ । तेण गंतूण महायणमज्झे वड्डेणं सद्देणं भणिओ–एहि एहि सीयली किल होइ अंबिलजाऊ । सो लज्जिओ घरं गओ । तेणं अंबाडिओ भणिओ य–एरिसे कज्जे सणियं कन्ने कहिज्जइ । अन्नया गेहं पलित्तं । तस्स भज्जाए भणियं–लहुं सद्दावेह ठकुरं । सो गंतुं सणियं कहेइ । जाव सो तस्स अक्खाइ ताव सव्वं घरं ज्झामियं । तत्थ वि अंबाडिओ भणिओ य–एरिसे कज्जे न वि आगम्मइ, अक्खायगेण अप्पणा चेव पाणिएण वा गोभत्तेण वा विज्झविज्जइ, गोरसो वा छुब्भइ, अंबिलो वि पल्हत्थिज्जइ, जहा तहा विज्झविज्जइ । अन्नया तस्स दंडिकुलपुत्तगस्स ण्हाऊण धूविंतस्स धूमो निगच्छइ । तओ सो गोभत्तं गोमुत्ताइयं च छुभेइ । एवं जो अन्नम्मि कहेयव्वे अन्नं कहेइ तस्स अणणुओगो । सम्मं कहिज्जमाणे अणुयोगो ॥

भावे भावस्य विषयेऽनुयोगेऽननुयोगे च सप्तोदाहरणानि भवन्ति ॥ १७१ ॥ तान्येवाह—

**सावगभज्जा सत्तवइए य कुंकणगदारए नउले ।**
**कमलामेला संबस्स साहसं सेणिए कोवे ॥ १७२ ॥**

प्रथममुदाहरणं श्रावकभार्या । द्वितीयं साप्तपदिकः पुरुषः । तृतीयं कौङ्कणकदारकः । चतुर्थं नकुलः । पञ्चमं कमलामेला । षष्ठं सम्बस्य साहसम् । सप्तमं 'श्रेणिके' श्रेणिकस्य कोपः ॥

तत्र **श्रावकभार्योदाहरणमिदम्**—एगो सावगो अन्नं महिलं दट्ठुं अज्झोववन्नो दुब्बलीभवइ । भज्जाए पुच्छिओ । निब्बंधे कहियं । ताए भणियं–आणेमि । ताहे सा संज्झासमए तीसे अविरइयाए तणएहिं वत्थेहिं अप्पाणं नेवत्थित्ता अंधयारे अल्लीणा । सो तीए समं अच्छिओ । तओ बीयदिवसे अद्धिइं पकओ 'वयं खंडियं' । ताए भणियं–मा अद्धिइं पकरेहि,

१ °वच्चयं दं° भा० ॥ २ एयं ह° भा० ॥

न खंडियं, अहं चेव आगया । साभिन्नाणं पत्तियावियो । एवं जो ससमयवत्तव्वयं परसमयवत्तव्वयं भणइ, ओदइयभावलक्खणेणं उवसमियभावलक्खणं परूवेइ ताहे अणणुयोगो भवति । सम्मं परूविज्जमाणे अणुयोगो ॥

**सावगपदिकोदाहरणमेवम्**—एगम्मि पच्चंतगामे एगो ओलग्गेयमणूसो[1] साहु-माहणाईणं न सुणेइ नेव अल्लियइ न वा वसहिं देइ 'मा मम धम्मं कहेहिइ, तो हं मा सदयो होहामि'त्ति । अन्नया तं गामं साहुणो आगया पडिस्सयं मग्गंति । ताहे सो गोट्ठिल्लएहिं 'एएसिं वसहिं न देसि त्ति एएहि य पवंचिओ होउ'त्ति तस्स घरं कहियं । 'इत्थ एरिसो तारिसो सावगो'त्ति ते पुच्छंता गया । दिट्ठा, जाव न चेव आढाइ । तत्थ एगेण साहुणा भणियं—जइ न चेव सो एसो, अहवा पवंचिया मो त्ति । तं सोऊण ते पुच्छिया । जहावत्तं कहियं । सो चिंतेइ—अहो ! अकज्जं, मं ताव पवंचंतु, साहुणो कहं पवंचिंति ? । ताहे 'मा तेसिं समो होउ'त्ति तेण भणियं—देमि वसहिं जइ मम धम्मं न कहेह । साहूहिं भणियं—एवं होउ त्ति । दिन्नं घरं । वासारत्ते विंचे[2] आपुच्छंति—विहरामो । ताहे पयट्टा साहुणोऽन्नत्थ विहरिउं । तेण अणुवइया । सीमापज्जंते धम्मो कहिओ । तत्थ न किंचि तरइ घेत्तुं मूलगुणं उत्तरगुणं वा मंसविरई वा । पच्छा सत्तवइयं वयं दिन्नं—मारेउकामेणं जावइएणं कालेणं सत्तपयाइं ओसक्किज्जंति एवइयं कालं पडिक्खित्ता मारेयव्वं 'संबुज्झिस्सइ'त्ति काउं । गया साहुणो । अन्नया चोरियाए गओ । अवसउणेण नियत्तो रत्तिं सणियं घरं एइ । तद्दिवसं तस्स भगिणी आगएल्लया पुरिसनेवत्थं काउं भाउज्जाइयाए समं नडपिच्छणगा[3] गया । चिरेण आगया निद्दक्कता तह चेव एगंतस्सयणे सइया । इयरो य आगओ पिच्छइ 'परपुरिसो' त्ति असिं उक्करिसित्ता 'आहणामि' त्ति ववसिओ । वयं संभरियं । ठिओ 'सत्तपयंतरं अच्छामि' त्ति । एयम्मि अंतरे भगिणीए बाहा भाउज्जाइयाए अक्कंतिया । ताए दुक्खाविज्जंतीए भणियं—अवणेहि मे बाहातो सीसं । तेण सरो सन्नाओ—भगिणी मे एसा पुरिसनेवत्थिय त्ति । दिट्ठा । लज्जिओ जाओ 'अहो ! मणेणं अकज्जं कयं' ति । उवणओ जहा सावगभज्जाए । सो संबुद्धो पव्वइओ ॥

**कोङ्कणकदारकोदाहरणमिदम्**—कोंकणगविसए एगो दारगो । तस्स माया मया । पिया से अन्नमहिलं न लहइ 'सवत्तिपुत्तो अच्छइ' त्ति काउं । अन्नया सपुत्तो कट्ठाणं गओ, ताहे णेण चिंतियं—एयस्स भएणं महिलियं न लभामि—त्ति मारेमि । तओ पुत्तो भणिओ—वच्छ ! कंडं आणेहि । सो पहाविओ । अण्णेण कंडेण विद्धो । दारएण लवियं—किं कंडं खित्तं ? विद्धो मि । पुणो वि खित्तं । रडंतो मारिओ । पुव्वं 'अयाणंतेण विद्धो मि'त्ति अणणुयोगो, 'मारिज्जामि' त्ति एवं नाए अणुयोगो । अहवा 'सारक्खणिज्जं मारेमि'त्ति अणणुयोगो, सारक्खंतस्स अणुयोगो । एवं अन्नम्मि परूवियव्वे अन्नं परूवेमाणस्स विपरीतत्वादननुयोगः, यथाभूतं[4] प्ररूपयतोऽनुयोगः ॥

१ °ग्गइमणू° भा० विना ॥ २ विंत्ते भा० ॥ ३ °च्छणगया डे० ॥ ४ यथारूपं प्ररू° भा० ॥

**नकुलोदाहरणमिदम्**—एगा चारभडिया गब्भिणी । अन्ना वि नउलिणी गब्भिणी तत्थ य लिहए एइ य जाइ य । ताओ समगं पसूयाओ । चारभडाए चिंतियं—मम पुत्तस्स रमणओ नउलो भविस्सइ—त्ति तस्स पीहयं देइ खीरं च । अन्नया दुवारे तीसे अविरइयाए कंडंतीए तत्थ मंचुलियाए सो दारगो ओयारिओ । तत्थ सप्पेण चडित्ता खाइओ मओ । इओ य इयरेण नउलेण मंचुलियाए उयरंतो दिट्ठो खंडीकओ । ताहे सो रुहिरलित्तेणं तुंडेण तीसे अविरइयाए मूलं गंतुं चाडूणि करेइ । ताए नायं—एएण मम पुत्तो खतिओ । मुसलेण आहणित्ता मारिओ । ताहे धावंती गया पुत्तमूलं, जाव सप्पं खंडाखंडीकयलयं पासेइ, ताहे दुगुणतरमद्धिई पगया । तीसे अविरइयाए पुव्वमणणुयोगो, पच्छा अणुयोगो । एवं जो अन्नं परूवेयव्वं अन्नं परूवेइ तस्स अणणुयोगो, जो तं चेव परूवेइ तस्स अणुयोगो ॥

**कमलामेलोदाहरणम्**—**बारवईए बलदेव**पुत्तस्स पुत्तो **सागरचंदो** नाम कुमारो, रूवेण य उक्किट्ठो सव्वेसिं **संबाईणं** इट्ठो । तत्थ य **बारवईए** वत्थव्वस्स चेव अण्णस्स रण्णो **कमलामेला** नाम धूया उक्किट्ठसरीरा । सा य **उग्गसेण**नत्तुस्स **धणदेव**स्स वरिल्लिया । इओ य **नारओ सागरचंद**स्स कुमारस्स सगासं आगओ । अब्भुट्ठिओ । उवविट्ठं समाणं पुच्छइ—किंचि भयवं ! अच्छेरयं दिट्ठं ? । आमं दिट्ठं । कहिं ? । इहेव **बारवईए** नयरीए **कमलामेला** नामं दारिया । कस्सइ दिन्निया ? । आमं । कस्स ? । **उग्गसेण**नत्तुस्स **धणदेवस्स** । तओ सो भणइ—कहं मम ताए समं संजोगो होज्जा ? । 'न याणामु' त्ति भणित्ता गओ । सो य **सागरचंदो** तं सोउं न वि आसणे न वि सयणे धिइं लहइ । तं दारियं फलए पासंतो नामं च गिण्हंतो अच्छइ । **नारओ** वि **कमलामेलाए** अंतियं गओ । ताए पुच्छिओ—किंचि अच्छेरयं दिट्ठं ? । **नारओ** भणइ—दुवे दिट्ठाणि, रूवेण **सागरचंदो,** विरूवत्तणेण **धणदेवो** । तओ **सागरचंदे** मुच्छिया **धणदेवे** विरत्ता । **नारएण** आसासिया । तेण गंतुं **सागरचंद**स्स आइक्खियं, जहा 'इच्छइ'त्ति । ततो य **सागरचंद**स्स माया अन्ने य कुमारा अद्दन्ना—मरति नूणं **सागरचंदो** । **संबो** आगओ जाव पिच्छइ **सागरचंदं** विलवमाणं । ताहे अणेण पच्छओ धाइऊण अच्छीणि दोहि वि हत्थेहिं च्छाइयाणि । **सागरचंदेण** भणियं—**कमलामेले !** । **संबेण** भणियं—नाहं **कमलामेला, कमलामेलो** हं । **सागरचंदेण** भणियं—आमं, तुमं चेव **कमलामेलं** दारियं मेलेहिसि । ताहे तेहिं कुमारेहिं **संबो** भणिओ—**कमलामेलं** मेलेहि **सागरचंद**स्स । न मन्नइ । तओ मज्जं पाएऊण अब्भुवगच्छाविओ । तओ विगयमओ चिंतेइ—अहो ! मए आलो अब्भुवगओ, किं सक्का इयाणिं निव्वहिउं ?—ति **पज्जुन्नं पन्नत्तिं** विज्जं मग्गइ । तेण दिन्ना । तओ जम्मि दिवसे **धणदेव**स्स विवाहो तम्मि दिवसे विज्जाए पडिरूवं विउव्विऊणं **कमलामेला** अवहरिया **रेवए** उज्जाणे नीया । **संबप्पमुहा** कुमारा उज्जाणं गंतुं **नारयस्स** रहस्सं भिंदिता **कमलामेलं सागरचंदं** परिणाविता तत्थ किड्डंता अच्छंति । विज्जापडिरूवगं पि विवाहे वट्टमाणे अट्टट्टहासं काऊणं उप्पइयं ।

---

१ मओ य । इयरेण मो० चूर्णौ च ॥ २ पुत्तगो ख° कां० ॥ ३ °कइल्ल° भा० ॥
४ चूर्णौ आव० हारि० वृत्तौ च "णभसेण" इति दृश्यते ॥ ५ कुरूवेण भा० ॥

तओ जाओ खोभो । न नज्जइ 'केण इ हरिय !' त्ति । नारओ पुच्छिओ भणइ–दिट्ठा रेवइए उज्जाणे केण वि विज्जाहरेण अवहरिया । तओ सबल-वाहणो नारायणो निग्गओ । संबो विज्जाहररूवं काऊण जुज्झिउं संपलग्गो । सब्वे दसाराइणो पराइया । तओ नारायणेण सद्धिं लग्गो । तओ जाहे णेणं णायं 'रुट्ठो ताउ' त्ति तओ से चलणेसु पडिओ । कण्हेण अंबाडिओ । तओ संबेण भणियं–एसा अम्हेहिं गवक्खेण अप्पाणं मुयंती दिट्ठा । तओ कण्हेण उग्गसेणो अणुगमिओ । पच्छा इमाणि भोगे भुंजमाणाणि विहरंति । अन्नया भयवं अरिट्ठनेमिसामी समोसरिओ । तओ सागरचंदो कमलामेला य सामिसगासे धम्मं सोऊण गहियाणुव्वयाणि संवुत्ताणि । तओ सागरचंदो अट्ठमि-चउद्दसीसुं सुन्नघरे वा सुसाणे वा एगराइयं पडिमं ठाइ । धणदेवेणं एयं नाऊणं तंबियाओ सुईओ घडावियाओ । तओ सुन्नघरे पडिमं ठियस्स वीससु वि अंगुलीनहेसु अक्कोडियाओ । तओ सम्ममहियासमाणो वेयणाभिभूओ कालगतो देवो जाओ । ततो बिइयदिवसे गवेसिंतेहिं दिट्ठो । अक्कंदो जाओ । दिट्ठाओ सूईओ । गवेसिंतेहिं तंबकुट्टगसगासे उवलद्धं–धणदेवेण कारावियाओ । रूसिया कुमारा धणदेवं मग्गंति । दुण्ह वि बलाणं जुद्धं संपलग्गं । तओ सागरचंदो देवो अंतरे ठाऊण उवसामेइ । पच्छा कमलामेला भयवओ सगासे पव्वइया । इत्तियं पसंगेण भणियं । इत्थ सागरचंदस्स कमलामेलं संबं मन्नमाणस्स अणणुयोगो, 'नाहं कमलामेल' त्ति भणिए अणुयोगो । एवं जो विवरीयं परूवेइ तस्स अणणुयोगो, जहाभावं परूवेमाणस्स अणुयोगो ॥

**सम्बस्य साहसमुदाहरणम्**—जंबवती नारायणं भणइ–एक्का वि मए पुत्तस्स अणाडिया न दिट्ठा । नारायणेण भणियं–अज्ज दाएमि । ताहे नारायणेणं जंबवईए आभीरीरूवं कयं, अप्पणो आभीररूवं । दो वि तक्कं घेत्तुं बारवई उइन्नाणि महियं विक्कंति । संबेण दिट्ठाणि । आभीरी भणिया–महियं किणामि त्ति एहि । सा अणुगच्छइ । आभीरो से मग्गेण एइ । सो संबो एगं देउलियं पवेसइ । आभीरी भणइ–नाहं पविसामि, मोल्लं देहि । सो भणइ–दिज्जइ, पविसाहि । सा भणइ–एत्थ चेव ठिओ तक्कं गिण्हाहि । सो भणइ–अवस्स पविसियव्वं । नेच्छइ ताहे हत्थे लग्गो । आभीरो उद्धाइऊण समं लग्गो । संबो जुद्धमहिट्ठिओ । आभीरो वासुदेवो जाओ, इयरी वि जंबवई । तओ लज्जिओ अंगुट्ठिं काऊण पलाइओ । बिइयदिवसे मज्झाए आणिज्जंतो खीलगं घडेइ । वासुदेवेण पुच्छिओ–किं एयं घडिज्जइ ? । संबो भणइ–जो परिवासियं बोल्लं काहिइ तस्स मुहे कुट्टिज्जिहि त्ति । इत्थं पढमं अणणुयोगो, नाए अणुयोगो । एवं जो विरूवं परूवेइ तस्स अणणुयोगो, तहभावं परूवेमाणस्स अणुयोगो ॥

**श्रेणिककोपोदाहरणम्**—रायगिहे नयरे सेणिओ राया । चिल्लणा तस्स भारिया । सा वद्धमाणसामिं तित्थयरं वंदित्ता वेयालियवेलाए माहमासे नगरं पविसइ । अंतरा पहे साहू पडिमापडिवण्णतो दिट्ठो । तीए रत्तिं सुत्तियाए कह वि हत्थो विलंबिओ । जया

१ °वई उ° मो० कां० ले० ॥

सीएणं गहिओ तया चेइयं । पवेसिओ सउडिमज्झे हत्थो । तस्स हत्थस्स तणएणं सीएणं सव्वं सरीरं सीएण गहियं । पच्छा ताए भणियं–स तपस्वी किं करिष्यति साम्प्रतम् ? । पच्छा रन्ना सेणिएण चिंतियं–संगारदिण्णओ को वि । रुट्ठेण पभाए अभओ भणिओ–सिग्घं अंतेउरं पलीवेहिं । सेणिओ गओ सामिणो मूलं । अभएण हत्थिसाला पलीविया । सामिं पुच्छइ–चिल्लणा एगपत्ती अणेगपत्ती वा ? । सामिणा भणियं–एगपत्ती । तओ 'मा डज्झिहि' त्ति तुरियं नियत्तो । अभओ य निग्गच्छइ । तेण भणियं–पलीवियं ? । अभओ भणइ–आमं । सेणिओ भणइ–तुमं किं तत्थेव न पडिओ ? । पडिभणइ–अहं पव्वइस्सामि, किं मे अग्गिपवेसेण ? । ताहे 'मा ज्झिज्झिहि' त्ति पच्छा अभएण भणियं–न डज्झइ । सेणियस्स चेल्लणाए पुव्वं अणणुयोगो, पुच्छिए अणुयोगो । एवं विवरीए परूविए अणणुयोगो, जहाभावं परूविए अणुयोगो ॥ १७२ ॥

तदेवमुक्तं निक्षेपद्वारम् । इदानीमेकार्थिकद्वारं वक्तव्यम्, तत्र तिष्ठतु तावदेतत्, एकार्थिकाभिधाने को गुणः ? इत्यत आह—

**एकार्थिकद्वारम्**

एकार्थिकाभिधाने गुणाः

**बंधाणुलोमया खलु, सुत्तम्मि यं लाघवं असम्मोहो ।**
**सत्थगुणदीवणा वि य, एगट्ठगुणा हवंतेए ॥ १७३ ॥**

एकार्थिकाभिधाने यान्यर्थपदानि गाथादिभिर्बद्ध(बन्द्ध)मिष्यन्ते तेषां बन्धेऽनुलोमता भवति, अननुकूलाभिधानपरिहारेणानुकूलाभिधाने बन्धो भवतीत्यर्थः । अनुकूलेन चाभिधानेन बद्धे सूत्रे सूत्रस्य लाघवं भवति । तथा विवक्षितार्थस्य 'असम्मोहः' निस्सन्दिग्धा प्रतीतिः, यथा शक्र इति वा पुरन्दर इति वा इन्द्र इति वा इत्याद्युक्ते शक्रशब्दार्थस्य । तथा शास्ता–तीर्थकरस्तस्य गुणास्तेषां दीपना–प्रकाशना भवति, यथा–अहो ! भगवान् एकैकस्यार्थस्य बहूनि पर्यायनामानि जानाति स्म । एते एकार्थिनामभिधाने गुणा भवन्ति ॥ १७३ ॥ सम्प्रत्येकार्थिकानि वक्तव्यानि, तानि द्विधा–सूत्रस्याऽर्थस्य च । तत्र प्रथमतः सूत्रस्याऽऽह—

सूत्रस्यैकार्थिकानि

**सुय सुत्त गंथ सिद्धंत सासणे आण वयण उवएसो ।**
**पण्णवणमागमे इय, एगट्ठा पज्जवा सुत्ते ॥ १७४ ॥**

श्रुतं सूत्रं ग्रन्थः सिद्धान्तः शासनम् आज्ञा वचनम् उपदेशः प्रज्ञापना आगमः 'इति' एते दश 'पर्यायाः' एकार्थाः सूत्रस्य ॥ १७४ ॥

एतेषां च सर्वेषामपि पदानां नामादिकश्चतुष्को निक्षेपः । तत्र सर्वत्रापि नाम-स्थापने द्रव्यत आगमतो नोआगमतो ज्ञशरीर-भव्यशरीरे प्रतीते । शेषं वक्तव्यम् । तत्र श्रुतमधिकृत्याह—

श्रुतस्य निक्षेपाः

**दव्वसुयं पत्तग-पुत्थएसु जं पढइ वा अणुवउत्तो ।**
**आगम-नोआगमओ, भावसुयं होइ दुविहं तु ॥ १७५ ॥**
**आगमओ सुयनाणी, सुओवउत्तो य होइ भावसुयं ।**
**सो सुयभावोऽणन्नो, सुयमवि उवओगओऽणन्नं ॥ १७६ ॥**

१ °भावे प° भा० कां० ॥ २ उ ता० ॥ ३ °ण आग° ता० ॥ ४ °वेऽण° ता० ॥

नोआगमतो द्रव्यश्रुतं ज्ञशरीर-भव्यशरीरव्यतिरिक्तं पत्रक-पुस्तकेषु न्यस्तम्, यश्च वाऽनुपयुक्तः पठति तद् नोआगमतो द्रव्यश्रुतम्। भावश्रुतं द्विविधम्—आगमतो नोआगमतश्च ॥ १७५ ॥ तत्राऽऽगमतो भावश्रुतं श्रुतज्ञानी 'श्रुतोपयुक्तः' श्रुतज्ञानोपयोगवान्, "उपयोगो भावनिक्षेपः" इति वचनात्। अथ कथं श्रुतज्ञानी श्रुतोपयुक्तो भावश्रुतम्? अत आह—यस्मात् 'सः' श्रुतज्ञानी श्रुतभावादनन्यः, श्रुतमपि जीवस्वभावादुपयोगादनन्यत्, ततः स एव श्रुतज्ञानी भावश्रुतम् ॥ १७६ ॥ नोआगमतो भावश्रुतमाह—

**जं तं दुसत्तगविहं, तमेव नोआगमो सुयं होइ ।**
**सामित्तासंबद्धं, समिईसहियस्स वा जं तु ॥ १७७ ॥**

यत् 'तत्' प्रागभिहितं 'द्विसप्तविधं' चतुर्दशविधमक्षरश्रुतादि, यदि वा द्वादशप्रकारमङ्गप्रविष्टमाचारादि द्विविधमङ्गबाह्यं कालिकमुत्कालिकं चेति चतुर्दशविधं श्रुतज्ञानं तदेव 'स्वामित्वासम्बद्धं' पुरुषेषु स्वामित्वेनासम्बद्धम्, पुरुषेभ्यः पृथग्विवक्षितमित्यर्थः, नोआगमतो भावश्रुतम्। यदि वा समितिसहितस्य पुरुषस्योपयुक्तस्य 'यत्' श्रुतं तद् नोआगमतो भावश्रुतम्। अत्र नोशब्दो मिश्रवाची ॥ १७७ ॥ अधुना सूत्रद्वारमाह—

**पंचविहं पुण दव्वे, भावम्मि तमेव होइ सुत्तं तु ।**

सूत्रस्य निक्षेपाः

द्रव्यतो नोआगमतो व्यतिरिक्तं सूत्रं पञ्चविधम्, तद्यथा—अण्डजं हंसगर्भादि, बोण्डजं कार्पासिकम्, कीटजं कृमिरागम्, वालजमूर्णामयम्, वल्कजं सनसूत्रादि। नोआगमतो भावसूत्रं 'तदेव' यदनन्तरं नोआगमतो भावश्रुतमुक्तम् ॥ ग्रन्थद्वारमाह—

**सच्चित्ताई गंथो, दव्वे भावे इमं चेव ॥ १७८ ॥**

ग्रन्थस्य निक्षेपाः

द्रव्यतो नोआगमतो व्यतिरिक्तो ग्रन्थस्त्रिविधः 'सचित्तादिः' सचित्तः अचित्तो मिश्रश्च। एष त्रिविधोऽप्युपरि प्रथमसूत्रे वक्ष्यते। भावे ग्रन्थः 'इदमेव' कल्पाध्ययनम् ॥ १७८ ॥

अधुना सिद्धान्तद्वारमाह—

**जेण उ सिद्धं अत्थं, अंतं णयतीति तेण सिद्धंतो ।**
**सो सव्व-पडीतंतो, अहिगरणे अब्भुवगमे य ॥ १७९ ॥**

सिद्धान्त-निक्षेपाः

येन कारणेन प्रमाणतः सिद्धमर्थम् 'अन्तं नयति' प्रमाणकोटिमारोहयतीति तेन कारणेन सिद्धान्त उच्यते। स एष द्रव्यतो नोआगमतो व्यतिरिक्तः पुस्तक-पत्रन्यस्तः। भावतश्चतुर्विधः, तद्यथा—सर्वतन्त्रसिद्धान्तः प्रतितन्त्रसिद्धान्तः अधिकरणसिद्धान्तः अभ्युपगमसिद्धान्तश्च ॥ १७९ ॥ तत्र सर्वतन्त्रसिद्धान्तमाह—

**संति पमाणांतिं पमेयसाहगाइं तु सव्वतंतो उ ।**
**थेज्जवई य वसुमई, आपो य दवा चलो वाऊ ॥ १८० ॥**

सर्वतन्त्र-सिद्धान्तः

सन्ति 'प्रमाणानि' प्रत्यक्षादीनि प्रमेयसाधकानि, तथा स्थैर्यवती पृथिवी, आपो द्रवाः, चलो वायुः, एष सर्वतन्त्रसिद्धान्तः, सर्वेषु तन्त्रेष्वस्यार्थस्य सिद्धत्वात् ॥ १८० ॥

---

१ °गमे सुयं ता० ॥ २ तत्र मो० भा० ॥ ३ पुण सुत्तं, दव्वे भावम्मि होइ सुत्तं तु ता० विना ॥ ४ °णाणि प° ता० ॥ ५ °गाइं ति सव्व° ता० ॥ ६ वातो ता० ॥

प्रतितन्त्रसिद्धान्तमाह—

प्रतितन्त्र-सिद्धान्तः

बो खलु सतंतसिद्धो, न य परतंतेसु सो उ पडितंतो ।
निच्चमणिच्चं सव्वं, निच्चानिच्चं च इच्चाई ॥ १८१ ॥

यः खल्वर्थः स्वतन्त्रसिद्धो न परतन्त्रेषु स प्रतितन्त्रसिद्धान्तः । यथा—सर्वं [1] नित्यं साङ्ख्यानाम्, सर्वमनित्यं क्षणिकवादिनाम्, सर्वं नित्या-ऽनित्यमार्हतानामित्यादि ॥ १८१ ॥

अधिकरणसिद्धान्तमाह—

अधिकरणसिद्धान्तः

सो अहिगरणो जहियं, सिद्धे सेसं अणुत्तमवि सिज्झे ।
जह निच्चत्ते सिद्धे, अन्नत्ता-ऽमुत्तसंसिद्धी ॥ १८२ ॥

यस्मिन् सिद्धे शेषमनुक्तमपि सिध्यति, यथा आत्मनो नित्यत्वे सिद्धे शरीरादन्यत्वसंसिद्धिरमूर्तत्वसंसिद्धिश्च । एषोऽधिकरणसिद्धान्तः ॥ १८२ ॥ अभ्युपगमसिद्धान्तमाह—

अभ्युपगमसिद्धान्तः

जं अब्भुविच्च कीरइ, सिच्छाएँ कहा स अब्भुवगमो उ ।
सीतो वन्ही गयजूह तणग्गे मग्गु-खरसिंगा ॥ १८३ ॥

यत् 'अभ्युपेत्य' स्वेच्छया अभ्युपगम्य वादकथा क्रियते, यथा—शीतो वह्निः, गजयूथं तृणाग्रे, मद्गोः—जलकाकस्य खरस्य च शृङ्गमिति । स एषोऽभ्युपगमसिद्धान्तः ॥ १८३ ॥

सम्प्रति शासनमाज्ञां चाह—

शासना-ऽऽज्ञयोर्निक्षेपः

कडकरणं दव्वे सासणं तु दव्वे व दव्वओ आणा ।
दव्वनिमित्तं वुभयं, दुंम्हि [2] वि भावे इमं चेव ॥ १८४ ॥

नोआगमतो द्रव्यशासनं व्यतिरिक्तं 'कृतकरणं' मुद्रा इत्यर्थः । आज्ञाऽपि द्रव्यतो नोआगमतो व्यतिरिक्ता सैव मुद्रा । अथवा 'द्रव्यनिमित्तं' द्रव्योत्पादननिमित्तं यत् 'उभयं' शासनमाज्ञा तद् द्रव्यशासनं सा द्रव्याज्ञा । 'द्वे अपि च' शासना-ऽऽज्ञे भावत इदमेवाध्ययनम् । किमुक्तं भवति ?—नोआगमतो भावशासनं भावाज्ञा च इदमेव कल्पाख्यमध्ययनम् । तथाहि—य एतस्याज्ञां न करोति सोऽनेकानि मरणादीनि प्राप्नोति ॥ १८४ ॥

इदानीं वचनद्वारम्, वचनं वागित्येकार्थम्, ततो वाचमधिकृत्याह—

वचनस्य निक्षेपाः

दव्ववती दव्वाइं, जाइं गहियाइँ मुंचइ न ताव ।
आराहणि दव्वस्स वि [3], दोहि वि भावस्स पडिवक्खो ॥ १८५ ॥

यानि भाषायोग्यानि द्रव्याणि भाषात्वेन गृहीतानि, न तावदद्यापि मुञ्चति सा नोआगमतो व्यतिरिक्ता द्रव्यवाक् । अथवा द्रव्यस्य 'आराधनी' यथास्वरूपप्रतिपादिका सा द्रव्यवाक् । द्वाभ्यामपि प्रकाराभ्यां भावस्य प्रतिपक्षो वक्तव्यः । किमुक्तं भवति ?—यानि भाषायोग्यानि द्रव्याणि भाषात्वेन परिणमय्य मुञ्चति सा नोआगमतो भाववाक्, अथवा या जीवस्य भावं ज्ञानादिकमाराधयति अजीवस्य घटादेर्वर्णादिकं सा नोआगमतो भाववाक् ॥ १८५ ॥

---

१ सर्वमीति नित्यं के० ॥ २ दोण्ह वि ता० । "दोण्ह व त्ति सासण-आणाणं" इति चूर्णिः ॥ ३ व ता० ॥

साम्प्रतमुपदेश-प्रज्ञापना-ऽऽगमानाह—

**दव्वाण दव्वभूओ, दव्वट्ठाए व विज्जमाईया ।**
**अह दव्वे उवएसो, पन्नवणा आगमे चेव ॥ १८६ ॥**

उपदेश-प्रज्ञाप-नाऽऽ-गमानां निक्षेपाः

द्रव्याणां द्रव्यभूतो द्रव्यार्थं वा वैद्यादय उपदेशादि कुर्वन्ति एष द्रव्यतो नोआगमतो व्यतिरिक्त उपदेशः प्रज्ञापना आगमश्च । इयमत्र भावना—यद्वैद्य आतुरस्यौषधद्रव्याणामुपदेशं करोति, यं वा साधुरनुपयुक्त उपदेशं ( ग्रन्थाग्रम्—१५०० ) कथयति, अथवा यद्वैद्य 'एष मम द्रव्यं दास्यति' इति द्रव्यनिमित्तमौषधद्रव्याणामुपदेशं करोति एष नोआगमतो व्यतिरिक्तो द्रव्योपदेशः । तथा यः कश्चिद्द्रव्याणि प्रज्ञापयति, भावं वा प्रज्ञापयन् अनुपयुक्तः, यदि वा 'एष मम किञ्चिद्दास्यति' इति द्रव्यनिमित्तं प्रज्ञापनां द्रव्यादीनां करोति एषा नोआगमतो व्यतिरिक्ता द्रव्यप्रज्ञापना । तथा यद्धिरण्यादीनामागमं सङ्ग्रहं करोति, यो वा साधुरनुपयुक्त आगमं पठति, यं वाऽऽगमं वैद्यो वृत्तिनिमित्तं पठति स नोआगमतो व्यतिरिक्तो द्रव्यागमः । तथा य उपयुक्त उपदिशति प्रज्ञापयति पठति वाऽऽगमम् एते नोआगमतो भावत उपदेश-प्रज्ञापना-ऽऽगमाः ॥ १८६ ॥ साम्प्रतमर्थैकार्थिकान्याह—

**अणुओगो य नियोगो, भास विभासा य वत्तियं चेव ।**
**एए अणुओगस्स उ, नामा एगट्ठिया पंच ॥ १८७ ॥**

अर्थस्यैकार्थिकानि

अनुयोगो नियोगो भाषा विभाषा वार्त्तिकं च, एतानि पञ्चानुयोगस्यैकार्थिकानि । तत्रानुकूलः सूत्रस्यार्थेन योगोऽनुयोगः । निश्चितो योगो नियोगः । अर्थस्य भाषणं भाषा । विविधप्रकारैर्भाषणं विभाषा । वृत्तौ भवं वार्त्तिकम्, यदेकस्मिन् पदे यदर्थापन्नं तस्य सर्वस्यापि भाषणम् ॥ १८७ ॥ उक्तान्यैकार्थिकानि, सम्प्रति निरुक्तद्वारमाह—

## निरुक्तद्वारम्

**निच्छियमुत्त निरुत्तं, तं पुण सुत्ते य होइ अत्थे य ।**
**सुत्ते उवरिं वुच्छं, अत्थनिरुत्तं इमं तत्थ ॥ १८८ ॥**

निश्चितमुक्तं निरुक्तम् । तच्च द्विधा—सूत्रस्यार्थस्य च । तत्र सूत्रस्योपरि "नेरुत्तियाणि तस्स उ०" ( गाथा ३८१ ) इत्यादिना ग्रन्थेन वक्ष्ये । अर्थनिरुक्तं पुनः 'इदं' वक्ष्यमाणम् ॥१८८॥

तदेव विवक्षुः प्रथमतस्तद्विषयान् दृष्टान्तान् वक्तव्यान् सूचयति—

**अणु बायरे य उंडिय, पडिंसुया चेव अब्भपडले य ।**
**वत्तिय चउकभंगो, निरुवादी वत्तणी य जहा ॥ १८९ ॥**

अर्थनिरुक्तं तत्र दृष्टान्ताश्च

अनुयोगे अणुत्वे बादरत्वे च दृष्टान्तो वक्तव्यः । नियोगे 'उण्डिका' उण्डिकापत्रकदृष्टान्तः, उण्डिका—मुद्रा । भाषायां प्रतिश्रुतदृष्टान्तः । विभाषायामभ्रपटलः । वार्त्तिके चत्वारो भङ्गाः, तत्र मङ्गुदृष्टान्तः । तथा निरुक्तादीनि यथा वर्द्धमानस्वाम्याख्यातवान् तथा किमृषभादयोऽपि ? उतान्यथा ? उच्यते—तथेति, केवलज्ञानस्य तुल्यत्वात्; यथा 'वर्त्तनी' मार्गः सा सर्वजनपदेषु प्रमाणत एकैव भवति ॥ १८९ ॥ तत्र प्रथममनुयोगद्वारमाह—

---

१ वोच्छिहिति अत्थ° ता० ॥ २ "उंडिया णाम केइस्स मुद्दा" इति चूर्णौ ॥

अनुयोगः

**अणुणा जोगो अणुजोगो, अणु पच्छाभावओ य थेवे य ।**
**जम्हा पच्छाऽभिहियं, सुत्तं थोवं च तेणाणू ॥ १९० ॥**

इह अनुयोग [ इति अणुयोग ] इति वा शब्दसंस्कारः । तत्र 'अनुना' पश्चाद्भूतेन योगोऽनुयोगः, अथवा 'अणुना' स्तोकेन योगः अणुयोगः । तथा चाह—अणु इति पश्चाद्भावे स्तोके च । यस्मात् पश्चात् 'अभिहितं' कृतं सूत्रं स्तोकं च तेन अणु इति भण्यते । अर्थः पुनरननुः, पूर्वमुक्तत्वात्, बादरश्च, बहुत्वात् ॥ १९० ॥ एवमाचार्येणोक्ते शिष्यः प्राह—

**पुव्वं सुत्तं पच्छा, य पगासो लोइया वि इच्छंति ।**
**पेलासरिसे सुत्ते, अत्थपया हुंति बहुया वि ॥ १९१ ॥**

ननु पूर्वं सूत्रं पश्चात् 'प्रकाशः' अर्थः, 'तान् तान् भावान् प्रकाशयतीति प्रकाशः' इति व्युत्पत्तेः, सूत्राभावे तु स कस्य स्यात् ?; अपि च लौकिका अप्येवमेवेच्छन्ति,

तथा चोक्तं तैरेव—

पूर्वं सूत्रं ततो वृत्तिर्वृत्तेरपि च वार्त्तिकम् ।
सूत्र-वार्त्तिकयोर्मध्ये, ततो भाष्यं प्रवर्त्तते ॥

ततो यद्वदथ यूयं 'पूर्वमर्थः पश्चात्सूत्रम्' इति तन्न घटां प्राञ्चति । यदपि च ब्रूथ 'सूत्रमणुः, अर्थो बादरः' इति तदपि न सम्यक्, यत एकस्यां पेडायां बहूनि वस्त्राणि मान्ति तत्र पेडाया एव बादरत्वं युज्यते, तद्वशाद् बहूनि वस्त्राणि मान्ति स्म; एवमत्रापि 'पेडासदृशे' पेडास्थानीये सूत्रे बहून्यर्थपदानि वर्त्तन्ते, ततः सूत्रमेव बादरीभवितुमर्हति नार्थ इति ॥१९१॥

न च महत्त्वमेकान्तेनार्थस्य, कस्मात् ? इत्याह—

**इक्कं वा अत्थपयं, सुत्ता बहुगा वि संपयंसंति ।**
**उक्खित्तनायमाइसु, अयमवि तम्हा अणेगंतो ॥ १९२ ॥**

एकमर्थपदं बहूनि सूत्राणि सम्प्रदर्शयन्ति, यथा उत्क्षिप्तज्ञाते 'अनुकम्पा कर्त्तव्या' इत्यर्थो बहुभिः सूत्रैर्वर्णितः । आदिशब्दात् संघाटादिषु ज्ञातेषु 'न वर्णहेतोराहारयितव्यम्' इत्यादिपरिग्रहः । तस्मादयमनेकान्तो यत् 'अर्थो महान्' इति ॥ १९२ ॥

आचार्यः प्राह—यत्त्वयोक्तं 'पूर्वं सूत्रं पश्चादर्थः' इति तन्न भवति, कथम् ? इत्याह—

**अत्थं भासइ अरिहा, तमेव सुत्तीकरेंति गणधारी ।**
**अत्थं च विणा सुत्तं, अणिस्सियं केरिसं होज्जा ॥ १९३ ॥**

अर्थं भाषतेऽर्हन् । 'तमेव' अर्हद्भाषितमर्थं सूत्रीकुर्वन्ति गणधारिणः । अर्थं च विना सूत्रम् 'अनिश्रितम्' अर्थनिश्रारहितं कीदृशं स्यात् ? असम्बद्धं स्यात्, "दशदाडिमे"त्यादिवाक्यवदिति भावः । अपि च लौकिका अपि शास्तारः प्रथमतोऽर्थं दृष्ट्वा सूत्रं कुर्वन्ति, अर्थमन्तरेण सूत्रस्यानिष्पत्तेः । यदप्युक्तं 'पेडावद्बादरं सूत्रम्, अर्थोऽणुः' इति तदप्यश्लीलम्, यतस्तस्या एव पेडाया एकं वस्त्रमादाय तेनानेकाः पेडा बध्यन्ते, तथैकस्मादर्थाद्बहूनि सूत्रा-

---

१ जोगणुजोगो ता० ॥ २ पेडास° ता० ॥ ३ अतम° ता० ॥ ४ ज्ञाताधर्मकथाङ्गे प्रथमं ज्ञातमिदम् ॥ ५ ज्ञाताधर्मकथाङ्गे द्वितीयं ज्ञातमिदम् ॥ ६ होइ ता० विना ॥

ण्यर्वाक् तेनैव बध्यन्ते । एवं च वस्त्रस्थानीयस्यार्थस्य महत्त्वम्, पेडास्थानीयस्य तु सूत्रस्याणुत्वमेव । यदप्युक्तं 'न च महत्त्वमेकान्तेनार्थस्य' इत्यादि तदप्यपरिभावितपरिभाषितम्, यत उत्क्षिप्तज्ञातादिषु सत्त्वानुकम्पादिकोऽर्थस्तावन्मात्रस्य सूत्रस्य, अशेषस्य तु शेषोऽर्थः ॥१९३॥

उक्तोऽनुयोगः, अधुना नियोगमाह—

नियोगः

**अहिगो [1]जोगो निजोगो, जहाऽइदाहो [2]भवे निदाहो त्ति ।**
**अत्थनिउत्तं सुत्तं, पसवइ चरणं जओ [3]मुक्खो ॥ १९४ ॥**

'निः' आधिक्ये, अधिको योगो नियोगः, यथाऽतिदाहो निदाहः । कस्य केन सहाधिक्यम्? इति चेद् उच्यते—सूत्रस्यार्थेन । आधिक्येन योगस्य किं फलम्? इति चेद् अत आह—अर्थेन सममाधिक्येन नियुक्तं सूत्रं 'चरणं' चारित्रं प्रसूते, यतः संसाराद् मोक्षः ॥ १९४ ॥ अत्रैव प्रसवने दृष्टान्तमाह—

उण्डिका-पत्रक-दृष्टान्तः

**वच्छनियोगे खीरं, अत्थनियोगेण चरणमेवं तु ।**
**[4]पत्तग दंडियमुभयं, दंडियसरिसो तहिं अत्थो ॥ १९५ ॥**

यथा गौर्वत्सेन नियुक्ता सती क्षीरं प्रसूते, एवमर्थेन समं नियुक्तं सूत्रं चरणं प्रसूते । यदि पुनरेकं केवलं सूत्रं स्यात् नार्थस्तेन सङ्गृहीतो भवेत् ततश्चरणप्रसवस्याभावः, यथा वत्सनियोगाभावे गोः क्षीरप्रसवस्याभावः । अर्थोऽपि केवलः सूत्रविहीनो न कार्यसाधकः, यथा केवलो वत्सः । अत्रैव दृष्टान्तान्तरमाह—"पत्तग दंडिय उभयं"ति 'पत्रकं' लेखः 'दण्डिका' लेखस्योपरि मुद्रानियोगः 'उभयं' पत्रकं दण्डिका च । इयमत्र भावना—

तिन्नि पुरिसा रायाणमोलग्गंति । राया तुट्ठो । कम्मिइ नगरे पसाओ कओ । तत्थ एगेण पुरिसेण जे तम्मि नयरे रायपुरिसा तेसिं जोग्गं पत्तयमाणीयं परं मुद्दारहियं । बिइएण दंडिया चेव केवला । तइएणोभयं । तत्थ जेण मुद्दारहियं पत्तयमाणीयं सो रायपुरिसेहिं भणिओ—नत्थि पत्तगस्सोपरि मुद्दाविणिओग त्ति न मन्नेमो । बिइओ भणिओ—अत्थि इयं मुद्दा, परं को रन्ना पसाओ कओ? को वा न कउ? त्ति न जाणामो त्ति, तम्हा न देमो त्ति । तइएणोभयं दरिसियं । सव्वं जहत्थियं लद्धं । एष दृष्टान्तः ॥

अयमर्थोपनयः—पत्रकसदृशं सूत्रम्, दण्डिकासदृशोऽर्थः । यथा पत्रकं केवलं दण्डिका वा न कार्यस्य प्रसाधिका, उभयं तु प्रसाधकम्, एवं सूत्रमर्थश्च पृथग् न चरणप्रसाधकः, उभयं तु प्रसाधकम् ॥ १९५ ॥ सम्प्रति प्रतिश्रुतदृष्टान्तोपेतं भाषाद्वारमाह—

भाषा अत्रार्थे प्रतिश्रुतदृष्टान्तश्च

**पडिसद्दगस्स सरिसं, जो भासइ [5]अत्थमेगु सुत्तस्स ।**
**सामइय बाल पंडिय, साहु जईमाइया भासा ॥ १९६ ॥**

[6]यथा गिरिकुहर-कन्दरादिषु यादृशः शब्दः क्रियते तादृशः प्रतिशब्द उत्तिष्ठति, एवं यो

---

१ जोग नि० ता० ॥ २ °दाहा भवे ता० ॥ ३ मोक्खो ता० ॥ ४ पत्तग उंडियमुभयं, उंडियसरिसो ता० । चूर्णिकृताऽयमेव पाठः स्वीकृतोऽस्ति ॥ ५ अत्थमो उ सुत्तस्स । सामातिय बाल पंडिय साहु जतिमातिया ता० ॥ ६ "जधा जलतले जारिसो सद्दो कीरति तारिसो चेव पडिसद्दतो उट्ठति" इति चूर्णौ ॥

यादृशं सूत्रं तस्य तादृशमर्थमेकं भाषते तस्य तद् भाषणं भाषा । यथा समभावः सामायिकम्, द्वाभ्यां—बुभुक्षया तृषा वाऽऽगलितो बालः, पापात् डीनः—पलायितः पण्डितः, अथवा पण्डा—बुद्धिः सा संजाताऽस्येति पण्डितः, साधयति मोक्षमार्गमिति साधुः, यतते सर्वात्मना संयमानुष्ठानेष्विति यतिः, आदिशब्दात् तपतीति तपन इत्यादिपरिग्रहः ॥ १९६ ॥

साम्प्रतमभ्रपटलदृष्टान्तसमन्वितं विभाषाद्वारमाह—

विभाषा अत्रार्थेऽभ्रपटलदृष्टान्तश्च

एक्केणं एक्कदलं, तहिं कयं [3]बिईएण बहुतरगा ।
तइएण छाइयं तं, तिल्ल-ऽविलमादुवाएहिं ॥ १९७ ॥
एगपए उ दुगाई, जो अत्थे भणइ सा विभासा उ ।
असइ य आसु य धावइ, न य सम्मइ तेण आसो उ ॥ १९८ ॥

एकेन च्छत्रकारेण त्रयाणामात्मीयशिष्याणां छत्राच्छादनार्थमभ्रपटलानि दत्तानि 'छत्राण्याच्छादयत' । तत्रैकेन शिष्येण एकमभ्रपटलदलं तत्र च्छत्रे कृतम्, द्वितीयेनाऽऽत्मीयच्छत्रे बहुतराणि द्वि-त्रि-चतुःप्रभृतीनि अभ्रपटलानि लापितानि, तृतीयेन च बहून्यभ्रपटलानि दत्त्वा तैला-ऽम्लादिभिरुपायैस्तच्छत्रं सर्वात्मनाऽऽच्छादितम् । किमुक्तं भवति ?—तान्यभ्रपटलदलानि लापितानि तैला-ऽम्लादिभिस्तीमित्वा सर्वथा निर्भेदं कृतम् । एष दृष्टान्तः, अयमर्थोपनयः—प्रथमशिष्यसदृशो भाषकः, द्वितीयशिष्यसदृशो विभाषकः ॥ १९७ ॥

तथा चाह—य एकस्मिन् द्वि-त्र्यादीनर्थान् वक्ति, यथाऽश्नातीत्यश्वः, यदि वाऽऽशु धावति न च श्राम्यतीत्यश्वः, एष विभाषकः, तस्य भाषणं विभाषा । तृतीयशिष्यसदृशो व्यक्तिकरः । उक्तञ्च—

पढमसरिच्छो भासगो, बिइय विभासो य तइय वित्तिकरो । इति । ॥ १९८ ॥

सम्प्रति मङ्खदृष्टान्तोपेतं वार्तिकद्वारमाह—

वार्तिकम्

सामाइयस्स अत्थं, पुव्वधर समत्तओ विभासेइ[6] ।
चउरो खलु मंखसुया, वत्तीकरणम्मि आहरणा ॥ १९९ ॥

यः सामायिकस्यार्थं 'पूर्वधरः' चतुर्दशपूर्वधारी सन् समस्तम् 'ओ' इति पादपूरणे विभाषते, यतः परं किमपि न वक्तव्यमस्ति स व्यक्तिकरो वार्तिककर इत्येकार्थौ । तस्मिंश्च व्यक्तिकरणे चत्वारः खलु मङ्खसुता आहरणानि ॥ १९९ ॥ तान्येवाह—

मङ्खचतुष्कदृष्टान्तः

[8]फलगिक्को गाहाहिं, बिइओ तइओ य वाइयत्थेणं ।
तिन्नि वि अकुडुंबभरा, तिगजोग चउत्थओ मरइ ॥ २०० ॥

---

१ "अथवा पण्डा–बुद्धिः, इणु गतौ, पण्डामनुगतः पण्डितः । साधुकारी साधुः ।" इति चूर्णौ ॥

२ गाथायुगलमिदं मूल-टीकालिखितप्रतिकृतिषु "एगपए उ दुगाई० १९७ एक्केणं एक्कदलं० १९८" इत्येवं व्यस्ततया वरीवृत्यते, किञ्च वृत्तिकृता चूर्णिकृता चापि क्रमभेदेनैतद्गाथायुगलं व्याख्यातमिति यथातद्व्याख्याक्रममुपन्यस्तमस्माभिः ॥ ३ बितियएण बहुयतरा ता० ॥ ४ °पए दुतिगाई ता० ॥ ५ °सु पधा° ता० ॥ ६ °सेति ता० ॥ ७ गाथेयं चूर्णौ "जे जम्मि०" गाथा २०१ अनन्तरं व्याख्याताऽस्ति ॥ ८ फलपणेक्को गाहाय बितियओ तइयओ वाचितत्थेणं । ता० ॥

चत्वारो मल्लाः । तेषामेकः फलकं गृहीत्वा हिण्डते, न गाथा उच्चरति, नापि वाचा कमप्यर्थं भाषते स न किञ्चिल्लभते । द्वितीयो न फलकं गृह्णाति, केवलं गाथाः पठन् हिण्डते सोऽपि न किञ्चिल्लभते । तृतीयो न फलकं गृह्णाति, नापि गाथा उच्चरति, परं वाचा कमप्यर्थं भाषते सोऽपि न किञ्चिल्लभते । चतुर्थस्तु फलकं गृहीत्वा गाथाः पठन् तासामर्थं च भाषमाणो हिण्डते, सर्वत्र लभते । आद्यास्त्रयोऽकुटुम्बभराः, चतुर्थः 'त्रिकयोगे' त्रिकयोगसम्प्रयुक्तः कुटुम्बभरः । एष दृष्टान्तः, अयमर्थोपनयः—व्यक्तावपि चत्वारो मल्लाः—एकस्य सूत्रमायाति नार्थः, द्वितीयस्यार्थो न सूत्रम्, तृतीयस्य सूत्रमप्यायाति अर्थोऽपि, चतुर्थस्य न सूत्रं नाऽप्यर्थः । अत्र द्वावाद्यौ चतुर्थश्च आद्यत्रिमल्लपुरुषवत्न मोक्षलक्षणस्वकार्यप्रसाधकाः, तृतीयस्तु चतुर्थमल्लवदात्मनो मोक्षप्रसाधकः ॥ २०० ॥

आह सम्प्रति कीदृशो व्यक्तिकरः ? इत्यत आह—

व्यतिकरः

**जे जम्मि जुगे पवरा, तेसि सगासम्मि जेण उग्गहियं ।**
**परिवाडीण पमाणं, वुच्छं वेंचीकरो स खलु ॥ २०१ ॥**

ये यस्मिन् युगे 'प्रवराः' प्रधानाः तेषां 'सकाशे' समीपे 'येन' ग्रहण-धारणासमर्थेन अवगृहीतम्, कतिभिः परिपाटीभिः ? इत्यत आह—परिपाटीनां परिमाणमग्रे वक्ष्ये, स खलु तदा व्यक्तिकरः ॥ २०१ ॥ अत्र शिष्यः प्राह—

**निक्खेवा य निरुत्तार्णि जा य कहणा भवे पगासस्स ।**
**अह रिसभाईयाऽऽहंसु किमेवं वद्धमाणो वि ॥ २०२ ॥**

ये निक्षेपाः चतुष्क-सप्तकादयः, यानि च निरुक्तानि सूत्रा-ऽर्थयोरनन्तरमुक्तानि, या च चतुर्भिरनुयोगद्वारैः 'प्रकाशस्य' अर्थस्य कथना, चशब्दादेकार्थिकानामपि या च कथना, एतानि यथा 'ऋषभादयः' त्रयोविंशतिस्तीर्थकरा आख्यातवन्तः तथा किमेवं भगवान् वर्धमानस्वाम्यप्याख्याति ? किं वाऽन्यथा ? इति, उच्यते—तथैव ॥ २०२ ॥ ननु ते उच्चतराः, भगवान् वर्धमानस्वामी पुनः सप्तरत्निप्रमाणः, ततः कथं तस्य तथैवाख्यानम् ? अत आह—

**धिय-संघयणे तुल्ला, केवलभावे य विसमदेहा वि ।**
**केवलनाणं तं चिय, पन्नवणिज्जा य चरमे वि ॥ २०३ ॥**

यथा विषमदेहा अपि तीर्थकृतो धृति-संहनने केवलभावे च तुल्याः तथा प्ररूपणायामपि तुल्याः । यतः 'चरमेऽपि' भगवति वर्धमानस्वामिनि तदेव केवलज्ञानं त एव च प्रज्ञापनीया भावा ये ऋषभादीनाम्, ततः कथं न तुल्या प्ररूपणा ? ॥ २०३ ॥

यस्तु विशेषस्तमुपदर्शयति—

**नायज्झयणाहरणा, इसिभासियमो पइन्नगसुया य ।**
**एए हुंति अनियया, निययं पुण सेसमुस्सण्णं ॥ २०४ ॥**

---

१ °गसंयुक्तः भा० ॥ २ वोच्छिति व° ता० ॥ ३ विप्ति° ता० विना ॥ ४ °णि चेव जा त कहणा पकासस्स । अह रिसभादी आहु य तहेव किं वद्ध° ता० । चूर्णिकृदभिमतोऽयं पाठः ॥ ५ यावच्चतु° कां० भा० ॥ ६ यावत्कथ° भा० ॥

**ज्ञाताध्ययनेषु** यानि आहरणानि–दृष्टान्ताः ते हि कदाचित्त एव भवेयुर्ये **ऋषभादिभि**-रुपन्यस्ताः, केचिदन्यथा वा ये प्रत्युत्पन्ना इति । तथा यानि **ऋषिभाषितानि प्रकीर्णकश्रु**-तानि च एतानि 'अनियतानि' कदाचिद् भवन्ति कदाचिन्न भवन्ति; यानि च भवन्ति तान्यपि कदाचित् तथार्थयुक्तानि कदाचिद् अन्यथार्थोपेतानि । शेषं पुनः 'उत्सन्नं' प्रायेण नियतम् ॥ २०४ ॥

आह कः पुनरत्र दृष्टान्तो यथा वर्धमानस्वाम्यपि तथैवाख्याति ? इति दृष्टान्तमाह—

वर्त्तनी-दृष्टान्तः

**जह सव्वजणवएसुं, एक्कं चिय सगडवत्तिणिपमाणं ।**
**विसमाणि य वत्थूणी, सगडाईणं तह निरुत्ता ॥ २०५ ॥**

यथा शकटादीनाम्, आदिशब्दाद् गव्यादिपरिग्रहः, यद्यपि 'विषमाणि वस्तूनि' केषाञ्चि-न्महान्ति केषाञ्चित् क्षुल्लकानि तथापि सर्वेष्वपि जनपदेषु एकमेव तदा तदा **शकटवर्त्तिन्याः** प्रमाणम्, सर्वत्राक्षाणां चतुर्हस्तप्रमाणत्वात्; तथा निरुक्तानि, उपलक्षणमेतत्, निक्षेपादीनि च प्ररूपणामधिकृत्य तुल्यानि ॥ २०५ ॥

आह नन्ववश्यं पूर्वरथानां सम्प्रतिरथानां च विस्तरस्यास्ति विशेषः, एवं महाप्रमाणानां पूर्वमनुष्याणामल्पप्रमाणानामधुनातनमनुष्याणां [ च ] विशेषो भवति, तत आह—

**जइ वि य वत्थू हीणा, पुव्विल्लरहेहिँ संपयरहाणं ।**
**तह वि जुगम्मि जुगम्मी, सहत्थचउहत्थगा अक्खा ॥ २०६ ॥**

यद्यपि पूर्वतनरथेभ्यः साम्प्रतरथानां वस्तूनि हीनानि तथापि युगे युगे सर्वत्राऽऽत्महस्तेन चतुर्हस्तका अक्षाः, ततः सर्वेष्वपि जनपदेष्वेकं शकटवर्त्तिन्याः प्रमाणम् । तथा यद्यपि पूर्वकाले महाप्रमाणा मनुष्याः सम्प्रतिकाले त्वल्पप्रमाणाः, तथापि सर्वेषां तदेव केवलज्ञानं तदेव संहननं त एव च प्रज्ञापनीया भावा इति तुल्या प्ररूपणा ॥ २०६ ॥

ननु पञ्चधनुःशतिकप्रभृतीनां महान्ति इन्द्रियाणि, तेन तेषां प्रभूततरक्षेत्रे विषयोपलम्भ-विशेषः तथा केवलोपलम्भविशेषोऽपि स्याद् ? अत आह—

**पुरिमेहिँ जइ वि हीणा, इंदियमाणा उ संपयनराणं ।**
**तह वि य सिं उवलद्धी, खित्तविभागेण तुल्ला उ ॥ २०७ ॥**

'पूर्वेभ्यः' पूर्वकालभाविभ्यः पुरुषेभ्यो यद्यपि 'साम्प्रतनराणां' सम्प्रतिमनुष्याणामिन्द्रि-यमानानि हीनानि तथाप्यात्माङ्गुलमधिकृत्य क्षेत्रविभागेनैषां तुल्या उपलब्धिः । तथाहि— श्रोत्रादीन्द्रियप्रमाणं श्रोत्रादीन्द्रियविषयप्रमाणं चाऽऽत्माङ्गुलतः, तच्च यथा पूर्वमनुष्याणां द्वाद-शयोजनादिकं क्षेत्रप्रमाणं तथाऽधुनातनमनुष्याणामपि । तथा चोक्तम्—

सोइंदियस्स णं भंते ! केवइए विसए पन्नत्ते ? गोयमा ! जहन्नेणं अंगुलस्स असंखिज्जइ-भागाओ उक्कोसेणं बारसहिंतो जोयणेहिंतो [तो अच्छिण्णे पोग्गले पुट्ठे पविट्ठाति सद्दाति सुणेति ] इत्यादि (प्रज्ञापना पञ्चदशमिन्द्रियपदम् उ० १ सू० १९५) ।

एवं हीना-ऽधिकशरीरप्रमाणत्वेऽपि केवलेनोपलम्भस्तुल्य एवेति न कश्चिद्दोषः । अन्यच्च

---

१ °डाणि इणं तह निरुत्तं ता० ॥ २ °भागे तेषां भा० के० ॥

शरीराश्रितानीन्द्रियाणि, ततः शरीरप्रमाणविषये तदाश्रितानामिन्द्रियाणामपि प्रमाणविशेषभावात् तद्विषयक्षेत्रोपलम्भविशेषः ॥ २०७ ॥

गतं निरुक्तद्वारम् । अधुना विधिद्वारावसरः, तत्र प्रथमतो विधेरेकार्थिकान्याह—

## विधिद्वारम्

**अणुपुव्वी परिवाडी, कमो य नायो ठिई य मज्जाया ।**
**होइ विहाणं च तहा, विहीएँ एगट्ठिया हुंति ॥ २०८ ॥** विधेरेकार्थिकानि

आनुपूर्वी परिपाटी क्रमो न्यायः स्थितिः मर्यादा विधानमित्येतानि विधेरेकार्थिकानि भवन्ति ॥ २०८ ॥ तत्र येन विधिनाऽनुयोगः कर्त्तव्यस्तमाह—

**सुत्तत्थो खलु पढमो, बिइओ निज्जुत्तिमीसिओ भणिओ ।**
**तइओ य निरवसेसो, एस विही[2] भणिय अणुयोगे ॥ २०९ ॥** धीमतः शिष्यानाश्रित्यानुयोगस्य विधिः

प्रथमस्य श्रोतुः प्रथमं तावत् सूत्रार्थः कथनीयः । यथा—“नो कप्पइ निग्गंथाण वा निग्गंथीण वा आमे तालपलंबे अभिन्ने पडिगाहित्तए” (उ० १ सू० १) इति सूत्रम् । अस्यार्थः—न इति प्रतिषेधे, ‘न कल्पते’ न वर्त्तते इत्यर्थः, नैषां ग्रन्थो विद्यत इति निर्ग्रन्थाः तेषाम्, वा विभाषायाम्, निर्ग्रन्थीनां वा, ‘आमम्’ अपक्वम्, तलो वृक्षः, तले भवं तालं फलमित्यर्थः, प्रलम्बं—मूलम्, तदपि तस्यैव तलवृक्षस्य प्रतिपत्तव्यम्, ततः समाहारः, ‘अभिन्नम्’ अव्यपगतजीवं प्रतिग्रहीतुमिति । एवं तावत् कथयितव्यं यावदध्ययनपरिसमाप्तिः । ततो द्वितीयस्यां परिपाट्यां ‘निर्युक्तिमिश्रितः’ पीठिकया सूत्रस्पर्शिकनिर्युक्त्या च समन्वितः, सोऽपि यावदध्ययनपरिसमाप्तिस्तावत् कथनीयः । ‘तृतीयः’ तृतीयस्यां परिपाट्यामनुयोगो निरवशेषो वक्तव्यः, पद-पदार्थ-चालना-प्रत्यवस्थानादिभिः सप्रपञ्चं समस्तं कथयितव्यमिति भावः । एष विधिरनुयोगे ग्रहण-धारणादिसमर्थान् शिष्यान् प्रति वेदितव्यः ॥ २०९ ॥

मन्दमतीन् प्रति प्रकारान्तरेणाऽनुयोगविधिमाह—

**मूयं हुंकारं वा, बाढक्कार पडिपुच्छ वीमंसा ।**
**तत्तो पसंगपारायणं च परिणिट्ठ सत्तमए ॥ २१० ॥** मन्दमतीन् शिष्यानाश्रित्यानुयोगस्य विधिः

प्रथमतो मूकं शृणुयात्, किमुक्तं भवति ?—प्रथमश्रवणे संयतगात्रस्तूष्णीमासीत । ततो द्वितीये श्रवणे हुङ्कारं दद्यात्, वन्दनं कुर्यादित्यर्थः । तृतीये ‘बाढकारं कुर्यात्’ ‘बाढमेवमेतत्, नान्यथा’ इति प्रशंसेदित्यर्थः । चतुर्थे गृहीतपूर्वा-ऽपरसूत्राभिप्रायो मनाक् प्रतिपृच्छां कुर्यात्, यथा ‘कथमेतद् ?’ इति । पञ्चमे ‘मीमांसां’ प्रमाणजिज्ञासां कुर्यात् । षष्ठे तदुत्तरोत्तरगुणप्रसङ्गः पारगमनं चाऽस्य भवति । ततः सप्तमे परिनिष्ठा, गुरुवदनुभाषत इत्यर्थः । यत एवं मन्दमेधसां श्रवणपरिपाट्या विवक्षिताध्ययनार्थावगमः ततस्तान् प्रति सप्तवारान् अनुयोगो यथाप्रतिपत्ति कर्त्तव्यः ॥ २१० ॥ अत्र परावकाशमाह—

**चोएइ राग-दोसा[3], समत्थ परिणामगे परूवणया ।**
**एएसिं नाणत्तं, वुच्छामि अहाणुपुव्वीए ॥ २११ ॥**

---

१ °या एते ता० ॥ २ °ही होति अणु° ता० ॥ ३ °दोसे स° ता० ॥

शिष्येणानुयोगदातरि गुरौ राग-द्वेषत्वापादनम्

शिष्यः 'नो(चो)दयति' प्रश्नयति—'समर्थे'-ग्रहण-धारणासमर्थे तथा परिणामके, [illegible]मेतत्, ग्रहण-धारणा[ऽ]समर्थेऽतिपरिणामके[ऽपरिणामके] च वा भगवन्! तदा युष्माकं राग-द्वेषौ प्रसजतः। तथाहि—तिसृभिः परिपाटीभिरेकान् ग्राहयतो रागः, अपरान् [illegible] परिपाटीभिर्ग्राहयतो द्वेषः; तथा परिणामकान् ग्राहयतो रागः, इतरानतिपरिणामका-ऽपरिणामकान् परिहरतश्च द्वेषः। 'एतेषां' ग्रहण-धारणासमर्था-ऽसमर्थानां परिणामकादीनां च 'यथाऽऽनुपूर्व्या' क्रमेण नानात्वं वक्ष्ये ॥ २११ ॥ तत्र प्रतिज्ञातमेव निर्वाहयन् प्रथमतो ग्रहण-धारणासमर्था-ऽसमर्थान् प्रति राग-द्वेषावाह—

मच्छरया अविमुत्ती, पूयासक्कार गच्छइ य खिन्नो[1]।
दोसो[2] गहणसमत्थे, इयरे रागो उ[3] वुच्छेयो ॥ २१२ ॥

ग्रहण-धारणासमर्थे शिष्यं तिसृभिः परिपाटीभिर्ग्राहयत एतावन्ति कारणानि स्युः—एष बहुशिक्षितो मम[4] सपत्नो भविष्यति, ततो मत्सरतया तिसृभिः परिपाटीभिस्तस्य ग्र(ग्रा)हणम्, अन्यथा एकया परिपाट्या तं ग्राहयेत्। 'अविमुक्तिः' इति एष सूत्रा-ऽर्थेषु समाप्तेषु मां मोक्ष्यते, इतरथा तु शिष्यपरिवारत्वेन वर्त्तत इत्यविमुक्तिकारणम्। अथवा गृहीतसूत्रा-ऽर्थस्यास्य पूजा-सत्कारो भविष्यति। 'खिन्नो वा' परिश्रान्तोऽन्यं गणं गमिष्यति। "वोच्छेय(यो)"त्ति मद्गसतौ चानुयोगस्य व्यवच्छेदो भविष्यति, अन्यस्य तथाविधशिष्यस्याभावात्। एवं कारणानि सम्भाव्य ग्रहण-धारणासमर्थे तिसृभिः परिपाटीभिरनुयोगं वदतो द्वेषः। 'इतरस्मिन्' जडे रागः, यथातदवबोधमनुयोगस्य प्रवर्त्तनात् ॥ २१२ ॥ अत्राऽऽचार्यः प्राह—

आचार्यस्य प्रतिवचः

निरवयवो न हु सैक्को[5], सयं पगासो उ संपयंसेउं।
कुंभजले वि[6] हु तुरिउज्झियम्मि न हु तिम्मए लिट्टू ॥ २१३ ॥

'न हु' नैव सूत्रस्य 'प्रकाशः' अर्थः 'सकृद्' एकया परिपाट्या 'निरवयवः' समस्तः सम्प्रदर्शयितुं शक्यः, तस्य ग्रहण-धारणासमर्थस्यापि तथाऽवधारयितुमशक्यत्वात्। एतदेव प्रतिवस्तूपमया द्रढयति—न हि कुम्भजलेऽपि त्वरितमुज्झिते लेष्टुः सर्वात्मना तिम्यते, एवमेषोऽपि ग्रहण-धारणासमर्थोऽपि नैकया परिपाट्याऽवधारयितुमीश इति तिसृभिः परिपाटीभिरनुयोगकथनमित्यदोषः ॥ २१३ ॥

साम्प्रतमतिपरिणामका-ऽपरिणामकान् परिहरतो द्वेषाभावमाह—

सुत्तं-ऽत्थे[7] कहयंतो, पारोक्खी सिस्सभावमुवलब्भ।
अणुकंपाएँ[8] अपत्ते, निज्जूहइ[9] मा विणस्सिज्जा ॥ २१४ ॥

'परोक्षी' परोक्षज्ञानोपेतः शिष्येभ्यः सूत्रा-ऽर्थौ कथयन् विनया-ऽविनयकरणादिना तेषां शिष्याणां भावम्—अभिप्रायमुपलभ्य 'अपात्राणि' अपात्रभूतान् शिष्यान् अनुकम्पया 'निर्यूहयति' अपवदति—न तेभ्यः सूत्रा-ऽर्थौ कथयति, श्रुताशातनादिना मा विनश्येयुरिति कृत्वा ॥ २१४ ॥ अत्रैवार्थे दृष्टान्तमा(न्ताना)ह—

---

१ गच्छति य ता० ॥ २ दोसा ग° ता० ॥ ३ य वोच्छेदो ता० ॥ ४ मम प्रसत्नो भवि° भा० विना ॥ ५ सक्का भा० ता० ॥ ६ वि ता० ॥ ७ °त्तऽत्थं क° ता० ॥ ८ °पाय अ° ता० ॥ ९ "णिज्जूहति त्ति न तेभ्य अपवायं कथयतीत्यर्थः" इति चूर्णौ ॥

दारुं धाउं वाही, बीए कंकडुय लक्खणे सुमिणे ।
एगंतेण अजोग्गे, एवमाई उदाहरणा ॥ २१५ ॥ दार्वादयो दृष्टान्ताः

'एकान्तेनायोग्ये' अपरिणामकेऽतिपरिणामके च दारु धातुः व्याधिः बीजानि काङ्कटुको लक्षणं स्वप्न इत्येवमादीनि 'उदाहरणानि' दृष्टान्ताः ॥ २१५ ॥ तत्र दारुदृष्टान्तमाह—

को दोसो एरंडे, जं रहदारुं न कीरए[1] तत्तो । दारु-दृष्टान्तः
को वा तिणिसे रागो[2], उवजुज्जइ जं रहंगेसु ॥ २१६ ॥

'एरण्डे' एरण्डद्रुमे को द्वेषो यत् तस्मात् 'रथदारु' रथयोग्यं दारु न क्रियते ?, को वा तिनिशे रागो यदुपयुज्यते स रथाङ्गेषु ? ॥ २१६ ॥

जं पि य दारुं जोग्गं, जस्स[3] उ वत्थुस्स तं पि हु न सक्का ।
जोएउमणिम्मविउं[4], तच्छण-दल-वेह-कुस्सेहिं ॥ २१७ ॥

'यदपि' वस्तु '[यस्य] वस्तुनः' अक्षादेर्योग्यं दारु तदपि तक्षण-दल-वेध-कुशैरनिर्माप्य योजयितुमशक्यं किन्तु निर्माप्य, एवमिहापि योग्योऽपि यावदर्वाक्तनैः सूत्रैर्न परिकर्म्मितस्तावन्न कल्पं व्यवहारं वाऽध्यापयितुं योग्यः । तत्र तक्षणं प्रतीतम्, दलानि द्विधा त्रिधा वा काष्ठस्य पाटनम्, वेधः प्रतीतः, कुशो यो वेधे प्रान्तः प्रवेश्यते ॥२१७॥ सम्प्रति धातुदृष्टान्तमाह—

एमेव अधाउं उज्झिऊण धाऊण कुणइ आयाणं । धातु-दृष्टान्तः
न य अक्कमेण सक्का, धाउम्मि वि इच्छियं काउं ॥ २१८ ॥

'एवमेव' राग-द्वेषौ विना अधातुं त्यक्त्वा धातूनामादानं करोति, न च धातावप्यक्रमेणेप्सितं कर्तुं शक्यं किन्तु क्रमेण; एवमिहाप्ययोग्यान् परिहरतो योग्यानपि क्रमेण ग्राहयतो न द्वेषः ॥ २१८ ॥ अधुना व्याधिदृष्टान्तमाह—

सुहसज्झो जत्तेणं[5], जत्तासज्झो असज्झवाही उ[6] । व्याधि-दृष्टान्तः
जह रोगे पारिच्छा, सिस्ससभावाण वि तहेव ॥ २१९ ॥

यथा रोगे वैद्येन परीक्षा क्रियते, यथा—एष सुखसाध्यः, एष यत्नेन साध्यः, एष चासाध्यव्याधिः यत्नेनाप्यसाध्यः । परीक्षाऽनन्तरं च राग-द्वेषौ विना तदनुरूपा प्रवृत्तिः, एवं शिष्यस्वभावानामपि 'तथैव' राग-द्वेषाभावेन परीक्षा क्रियते, तदनुरूपा च प्रवृत्तिः ॥ २१९॥ अधुना बीजदृष्टान्तमाह—

बीयमबीयं[7] नाउं, मोत्तुमबीए उ करिसतो सालिं[8] । बीज-दृष्टान्तः
ववइ विरोहणजोग्गे, न यावि से पक्खवाओ उ ॥ २२० ॥

यथा कर्षको बीजमबीजं च ज्ञात्वा अबीजानि मुक्त्वा 'शालिं' शालिबीजानि वपति, न च तस्मिन् विरोहणयोग्ये बीजे "से" तस्य कर्षकस्य 'पक्षपातः' रागः, एवमत्रापि भावनीयम् ॥ २२० ॥ सम्प्रति काङ्कटुकदृष्टान्तमाह—

---

१ °रती त° ता० ॥ २ रातो उ° ता० ॥ ३ तस्स ता० ॥ ४ °म्मवियं त° ता० ॥ ५ °त्तेण य जतणासज्झो ता० ॥ ६ य ता० ॥ ७ °बीए ना° ता० ॥ ८ साली ता० ॥

काङ्कटुक-दृष्टान्तः

कंकडुए को दोसो, जं अग्गी [1]तं तु न पयई दित्तो ।
को वा इयरे रागो, एमेव [2]य सूवकारस्स ॥ २२१ ॥

को द्वेषोऽग्नेः काङ्कटुके यदग्निर्दीप्तोऽपि तं न पचति ?, को वा इतरस्मिन् रागो यत् पाचयति ?, नैव कश्चित् । एवमत्रापि भावनीयम् ॥ २२१ ॥ अधुना लक्षणदृष्टान्तमाह—

लक्षण-दृष्टान्तः

जे उ अलक्खणजुत्ता, कुमारगा ते [3]निसेहिउं इयरे ।
रज्जरिहे अणुमन्नइ, सामुद्दो नेय विसमो उ ॥ २२२ ॥

यथा 'सामुद्रः' सामुद्रलक्षणपरिज्ञाता राज्ञि व्यपगते तस्य ये कुमारा अलक्षणयुक्तास्तान् निषिध्य 'इतरान्' लक्षणोपेतान् राज्यार्हाननुमन्यते, न च स तथाऽनुमन्यमानः 'विषमः' राग-द्वेषवान्, एवमत्रापि द्रष्टव्यम् ॥ २२२ ॥ स्वप्नदृष्टान्तमा(न्ताना)ह—

स्वप्न-दृष्टान्तः

जो जह कहेइ सुमिणं, तस्स तह फलं कहेइ तन्नाणी ।
[4]रत्तो वा दुट्ठो वा, न यावि वत्तव्वयमुवेइ ॥ २२३ ॥

यो यथा स्वप्नं कथयति तस्य तथा 'तज्ज्ञानी' स्वप्नज्ञानी स्वप्नफलं कथयति, न च स तथा कथयन् रक्त इति वा द्विष्ट इति वा वक्तव्यतामुपैति, एवमत्रापि ॥ २२३ ॥

एवमेकान्तेनायोग्या ये शिष्यास्तेषां परिहारे राग-द्वेषाभावे दृष्टान्ता अभिहिताः । सम्प्रति कालान्तरयोग्यानपरिणतान् क्रमेण परिणामयतो राग-द्वेषाभावे दृष्टान्तमाह—

अग्न्यादयो दृष्टान्ताः

अग्गी बाल गिलाणे, सीहे रुक्खे करीलमाईया ।
अपरिणयजणे एए, सप्पडिवक्खा उदाहरणा ॥ २२४ ॥

'अपरिणते जने' कालान्तरयोग्ये एतानि 'सप्रतिपक्षाणि' पूर्वमयोग्यतायां पश्चाद् योग्यतायामित्यर्थः उदाहरणानि । तद्यथा—अग्निर्बालो ग्लानः सिंहो वृक्षः 'करीलं' वंशकरीलम्, आदिशब्दाद्वक्ष्यमाणहस्त्यादिदृष्टान्तपरिग्रहः ॥ २२४ ॥ तत्र प्रथममग्निदृष्टान्तमाह—

अग्नि-दृष्टान्तः

जह अरणीनिम्मविओ, थोवो विउलिंधणं न चाएइ ।
दहिउं सो पज्जलिओ, सव्वस्स वि पच्चलो पच्छा ॥ २२५ ॥
एवं [5]खु थूलबुद्धी, निउणं अत्थं अपच्चलो घेत्तुं ।
सो चेव जणियबुद्धी, सव्वस्स वि पच्चलो पच्छा ॥ २२६ ॥

यथा अरणिनिर्मापितः स्तोको वह्निर्विपुलमिन्धनं न दग्धुं शक्नोति, स एव पश्चात् प्रज्वलितः सर्वस्यापीन्धनजातस्य दहने 'प्रत्यलः' समर्थः ॥ २२५ ॥

एवमग्निदृष्टान्तेन प्रथमतः शिष्यः स्थूलबुद्धिः सन् निपुणमर्थं ग्रहीतुमप्रत्यलः । पश्चात् स एव शास्त्रान्तरैः 'जनितबुद्धिः' उत्पादितबुद्धिः सर्वस्यापि शास्त्रस्य ग्रहणप्रत्यलो भवति ॥ २२६ ॥ बालदृष्टान्तमाह—

बाल-ग्लान-दृष्टान्तौ

देहे अभिवड्ढंते, बालस्स उ पीहगस्स अभिवुड्ढी ।
अइबहुएण विणस्सइ, एमेवऽहुणुट्ठिय गिलाणे ॥ २२७ ॥

---

१ तं न पचते इद्धो ता० ॥ २ य सुत्तकारस्स ता० ॥ ३ निसिद्धिउं ता० ॥ ४ रत्तो त्ति य दुट्ठो त्ति य न ता० ॥ ५ तु ता० ॥

बालस्य देहे[1] अभिवर्द्धमाने तदनुसारेण दातव्यस्य 'पीहकस्य' आहारस्यापि(स्यामि)वृद्धिर्भवति, देहवृद्ध्यनुसारतः पीथकमपि क्रमशो वर्द्धमानं दीयते इति भावः। यदि पुनरतिबहु दीयते तदा स विनश्यति। ग्लानदृष्टान्तमाह—'एवमेव' बालगतेन प्रकारेणाधुनोत्थितेऽपि ग्लाने वक्तव्यम्—यथा ग्लानोऽप्यधुनोत्थितः क्रमेणाभिवर्द्धमानमाहारं गृह्णाति, एकवारमतिप्रभूतग्रहणे विनाशप्रसङ्गात्। एवं शिष्योऽपि क्रमेण योग्यतानुरूपं शास्त्रमादत्ते, प्रथमत एवातिनिपुणार्थशास्त्रग्रहणे बुद्धिभङ्गप्रसक्तेः ॥ २२७ ॥ सिंहादिदृष्टान्तानाह—

सिंह-वृक्ष-करील-दृष्टान्ताः

खीर-मिउपोग्गलेहिं, सीहो पुट्ठो उ खाइ अट्ठी[2] वि ।
रुक्खो विवन्नओ खलु, वंसकरिल्लो य नहछिज्जो ॥ २२८ ॥
ते चेव विवड्ढंता, हुंति अछेज्जा कुहाडमाईहिं ।
तह कोमला वि बुद्धी, भज्जइ गहणेसु अत्थेसु ॥ २२९ ॥

सिंहः प्रथमतः क्षीर-मृदुपुद्गलैः स्वमात्रा पोष्यते। ततः पुष्टः सन् अस्थीन्यपि स खादति। तथा वृक्षो द्विपर्णो[3] वंशकरीलम् एतौ द्वावपि प्रथमतो नखच्छेद्यौ, ततः पश्चादभिवर्द्धमानौ यतस्ततः कुठारादिभिरप्यच्छेद्यौ भवतः। एवं शिष्यस्यापि प्रथमतः कोमला बुद्धिर्भवति, ततः सा गहनेष्वर्थेषु 'भज्यते' भङ्गमुपयाति। क्रमेण तु शास्त्रान्तरदर्शनतोऽभिवर्द्धमाना कठोरा कठोरतरोपजायते इति न कचिदपि भङ्गमुपयाति ॥ २२८ ॥ २२९ ॥

एतदेवोपदिशन्नाह—

निउणे निउणं अत्थं, थूलत्थं थूलबुद्धिणो कहए ।
बुद्धीविवड्ढणकरं, होहिइ कालेण सो निउणो ॥ २३० ॥

निपुणे निपुणमर्थं कथयेत्, स्थूले स्थूलमर्थं कथयेत्। कथम्भूतम्? इत्याह—बुद्धिविवर्द्धनकरम्। एवं सति स कालेन निपुणो भवति, अन्यथा बुद्धिभङ्गप्रसङ्गतो न स्यात् ॥ २३० ॥ साम्प्रतमादिशब्दसूचितान् हस्त्यादीन् दृष्टान्तानाह—

हस्त्यादयो दृष्टान्ताः

सिद्धत्थए वि गिण्हइ, हत्थी थूलगहणे सुनिम्माओ ।
सरवेह-छिज्ज-पवए, घड-पड-चित्ते तहा धमए ॥ २३१ ॥

हस्ती स्थूलग्रहणे सुनिर्मातः सन् पश्चात् सिद्धार्थकानपि गृह्णाति। तथाहि—नवको हस्ती शिष्यमाणः प्रथमं काष्ठानि ग्राह्यते, तदनन्तरं क्षुल्लकान् पाषाणान्, ततो गोलिकाः, ततो बदराणि, तदनन्तरं सिद्धार्थकानपि। यदि पुनः प्रथमत एव सिद्धार्थकान् ग्राह्यते ततो न शक्नोति ग्रहीतुमिति। एवं स्वरवेध-पत्रच्छेद्य-प्लवक-घटकारक-पटकारक-चित्रकारक-धमकाश्च दृष्टान्ता भावनीयाः। ते चैवम्—प्रथमं धानुष्कः स्थूलद्रव्यं व्यद्धुं शिक्षति, पश्चात्स वालम्, पश्चादतिसुनिर्मातः स्वरेणापि विध्यति। तथा पत्रच्छेद्यकार्यपि प्रथममकिञ्चित्करैः पत्रैः शिक्ष्यते, ततो यदा निर्मातो भवति तदा ईप्सितं पत्रच्छेद्यं कार्यते। तथा प्लवकोऽपि प्रथमं वंशे लगयित्वा प्लाव्यते, ततः पश्चादभ्यस्यन् आकाशेऽपि तानि तानि करणानि करोति। घटकारोऽपि प्रथमतः शरावादीनि कार्यते, पश्चात् शिक्षितो घटानपि करोति। पटकारोऽपि प्रथमतः स्थूलानि

१ °हे परिव° भा० ॥ २ अट्ठीणि ता० ॥ ३ द्विपर्णो भा० विना ॥

चीवराणि शिक्ष्यते, ततः सुशिक्षितः शोभनानपि पटान् वयति । चित्रकारोऽपि प्रथमतोऽङ्कं चित्रयितुं शिक्ष्यते, ततः शेषानवयवान्, पश्चात् सुशिक्षितः सर्वं चित्रकर्म सम्यक् करोति । धमकोऽपि पूर्वं शृङ्गादीनि धमयति (धमति), पश्चाच्छङ्खम् ॥ २३१ ॥ अत्रैवोपनयमाह—

जत्थ मई ओगाहइ, जोग्गं जं जस्स तस्स तं कहए ।
परिणामा-ऽऽगमसरिसं, संवेगकरं सनिव्वेयं ॥ २३२ ॥

यथैते हस्त्यादयः क्रमेण निर्माप्यन्ते एवं शिष्यस्यापि यत्र मतिरवगाहते यस्य च यद् योग्यं शास्त्रं तस्य तत् कथयति । कथम्भूतम्? इत्याह—'परिणामा-ऽऽगमसदृशं' यस्य यादृशः परिणामो यस्य च यावानागमस्तत्सदृशम्, यथा—ईदृशपरिणामस्येदम् एतावदागमस्य पुनरिदमिति । पुनः किंविशिष्टं कथयितव्यम्?, अत आह—'संवेगकरं' सिद्धिर्देवलोकः सुकुलोत्पत्तिरित्यादेरभिलाषः संवेगस्तत्करणशीलं संवेगकरम्, तथा नरकः तिर्यग्योनिः कुमानुषत्वमित्यादेर्विरक्तता निर्वेदस्तत्करणशीलं निर्वेदकरम्[1] ॥ २३२ ॥

तदेवं योग्येऽपि क्रमेण दाने राग-द्वेषाभाव उक्तः । 'सम्प्रति शिष्येष्वाचार्येण परिणामकत्वं परीक्ष्यानुयोगः कर्त्तव्यः, शिष्यैरप्याचार्यं परीक्ष्य तस्य सकाशे श्रोतव्यम्' इति शिष्या-ऽऽचार्यपरस्परविधिमतिदेशत आह—

गिण्हंत-गाहगाणं, आइसुएसु उ विही समक्खाओ ।
सो चेव य होइ इहं, उज्जोगो वण्णिओ नवरं ॥ २३३ ॥

गृह्णतां—शिष्याणां ग्राहकस्य—आचार्यस्य 'आदिसूत्रेषु' सामायिकादिषु यो विधिः समाख्यातः "गोणी चंदण०" (आव० निर्यु० गाथा १३६) इत्यादिलक्षणः स एवेह निरवशेषो वक्तव्यः । यस्तु शिष्याणामनुयोगकथने 'उद्योगः' उद्यमो यथा तिसृभिः परिपाटीभिरथवा सप्तभिः कर्त्तव्यः, स नवरं सप्रपञ्चमुपवर्णितः ॥ २३३ ॥

गतं विधिद्वारम् । अधुना प्रवृत्तिद्वारं वक्तव्यम् । प्रवृत्तिः प्रवाहः प्रसूतिरित्येकार्थाः । कथमनुयोगः प्रवर्त्तते? इति । सा च प्रवृत्तिर्द्विधा—द्रव्यतो भावतश्च । तत्र द्रव्यतः प्रवृत्तिमाह—

**प्रवृत्तिद्वारम्**

अणिउत्तो अणिउत्ता, अणिउत्तो नेवं होइ उ निउत्ता ।
नि(ने)उत्तो अणिउत्ता, उ निउत्तो चेव उ निउत्ता ॥ २३४ ॥
निउत्ता अनिउत्ताणं, पवत्तई अहव ते वि उ निउत्ता[2] ।
दव्वम्मि होइ गोणी, भावम्मि जिणादयो हुंति ॥ २३५ ॥

द्रव्यतः प्रसवे गौर्दृष्टान्तो भवति, भावे जिनादयः । तत्र गवि दोहकेन सह चत्वारो भङ्गाः, तद्यथा—दोहकोऽनियुक्तो गौरप्यनियुक्ता १ दोहकोऽनियुक्तो गौर्नियुक्ता २ दोहको नियुक्तो गौरनियुक्ता ३ दोहको नियुक्तो गौरपि नियुक्ता ४ । एवमाचार्य-शिष्येष्वपि भङ्गचतुष्टयं योजनीयम्, तच्चाग्रे योक्ष्यते । तत्र तृतीये भङ्गे नियुक्त आचार्यो यावदप्यनियुक्तानां

१ "सिद्धी य देवलोगो, सुकुलुप्पत्ती य होति संवेगो । णरओ तिरिक्खजोणी, कुमाणुसत्तं च निव्वेओ ॥ १ ॥" इति चूर्णौ ॥ २ °रणीयशी° भा० ॥ ३ °व ते वि उ ता० ॥

शिष्याणामनुयोगं प्रवर्त्तयति । यदि वा द्वितीये भङ्गे तेऽपि शिष्या नियुक्ता अनियुक्तमाचार्यमनुयोगे प्रवर्त्तयन्ति । एवं तृतीये द्वितीये च भङ्गेऽनुयोगस्य प्रवृत्तिः । प्रथमे तु सर्वथा न भवति । चतुर्थे प्रवृत्तिर्निःप्रतिपक्षा ॥ २३४ ॥ २३५ ॥

तत्र गोदृष्टान्तविषयं भङ्गचतुष्टयं व्याख्यानयति—

**अप्पण्हुया य गोणी, नेव य दुद्धा[1] समुज्जओ दुद्धुं[2] ।**
**खीरस्स कओ पसवो, जइ वि य सा खीरदा धेणू ॥ २३६ ॥**
**बीए वि नत्थि खीरं, थेवं[4] व हविज्ज एव तइए वि ।**
**अत्थि चउत्थे खीरं, एसुवमा आयरिय-सीसे ॥ २३७ ॥**
**अहवा अणिच्छमाणमवि किंचि उज्जोगिणो पवत्तंति ।**
**तइए सारिंते वा, होज्ज पवित्ती गुणिंते वा ॥ २३८ ॥**

गौरप्रस्नुता, नैव च दोग्धा तां दोग्धुं समुद्यतः, ततो यद्यपि सा क्षीरदा धेनुस्तथाप्यस्मिन् प्रथमभङ्गे कुतः क्षीरस्य प्रसवः ? नैव कुतश्चित् ॥ २३६ ॥

द्वितीयेऽपि भङ्गे 'दोहकोऽनियुक्तो गौर्नियुक्ता' इत्येवंरूपे नास्ति क्षीरम्, दोहकस्यानियुक्तत्वात् । अथवा गौः प्रस्नुतेति स्तनेषु गलत्सु स्तोकं क्षीरं भवेत् । एवं तृतीयेऽपि भङ्गे 'दोहको नियुक्तो गौरनियुक्ता' इत्येवंलक्षणे नास्ति क्षीरप्रसवः, स्तोकं वा स्याद् दोहकगुणेन । चतुर्थे पुनर्भङ्गे गौरपि प्रस्नुता दोहकोऽपि नियुक्त इत्यस्ति क्षीरप्रसवः । 'एषा उपमा' भङ्गचतुष्टयात्मिका आचार्य-शिष्ययोरप्यनुयोगस्य प्रसवे वेदितव्या । तथाहि—आचार्योऽप्यनियुक्तः शिष्या अपि अनियुक्ता इति प्रथमभङ्गे नास्त्यनुयोगस्य प्रवृत्तिः । अनियुक्त आचार्यः शिष्या नियुक्ता इति द्वितीयेऽपि भङ्गे नानुयोगः, आचार्यस्यानियुक्तत्वात् ॥ २३७ ॥

अथवा अनियुक्तमाचार्यमनिच्छन्तमपि उद्योगिनः शिष्याः किञ्चित्प्रतिपृच्छादिभिरनुयोगं कर्तुं प्रवर्त्तयन्ति, ततो भवति द्वितीयेऽपि भङ्गेऽनुयोगस्य प्रवृत्तिः । 'तृतीये' 'आचार्यो नियुक्तः शिष्या अनियुक्ताः' इत्येवंरूपे नास्त्यनुयोगस्य सम्भवः, अथवा पुनः पुनः सारयत्याचार्ये अथवा श्रोतुमनिच्छन्तमपि शैलसमानं कञ्चिच्छ्रोतारं पुरतो विन्यस्य 'मा नश्यत्वनुयोगः' इति 'गुणयति' गुणननिमित्तमनुयोगं कुर्वति भवेदनुयोगः ॥ २३८ ॥

अत्र दृष्टान्तः कालकाचार्यः[5] । तमेवाह—

**सागारियमप्पाहण[6], सुवन्न सुयसिस्स खंतलक्खेण ।**
**कहणा सिस्सागमणं, धूलीपुंजोवमाणं च ॥ २३९ ॥**

कालकाचार्यकथानकम्

**उज्जेणीए** नयरीए **अज्जकालगा** नामं आयरिया सुत्त-ऽत्थोववेया बहुपरिवारा विहरंति । तेसिं **अज्जकालगाणं** सीसस्स सीसो सुत्त-ऽत्थोववेओ **सागरो** नामं **सुवन्नभूमीए** विहरइ । ताहे **अज्जकालया** चिंतेंति—'एए मम सीसा अणुओगं न सुणंति तओ किमेएसिं मज्झे चिट्ठामि ?, तत्थ जामि जत्थ अणुयोगं पवत्तेमि, अवि य एए वि सिस्सा पच्छा लज्जिया

१ दोज्झा ता० ॥ २ दोज्झुं ता० ॥ ३ बिइए ता० ॥ ४ थोवं ता० ॥ ५ °चार्याः भा० ॥
६ °य अप्पा° ता० ॥

वोच्छिहिंति । एवं चिंतिऊण सेज्जायरमापुच्छंति—कहं अमुत्थ जामि ? तओ मे सिस्सा सुणेहिंति, तुमं पुण मा तेसिं कहेज्जा, जइ पुण गाढतरं निब्बंधं करिज्जा तो खरंटेउं साहेज्जा, जहा—सुवण्णभूमीए सागराणं सगासं गया । एवं अप्पाहित्ता रत्तिं चेव पसुत्ताणं गया सुवण्णभूमिं । तत्थ गंतुं खंतलक्खेण पविट्ठा सागराणं गच्छं । तओ सागरायरिया 'खंत'त्ति काउं तं नाढाइया अब्भुट्ठाणाईणि(ईहिं) । तओ अत्थपोरिसीवेलाए सागरायरिएणं भणिया—खंता ! तुब्भं एयं गमइ ? । आयरिया भणंति—आमं । 'तो खाइं सुणेह'त्ति पकहिया, गव्वायंता य कहिंति । इयरे वि सीसा पभाए संते संभंता आयरियं अपासंता सव्वत्थ मग्गिउं सिज्जायरं पुच्छंति । न कहेइ, भणइ य—तुब्भं अप्पणो आयरिओ न कहेइ मम कहं कहेइ ? । तओ आउरीभूएहिं गाढनिब्बंधे कए कहियं, जहा—तुब्भच्चएण निवेएण सुवण्णभूमीए सागराणं सगासं गया । एवं कहित्ता ते खरंटिया । तओ ते तह चेव उच्चलिया सुवण्णभूमिं गंतुं । पंथे लोगो पुच्छइ—एस कयरो आयरिओ जाइ ? । ते कहिंति अज्जकालगा । तओ सुवण्णभूमीए सागराणं लोगेण कहियं, जहा—अज्जकालगा नाम आयरिया बहुस्सुया बहुपरिवारा इहागंतुकामा पंथे वट्टंति । ताहे सागरा सिस्साणं पुरओ भणंति—मम अज्जया इंति, तेसिं सगासे पयत्थे पुच्छीहामि त्ति । अचिरेणं ते सीसा आगया । तत्थ अग्गिल्लेहिं पुच्छिज्जंति—किं इत्थ आयरिया आगया चिट्ठंति ? । नत्थि, नवरं अन्ने खंता आगया । केरिसा ? । वंदिए नायं 'एए आयरिया' । ताहे सो सागरो लज्जिओ 'बहुं मए इत्थ पलवियं, खमासमणा य वंदाविया' । ताहे अवरण्हवेलाए 'मिच्छा दुक्कडं' करेइ 'आसाइय'त्ति । भणियं च णेण—केरिसं खमासमणो ! अहं वागरेमि ? । आयरिया भणंति—सुंदरं, मा पुण गव्वं करिज्जासि । ताहे धूलीपुंजदिट्ठंतं करे(रें)ति—धूली हत्थेण घेत्तुं तिसु ठाणेसु ओयारेंति—जहा एस धूली ठविज्जमाणी उक्खिप्पमाणी य सव्वत्थ परिसडइ, एवं अत्थो वि तित्थगरेहिंतो गणहराणं गणहरेहिंतो जाव अम्हं आयरि-उवज्झायाणं परंपरएणं आगयं, को जाणइ कस्स केइ पज्जाया गलिया ?, ता मा गव्वं काहिसि । ताहे 'मिच्छा दुक्कडं' करित्ता आढत्ता अज्जकालिया सीस-पसीसाण अणुओगं कहेउं ॥

सम्प्रत्यक्षरगमनिका—सागारिकः—शय्यातरस्तस्य अप्पाहणं—सन्देशकथनम् । स्वयमार्याणां सुवर्णभूमौ सुतशिष्यस्य—शिष्यस्यापि शिष्यस्य सागराभिधानस्य "खंतलक्खेण" वृद्धव्याजेन गमनम् । पश्चाच्छिष्याणां सागारिकेण कथना, यथा—आचार्याः सुवर्णभूमौ सागरस्यान्तिकं गताः । ततः शिष्याणां तत्रागमनम् । सागरं गर्वमुद्वहन्तं प्रति धूलीपुञ्जोपमानमिति ॥ २३९ ॥ चतुर्थभङ्गमधिकृत्याह—

**निउत्तो उभउकालं, भयवं कहणाएँ वद्धमाणो उ ।**
**गोयममाई वि सया, सोयव्वे हुंति उ निउत्ता ॥ २४० ॥**

'नियुक्तः' उभयकालमनुयोगं करोति । 'नियुक्ताः' उभयकालं शृण्वन्ति । अत्र कथनायां दृष्टान्तो भगवान् वर्द्धमानस्वामी । श्रोतव्ये सदा नियुक्ता दृष्टान्ता भवन्ति गौतमादयः ॥ २४० ॥ गतं प्रवृत्तिद्वारम् । इदानीं केन वेति द्वारमाह—

केन चेति द्वारम्

अनुयोगदातृगुणाः

देस-कुल-जाइ-रूवी, संघयणी धिइजुओ अणासंसी ।
अविकंथणो अमाई, थिरपरिवाडी गहियवक्को ॥ २४१ ॥
जियपरिसो जियनिद्दो, मज्झत्थो देस-काल-भावन्नू ।
आसन्नलद्धपइभो, नाणाविहदेसभासन्नू ॥ २४२ ॥
पंचविहे आयारे, जुत्तो सुत्तऽत्थतदुभयविहन्नू ।
आहरण-हेउ-उवणय-नयनिउणो गाहणाकुसलो ॥ २४३ ॥
ससमय-परसमयविऊ, गंभीरो दित्तिमं सिवो सोमो ।
गुणसयकलिओ जुत्तो, पवयणसारं परिकहेउं ॥ २४४ ॥

युतशब्दः प्रत्येकमभिसम्बध्यते—देशयुतः कुलयुत इत्यादि । तत्र यो मध्यदेशे जातो यो वाऽर्द्धषड्विंशतिषु जनपदेषु स देशयुतः, स ह्यार्यदेशभणितिं जानाति, ततः सुखेन तस्य समीपे शिष्या अधीयत इति तदुपादानम् । कुलं पैतृकम्, तथा च लोके व्यवहारः—इक्ष्वाकुकुलजोऽयम् नागकुलजोऽयमित्यादिः, तेन युतः प्रतिपन्नार्थनिर्वाहको भवति । जातिर्मातृकी, तया युतो विनयादिगुणवान् भवति । रूपयुतो लोकानां गुणविषयबहुमानभाग् जायते, "यत्राकृतिस्तत्र गुणा वसन्ति" इति प्रवादात् । संहननयुतो व्याख्यायां न श्राम्यति । धृतियुतो नातिगहनेष्वर्थेषु भ्रममुपयाति । 'अनाशंसी' श्रोतृभ्यो वस्त्राद्यनाकाङ्क्षी । 'अविकत्थनः' नातिबहुभाषी । ['अमायी' न शाठ्येन शिष्यान् वाहयति ।] स्थिरा—अतिशयेन निरन्तराभ्यासतः स्थैर्यमापन्ना अनुयोगपरिपाट्यो यस्य स स्थिरपरिपाटिः, तस्य हि सूत्रमर्थो वा न मनागपि गलति । 'गृहीतवाक्यः' उपादेयवचनः, तस्य ह्यल्पमपि वचनं महार्थमिव प्रतिभाति ॥२४१॥ 'जितपरिषत्' न महत्यामपि पर्षदि क्षोभमुपयाति । 'जितनिद्रः' रात्रौ सूत्रमर्थं वा परिभावयन् न निद्रया बाध्यते । 'मध्यस्थः' सर्वेषु शिष्येषु समचित्तः । देशं कालं भावं जानातीति देश-काल-भावज्ञः, स हि देशं कालं भावं च लोकानां ज्ञात्वा सुखेन विहरति, शिष्याणां चाभिप्रायान् ज्ञात्वा तान् सुखेनानुवर्त्तयति । 'आसन्नलब्धप्रतिभः' परवादिना समाक्षिप्तः शीघ्रमुत्तरदायी । नानाविधानां देशानां भाषा जानातीति नानाविधदेशभाषाज्ञः, स हि नानादेशीयान् शिष्यान् सुखेन शास्त्राणि ग्राहयति ॥ २४२ ॥ पञ्चविध आचारः—ज्ञानाचारादिरूपस्तस्मिन् 'युक्तः' उद्युक्तः, स्वयमाचारेष्वस्थितस्यान्यानाचारेषु प्रवर्त्तयितुमशक्यत्वात् । सूत्रा-ऽर्थग्रहणेन चतुर्भङ्गी सूचिता—एकस्य सूत्रं नार्थः, द्वितीयस्यार्थो न सूत्रम्, तृतीयस्य सूत्रमप्यर्थोऽपि, चतुर्थस्य न सूत्रं नाप्यर्थः; तत्र तृतीयभङ्गग्रहणार्थं तदुभयग्रहणम्, सूत्रा-ऽर्थ-तदुभयविधीन् जानातीति सूत्रार्थतदुभयविधिज्ञः । आहरणं—दृष्टान्तः, हेतुश्चतुर्विधो यापकादिः यथा दशवैकालिकनिर्युक्तौ, यदि वा द्विविधो हेतुः कारको ज्ञापकश्च, तत्र

१ अहवा वि इमो हेऊ, विण्णेओ तत्थिमो चउविअप्पो । जावग थावग वंसग, लूसग हेऊ चउत्थो उ ॥ अध्य० १ गाथा ८९ ॥ २ "तत्र कारको यथा—मृत्पिण्ड-चक्र-सूत्रोदक-कुलालसामग्रीलक्षणो हेतुर्घटादीनां निर्वर्तकत्वात् कारकः । ज्ञापको यथा—तैल-स्थाल-वर्ति-ज्योतिःसामग्रीनिष्पन्नः प्रदीपलक्षणो हेतुः वस्त्र-शयना-ऽऽसनादीनामनेकेषां तमसाऽभिव्यञ्जकत्वात् ज्ञापकः ।" इति चूर्णिकृतः ॥

कारको घटस्य कर्ता कुम्भकारः, ज्ञापको यथा—तमसि घटादीनामभिव्यञ्जकः प्रदीपः, उपनयः—उपसंहारः, नयाः—नैगमादयः, एतेषु निपुण आहरण-हेतूपनय-नयनिपुणः; स हि श्रोतारमपेक्ष्य तत्प्रतिपत्त्यनुरोधतः क्वचिद् दृष्टान्तोपन्यासं क्वचिद् हेतूपन्यासं करोति, उपसंहारनिपुणतया सम्यगधिकृतमर्थमुपसंहरति, नयनिपुणतया नयवक्तव्यतावसरे सम्यक्प्रपञ्चं वैविक्त्येन नयानभिधत्ते । 'ग्राहणाकुशलः' प्रतिपादनशक्त्युपेतः ॥ २४३ ॥ स्वसमयं परसमयं वेत्तीति स्वसमय-परसमयवित्, स च परेणाक्षिप्तः सुखेन स्वपक्षं परपक्षं च निर्वहति । 'गम्भीरः' अतुच्छस्वभावः । 'दीप्तिमान्' परवादिनामनुद्धर्षणीयः । 'शिवः' अकोपनः, यदि वा यत्र तत्र वा विहरन् कल्याणकरः । 'सोमः' शान्तदृष्टिः । गुणाः—मूलगुणा उत्तरगुणाश्च तेषां शतानि तैः कलितो गुणशतकलितः । 'युक्तः' समीचीनः प्रवचनस्य—द्वादशाङ्गस्य सारम्—अर्थं कथयितुम् ॥ २४४ ॥ कस्माद्गुणशतकलित इष्यते ? इति चेद् अत आह—

**गुणसुट्ठियस्स वयणं, घयपरिसित्तु व्व पावओ भाइ ।**
**गुणहीणस्स न[1] सोहइ, नेहविहूणो जह पईवो ॥ २४५ ॥**

यो मूलगुणादिषु गुणेषु सुस्थितस्तस्य वचनं घृतपरिसिक्तपावक इव 'भाति' दीप्यते । गुणहीनस्य तु न शोभते वचनम्, यथा स्ने[2]हविहीनः प्रदीपः । उक्तञ्च—

आयारे वट्टंतो, आयारपरूवणाअसंकंतो ।
आयारपरिब्भट्ठो, सुद्धचरणदेसणे भइओ ॥ ॥ २४५ ॥

गतं केन वेति द्वारम् । अधुना कस्येति द्वारमाह—

**कस्येति द्वारम्**

**जइ पवयणस्स सारो, अत्थो सो तेण कस्स[3] कायव्वो ।**
**एवंगुणन्निएणं, सव्वसुयस्साऽऽउ देसस्सा ॥ २४६ ॥**

यदि प्रवचनस्य सारो अर्थस्तर्हि स तेन एवंगुणान्वितेन कस्य कर्त्तव्यः ? किं सर्वश्रुतस्य ? उत 'देशस्य' श्रुतस्कन्धादेः ? इति ॥ २४६ ॥ अत्र सूरिराह—

**को कल्लाणं निच्छइ, सव्वस्स वि एरिसेण वत्तव्वो ।**
**कप्प-व्ववहाराण उ, पगयं सिस्साण थिरत्थं ॥ २४७ ॥**

को नाम जगति कल्याणं नेच्छति ? ततः सर्वस्यापि श्रुतस्यानुयोग ईदृशेन वक्तव्यः । केवलं कल्पो व्यवहारश्चापवादबहुलस्ते[5]नैतयोरनुयोगे विशेषत एतादृशेन 'प्रकृतम्' अधिकृतमधिकारः, एवंगुणयुक्तेनैव कल्प-व्यवहारयोरनुयोगः कर्त्तव्य इत्यर्थः । कस्मादे[6]वमुच्यते ? इति चेत्, उच्यते—शिष्याणां स्थिरीकरणार्थम् ॥ २४७ ॥ तदेव स्थिरीकरणं भावयति—

**एसुस्सग्गठियप्पा, जयणाणुन्नातो दरिसयंतो वि ।**
**तासु न वट्टइ नूणं, निच्छयओ ता अकरणिज्जा ॥ २४८ ॥**

यदा नाम यथोक्तगुणशतकलितः कल्प-व्यवहारयोरनुयोगं करोति तदा शिष्या एवमव-

---

१ न भायति ने° ता० ॥ २ स्नेहेन वि° डे० ॥ ३ °स्स वत्तव्वो ता० ॥ ४ °स्स का° डे० ता० ॥ ५ °लस्तेन तयो° भा० मो० विना ॥ ६ °वम्? उच्यते—शिष्या° भा० विना ॥

बुध्यन्ते—एष स्वयमुत्सर्गस्थितात्मा, अथ च कल्पे व्यवहारे च यतनया पञ्चकादिपरिहाणिरूपया प्रतिसेवना अनुज्ञाताः प्रदर्शयति, ततः प्रतिसेवना यतनयाऽनुज्ञाता अपि प्रदर्शयन् स्वयं तासु न वर्तते, किन्तु केवलमुत्सर्गमाचरति, तदेवं ज्ञायते नूनम्—निश्चयेनैता यतनानुज्ञाता अपि प्रतिसेवनाः 'अकरणीयाः' न समाचरितव्याः ॥ २४८ ॥ किञ्च—

**जो उत्तमेहिँ पहओ, मग्गो सो दुग्गमो न सेसाणं ।**
**आयरियम्मि जयंते, तदणुचरा केण सीइज्जा[1] ॥ २४९ ॥**

यः 'उत्तमैः' गुरुभिः 'प्रहतः' क्षुण्णः 'मार्गः' पन्थाः स शेषाणां दुर्गमो न भवति, किन्तु सुगमः । तत्र आचार्ये 'यतमाने' यथोक्तसूत्रनीत्या प्रयत्नवति 'तदनुचराः' तदाश्रिताः शिष्याः केन हेतुना सीदेयुः ? नैव सीदेयुरिति भावः । तत एतेन कारणेन कल्प-व्यवहारयोरनुयोगे विशेषत एतादृशेन प्रकृतम् ॥ २४९ ॥

**अणुओगम्मि य पुच्छा, अंगाई कप्प छक्कनिक्खेवो ।**
**सुय खंधे निक्खेवो, इक्केक्को[2] चउव्विहो होइ ॥ २५० ॥**

अनुयोगेऽङ्गादेः पृच्छा वक्तव्या, तदनन्तरं कल्पस्य षट्को निक्षेपः, ततः श्रुते स्कन्धे च एकैकस्मिन् निक्षेपश्चतुर्विधो भवति वक्तव्यः । एष द्वारगाथासमासार्थः ॥ २५० ॥

साम्प्रतमेनामेव विवरीषुः प्रथमतोऽनुयोगेऽङ्गादेः पृच्छामाह—

**जइ कप्पादणुयोगो, किं सो अंगं उयाहु सुयखंधो ।**
**अज्झयणं उद्देसो, पडिवक्खंगादिणो बहवो ॥ २५१ ॥**

यदि कल्पादेः आदिशब्दाद् व्यवहारस्य ग्रहणम् अनुयोगः ततः किं सोऽङ्गम् ? उताहो श्रुतस्कन्धः ? अध्ययनम् ? उद्देशो वा ? । अमीषां चाङ्गानां प्रतिपक्षा बहवोऽङ्गादयो द्रष्टव्याः । इयमत्र भावना—यदि नामैतादृशेनाचार्येणानुयोगः कल्पस्य व्यवहारस्य च कर्त्तव्यः ततः स कल्पो व्यवहारो वा किमङ्गम् अङ्गानि ? श्रुतस्कन्धः श्रुतस्कन्धाः ? अध्ययनम् अध्ययनानि ? उद्देश उद्देशाः ? ॥ २५१ ॥ अत्र सूरिराह—

**सुयखंधो अज्झयणा, उद्देसा चेव हुंति निक्खिप्पा ।**
**सेसाणं पडिसेहो, पंचण्ह वि अंगमाईणं ॥ २५२ ॥**

श्रुतस्कन्धोऽध्ययनानि उद्देशा एते त्रयः पक्षा भवन्ति 'निक्षेप्याः' स्थाप्या आदरणीया इत्यर्थः । शेषाणां पञ्चानामप्यङ्गादीनां प्रतिषेधः । तद्यथा—कल्पो व्यवहारो वा नाङ्गं नाङ्गानि श्रुतस्कन्धो नो श्रुतस्कन्धाः अध्ययनं नाध्ययनानि नो उद्देशः उद्देशाः ॥ २५२ ॥

**तम्हा उ निक्खिविस्सं, कप्प-व्ववहारमो सुयक्खंधं ।**
**अज्झयणं उद्देसं, निक्खिवियव्वं तु जं जत्थ ॥ २५३ ॥**

यस्मादेवं तस्मात् कल्पं निक्षेप्स्यामि व्यवहारं निक्षेप्स्यामि श्रुतं निक्षेप्स्यामि स्कन्धं निक्षेप्स्यामि अध्ययनं निक्षेप्स्यामि उद्देशं निक्षेप्स्यामि । यच्च यत्र निक्षेप्तव्यं नामादि चतुष्प्रकारं षट्प्रकारं वा [तत्] तत्र वक्ष्यामि । तत्र कल्पस्य षड्विधो नामादिको निक्षेपः ।

---

१ सीएज्जा ता० ॥ २ एकेक्क च° ता० ॥

[illegible]—

"कप्प ठवणनिक्खेवो" (गा० २५०)

व्यवहारस्य चतुर्विधो नामादिनिक्षेपः ॥ २५३ ॥ एतयोः लक्षणमाह—

आइल्लाणं दुण्ह वि, सट्ठाणं होइ नामनिप्फन्ने ।
अज्झयणस्स उ ओहे, उद्देसस्सऽणुगमे भणिओ ॥ २५४ ॥

'आद्ययोर्द्वयोः' कल्प-व्यवहारयोर्यथाक्रमं षट्कस्य चतुष्कस्य च निक्षेपस्य स्वस्थानं भवति नामनिष्पन्ने निक्षेपे, ततः स तत्र वक्तव्यः; तत्र कल्पस्य पञ्चकल्पे व्यवहारस्य पीठिकायाम् । अध्ययनस्य चतुष्प्रकारो निक्षेपः ओघनिष्पन्ने निक्षेपेऽभिधास्यते । उद्देशस्य च 'अनुगमे' उपोद्घातनिर्युक्त्यनुगमे भणितः करिष्यते ॥ २५४ ॥

सम्प्रति "सुय खंधे निक्खेवो" (गा० २५०) इत्यादिव्याख्यानार्थमाह—

नामसुयं ठवणसुयं, दव्वसुयं चेव होइ भावसुयं ।
एमेव होइ खंधे, पन्नवणा तेसि पुव्वुत्ता ॥ २५५ ॥

श्रुतस्य चतुष्प्रकारो नामादिको निक्षेपः, तद्यथा—नामश्रुतं स्थापनाश्रुतं द्रव्यश्रुतं भावश्रुतं च । 'एवमेव' अनेनैव प्रकारेण स्कन्धेऽपि चतुःप्रकारो निक्षेपः, तद्यथा—नामस्कन्धः स्थापनास्कन्धो द्रव्यस्कन्धो भावस्कन्धश्च । एतेषां प्रज्ञापना पूर्वमावश्यके उक्ताऽवधारणीया ॥ २५५ ॥ गतं कल्पेति द्वारम् । अधुना तद्द्वा[रद्वा]रं वक्तव्यम्—

<u>अनुयोगद्वारद्वारम्</u>

अनुयोग-द्वाराणि

चत्तारि दुवाराइं, उवक्कम निक्खेव अणुगम नया य ।
काऊण परूवणयं, अणुगम-निज्जुत्ति सुत्तस्स ॥ २५६ ॥

कल्पस्य चत्वार्यनुयोगद्वाराणि भवन्ति, तद्यथा—उपक्रमो निक्षेपोऽनुगमो नयाश्च । एतेषां च प्ररूपणा यथाऽनुयोगद्वारे तथा कर्तव्या । सा च तावद् यावत् सूत्रानुगमः सूत्रस्पर्शिकनिर्युक्त्यनुगमश्च । अनुयोगद्वाराणि नाम अनुयोगस्य—अर्थस्य मुखानि उपाया इत्यर्थः ॥२५६॥ आह किमर्थमनुयोगद्वाराणि कृतानि ? किमर्थं वा चत्वारि ? एकमेव द्वारमस्तु, अत आह—

अद्दारगं अनगरं, एगद्दारे य होइ पलिमंथो ।
चउदारे तेण भवे, देस पएसे य छिंडीओ ॥ २५७ ॥

यथा 'अद्वारकम्' अकृतद्वारमनगरम्, एकस्मिंश्च द्वारे कृते भवति 'परिमन्थः' निर्गच्छद्भिः प्रविशद्भिश्चाश्व-हस्त्यादिभिः सङ्घट्टः, तेन कारणेन तन्नगरं चतुर्द्वारं भवति । तत्रापि 'देशे' द्वारकुड्यादिलक्षणे प्रदेशे च तत्र तत्रानेकाश्छिण्डिका भवन्ति । एवमकृतानुयोगद्वारमेकान्तेनागम्यम्, अकृतद्वारनगरवत्; कृतैकानुयोगद्वारमपि दुरधिगमम्, कृतैकद्वारकनगरवत्; तेन चत्वार्यनुयोगद्वाराणि कृतानि । गतं [तद्द्वार]द्वारम् ॥

<u>भेदद्वारम्</u>

इदानीं भेदद्वारम्—यथा नगरस्य देशेषु प्रदेशेषु च छिण्डिका भवन्ति तथाऽनुयोगस्यापि

---

१ नए य ता० ॥

उपक्रम-द्वारम्

चतुर्णां द्वाराणामवान्तरभेदाः । तत्रोपक्रमो द्विभेदः, तद्यथा—लौकिकः शास्त्रीयश्च । लौकिकः षड्विधः—नामोपक्रमः स्थापनोपक्रमो द्रव्योपक्रमः क्षेत्रोपक्रमः कालोपक्रमो भावोपक्रमश्च ॥२५७॥

तत्र नाम-स्थापने प्रतीते । द्रव्योपक्रममाह—

लौकिको द्रव्योपक्रमः

सच्चित्ताई तिविहो, उवक्कमो दव्वि सो भवे दुविहो ।
परिकम्मणम्मि एक्को, बिइओ संवट्टणाए उ ॥ २५८ ॥

नोआगमतो व्यतिरिक्तो द्रव्योपक्रमस्त्रिविधः—'सचित्तादिः' सचित्तोऽचित्तो मिश्रश्च । एकैको द्विविधः—परिकर्मणि संवर्तनायां च ॥ २५८ ॥ एतदेव व्याख्यानयति—

जेण विसिस्सइ रूवं, भासा व कलासु वा वि कोसल्लं ।
परिकम्मणा उ एसा, संवट्टण वत्थुनासो उ ॥ २५९ ॥

येन रूपं 'विशिष्यते' विशिष्टतरं क्रियते, यथा सुवर्णे कटकरूपतापादनं कृष्णवर्णे वा गौरवर्णताजननम्; तथा येन भाषा विशेष्यते—स्पष्टवर्णोच्चारणादिरूपा क्रियते, यथा शुक-सारिकादीनाम्; यया वा 'कलासु' द्वासप्ततिसङ्ख्यासु कौशल्यमुपजन्यते एषा परिकर्मणा । संवर्तना वस्तुनाशः, यथा—सुवर्णे कटकत्वं भज्यते पुरुषो वा मार्यते । तत्र सचित्ते परिकर्मणा यथा—नटस्य नेपथ्यं क्रियते, शुको वा पाठ्यते, पुरुषो वा द्वासप्ततिकला अवगाह्यते, संवर्तना यथा—पुरुषो मार्यते । अचित्ते परिकर्मणा यथा—सुवर्णे कटकं क्रियते, संवर्तना—कटकं भज्यते । मिश्रे परिकर्मणा यथा—साभरणो नटो चारुवेषं कार्यते, पुरुषो वा साभरणो द्वासप्ततिकला ग्राह्यते, संवर्तना यथा—सायुधः पुरुषो मार्यते ॥ २५९ ॥

गतो द्रव्योपक्रमः । सम्प्रति क्षेत्रोपक्रममाह—

लौकिकः क्षेत्रोपक्रमः

नावाएँ उवक्कमणं, हल-कुलियाईहिँ वा वि खित्तस्स ।
सम्मज्ज-भूमिकम्मे, पंथ-तलागाइएसुं तु ॥ २६० ॥

नावा आदिशब्दादुडुपादिभिश्च नदीं तरति, अथवा हल-कुलिकादिभिर्यत् 'क्षेत्रस्य' इक्षुक्षेत्रादेरुपक्रमणम्, यदि वा यत् क्रियते गृहादीनां सम्मार्जनं भूमिकर्म वा देवकुलादीनाम्, यद्वा पथः—मार्गस्य शोधनम् तडागं वा खन्यते, आदिग्रहणेनावटादिषु यत् परिकर्म खननादिलक्षणम् । एष समस्तोऽपि क्षेत्रोपक्रमः ॥ २६० ॥ कालोपक्रममाह—

लौकिकः कालोपक्रमः

छायाएँ नालियाइ व, कालस्स उवक्कमो विउपसत्थो ।
रिक्खाईचारेसु व, साव-विबोहेसु व दुमाणं ॥ २६१ ॥

'छायया' शङ्कुच्छायया 'नालिकया' घटिकया यः कालो ज्ञायते, यथा एतावान् कालो गत इति । किंविशिष्टः ? इत्याह—"विउपसत्थो" विद्वः—विद्वांसस्तैः प्रशस्तः—प्रशंसितः, यथा सुष्ठु ज्ञात इति, एष कालोपक्रमः । यदि वा रि(क)खं—नक्षत्रम् आदिशब्दाद्ग्रहपरिग्रहः तेषां चारेषु यत्परिज्ञानम्, यथा—नक्षत्रमिदमेतावन्तं कालमशुभम्, ग्रहो वाऽमुकराशावेतावन्तं कालं स्थायी इत्यादि । यद्वा 'द्रुमाणां' शमी-चिञ्चिणिकाप्रभृतीनां स्वापे विबोधे च दृष्टे ज्ञायते, यथा—गतोऽस्तमादित्य उदितो वेति । एष कालोपक्रमः ॥ २६१ ॥

---

१ °ाईओ ता० सिंना ॥ २ °याए व ता० ॥

भावोपक्रमो द्विधा—प्रशस्तोऽप्रशस्तश्च । उभयमप्याह—

लौकिकोऽप्रशस्तो भावोपक्रमः तत्रार्थे दृष्टान्ताश्च

**गणिगा मरुगीऽमच्चे, अपसत्थो भावुवक्कमो होइ ।**
**आयरियस्स उ भावं, उवक्कमिज्जा अह पसत्थो ॥ २६२ ॥**

अप्रशस्तं संसारनिबन्धनत्वादशोभनं यद् भावस्योपक्रमणमेष भावोपक्रमोऽप्रशस्तः । अत्र दृष्टान्तो गणिका 'मरुकी' ब्राह्मणी तृतीयोऽमात्यः ।

एगा गणिया चउसट्ठिकलापंडिया । तीए चित्तसभाए सव्वमणूसजाईणं जाइकम्मं सिप्पाणि कुवियपसायणं च लिहावियं । ताहे जो कोइ मेहुणट्ठी एइ तं भणइ—चित्तसभं पिच्छ जेण नज्जइ किंजाईओ? केरिसो वा एस? । ताहे सो तत्थ जाइकम्मं सिप्पाणि कुवियपसायणं च दट्ठुमवस्समेव भणइ जं जत्थ सुकयं दुकयं वा । ताहे सा जाणइ—अमुगजाईओ, अमुगं सिप्पं जाणइ, कुवियपसायणे दारुणसभावो इत्थिनिज्जिओ वा । एवं नाउं तहा उवचरइ । एस गणियादिट्ठंतो ॥

मरुगीदिट्ठंतो इमो—एगा मरुगी । सा चिंतेइ—कहं मज्झ धीयाओ सुहियाओ हवेज्जा? । तओ जा जाहे परिणिज्जइ ताहे तं सिक्खवेइ—भत्तारस्स दुक्कमित्ता चडंतं पण्हीए आहणिज्जासु । तत्थ पढमाए आहओ पायं मद्दिउमारद्धो, परिचुंबिया 'हा ! दुक्खाविय'त्ति । ताए माऊए सिट्ठं । मायाए भन्नइ—दासो मे जातो ( दासभोज्जतो ) एस तव । बिइयाए आहओ । सो रुंटित्ता उवसंतो । माऊए सिट्ठं । सा भणति—तुमं पि दासभोगेणं एयं भुंजाहि, परं मा अतिआयतं । तइयाए आहतो । रुट्ठो । पिट्टिया । उट्ठित्ता गतो । माऊए कहियं । तीए भणियं—एस उत्तमो, चक्किया चिट्ठिज्जा, देवयमिव उवचरेज्जा, भर्तृदेवताका हि नारी । पच्छा कहं कह वि गमित्ता पसाइओ । जहा—एस अम्हं कुलधम्मो, उवायकं वा इच्छियं, कोउगा वा कयं ॥

अमात्यदृष्टान्तो यथा—एगस्स रण्णो आहेडएणं निग्गयस्स आसेण मुत्तियं । पडिनियत्तो राया तेणेव मग्गेणाऽऽगओ पासइ मुत्तं तह चेव ट्ठियं । तओ सुचिरं निरिक्खित्ता चिंतियमणेण—जइ इत्थ तडागं होइ तो सुंदरं । अमच्चेण तस्स भावं नाऊण तडागं खणावियं । तडे पायववण( ग्रन्थाग्रम्—२००० )संडाणि आरोवियाणि । अन्नया रन्ना निग्गएणं दिट्ठं, पुच्छियं—कस्सेयं तडागं? । अमच्चेण भणियं—तुब्भं । कहं? । तओ अमच्चेण सव्वं सिट्ठं । राया तुट्ठो अमच्चस्स ॥

उक्तोऽप्रशस्तो भावोपक्रमः । प्रशस्तमाह—आचार्यस्य यद् भावमुपक्रामति एष प्रशस्तो भावोपक्रमः ॥ २६२ ॥ आचार्यस्य भावमुपक्रम्य किं कर्त्तव्यम्? अत आह—

लौकिकः प्रशस्तो भावोपक्रमः

**जो जेण पगारेणं, तूसइ कार-विणयाणुवत्तीहिं ।**
**आराहणाइ मग्गो, सु च्चिय अव्वाहओ तस्स ॥ २६३ ॥**

'यः' आचार्यो येन प्रकारेण 'कार-विनयानुवृत्तिभिः' कारेण—वैयावृत्त्यादिकरणेन यथा—पादौ प्रक्षालनीयौ, विश्रामणा कर्त्तव्या, ग्लानादीनां नित्यं वैयावृत्त्यं कर्त्तव्यमित्यादि; तथा

१ °क्कमा ऽम° ता० ॥ २ "दासभोज्जो एस तव" इति चूर्णौ पाठः ॥

विनयस्य यावन्तो भेदास्तेषां मध्ये यो येन विनयेनानुवृत्तिः–सर्वेष्वप्यप्रतिकूलतया तुष्यति तस्य तमपरं कुर्यात् । किं कारणं येन येन कृतेन तुष्यति तत् कर्तव्यम्? अत आह–'तस्य' आचार्यस्याराधनाया एषोऽव्याहतः 'मार्गः' पन्थाः ॥ २६३ ॥ किञ्च—

**आगारिंगियकुसलं, जइ सेयं वायसं वए पुज्जा ।**
**तह वि य सिं न विकूडे, विरहम्मि य कारणं पुच्छे ॥ २६४ ॥**

आकारः–दिगवलोकनादिस्तेन इङ्गितं–परिज्ञानं यदन्तर्गतस्य भावस्य तत्र कुशल आकारेङ्गितकुशलः, अथवाऽऽकारः–दिगवलोकनादिरिङ्गितं–सूक्ष्मचेष्टाविशेषस्ताभ्यामन्तर्गताभिप्रायलक्षणे कुशल आकारेङ्गितकुशलस्तं शिष्यं 'पूज्याः' आचार्या [ वदेयुः । किं ] वदेयुः ? इत्याह–'श्वेतं वायसं' यथा परतः श्वेतो वायसस्तिष्ठतीति, तथापि "सिं" तेषां पूज्यानां तद् वचनं स शिष्यः 'न विकुट्टयेत्' न प्रतिषेधयेत्, यथा–न भवत्ययं श्वेतः, वायसः कृष्ण इति; केवलं 'विरहे' जनापगमे एकान्ते कारणं पृच्छेत्–कथं तदा गुरुपादैरुपदिष्टं 'श्वेतो वायसः' ? इति । तत्राऽऽचार्येण वक्तव्यम्–सत्यम्, न भवति श्वेतो वायसः किन्तु मया त्वत्परिज्ञानार्थमुक्तम्, यथा–किमेष मद्वचनं कोपयति न वा ? इति ॥ २६४ ॥ उक्तो भावोपक्रमः, तदभिधानाच्च लौकिकः । सम्प्रति शास्त्रीयो वक्तव्यः, स च भावेऽन्तर्भवतीति भावोपक्रमतया तमेवाह—

षड्विधः शास्त्रीय उपक्रमः

**भावे उवक्कमं वा, छव्विहमणुपुव्विमाइ वण्णेउं ।**
**जत्थ समोयरइ इमं, अज्झयणं तत्थ ओयारे ॥ २६५ ॥**

वाशब्दः प्रकारान्तरसूचने । अथवा भावोपक्रमं 'षड्विधं' आनुपूर्वी-नाम-प्रमाण-वक्तव्यता-ऽर्थाधिकार-समवतारलक्षणं वर्णयित्वा यत्रेदमध्ययनं समवतरति तत्रावतारयितव्यम् । तद्यथा–आनुपूर्वी त्रिधा, पूर्वानुपूर्वी पश्चादानुपूर्वी अनानुपूर्वी च ॥ २६५ ॥ तत्र—

**दुण्हं अणाणुपुव्वी, न हवइ पुव्वाणुपुव्विओ पढमं ।**
**पच्छाणुपुव्वि बिइयं, जइ उ दसा तेण बारसमं ॥ २६६ ॥**

द्वे एवाध्ययने कल्पो व्यवहारश्च, न च द्वयोरनानुपूर्वी भवति, ततोऽत्र पूर्वानुपूर्वी वा प्रतिपत्तव्या पश्चानुपूर्वी वा । तत्र पूर्वानुपूर्व्या प्रथमं पश्चादानुपूर्व्या द्वितीयम् । केचिदाचार्याः प्राहुः–कल्प-व्यवहार-दशा एकश्रुतस्कन्धः, तन्मतेन यदि दशा अपि गण्यन्ते तदा पूर्वानुपूर्व्या प्रथमं पश्चानुपूर्व्या द्वादशमम् अनानुपूर्व्या एकादिकाया एकोत्तरिकाया द्वादशगच्छगतायाः श्रेणेरन्योऽन्याभ्यासे यावन्तो भङ्गकाः प्रथमान्तिमवर्जास्तावन्तो भेदा द्रष्टव्याः ॥ २६६ ॥

**सव्वज्झयणा नामे, ओसम्मं मीसए अवतरंति ।**
**जीवगुण नाण आगम, उत्तरऽणंगे य काले य ॥ २६७ ॥**

'नाम्नि' षड्विधनाम्नि समवतरति । षड्विधे च नाम्नि भावाः प्ररूप्यन्ते । तत्र 'मिश्रके' क्षायोपशमिके भावे समवतरन्ति यतः सर्वाण्यप्यध्ययनानि उत्सन्नम् अत इदमपि क्षायो-

---

१ °श्चानु° भा० ॥ २ उन्नप्रायेणचं अत ('उत्सन्नं' प्रायेण, अत) डे० ॥

पशमिकनाम्न्यवतरति । प्रमाणद्वारमङ्गीकृत्य गुणप्रमाणे । तदपि द्विधा—जीवगुणप्रमाणमजीवगुणप्रमाणं च, तत्र जीवगुणप्रमाणे समवतरति । तदपि ज्ञान-दर्शन-चारित्रभेदात् त्रिधा, तत्र ज्ञानगुणप्रमाणे समवतरति । तदपि चतुर्धा—प्रत्यक्षमनुमानमागम उपमानं च, तत्राऽऽगमे । सोऽपि द्विधा—लौकिको लोकोत्तरिकश्च, तत्र लोकोत्तरिके । सोऽपि द्विधा—अङ्गप्रविष्टोऽनङ्गप्रविष्टश्च, तत्रानङ्गप्रविष्टे । सोऽपि द्विधा—कालिक उत्कालिकश्च, तत्र कालिके । नयप्रमाणे तु न समवतरति, कालिकश्रुते नयानां समवताराभावात् । सङ्ख्याप्रमाणे तु कालिकश्रुतपरिमाणसङ्ख्यायां समवतरति ॥ २६७ ॥

**पज्जव पुव्वुद्दिट्ठा, संघाया पज्जव-ऽक्खराणं च ।**
**मुत्तूण पज्जवा खलु, संघायाई उ संखिज्जा ॥ २६८ ॥**

कल्पस्य व्याख्यानेऽनन्ताः पर्यवाः, ते च पूर्वं—**नन्द्याम्**—

"सव्वागासपएसग्गं सव्वागासपएसेहिं अणंतगुणियं पज्जवक्खरं निप्फज्जइ" (पत्र १९५) इत्यनेनोद्दिष्टाः—कथिताः । सङ्घाता द्विधा—पर्यवाणामक्षराणां च । तत्र पर्यवसङ्घाता अनन्तास्तान् 'पर्यवान्' पर्यवसङ्घातान् मुक्त्वा शेषाः खलु 'सङ्घातादयः' अक्षरसङ्घातादयः सङ्ख्येयाः, तद्यथा—सङ्ख्येया अक्षरसङ्घाताः, सङ्ख्येयाः श्लोकाः, सङ्ख्याता वेष्टका इत्यादि ॥२६८॥

**उस्सन्नं सव्वसुयं, ससमयवत्तव्वया समोयरइ ।**
**अहिगारो कप्पणाए, समोयारो जो जहिं एस ॥ २६९ ॥**

'उत्सन्नं' सर्वकालं सर्वश्रुतं स्वसमयवक्तव्यतायां समवतरति । अर्थाधिकारे मूलगुणेषूत्तरगुणेषु चापराधमापन्नानां प्रायश्चित्तकल्पनायाम् ॥ २६९ ॥ सम्प्रति यदुक्तं 'स्वसमयवक्तव्यतायां समवतरति' तदिदानीं सिंहावलोकितेनापवदति—

**परपक्खं दूसित्ता, जम्हा उ सपक्खसाहणं कुणइ ।**
**नो खलु अदूसियम्मी, परे सपक्खंजसा सिद्धी ॥ २७० ॥**

परसमयवक्तव्यतायामप्यवतरति, यस्मात् परपक्षं दूषयित्वा स्वपक्षसाधनं करोति, न खल्वदूषिते परपक्षे स्वपक्षस्याञ्जसा व्यक्ता प्रधाना वा सिद्धिर्भवति, ततः परसमयवक्तव्यतायामवतारः । तदेवमिदं कल्पाध्ययनमुपक्रमे आनुपूर्व्यादौ यत्र यत्र समवतरति तत्र तत्र समवतारितम् ॥ २७० ॥ गत उपक्रमः । सम्प्रति निक्षेपमाह—

निक्षेपद्वारम्

**निक्खेवो होइ तिहा, ओहे नामे य सुत्तनिप्फन्ने ।**
**अज्झयणं अज्झीणं, आओ झवणा य तत्थोहे ॥ २७१ ॥**

ओघनिष्पन्नो निक्षेपः

निक्षेपस्त्रिविधः—ओघनिष्पन्नो नामनिष्पन्नः सूत्रालापकनिष्पन्नश्च । तत्रौघनिष्पन्नश्चतुर्विधः, तद्यथा—अध्ययनमक्षीणमायः क्षपणा च ॥ २७१ ॥

**इक्किक्कं तं चउहा, नामाईयं विभासिउं ताहे ।**
**भावे तत्थ उ चउसु वि, कप्पज्झयणं समोयरइ ॥ २७२ ॥**

१ "पमाणे भावपमाणे समोतरति, तं तिविहं—गुणप्पमाणं णयप्पमाणं संखप्पमाणं, गुणप्पमाणे समोतरति" इति चूर्णौ ॥ २ °ज्झयं स° ता० ॥ ३ °ण त्ति त° ता० ॥ ४ °उं ओहे ता० ॥

'एकैकम्' अध्ययनादिकं यथा अनुयोगद्वारे तथा नामादीनां भेदतश्चतुर्धा विभाष्य चतुर्ष्वपि 'तत्र' तेष्वध्ययनादिषु 'भावे' भावविषये तु कल्पाध्ययनमिदं समवतरति ॥२७२॥

गत ओघनिष्पन्नो निक्षेपः । सम्प्रति नामनिष्पन्नमाह—

नामनिष्पन्नो निक्षेपः

**नामे छविह कप्पो, दव्वे वासि-परसादिएहिं तु ।**
**खेत्ते काले जहुवक्कमम्मि भावे उ पंचविहो ॥ २७३ ॥**

नामनिष्पन्ने निक्षेपे कल्प इति नाम । स च षोढा, तद्यथा—नामकल्पः स्थापनाकल्पो द्रव्यकल्पः क्षेत्रकल्पः कालकल्पो भावकल्पश्च । तत्र नाम-स्थापने प्रतीते । द्रव्यकल्पो येन वासी-परश्वादिना द्रव्येण कल्प्यते तद् द्रष्टव्यम् । क्षेत्रकल्पो यथाक्षेत्रोपक्रमः । कालकल्पो यथाकालोपक्रमः । भावकल्पः 'पञ्चविधः' पञ्चप्रकारः ॥ २७३ ॥ तमेवाह—

**छव्विह सत्तविहे वा[3], दसविह वीसइविहे य बायाला ।**
**जस्स उ नत्थि विभागो, सुव्वत्त जलंधकारो से ॥ २७४ ॥**

[4]भावतः कल्पः षड्विधः सप्तविधो दशविधो विंशतिविधो द्वाचत्वारिंशद्विधश्च । एते पञ्चापि प्रकाराः पञ्चकल्पे व्याख्यातास्तथा ज्ञातव्याः । यस्य त्वेषः 'विभागः' पञ्चप्रकारभावकल्पपरिज्ञानं नास्ति 'से' तस्य सुव्यक्तं जडान्धकारः ॥ २७४ ॥

गतो नामनिष्पन्नो निक्षेपः । सम्प्रति सूत्रालापकनिष्पन्नं प्रत्याह—

सूत्रालापकनिष्पन्नो निक्षेपः

**पत्तो वि न निक्खिप्पइ, सुत्तालावस्स इत्थ निक्खेवो ।**
**सुत्ताणुगमे [5]वुच्छं, इति अत्थे लाघवं होइ ॥ २७५ ॥**

यद्यपि सूत्रालापकस्य निक्षेपः 'प्राप्तः' प्राप्तावसरस्तथापि स प्राप्तोऽपि 'अत्र' निक्षेपप्रक्रमे न निक्षिप्यते, किन्त्वितोऽस्ति तृतीयमनुयोगद्वारमनुगम इति तत्र सूत्रानुगमे वक्ष्ये । यतः 'इति' एवं सति अर्थे लाघवं भवति । तथाहि—सूत्रालापकनिक्षेपः सूत्रगतानामालापकानां निक्षेपः, ते च सूत्रगता आलापाः सूत्रे सति सम्भवन्ति, ततः सूत्रानुगम एव तन्निक्षेपो ज्यायान्, इह तु तन्निक्षेपकरणे महत् प्रतिपत्तिकष्टम् ॥ २७५ ॥ अनुगमे च त्रीणि द्वाराणि, तद्यथा—लक्षणं तदर्हा पर्षत् सूत्रार्थश्च । प्रथमं लक्षणद्वारमाह—

अनुगमद्वारम्

## लक्षणद्वारम्

**लक्खणओ खलु सिद्धी, तदभावे तं न साहए अत्थं ।**
**सिद्धमिदं सव्वत्थ वि, लक्खणजुत्तं सुयं तेण ॥ २७६ ॥**

इह लक्षणहीनं सूत्रं न भवति, यतो लक्षणयुक्तस्य सूत्रस्यार्थः लक्षणहीनस्य त्वर्थाभावः, ततो यन्निमित्तमुपनिबद्धं सूत्रं तस्याप्रसिद्धिरेव । तथा चाह—लक्षणतः खलु विवक्षितस्यार्थस्य सिद्धिः, 'तदभावे' लक्षणाभावे 'तत्' सूत्रं न साधयति विवक्षितमर्थम् । इदं च 'सर्वत्रापि' [6]लोके सिद्धम्—यत् किञ्चिन्मण्यादि द्रव्यं लाभार्थं क्रीतं तल्लक्षणहीनं लाभं न साधयति । तेन कारणेन लक्षणयुक्तं सूत्रमिष्यते ॥ २७६ ॥ अथ कीदृशं लक्षणयुक्तं सूत्रम् ? अत आह—

---

१ °परसुमाईसु । खेत्ते ता० विना ॥ २ "दव्वकप्पो जं वासि-परसुमादीहिं दव्वेहिं किं पि कप्पिज्जति" इति चूर्णौ ॥ ३ या ता० ॥ ४ "एसा गाधा जधा पंचकप्पे तथा विभासितव्या" इति चूर्णिः ॥ ५ वोच्छिहति इति स्थाने ता० ॥ ६ लोकसि° कां० डे० विना ॥

सूत्रस्य लक्षणानि

**अप्पग्गंथ महत्थं, बत्तीसादोसविरहियं जं च ।**
**लक्खणजुत्तं सुत्तं, अट्ठहि य गुणेहिँ उववेयं ॥ २७७ ॥**

'अल्पग्रन्थम्' अल्पाक्षरम् महार्थम्, अत्र चत्वारो भङ्गाः—अल्पाक्षरमल्पार्थं च यथा—कार्पासादिकम्, अल्पाक्षरं महार्थम् यथा—सामायिक-कल्प-व्यवहारादि, महाक्षरमल्पार्थम् यथा—"जीमूते इति वा ककुभे इति वा" इत्यादिभिर्बहुभिरक्षरैर्वर्णव्यावर्णनम्, महाक्षरं महार्थम् यथा—दृष्टिवादः । तत्र यद् अल्पाक्षरं महार्थं तादृशं सूत्रमिष्यते । तथा यद् द्वात्रिंशद्दोषविरहितं तदिष्यते । ते च द्वात्रिंशद्दोषा वक्ष्यमाणाः । तथाऽष्टभिर्गुणैर्वक्ष्यमाणैर्यद् उपेतं तदिष्यते । एवम्भूतं सूत्रं लक्षणयुक्तम् ॥ २७७ ॥ अधुना द्वात्रिंशद्दोषानाह—

द्वात्रिंशत्सूत्रस्य दोषाः

**अलियमुवघायजणयं, अवत्थय निरत्थयं छलं दुहिलं ।**
**निस्सारमहियमूणं, पुणरुत्तं वाहयमजुत्तं ॥ २७८ ॥**
**कमभिन्न वयणभिन्नं, विभत्तिभिन्नं च लिंगभिन्नं च ।**
**अणभिहियमपयमेव य, सभावहीणं ववहियं च ॥ २७९ ॥**
**काल-जइ-च्छविदोसो, समयविरुद्धं च वयणमित्तं च ।**
**अत्थावत्तीदोसो, हवइ य असमासदोसो उ ॥ २८० ॥**
**उवमा-रूवगदोसो, परप्पवत्ती य संधिदोसो य ।**
**एए उ सुत्तदोसा, बत्तीसं हुंति नायव्वा ॥ २८१ ॥**

अलीकं द्विविधम्—अभूतोद्भावनं भूतनिह्नवश्च । तत्राभूतोद्भावनं यथा—श्यामाकतन्दुलमात्रो जीव इत्यादि । भूतनिह्नवो यथा—नास्ति जीव इत्यादि १। 'उपघातजनकं' यत् परस्योपघाते वर्तते, यथा—"न मांसभक्षणे दोषः" (मनुस्मृति अ० ५ श्लो० ५६) इत्यादि २। 'अपार्थकं' यस्यावयवेष्वर्थो विद्यते न समुदाये, असम्बद्धमित्यर्थः, यथा—"शङ्खः कदल्यां कदली च भेर्याम्" अथवा—

वंजुलपुप्फुप्पीसा, उंबर-वडकुसुममालिया सुरभी ।
वरतुरगस्स विसायइ, ओलइया अग्गसिंगेसु ॥ ३ ।

'निरर्थकं' यस्यावयवेष्वर्थो न विद्यते, यथा—डित्थः डवित्थः वाजनः ४ । छलं यथा—अस्त्यात्मा यद्यस्ति आत्मा तर्हि यद् यदस्ति स स आत्मा प्राप्नोति, नवकम्बलो देवदत्त इत्यादि वा ५ । द्रोहणशीलं द्रुहिलं यत् पुण्य-पापापलपनादि, यथा—

एतावानेव लोकोऽयं, यावानिन्द्रियगोचरः । इत्यादि ६ ।

'निस्सारं' यत्र सारः—अर्थो न विद्यते, यथा—अस्थि-चर्मशिलापुञ्जं वृद्धाः ७ । 'अधिकं' यत् पञ्चानामवयवानामन्यतरेण समधिकम् ८ । 'ऊनम्' एषामन्यतमेन हीनम् ९ । पुनरुक्तं त्रिविधम्—अर्थपुनरुक्तं वचनपुनरुक्तं उभयपुनरुक्तं च । तत्रार्थपुनरुक्तं यथा—इन्द्रः शक्रः पुरन्दर इति, वचनपुनरुक्तं यथा—सैन्धवमानय लवणं सैन्धवमानयेत्यादि, उभयपुनरुक्तं यथा—क्षीरं क्षीरम् १०। 'व्याहतं' यत्र पूर्वमपरेण बाध्यते, यथा—

कर्म चास्ति फलं चास्ति, भोक्ता नास्ति च निश्चयः । ११ ।

---

१ लिंगविभिन्नं विभत्तिभिन्नं च ता० भा० ॥ २ य ता० ॥

'अयुक्तं' यद् बुद्ध्या विचिन्त्यमानं न युक्तिं सहते, यथा—

तेषां कटतटभ्रष्टैर्गजानां मदबिन्दुभिः ।
प्रावर्त्तत नदी घोरा, हस्त्यश्वरथवाहिनी ॥ १२ ॥ २७८ ॥

क्रमभिन्नं यथा—धरणीधरेन्द्र-चन्द्र-पद्म-सागरान् गम्भीर-नन्दन-सुख-बल-स्थैर्यगुणैर्जयति १३ । 'वचनभिन्नं' यत्रैकवचनप्रसङ्गे द्विवचनं बहुवचनं वा क्रियते, द्विवचन-बहुवचनव्यत्यासो वा १४ । 'विभक्तिभिन्नं' यत्र विभक्तेरन्यथा प्रयोगः १५ । 'लिङ्गभिन्नं' यत्र स्त्रीलिङ्गे पुल्लिङ्गं नपुंसकलिङ्गं वा क्रियते, एवं शेषयोरपि द्रष्टव्यम् १६ । 'अनभिहितं' नाम यत् स्वसमयेऽनुक्तमात्मन इच्छया भण्यते १७ । 'अपदं' नाम यत्र गाथापदे गीतिकापदं वानवासिकापदं वा क्रियते १८ । 'स्वभावहीनं' यस्य यो यत्रात्मीयः स्वभावस्तेन तत् शून्यमभिधीयते, यथा—स्थिरो वायुरिति १९ । 'व्यवहितं' नाम यत्र किञ्चिद् निर्दिश्याऽन्यद् विस्तरेण वर्णयित्वा पुनस्तत् प्रकृतमभिधीयते २० ॥ २७९ ॥

कालदोषो यत्रातीता-ऽनागत-वर्तमानकालव्यत्यासकरणम् २१ । यतिः नाम विश्रामस्तस्य दोषो यतिदोषः, यत्र श्लोके गाथायां वृत्ते वा स्वलक्षणप्राप्तः पदच्छेदो न क्रियतेऽस्थाने वा क्रियते, यथा—

जयति जईणं पवरो, गुणनिगरो नाणकिरणउज्जोओ ।
लोईसरो मुणिवरो, सिरिवच्छच्छलो महावीरो ॥ २२ ।

छविदोषो नाम यत्र यस्या छविः क्रियते २३ । समयविरुद्धं यथा—वैशेषिको ब्रूते 'प्रधानं कारणम्' जैनो वदति 'नास्ति जीवः' इत्यादि २४ । वचनमात्रं यथा—कश्चित्कीलकं निहत्य ब्रूयात्—इदं लोकमध्यमित्यादि २५ । अर्थापत्तिदोषो यथा—ब्राह्मणो न हन्तव्यः अर्थादापन्नं शेषजनो हन्तव्य इति २६ । 'असमासदोषः' यत्र समासे प्राप्ते समासरहितानि पदानि भण्यन्ते २७ ॥ २८० ॥

उपमादोषो यथा—काञ्जिकमिव ब्राह्मणस्य सुरा पेया २८ । रूपकदोषो यथा—पर्वतो रूप्यमाण आत्मीयैरङ्गैः शून्यो वर्ण्यते २९ । 'परमवृत्तिदोषः' यत्र सुबहुमप्यर्थं वर्णयित्वा निर्देशं न करोति ३० । 'पददोषः' स्याद्यन्ते तिबाद्यन्तं तिबाद्यन्ते वा स्याद्यन्तं करोति ३१ । 'सन्धिदोषः' यत्र भवन्नपि सन्धिर्न क्रियते विसर्गलोपं वा कृत्वा पुनः सन्धिं करोति ३२ । एते द्वात्रिंशत्सूत्रदोषा भवन्ति ज्ञातव्याः ॥ २८१ ॥

अष्टभिर्गुणैरुपेतमित्युक्तम् अतस्तानेवाष्टौ गुणानाह—

**निद्दोसं सारवंतं च, हेउजुत्तमलंकियं ।**
**उवणीयं सोवयारं च, मियं महुरमेव य ॥ २८२ ॥** सूत्रस्याष्टौ गुणाः

निर्दोषं १ सारवत् २ हेतुयुक्तम् ३ अलङ्कृतम् ४ उपनीतं ५ सोपचारं ६ मितं ७ मधुरम् ८ इति ॥ २८२ ॥ तत्र निर्दोषादिपदव्याख्यानार्थमाह—

---

१ "गुणनिगरो कामियमिच्छमज्जुओ" इति चूर्णौ ॥ २ "छविः अलङ्कारविशेषः" इति आव० हारि० वृत्तौ पत्र ३७५ ॥

**दोसा खलु अलियाई, बहुपज्जायं च सारवं सुत्तं ।**
**साहम्मेयरहेऊ, सकारणं वा वि हेउजुयं ॥ २८३ ॥**
**उवमाइ अलंकारो, सोवणयं खलु वयंति उवणीयं ।**
**काहलमणोवयारं, दंडगममियं तिहा महुरं ॥ २८४ ॥**

**दोषाः** खल्वलीकादयः प्रागभिहितास्तैर्वर्जितं निर्दोषम् १ । सारवद् नाम '**बहुपर्यायम्**' **एकैकस्मि**न्नभिधेये यत्रानेकान्यभिधानानीत्यर्थः २ । हेतुयुक्तं साधर्म्येण वैधर्म्येण वा हेतुना युक्तम्, अथवा हेतुः कारणं निमित्तमप्यनर्थान्तरम्, ततो यत् सकारणं तद् हेतुयुक्तमिति, यथा—"सुत्तत्तं सेयं जागरियत्तं वा सेयं" इत्यादि ३ ॥ २८३ ॥ अलङ्कृतं यत्रोपमादिरलङ्कारः । तत्रोपमायुक्तम्, यथा—"सूरेव सेणाइ समत्तमाउहे" । आदिग्रहणेन—

नियमा अक्खरलंभो, माउक्कमनिट्ठुरं छवीजमगं ।
महुरत्तणमत्थघणत्तणं च सुत्ते अलंकारा ॥

इति परिग्रहः ४ । उपनीतं खलु वदन्ति 'सोपनयं' सोपसंहारम् ५ । अनुपचारं नाम यत् 'काहलं' फल्गुप्रायम्, तद् विपरीतं सोपचारम् ६ । मितं पदैः श्लोकादिभिर्वा, अमितं दण्डकैः ७ । मधुरं त्रिधा—सूत्रमधुरमर्थमधुरमुभयमधुरम् ८ । एतैरष्टभिर्गुणैरुपेतम् ॥ २८४ ॥

चशब्दात्—

चशब्द-सूचिता अपरे सूत्रगुणाः

**अप्पक्खरमसंदिद्धं, सारवं विस्सओमुहं ।**
**अत्थोभमणवज्जं च, सुत्तं सव्वन्नुभासियं ॥ २८५ ॥**

अल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखं 'अस्तोभं' स्तोभकरहितं अनवद्यम् इत्थम्भूतं सूत्रं सर्वज्ञभाषितम् ॥ २८५ ॥ तत्राल्पाक्षरं प्रतीतम् । असन्दिग्धादिपदव्याख्यानार्थमाह—

**अत्थेसु दोसु तीसु व, सामन्नमिहाणओ उ संदिद्धं ।**
**जह सिंधवं तु आणय, अत्थबहुत्तम्मि संदेहो ॥ २८६ ॥**
**उय-वइकारो ह त्ति य, हीकाराई य थोभगा हुंति ।**
**वज्जं होइ गरहियं, अगरहियं होइ अणवज्जं ॥ २८७ ॥**

यस्मिन्नर्थेऽभिधीयमाने द्वयोस्त्रिषु चार्थेषु सामान्याभिधानतः सन्देह उपजायते तत् सन्दिग्धम्, यथा—सैन्धवमानयेत्युक्ते किं वस्त्रस्य ग्रहणम्? आहोश्वित्पुरुषस्य? उताहो लवणस्य? इत्यर्थबहुत्वे सन्देहः । सारवत् नवनीतभूतम् । विश्वतोमुखं यत् सर्वतोऽधिकृतमर्थं प्रयच्छति ॥ २८६ ॥ अस्तोभा-ऽनवद्ययोर्व्याख्यानमाह—

"उय इत्यादि" उत-वै-हो-हिप्रभृतीनामकारणप्रक्षेपाः स्तोभकाः तद्रहितमस्तोभकम् । अवद्यं भवति गर्हितं तत्प्रतिषेधादगर्हितमनवद्यम् ॥ २८७ ॥

एवंगुणजातीयं सूत्रं कथमुच्चरितव्यं पठनीयं वा? तत आह—

१ तहा ता० विना ॥ २ "सुत्तत्तं भंते! साहू? जागरियत्तं साहू?" इत्यादिरूपं सूत्रं **भगवत्यां** श० १२ उ० २ पत्र ५५७ ॥ ३ "उत वै ह ही अकारणे एवमादीनां प्रक्षेपः" इति **चूर्णौ** ॥ ४ °**हादिप्रभृ**° भा० विना ॥

सूत्रोच्चारणपद्धतिः

**अहीणऽक्खरं अणहियमविच्चामेलियं अवाइद्धं ।**
**अक्खलियं च अमिलियं, पडिपुन्नं चेव घोसजुयं ॥ २८८ ॥**

अहीनाक्षरम् । 'अनधिकम्' अधिकाक्षररहितम् । 'अव्यत्याम्रेडितं' नाम यदस्थानेन पदघटनम्, यथा—

प्राप्तराज्यस्य रामस्य, राक्षसाः प्रलयं गताः ।

इत्यत्र "प्राप्तराज्यस्य रामस्य राक्षसाः" इत्यादि तद्रहितम् । यदि वाऽन्यान्यदर्शनानुगतशास्त्रान्तरपल्लवप्रक्षेपरहितमव्यत्याम्रेडितम् । 'अव्याविद्धं' यत् तस्य सूत्रस्याधस्तनपदमुपरि उपरितनमधो न क्रियते । 'अस्खलितं' यद् उपलाकुलभूमौ हलमिव पदादिभिर्न स्खलितम् । 'अमिलितं' यद् ग्रन्थान्तरवर्त्तिभिः पदैरमिश्रितम्, यथा—सामायिकसूत्रे दशवैकालिकोत्तराध्ययनादिपदानि न क्षिपतीति । प्रतिपूर्णं पदादिभिः । 'घोषयुतं' यथावस्थितैरुदात्तादिभिर्घोषैर्युक्तम् ॥ २८८ ॥ तत्र यदुक्तमहीनाक्षरमिति तत्र हीनं द्विधा—द्रव्यहीनं भावहीनं च । द्रव्यहीने उदाहरणमाह—

द्रव्यहीने द्रव्याधिके चाविरतिकाद्विकोदाहरणम्

**तित्त-कडुओसहाइं, मा णं पीलिज्जऊ ण ते देइ ।**
**पउणइ न तेहि अहिएहिँ मरइ बालो तहाहारे ॥ २८९ ॥**

एगाए अविरइयाए पुत्तो गिलाणो । तीए विज्जो पुच्छिओ । तेण ओसहाणि दिन्नाणि । सा चिंतेइ—इमाणि कडुय-तित्ताणि मा निपीडिज्जा । तओ णाए अद्धाणि अवणीयाणि । सो तेहिं न पगुणीकओ, मओ ॥ तओ एगा ऊणगं पीहगं देइ, तीसे वि मओ ॥

अक्षरगमनिका—तिक्त-कटुकौषधानि माऽमुं बालं पीडयेयुरिति न तानि परिपूर्णानि ददाति किन्त्वर्द्धानि । न च तैरर्द्धितैर्बालः प्रगुणति किन्तु म्रियते । तथा आहारे ऊने म्रियते । एष दृष्टान्तः, अयमर्थोपनयः—यथा तौ बालावैकभविकं दुःखं प्राप्तौ एवं यो भावहीनं सूत्रमुच्चरति पठति वाऽक्षरैर्हीनमित्यर्थः तस्य प्रायश्चित्तं मासलघु । आज्ञां तीर्थङ्कराणामतिचरतश्चतुर्गुरु । अनवस्थायां चतुर्गुरु । मिथ्यात्वे चतुर्लघु । विराधना द्विविधा—आत्मविराधना संयमविराधना च । तत्राऽऽत्मविराधना प्रमत्तं देवता छलयेत्, अन्यो वा साधुर्ब्रूयात्—किं विद्रवसि सूत्रम् ?, तत्र कलहप्रसङ्गेऽस्थिभङ्ग-मरणादिदोषप्रसङ्गः । सूत्रं हीनं कुर्वता संयमो विराधित एव ॥ २८९ ॥ कथम् ? इत्याह—

भावहीनम्

हीनाक्षरमधिकाक्षरं वा सूत्रं पठतां संयमादिनाशः

**अक्खर-पयाइएहिं, हीणऽइरेगं च तेसु चेव भवे ।**
**दोसु वि अत्थविवत्ती, चरणे य अयो य न य मुक्खो ॥ २९० ॥**

हीनं नाम अक्षर-पदादिभिरूनम् । 'तैरेव' अक्षर-पदादिभिः 'अतिरेकं' साधिकम् । 'द्वयोरपि' हीनाक्षरेऽधिकाक्षरे चेत्यर्थः 'अर्थव्यापत्तिः' अर्थस्य विसंवादः । 'अतश्च' अर्थस्य विसंवादे चरणस्य विसंवादः । चरणविसंवादात् 'न मोक्षः' मोक्षाभावः । मोक्षाभावे सर्वा दीक्षा निरर्थिका । एष भावहीने दोषः ॥ २९० ॥ तस्मिन्नेव भावहीने दृष्टान्तमाह—

---

१ "आणं तित्थयराणं अतिचरति र्का, अणवत्थाए र्का, मिच्छत्ते र्क" इति चूर्णौ ॥ २ °रणे आया य न य ता० विना ॥

अक्षराधिके विद्याधर-अभय-कुमारोदाहरणम्

विज्जाहर रायगिहे, उप्पय पडणं च हीणदोसेणं ।
सुणणा सरणा गमणं, पयाणुसारिस्स दाणं च ॥ २९१ ॥

रायगिहे सामी समोसढो । तत्थ एगो विज्जाहरो वंदिउं पडिनियत्तो विज्जं आवाहेइ । तस्स तीए विज्जाए कइ वि अक्खराणि विस्सरियाणि । सो उप्पयणं पडणं च करेइ । अभओ तं दट्ठूण तस्स सगासं गओ पुच्छइ । तेण सिट्ठं । अभएण भणियं—जइ ममं पि देसि [1] तो उज्जुयारेमि । इयरेण पडिवन्नं । तओ अभओ भणइ—तो सावं भण एगं पयं । तेण भणियं । अभएण सुयं । ताहे अभयेण पयाणुसारिणा ताणि अक्खराणि सरियाणि [2] । विज्जाहरो उप्पइत्ता गओ अभयस्स विज्जं दाउं ॥

अक्षरगमनिका—राजगृहे विद्याधरः कतिपयविद्याक्षरगलनाद् हीनदोषेणोत्पतनं पतनं च करोति । ततो विद्यापदानामभयस्य श्रवणाद्(णा) । तच्छ्रवणतोऽभयस्य पदानुसारिप्रज्ञया विस्मृतपदानां स्मरणात्(णा) । तदनन्तरं पदानुसारिणोऽभयस्य विद्यादानं कृत्वा विद्याधरस्य स्वस्थाने गमनम् ॥ २९१ ॥ अधिकमपि द्विधा—द्रव्ये भावे च । तत्र द्रव्याधिके तथैव द्वे अविरतिके दृष्टान्त औषधैः पीहकेन च । एवं तावदक्षर-पदादिभिरधिके सूत्रे दोषा मासलघुमायश्चित्तादयः प्रागुक्ताः । सम्प्रति भावाधिके एवोदाहरणमाह—

भावाधिकेऽशोक-कुणाल-सम्प्रति-राजोदाहरणम्

पाडलऽसोग कुणाले, उज्जेणी लेहलिहण सयमेव ।
अहिय सवत्ती मत्ताहिएण सयमेव वायणया ॥ २९२ ॥
छुरियाण अप्पडिहया, आणा सयमंजणं निवे णायं ।
गामग सुयस्स जम्मं, गंधव्वाऽऽउट्टणा कोइ [3] ॥ २९३ ॥
चंदगुत्तपपुत्तो यँ [4], बिंदुसारस्स नत्तुओ ।
असोगसिरिणो पुत्तो, अंधो जायइ कागिणिं ॥ २९४ ॥

पाडलिपुत्ते नयरे चंदगुत्तपुत्तस्स बिंदुसारस्स पुत्तो असोगो नाम राया । तस्स असोगस्स पुत्तो कुणालो उज्जेणीए । सा से कुमारभुत्तीए दिन्ना । सो खुड्डलओ । अन्नया तस्स रन्नो निवेइयं, जहा—कुमारो सायरेगट्ठवासो जाओ । तओ रन्ना सयमेव लेहो लिहिओ, जहा—अधीयतां कुमारः । कुमारस्स मायसवत्तीए रन्नो पासे ठियाए भणियं—आणेह, पासामि लेहं । रन्ना पणामिओ । ताहे तीए रन्नो अन्नचित्तत्तणओ सलागाग्रान्तेन निष्ठ्यूतेन तीमित्वा अकारस्योपरि अनुस्वारः कृतः । 'अन्धीयताम्' इति जायं । पडिअप्पिओ रन्नो लेहो । रन्ना वि पमत्तेण न चेव पुणो अणुवाइओ । मुद्दित्ता उज्जेणिं पेसिओ । वाइओ । वाइगा पुच्छिया—किं लिहियं ? ति । पुच्छिया न कहिंति । ताहे कुमारेण सयमेव वाइओ । चिंतियं च णेणं—अम्हं मोरियवंसाणं अप्पडिहया आणा, तो कहं अप्पणो [5] पिउणो आणं अइक्कमेमि ? । तत्तसिलागाए अच्छीणि अंजियाणि । ताहे रन्ना नायं । परितप्पिता उज्जेणी अन्न-

१ छे० विनाऽन्यत्र—तो उज्जयारेमि भा० कां० । तो अज्जयारेमि डे० मो० । "तो उज्जुवारेमि" चूर्णौ ॥ २ °मि । तओ विज्जा° भा० ॥ ३ को त्ति ता० ॥ ४ तु ता० ॥ ५ °प्पणा पि° कां० छे० डे० ॥

कुमारस्स दिन्ना । तस्स वि कुमारस्स अन्नो गामो दिन्नो । अन्नया तस्स कुणालस्स अंधस्स पुत्तो जाओ । सो य अंधकुणालो गंधव्वे अईव कुसलो । अन्नया अन्नायचज्जाए गायंतो हिंडइ । तत्थ रन्नो निवेईयं, जहा–एरिसो तारिसो गंधव्विओ अंधलओ । रन्ना भणियं–आणेह । आणीओ । जवणीअंतरिओ गायइ । ताहे अईव राया अक्खोओ अक्खित्तो । ताहे भणइ–किं देमि ? । इत्थ कुणालेण गीयं–"चंदगुत्तपपुत्तो य" (गाथा २९४) इत्यादि गाथा । ताहे रन्ना पुच्छियं–को एस तुमं ? । तेण कहियं–तुब्भं पुत्तो । जवणियं अवसारेउं कंठे घेत्तुं अंसूपाओ कओ । भणियं च णेण–किं कागिणीए वि नारिहसि जं कागिणिं जायसि ? । अमच्चेहिं भणियं–रायपुत्ताणं रज्जं कागिणी । रन्ना भणियं–किं काहिसि अंधगो रज्जेणं ? । कुणालो भणइ–मम पुत्तो अत्थि । कया जाओ ? । संपइ सूओ । आणीओ । संपइ त्ति से नामं कयं । रज्जं दिन्नं ॥

अक्षरगमनिका—'पाटले' पाटलिपुत्रके नगरे अशोको राजा । कुणालस्तस्य पुत्रः । उज्जयिन्यां राज्ञः स्वयमेव तद्योग्यलेखलिखनम्–अधीयतामिति । मात्राधिके सति न वाचकै-र्वाच्यते । ततः स्वयमेव वाचना । ततो 'मौर्याणामप्रतिहता आज्ञा' इति विचिन्त्य स्वयं तप्तशिलाकया नेत्रयोरञ्जनम् । ततो नृपे ज्ञानं । ततः परितप्य स राज्ञा ग्रामगतः कृतः । ततः सुतस्य जन्म । गन्धर्वेण समस्तस्यापि लोकस्य 'आवर्त्तना' आवर्जनं निवेदनम्–कोऽप्य-न्धोऽतीव गन्धर्वे कुशल इति । ततस्तस्याऽऽनयनम् । परितोषे याच्ञा गाथा–"चन्द्रगुप्त-प्रपौत्र" इत्यादि । अत्राप्युपनयः स एव ॥ २९२ ॥ २९३ ॥ २९४ ॥

अथवा भावाधिके इदं लौकिकमाख्यानम्—

भावाधिके वानरोदाहरणम्

कामियसरस्स तडे वंजुलरुक्खो महइमहालओ । तत्थ किर रुक्खे विलग्गिउं जो सरे पडइ सो जइ तिरिक्खजोणिओ तो मणूसो भवइ, अह मणूसो पडति तो देवो भवइ, अह बिइयं वारं पडइ तो प्रकृतिमेव गच्छइ । तत्थ वानरो सपत्तिओ पाणियं पाउं ओयरइ । अन्नया पाणीयपायणट्ठाए आगओ । सो संलावं प्रकृतिगमनविरहितं श्रुत्वा सपत्नीकश्चिन्त-यति–रुक्खं विलग्गिउं सरे पडामो जा माणुसजुयलं भवामो । पडियाणि । उरालं माणुस-जुयलं जायं । सो भणइ–पुणो पडामो जाव देवजुयलं होमो । इत्थी वारेइ–को जाणइ जइ न हुज्जा ? । पुरिसो भणइ–जइ न हुज्जामो किं माणुसत्तणं पि अम्हं नासिहिइ ? । वारिज्ज-माणो वि पडिओ वानरो जाओ । पच्छा रायपुरिसेहिं गहिया सा इत्थी रन्नो भज्जा जाया । इयरो वि मायारएहिं गहिओ खेडाओ सिक्खाविओ । अन्नया ते मायारगा रन्नो पुरओ पेच्छं दिंति । राया देवीए समं पिच्छइ । ताहे सो वानरो देविं निज्झायंतो अभिलसइ । ताहे ताए अणुकंपाए वानरो भणिओ—

जो जहा वट्टए कालो, तं तहा सेव वानरा ।
मा वंजुलपरिब्भट्ठो, वानरा पडणं सर ॥ २९५ ॥

यो यथा वर्त्तते कालः 'तं' कालं तथा सेवस्व वानर ! । वञ्जुलवृक्षादेकवारं परिभ्रष्टः—

१ °इओ ज° मो० छे० त० ॥

पतितः सन् मया तदा भणितः—'मा भूयो वञ्जुलवृक्षात् सरसि पतनं कुरु, प्रकृतिं यास्यसि' इति एतत् स्मर । एवं भावतोऽधिकेऽर्थस्य विसंवाद इत्यादिका विभाषा तथैव ॥ २९५ ॥

सम्प्रति 'अविच्चामेलियं अव्वाइद्धं' इत्येते द्वे पदे व्याख्यानयति—

**व्यत्याम्रेडितम् अव्याविद्धं च**

**विच्चामेलण अन्नुन्नसत्थपल्लवविमिस्स पयसो वा ।**
**तं चेव य हिट्ठुवरिं, वायद्धे आवली नायं ॥ २९६ ॥**

व्यत्याम्रेडितं नाम अन्यान्यशास्त्रपल्लवविमिश्रणम् । तत्र द्रव्यतो **व्यत्याम्रेडिते पायसमुदाहरणम्**—

जहा कोलिया वइयं गया । तत्थ तेहिं 'परमन्नं रंधेमो' [ त्ति ] दुद्धं आद्दहियं । इत्थ जं जं छुब्भइ तं तं पायसो भवइ त्ति तंदुला चवला मुग्गा तिला कुक्कुसा छूढा । तं सव्वं विणट्ठं अकिंचिकरं जायं ॥

एवमेव भावे सूत्रं व्यत्याम्रेडयति—"सव्वभूयप्पभूयस्स, सम्मं भूयाई पासउ ।" (दशवै० अध्य० ४ गा० ९) अत्रेदमपि घटत इति कृत्वा क्षिपति—

श्रूयतां धर्मसर्वस्वं, श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि, परेषां न समाचरेत् ॥ ( इतिहाससमुच्चये )

भावतो व्यत्याम्रेडितं सूत्रं कुर्वतोऽर्थस्य विसंवाद इत्यादि विभाषा प्रागिव यावद् दीक्षा निरर्थिका । तदेव च सूत्रमध उपरि व्यत्यासेन क्रियमाणं व्याविद्धम् । तच्च द्विधा—द्रव्यतो भावतश्च । तत्र **द्रव्यव्याविद्धे आवली 'ज्ञातम्' उदाहरणम्**—

एगा आभीरी नगरं गया । तीसे वयंसिया वाणिगिणी । सा हारं पोएइ । इयरी भणइ—आणेहिं, अहं हारं पोएमि । ताए पणामिओ । इयरीए उप्परिवाडीए पोइओ । वाणिगिणी वक्खित्ता आसि । पच्छा ताए दट्ठुं भणिया—हा पावे ! विणासिओ हारो, महद्दुष्कर्म कृतम् ॥

भावव्याविद्धमेवम्, यथा—

अहिंसा संजमो तवो, धम्मो मंगलमुक्कट्ठं ।
जस्स धम्मे सया मणो, देवा वि तं नमंसंति ॥ (दश० अ० १ गा० १)

एवं व्याविद्धे भावतोऽर्थस्य विसंवाद इत्यादि विभाषा पूर्ववद् यावद् दीक्षा निरर्थिका । तस्मादव्याविद्धमुच्चरितव्यम् ॥ २९६ ॥

अधुना स्खलित-मिलिता-ऽप्रतिपूर्णा-ऽघोषयुतानां व्याख्यानमाह—

**स्खलित-मिलितादिपदानां व्याख्या**

**खलिए पत्थरसीया, मिलिए मिस्साणि धन्नवाणया ।**
**मत्ताइ-बिंदु-वन्ने, घोसा इ उदत्तमाईया ॥ २९७ ॥**

स्खलितं द्विधा—द्रव्यतो भावतश्च । तत्र द्रव्ये 'प्रस्तरसीता' प्रस्तराकुलं क्षेत्रम्, तस्मिन् हि वाह्यमानानि हल-कुलिकादीनि उत्क्षिप्य अन्यत्र निपतन्ति । एवं भावस्खलितं यदन्तराऽन्तरा आलापकान् मुञ्चति, यथा—धम्मो, अहिंसा, देवा वि तं नमंसंति, (दश० अ० १ गा० १) पुप्फेसु भमरा जहा ( दश० अ० १ गा० ४ ) । पच्छित्तं तं चेव, दोसा य । मिलितमपि

१ °सा ओदत्त° ता० ॥

द्विधा–द्रव्यतो भावतश्च । तत्र द्रव्यतो मिलितं बहूनां व्रीहि-यवादीनां धान्यानामेकत्र मिश्रीकृतानां वापनता–वापनम् । भावतो मिलितं यद् अन्यस्यान्यस्योद्देशकस्याध्ययनस्य वा आलापकानेकत्र मीलयति सर्वं जिनवचनमिति कृत्वा । यथा—"सव्वे पाणा पियाउगा" (आचा० श्रु० १ अ० २ उ० ३) "सव्वजीवा वि इच्छंति, जीविउं न मरिजिउं" इत्थ न नज्जइ किं कालियं उक्कालियं छेयसुयं वा ? । अत्र प्रायश्चित्तं दोषाश्च प्राग्वत् । परिपूर्णं द्विधा–द्रव्यतो भावतश्च । तत्र द्रव्यतः परिपूर्णो घटः । भावे परिपूर्णं मात्रादिभिः–मात्राभिः आदिग्रहणात् पदैः बिन्दुभिः वर्णैः–अक्षरैश्चापरिपूर्णे तदेव प्रायश्चित्तं दोषाश्च । मात्राभिरपरिपूर्णं यथा—"धम्म मंगलमुक्कट्ठं" । पदैरपरिपूर्णं यथा—"धम्मो उक्किट्ठं" । बिन्दुभिरपरिपूर्णं यथा—"धम्मो मंगलमुक्किट्ठ" इति । वर्णैरपरिपूर्णं यथा—"धं मं ल उक्कट्ठं" इत्यादि । घोषा उदात्तादयः, तत्र उच्चैरुदात्तः, नीचैरनुदात्तः, समाहारः स्वरितः । उच्चैःशब्देन यथा—"उप्पन्ने इ वा" इत्यादि । नीचैःशब्देन यथा—"जे भिक्खू हत्थकम्मं करेइ" (निशीथ उ० १ सू० १) इत्यादि । घोषैरयुक्तं कुर्वतस्तदेव प्रायश्चित्तं त एव च दोषाः ॥ २९७ ॥

सम्प्रति व्यत्याम्रेडितादीनां पञ्चानां प्रकारान्तरेणार्थमभिधातुकाम आह—

व्यत्याम्रेडितादिपदानां व्याख्यान्तरम्

**मुत्तूण पढम-बीए, अक्खर-पय-पाय-बिंदु-मत्ताणं ।**
**सव्वेसि समोयारो, सट्ठाणे चेव चरिमस्स ॥ २९८ ॥**

प्रथमं–हीनाक्षरं द्वितीयम्–अधिकाक्षरम् एते द्वे पदे मुक्त्वा शेषाणां पञ्चानां घोषयुतवर्जानाम् अक्षर-पद-पाद-बिन्दु-मात्राणां समवतारः कर्त्तव्यः । यथा–व्यत्याम्रेडितं नामान्यान्यशास्त्राणामक्षरैः पदैः पादैर्बिन्दुभिर्मात्राभिर्घोषैर्वा । व्याविद्धं तस्यैव शास्त्रस्य अधस्तनान्युपरि उपरितनान्यधोऽक्षर-पदा[दी]नि यत् करोति । स्खलितं पञ्चभिरेव पदादिभिः । मिलितं यथा–सामायिकपदे दशवैकालिकोत्तराध्ययनप्रभृतीनामनेकानि पदानि मीलयति । अपरिपूर्णं पञ्चभिरेवाक्षरादिभिः स्वगतैः । "सट्ठाणे चेव चरिमस्स" [अ]घोषयुतं घोषैरेवापरिपूर्णं नाक्षरादिभिः ॥ २९८ ॥ साम्प्रतमेतेषु हीनाक्षरादिषु प्रायश्चित्तमाह—

सूत्रं हीनाक्षराद्युच्चरतां प्रायश्चित्तम्

**खलिय मिलिय वाइद्धं, हीणं अच्चक्खरं वयंतस्स ।**
**विच्चामेलिय अप्पडिपुन्ने घोसे य मासलहुं ॥ २९९ ॥**

स्खलितं मिलितं व्याविद्धं हीनाक्षरमत्यक्षरं व्यत्याम्रेडितमपरिपूर्णघोषं च वदतः प्रत्येकं प्रायश्चित्तं मासलघु । स्वामिन आज्ञाभङ्गे चतुर्गुरु, यथा स तथाऽन्येऽपि करिष्यन्तीति चतुर्गुरु । यथोक्तकारी न भवतीति मिथ्यात्वे चतुर्लघु । विराधना द्विविधा–आत्मविराधना संयमविराधना च । आत्मविराधना–देवतया छलनम् । संयमविराधना–कोऽपि साधुर्वारयेत् 'मा स्खलितादीनि कुरु' ततः कलहतोऽस्थिभङ्गाद्यात्मविराधनायां परिताप-महाग्लानाद्यारोपणा संयमविराधना । सूत्रस्यान्यथोच्चारणेऽर्थविसंवादः, अर्थविसंवादे चरणाभावः, चरणाभावे मोक्षाभाव इति दीक्षा निरर्थिका । लघुग्रहणाद् गुरुकमपि सूचितम्, ह्रस्वोक्त्या यथा दीर्घस्य सूचनम् । तत्र गुरुकमिति वा अनुद्धातीति वा कालकमिति वा गुरुकस्य नामानि । लघुकमिति वा उद्घातितमिति वा शुक्लमिति वा लघुकस्य नामानि ॥ २९९ ॥

१ °द्घातमि° डे० ॥

अत्र गुरु-लघुविशेषविस्तरपरिज्ञानार्थमाचार्यस्त्रिविधं प्रायश्चित्तं दर्शयति, तद्यथा—दानप्रायश्चित्तं तपःप्रायश्चित्तं कालप्रायश्चित्तं च । तत्र दानप्रायश्चित्तं गुरुकं लघुकं च । एवं तपः-कालप्रायश्चित्ते अपि गुरु-लघुके प्रत्येकं वक्तव्ये । तत्र दानप्रायश्चित्तं गुरुकमाह—

जं तु निरंतरदाणं, जस्स व तस्स व तवस्स तं गुरुगं ।
जं पुण संतरदाणं, गुरू वि सो खलु भवे लहुओ ॥ २०० ॥

यस्य वा तस्य वा तपसो गुरुकस्याष्टमादेरगुरुकस्य निर्वृतिकादे(निर्विकृतिकादे)र्यन्निरन्तरदानं तद् भवति दानप्रायश्चित्तं गुरु । यत् पुनः सान्तरमष्टमादेर्गुरुकस्य तपसो दानं तद् गुर्वपि खलु भवति लघु, यथा—आपत्तिश्चतुर्लघुकस्य षड्लघुकस्य वा तत्राष्टम-दशमानि सान्तराणि दीयन्ते । एष दानप्रायश्चित्ते गुरु-लघुकयोर्विशेषः ॥ २०० ॥ सम्प्रति तपः-कालयोराह—

काल-तवे आसज्ज व, गुरू वि होइ लहुओ लहू गुरुगो ।
कालो गिम्हो[1] उ गुरू, अट्ठाइ तवो लहू सेसो ॥ २०१ ॥

कालं तपश्चासाद्य गुर्वपि लघु भवति, लघ्वपि च गुरु । तत्र कालो ग्रीष्मो गुरुः, तपोऽष्टमादि, शेषः कालस्तपश्च लघु । इयमत्र भावना—लघ्वपि यद् अष्टमादिना तपसा उह्यते तत् तपोगुरु, यन्निर्विकृतिकादिना षष्ठपर्यन्तेनोह्यते तत् तपोलघु; तथा यद् ग्रीष्मे काले उह्यते तत् कालगुरु, वर्षारात्रे हेमन्ते वोह्यमानं काललघु ॥ २०१ ॥ तदेवं यतः स्खलिताद्युच्चारणे प्रायश्चित्तमाज्ञा-ऽनवस्था-मिथ्यात्व-विराधनाश्च दोषाः तस्मात् सूत्रं स्खलितादिदोषरहितमुच्चारणीयं पठनीयं च । एवं च पठितस्य सूत्रस्य व्याख्या कर्तव्या । तत्र व्याख्यालक्षणमाह[2]—

व्याख्यायाः षड् भेदाः

संहिया[3] य पयं चेव, पयत्थो पयविग्गहो ।
चालणा य पसिद्धी यँ[4], छव्विहं विद्धि लक्खणं ॥ २०२ ॥

संहिता १ पदं २ पदार्थः ३ पदविग्रहः ४ चालना ५ प्रसिद्धिश्च ६ । एवं 'षड्विधं' षट्प्रकारं व्याख्यालक्षणं 'विद्धि' जानीहि ॥ २०२ ॥ तत्र संहितेति कोऽर्थः ? इत्याह—

संहिता

सन्निकरिसो परो होइ संहिया संहिया व जं अत्था ।
लोगुत्तर लोगम्मि य, हवइ जहा धूमकेउ त्ति ॥ २०३ ॥

यो द्वयोर्बहूनां वा पदानां 'परः' अस्खलितादिगुणोपेतो विविक्ताक्षरो झटिति मेधाविनामर्थप्रदायी 'सन्निकर्षः' सम्पर्कः स संहिता । अथवा यद् अर्थाः संहिता एषा संहिता । सा द्विधा—लौकिकी लोकोत्तरा च । तत्र लौकिकी 'यथा धूमकेतुः' इति, यथा इति पदं धूम इति पदं केतुरिति पदम् ॥ २०३ ॥

पदं पदार्थः पदविग्रहश्च

तिपयं जह ओवम्मे, धूम अभिभवे केउ उस्सए अत्थो ।
को[5] सु त्ति अग्गि उत्ते, किंलक्खणो दहण-पयणाई ॥ २०४ ॥

---

१ गिम्हो उ ता० ॥ २ अत्र चूर्णिकृता "तेण दोसविउत्तं सुत्तं विधीये उच्चारेयव्वं" इत्यवतीर्य "सुत्तं पदं पदत्थो०" इति गाथा २०९ व्याख्याताऽस्ति । तदनन्तरं च "अण्णे भणंति" इत्यवतीर्य "संहिता य पदं०" इति गाथा २०२ व्याख्याताऽस्ति ॥ ३ संधिया ता० ॥ ४ य पंचहा वि° ता० ॥ ५ को को त्ति ता० ॥

'यथा धूमकेतुः' इति संहितासूत्रं द्विपदम्[1]। सम्प्रति पदार्थ उच्यते—यथेत्यौपम्ये, धूम इत्यभिधवे, "धूवि धूनने" इति वचनात्, केतुरित्युच्छ्रये। [illegible] धूमः केतुरस्येति धूमकेतुरिति पदविग्रहः। कोऽसौ? इति चेत्, अग्निः। एवमुक्ते पुनराह—स किंलक्षणः?। सूरिराह—'दहन-पचनादि' दहन-पचन-प्रकाशनसमर्थोऽर्चिष्मान् ॥ २०४ ॥

अत्र चालनां प्रत्यवस्थानं चाह—

जइ एव सुत्त-सोवीरगाई वि होंति अग्गिमक्खेवो।
न वि ते अग्गि पइन्ना, कसिणग्गिगुणन्निओ हेऊ ॥ २०५ ॥
दिट्ठंतो घडगारो, न वि जे उक्खेवणाइ तक्कारी।
जम्हा जहुत्तहेऊसमन्निओ निगमणं अग्गी ॥ २०६ ॥

चालना प्रत्यवस्थानं च

यदि नाम दहन-पचनादिस्तर्हि शुक्र-सौवीरकादयोऽपि दहन्ति, करीषादयोऽपि पचन्ति, खद्योत-मणिप्रभृतयोऽपि प्रकाशयन्ति ततस्तेऽप्यग्निर्भवितुमर्हन्ति, एषः 'आक्षेपः' चालना। अत्र प्रत्यवस्थानमाह—'नैव शुक्रादयोऽग्निर्भवन्ति' इति प्रतिज्ञा, 'कृत्स्नगुणसमन्वितत्वात्' इति हेतुः, दृष्टान्तो घटकारः, यथा हि घटकर्ता मृत्पिण्ड-दण्ड-चक्र-सूत्रोदक-प्रयत्नहेतुकस्य घटस्य कार्त्स्न्येनाभिनिर्वर्त्तकः, अभिनिर्वृत्तस्य चोत्क्षेपणोद्वहनसमर्थः, यथाऽन्ये पुरुषाः; न च ये घटस्योत्क्षेपणादयस्तत्कारी घटस्याभिनिर्वर्त्तकः। एवमत्रापि यो दहति पचति प्रकाशयति च यथास्वगतेन लक्षणेनासाधारणः स एव यथोक्तहेतुसमन्वितः परिपूर्णोऽग्निर्न शुक्रादय इति निगमनम्[3] ॥ २०५ ॥ २०६ ॥ सम्प्रति लोकोत्तरे संहितादीनि दर्शयति—

उत्तरिएँ जह दुमाई, तदत्थहेऊ अविग्गहो चेव।
को पुण दुमु त्ति वुत्तो, भण्णइ पत्ताइउववेओ ॥ २०७ ॥
तदभावे न दुमु त्ति य, तदभावे वि स दुमु त्ति य पइन्ना।
तग्गुणलद्धी हेऊ, दिट्ठंतो होइ रहकारो ॥ २०८ ॥

लोकोत्तरे संहितादीनां योजनम्

लोकोत्तरे "जहा दुमस्स पुप्फेसु, भमरो आवियइ रसं" (दश० अ० १ गा० २) इति संहिता। अत्र पदानि—यथा इति द्रुम[स्य] इति पुष्पेष्विति भ्रमर इति आपिबतीति रसमिति। अधुना पदार्थ उच्यते—'यथा' इत्यौपम्ये। द्रुं गतौ, द्रवति—गच्छति अव उपरि चेति द्रुमः[4], औणादिको मक्प्रत्ययः, तस्य द्रुमस्य। पुष्प विकसने, पुष्पन्ति—विकसन्तीति पुष्पाणि, अच्, तेषु। भ्रम अनवस्थाने, भ्राम्यति निरन्तरमिति भ्रमरः, औणादिको अरः

१ "एकपदत्वान्नास्ति विग्रहः" इति चूर्णौ ॥ २ °मिा अक्खेो° ता० ॥

३ "अत्र प्रसिद्धिं करोत्याचार्यः—यदभिहितमनेन 'यदि दहनादिलक्षणोऽग्निर्भवति तेन तर्हि शुक्रादयोऽप्यग्निर्भवन्ति' इत्यत्र ब्रूमः—'असदेतत्' इति नः प्रतिज्ञा, 'कृत्स्नाग्निगुणसमन्वितत्वात्' इति हेतुः, दृष्टान्तो घटकारः, यथा हि घटकर्ता मृत्पिण्ड-चक्र-सूत्रोदक-प्रयत्नहेतुकस्य घटस्य कार्त्स्न्येनाभिनिर्वर्तको भवति अभिनिर्वृत्तस्य चोत्क्षेपणोद्वहनसमर्थो यथा भवति तथाऽन्येऽपि पुरुषाः, न तूत्क्षेपणोद्वहनादिसामर्थ्यादेव तेषां घटकर्तृत्वं भवति, किमेवं न गृह्यते? घटकर्तुरेवैकस्य घटकारत्वं विद्यते नेतरेषाम्? तस्मात् कृत्स्नगुणान्वितत्वात् पर्यायोऽग्नेरेवैकस्याग्नित्वं विद्यते न शुक्रादीनामिति निगमनम्।" इति चूर्णिः ॥

४ "दु द्रु गतौ, द्रुमः, दोर्भि वा सातो द्रुमः।" इति चूर्णिः ॥

प्रत्ययः । पा पाने, आङ् मर्यादायामभिविधौ वा, तस्य तिपि आपिबतीति रूपम् । रस आस्वादने, रस्यते—आस्वाद्यत इति रसः, कर्मण्यौणादिकः अकारप्रत्ययः, तम् । अत्र व्यस्तपदत्वाद्विग्रहाभावः, तथा चाह—"तदत्थहेऊ अविग्गहो चेव" तेषां—पदानामर्थस्य हेतुः 'अविग्रह एव' न विग्रहद्वारेणात्र पदार्थ इत्यर्थः । अत्र चालना—नोदक आह—'कः' कीदृग्लक्षणो द्रुम उक्तः ? । सूरिराह—भण्यते, 'पत्राद्युपेतः' पत्र-पुष्प-फलादिसमन्वितः । उक्तञ्च—

पत्र-पुष्प-फलोपेतो, मूल-स्कन्धसमन्वितः ।
एष वृक्ष इति ज्ञेयो, विपरीतं[1]मतोऽन्यथा ॥ ॥ ३०७ ॥

यदि पत्राद्युपेतो द्रुमस्तर्हि यदा परिशटितपाण्डुपत्रादिर्द्रुमो भवति तदा तस्याद्रुमत्वं प्राप्नोति, एषा चालना । अत्र प्रत्यवस्थानम्—'तदभावेऽपि स द्रुमः' इति प्रतिज्ञा, 'तद्गुणलब्धित्वात्' इति हेतुः, दृष्टान्तो रथकारः; यथा हि रथकारस्य रथकरणे प्रयत्नमकुर्वाणस्यापि रथकर्तृत्वं तद्गुणलब्धित्वात्, एवं परिशटितपाण्डुपत्रस्यापि द्रुमस्य तद्गुणलब्धेरनिवृत्तत्वादव्याहतं द्रुमत्वमिति ॥ ३०८ ॥ सम्प्रति मतान्तरेणा[2]न्यथा व्याख्यालक्षणमाह—

मतान्तरेण व्याख्यालक्षणम्

सुत्तं पयं पयत्थो, पयनिक्खेवो य निण्णयपसिद्धी ।
पंच विगप्पा एए, दो सुत्ते तिन्नि अत्थम्मि ॥ ३०९ ॥

प्रथमतोऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयम् । ततः 'पदं' पदच्छेदो विधेयः । तदनन्तरं पदार्थः कथनीयः । ततः 'पदनिक्षेपः' पदार्थनोदना । तदनन्तरं 'निर्णयप्रसिद्धिः' निर्णयविधानम् । पदविग्रहः पदार्थेऽन्तर्भूतः । एवमेते पञ्च 'विकल्पाः' प्रकारा व्याख्यायां भवन्ति । अत्र सूत्रं पदमिति द्वौ विकल्पौ सूत्रे प्रविष्टौ । 'त्रयः' पदार्थ-तदाक्षेप-निर्णयप्रसिद्ध्यात्मका अर्थ इति ॥ ३०९ ॥ यदुक्तमधस्तात् "सूत्रनिरुक्तमुपरि वक्ष्यामि" (गा० १८८) इति तद् वक्तुकाम आह—

सूत्रनिरुक्तम्

सुत्तं तु[3] सुत्तमेव उ, अहवा सुत्तं तु तं भवे लेसो ।
अत्थस्स सूयणा[4] वा, सुवुत्तमिइं[5] वा भवे सुत्तं ॥ ३१० ॥

अर्थेन अबोधितं सुप्तमिव सुप्तं प्राकृतशैल्या सुत्तं । अथवा सूत्रं नाम तद् भवति 'श्लेषः' तन्तुरूपमित्यर्थः, तथा (यथा) तन्तुना द्वे त्रीणि बहूनि वा वस्तूनि एकत्र संहन्यन्ते एवमेकेनापि सूत्रेण बहवोऽर्थाः सङ्घात्यन्त इति सूत्रमिव सूत्रम् । अर्थस्य सूचनाद्वा सूत्रम् । सुष्ठु उक्तमिति वा सूक्तम्, प्राकृतशैल्या तु सुत्तमिति ॥ ३१० ॥

सम्प्रति सूत्रशब्दस्यैव निरुक्तान्याह—

नेरुत्तियाइँ[6] तस्स उ, सूयइ सिव्वइ तहेव सुवइ त्ति ।
अणुसरति त्ति य भेया, तस्स उ नामा इमा हुंति ॥ ३११ ॥

---

१ °तस्ततो° मो० ले० ॥ २ चूर्णिकारेण "सुत्तं पयं०" इति गाथयाऽनन्तरमेवोच्यमानं व्याख्यालक्षणं मौलिकत्वेनाङ्गीकृतम्, "संहिया य०" (गा० ३०२) इत्यादिनोक्तं पुनर्व्याख्यालक्षणं मतान्तरतयोपदर्शितम् । दृश्यतां पत्र ९२ टि० २ ॥ ३ त ता० ॥ ४ सूतणा ता० ॥ ५ °मिति व भ° ता० ॥ ६ एगट्ठियाइं तस्स ता० । गाथेयं चूर्णिकृता "पासुत्त०" ३१२ गाथाऽनन्तरं विवृता वर्तते ॥

'तस्य' सूत्रस्य निरुक्तान्यमूनि—सूचयतीति सूत्रम्, अथवा सीव्यतीति सूत्रम्, यदि वा सुवतीति सूत्रम्, अथवाऽनुसरतीति सूत्रम् इति निरुक्तस्य भेदाः । नामानि पुनस्तस्य 'इमानि' सुप्तादीनि वक्ष्यमाणार्थानि भवन्ति ॥ ३११ ॥ तान्येवार्थतो व्याख्यानयति—

**पासुत्तसमं सुत्तं, अत्थेणाबोहियं न तं जाणे ।**
**लेससरिसेण तेणं, अत्था संघाइया बहवे ॥ ३१२ ॥**

यथा द्वासप्ततिकलापण्डितो मनुष्यः प्रसुप्तः सन् न किञ्चित्तासां कलानां जानाति, एवमर्थेनाबोधितं न किञ्चिदर्थविशेषं जानाति । यदा त्वर्थेन प्रबोधितं भवति तदा सर्वेषां तदन्तर्गतानां भावानां ज्ञायकमुपजायते, यथा स एव पुरुषः प्रबोधितस्तासां कलानाम्, अतः प्रसुप्तसमं सूत्रम् । अथवा श्लेषसदृशं तत् सूत्रं, तथाहि—तेन 'श्लेषसदृशेन' तन्तुसदृक्षेण बहवोऽर्थाः सङ्घातितास्ततः श्लेषसदृशम् ॥ ३१२ ॥

सम्प्रति 'अर्थस्य सूचनात्' (गा० ३१०) इति व्याख्यानयति—

**सूइज्जइ सुत्तेणं, सूई नट्ठा वि तह सुएणऽत्थो ।**
**सिव्वइ अत्थपयाणि व, जह सुत्तं कंचुगाईणि ॥ ३१३ ॥**

यथा सूची नष्टा 'सूत्रेण सूच्यते' सूत्रेणैवोपलक्ष्यते तथा श्रुतेनार्थः सूच्यत इति अर्थस्य सूचनात् सूत्रम् । एतेन 'सूचयति' (गा० ३११) इति निरुक्तं व्याख्यातम् । अधुना 'सीव्यति' (गा० ३११) इति व्याख्यानयति—यथा सूत्रं कञ्चुकादीनि सीव्यति एवमर्थपदान्यनेकानि सीव्यतीत्यर्थस्य सीवनात् सूत्रम् ॥ ३१३ ॥

"सुवति त्ति" (गा० ३११) अस्य व्याख्यानमाह—

**सूरमणी जलकंतो, व अत्थमेवं तु पसवई सुत्तं ।**
**वणिय[1]सुयंध कयवरे, तदणुसरंतो रयं एवं ॥ ३१४ ॥**

यथा सूर्यकान्तोऽग्निं जलकान्तो जले दीप्तिं श्रवति एवं सूत्रमर्थं प्रसवतीति सूत्रम् । अनुसरणं द्विधा—द्रव्यतो भावतश्च । तत्र द्रव्यतो **वणिक्सुतोऽन्धः कचवरे दृष्टान्तः**—

एकस्य वणिजः पुत्रोऽन्धः । वणिजा चिन्तितम्—मा एष वराकोऽनिर्विष्टं भक्तं भुङ्क्ताम्, 'परिभवस्थानमन्यथा गाढतरं भविष्यति' इति द्वौ स्तम्भौ निहत्य तत्र रज्जुर्बद्धा । ततः सोऽन्धपुत्रो रज्ज्वनुसारेण कचवरं बहिस्त्याज्यते ॥

एष दृष्टान्तोऽयमर्थोपनयः—वणिक्स्थानीय आचार्यः, अन्धस्थानीयाः साधवः, रज्जुस्थानीयं सूत्रम्, कचवरस्थानीयमष्टप्रकारं कर्म । तथा चाह—'एवं' वणिक्सुतान्धदृष्टान्तप्रकारेण 'तत्' सूत्रमनुसरन् 'रजः' अष्टप्रकारं कर्म कचवरस्थानीयमपनयति, ततः सरणात् सूत्रम् । सुष्ठूक्तं सूक्तमिति नाम तु सुप्रतीतमिति न व्याख्यातम् ॥ ३१४ ॥

अथ तत् सूत्रं कतिविधम् ? इत्यत आह—

सूत्रस्य भेदाः

**सन्ना य कारगे पकरणे य सुत्तं तु तं भवे तिविहं ।**
**उस्सग्गे अववाए, अप्पे सेए य बलवंते ॥ ३१५ ॥**

---

१ °णेसुय अंध ता० ॥

सूत्रं त्रिविधम्, तद्यथा—सञ्ज्ञासूत्रं कारकसूत्रं प्रकरणसूत्रं च । अथवा द्विविधं सूत्रम्—“उस्सग्गे”त्ति औत्सर्गिकं “अववादि”त्ति आपवादिकम् । तत्र किं उत्सर्गो श्रेयान् ? उत अपवादः ? । तथा उत्सर्गोऽपवादो वा स्वस्थाने श्रेयान् बलवांश्च, अपरस्थानेऽबलवांश्चाश्रेयाँश्च । एष द्वारगाथासमासार्थः ॥ ३१५ ॥

साम्प्रतमेनामेव विवरीषुः प्रथमतः संज्ञासूत्रमाह—

संज्ञा-सूत्रम्

**उवयार अनिट्ठुरया, कज्जित्थीदाणमाहु नित्थक्का ।**
**जे छेएँ आमगंधादि, आरं सव्वा सुयं तेणं ॥ ३१६ ॥**

यत् सामयिक्या संज्ञया सूत्रं भण्यते तत् संज्ञासूत्रम् । यथा—“जे छेए से सागारियं[1] परियाहरे ।” तथा—‘आमगंधा’ इति “सव्वामगंधं परिन्नाय निरामगंधो परिवए” (आचारांग श्रु० १ अ० २ उ० ५) तथा—‘आरं’ति “आरं दुगुणेणं पारं एगगुणेणं” इति । यच्छेकः सः ‘सागारिकं’ मैथुनं ‘परियाहरे’ परिवर्जयति । तथा आमम्—अविशोधिकोटिः, गन्धः—विशोधिकोटिः, परिज्ञा द्विविधा—ज्ञपरिज्ञा प्रत्याख्यानपरिज्ञा च, तत्र ज्ञपरिज्ञया सर्वमामगन्धं परिज्ञाय प्रत्याख्यानपरिज्ञया च प्रत्याख्याय निरामगन्धः सन् परि—समन्तात् व्रजेत्—अप्रतिबद्धो विहरेदित्यर्थः । आरः—संसारस्तं ‘द्विगुणेन’ रागेण द्वेषेण च परिवर्जयति, ‘पारं’ मोक्षस्तमेकेन गुणेन—राग-द्वेषपरिहारलक्षणेन साधयति । अथ कः संज्ञासूत्रेण गुणः ? इत्यत आह—“उवयारे”त्यादि पूर्वार्द्धम् । संज्ञावचनं हि कचिज्जुगुप्सितेऽर्थे प्रयुज्यमानं तद्विषयमुपचारवचनं भवति । उपचारवचनेन च भण्यमाने तस्मिन् जुगुप्सितेऽर्थे न निष्ठुरतेति अनिष्ठुरता । तथाकार्ये समापतिते स्त्रियाः—साध्व्याः सूत्रदानमाहुः पूर्वसूरयः, ततस्तस्याः साधुसमीपे पठन्त्याः सुखेनालापको दीयते, अन्यथा व्यक्तमभिधीयमाने कथा भिन्ना भवति, ततः सा ‘नित्थक्का’ निर्लज्जा जायते । यादृशे च कार्ये साध्वी साधुसमीपे पठति तदुपरिष्टाद्वक्ष्यते । तेन संज्ञासूत्रमिष्यते ॥ ३१६ ॥

कारक सूत्रम्

कारगसूत्रं नाम यथा—आहाकम्मन्नं भुंजमाणे समणे निग्गंथे कइ कम्मपगडीओ बंधति ? गोयमा ! आउवज्जाओ सत्त कम्मपगडीओ । से केणट्ठेणं भंते ! एवं वुच्चइ ? (श० १ उ० ९) इत्यादि प्रश्नोत्तरालापकः । ननु सर्वज्ञप्रामाण्यादेवैतच्छ्रद्धीयते—यथाऽऽधाकर्म भुञ्जान आयुर्वर्जानां सप्तानां कर्मप्रकृतीनां बन्धकः, ततः कस्मादुच्यते “केनार्थेन भदन्त ! एवमुच्यते” इत्यादि ? तत आह—

**सव्वन्नुपमाणाओ, जइ वि य उस्सग्गओ सुयपसिद्धी[2] ।**
**वित्थरओऽपायाण य, दरिसणमिइ कारगं तम्हा ॥ ३१७ ॥**

यद्यपि सर्वज्ञप्रामाण्यात् ‘उत्सर्गतः’ एकान्तेन श्रुतस्य सर्वस्यापि प्रसिद्धिः तथापि विस्तरतोऽपायानां दर्शनं स्यात् ‘इति’ तस्मादधिकृतार्थप्रसिद्धिकारकं “से केणट्ठेण”मित्यादि सूत्रमुपन्यस्यते ॥ ३१७ ॥ इदानीं प्रकरणसूत्रमाह—

---

१ “जे छेए से सागारियं न सेवए” इति सूत्रमाचाराङ्गे श्रु० १ अ० ५ उ० १ ॥ २ °सुयपामण्णा अत्थि चि ता० ॥

**पगरणओ पुण सुत्तं, जत्थ उ अक्खेव-निन्नयपसिद्धी ।**
**नमि-गोयमकेसिज्जा, अद्दग-नालंदइज्जा य ॥ ३१८ ॥**

प्रकरण-सूत्रम्

प्रकरणतः सूत्रं नाम यत्र स्वसमय एवाक्षेप-निर्न्न(र्ण)यप्रसिद्धिरुपवर्ण्यते, यथा—**नेमिप्रव्रज्या गौतमकेशीयं आर्द्रकीयं नालन्दीय**मिति ॥ ३१८ ॥

उत्सर्ग-सूत्रम्

तदेवमुक्तं सञ्ज्ञादिभेदतस्त्रिप्रकारं सूत्रम् । अधुनोत्सर्गा-ऽपवादभेदतो द्विविधमुच्यते । तत्रोत्सर्गसूत्रम्—नो कप्पइ निग्गंथाण वा निग्गंथीण वा आमे तालपलंबे अभिन्ने पडिगाहित्तए (उ० १ सू० १) । अववाइयं जहा—कप्पइ निग्गंथाणं पक्के तालपलंबे भिन्नेऽभिन्ने वा पडिगाहित्तए (उ० १ सू० ३) । अथवा त्रिविधं सूत्रम्—उत्सर्गसूत्रमपवादसूत्रमुत्सर्गापवादसूत्रं च । तत्रौत्सर्गिकमापवादिकं चोक्तम् । उत्सर्गापवादसूत्रं पुनरिदम्—नो कप्पइ निग्गंथाण वा निग्गंथीण वा अन्नमन्नस्स मोयं आदित्तए वा आयमित्तए वा अन्नत्थागाढेहिं रोगायंकेहिं (उ० ५ सू० ४७-४८) । अथवा चतुर्विधं सूत्रम्—औत्सर्गिकमापवादिकमुत्सर्गापवादमपवादौत्सर्गिकम् । तत्राऽऽद्यानि त्रीण्युक्तानि चतुर्थमपवादौत्सर्गिकमिदम्, यथा—[3]मंसं च दलाहि मा अट्ठियाणि ॥ आह उत्सर्ग इत्यपवाद इति वा कोऽर्थः ? उच्यते—

अपवाद-सूत्रम्

उत्सर्गा-पवाद-सूत्रम्

अपवादो-त्सर्गसूत्रम्

उत्सर्गाऽ-पवादयो-रर्थः

**उज्जयसग्गुस्सग्गो, अववाओ तस्स चेव पडिवक्खो ।**
**उस्सग्गा विनिवतियं, धरेइ सालंबमववाओ ॥ ३१९ ॥**

उद्यतः सर्गः—विहार उत्सर्गः । 'तस्य च' उत्सर्गस्य प्रतिपक्षोऽपवादः । कथम् ? इति चेद् अत आह—उत्सर्गाद् अध्वा-ऽवमौदर्यादिषु 'विनिपतितं' प्रच्युतं ज्ञानादिसालम्बमपवादो धारयति ॥ ३१९ ॥ ननु स उत्सर्गादपवादं गतः सन् कथं न भग्नव्रतो भवति ? उच्यते—

**धावंतो उव्वाओ, मग्गन्नू किं न गच्छइ कमेणं ।**
**किं वा मउई किरिया, न कीरये असहुओ तिक्खं ॥ ३२० ॥**

सर्वोऽप्यस्माकं प्रयासो मोक्षसाधननिमित्तम्, स च मोक्षं तथा साधयति नेतरथा । दृष्टान्तोऽयम्—यथा कोऽपि पाटलिपुत्रं गच्छन् धावन् 'उद्वातः' श्रान्तो भवति तदा किं न 'क्रमेण' स्वभावगत्या मार्गज्ञः सन् गच्छति ? गच्छत्येवेति भावः, केवलं चिरेण तत् पाटलिपुत्रमवाप्नोति, यदि पुनः श्रान्तोऽपि धावति तदा अपान्तराल एव म्रियते; एवमत्राप्यध्वादौ तादृशे कार्येऽपवादमप्रतिपद्यमानो विनश्यति । किं वा रोगिणस्तीक्ष्णां क्रियामसहमानस्य मृद्वी क्रिया न क्रियते ? क्रियत एवेत्यर्थः । यथैतद् एवमत्राप्युत्सर्गात् परिभ्रष्टस्यापवादगमनम् ॥ ३२० ॥

ननु किमुत्सर्गादपवादप्रसिद्धिः ? उतापवादादुत्सर्गस्य ? तत आह—

**उन्नयमविक्ख निन्नस्स पसिद्धी उन्नयस्स निन्नाओ ।**
**इय अन्नुन्नपसिद्धा, उस्सग्गऽववायमो तुल्ला ॥ ३२१ ॥**

१ नमिप्रव्रज्या गौतमकेशीयं—केशिगौतमीयमिति द्वे अध्ययने **उत्तराध्ययने** क्रमशः नवम-त्रयोविंशतितमे ॥ २ आर्द्रकीयं नालन्दीयमिति द्वे अध्ययने **सूत्रकृदङ्गे** द्वितीयश्रुतस्कन्धे क्रमशः षष्ठ-सप्तमे ॥ ३ "अभिकंखसि मे दाउं जावइयं तावइयं पुग्गलं दलयाहि, मा य अट्ठियाणि" इति **आचाराङ्गे** श्रु० २ चू० १ अ० १ उ० १० ॥ ४ °यमग्गु° ता० ॥

यथोन्नतमपेक्ष्य निम्नस्य प्रसिद्धिः निम्नाच्चोन्नतस्य प्रसिद्धिः 'इति' एवम् 'अन्योऽन्यप्रसिद्धौ' उत्सर्गादपवादोऽपवादादुत्सर्गः प्रसिद्ध इति द्वावप्युत्सर्गा-ऽपवादौ तुल्यौ ॥ ३२१ ॥

तदेवमुत्सर्गापवादद्वारमुक्तम् । इदानीमल्पद्वारमुच्यते । शिष्यः पृच्छति–भगवन् ! किमुत्सर्गा अल्पे ? उतापवादाः ? उच्यते–तुल्याः । यत आह—

**जावइया उस्सग्गा, तावइया चेव हुंति अववाया ।**
**जावइया अववाया, उस्सग्गा त्तिया चेव ॥ ३२२ ॥**

यावन्त उत्सर्गास्तावन्तोऽपवादाः, यावन्तोऽपवादास्तावन्त उत्सर्गाः । कथम् ? इति चेद् उच्यते–सर्वस्यापि प्रतिषेधस्यानुज्ञाभावाद् द्वयेऽपि तुल्याः ॥ ३२२ ॥

सम्प्रति "सेय-बलवंते" इति द्वारद्वयं व्याचिख्यासुराह—

**सट्ठाणे सट्ठाणे, सेया बलिणो य हुंति खलु एए ।**
**सट्ठाण-परट्ठाणा, य हुंति वत्थूतो निप्फन्ना ॥ ३२३ ॥**

शिष्यः पृच्छति–किमुत्सर्गः श्रेयान् बलवाँश्च ? उतापवादः ? । सूरिराह–'एते खलु' उत्सर्गा अपवादाश्च स्वस्थाने स्वस्थाने श्रेयांसो बलिनश्च भवन्ति, परस्थाने परस्थानेऽश्रेयांसो दुर्बलाश्च । अथ किं स्वस्थानम् ? किं वा परस्थानम् ? अत आह–स्वस्थान-परस्थाने वस्तुतो निष्पन्ने ॥ ३२३ ॥

अथ वस्त्वेव न जानामि, किं तद् वस्तु ? इति उच्यते–पुरुषो वस्तु । तथा चाह—

**संथरओ सट्ठाणं, उस्सग्गो असहुणो परट्ठाणं ।**
**इय सट्ठाण परं वा, न होइ वत्थू विणा किंचि ॥ ३२४ ॥**

'संस्तरतः' निस्तरत उत्सर्गः स्वस्थानम् अपवादः परस्थानम्, 'असहस्य' असमर्थस्य–यः संस्तरीतुं न शक्नोति तस्यापवादः स्वस्थानमुत्सर्गः परस्थानमिति । एवममुना प्रकारेण पुरुषलक्षणं वस्तु विना न किञ्चित् स्वस्थानं परस्थानं वा, किन्तु पुरुषो वस्तु संस्तरति न वेति अतः पुरुषात् स्वस्थानं परस्थानं वा निष्पद्यते । तत उक्तं प्राक् "स्वस्थान-परस्थाने वस्तुतो भवतो निष्पन्ने" ( गाथा ३२३ ) ॥ ३२४ ॥ गतं सूत्रद्वारम् । अधुना पदद्वारमाह—

**नाम निवाउवसग्गं, अक्खाइय मिस्सयं च नायव्वं ।**
पदम् **पंचविहं होइ पयं, लक्खणकारेहिँ निद्दिट्ठं ॥ ३२५ ॥**

'पञ्चविधं' पञ्चप्रकारं पदं 'लक्षणकारैः' पदलक्षणविद्भिः 'निर्दिष्टम्' आख्यातम् । तद्यथा–अश्व इति नामिकम्, खलु इति नैपातिकम्, परि इत्यौपसर्गिकम्, पचति इत्याख्यातिकम्, संयत इति मिश्रम् ॥ ३२५ ॥ उक्तं पदम् । अधुना पदार्थद्वारमाह—

**होइ पयत्थो चउहा, सामासिय तद्धिओ य धाउकओ ।**
पदार्थः **नेरुत्तिओ चउत्थो, तिण्ह पयाणं पुरिल्लाणं ॥ ३२६ ॥**

'त्रयाणां पूर्वाणां पदानां' नाम-निपातौपसर्गिकाणां चतुर्विधः पदार्थो भवति । तद्यथा–सामासिकः तद्धितो धातुकृतो नैरुक्तश्च चतुर्थः । तत्र सामासिकः सप्तधा—

**दंदे य बहुव्वीही,[1] कम्मधारय दिगुयए चेव।**
**तप्पुरिस अव्वईभावे, एगसेसे य सत्तमे ॥**

सामासिकः पदार्थः

तत्र द्वन्द्वो यथा—दन्ताश्च ओष्ठौ च दन्तोष्ठौ। बहुव्रीहिर्यथा—फुल्ला इमम्मि गिरिम्मि कुडय-कयम्बा सो इमो गिरी फुल्लकुडय-कयंबो। कर्म्मधारयः—श्वेतः पटः श्वेतपटः। द्विगुः—त्रीणि मधुराणि त्रिमधुरम्। तत्पुरुषो—वने हस्ती वनहस्ती। अव्ययीभावः—गङ्गायाः समीपं उपगङ्गम्। एकशेषो यथा—पुरुषश्च पुरुषश्च पुरुषश्च पुरुषाः, एवं वृक्षा इत्यादि ॥

उक्तः सामासिकः। सम्प्रति तद्धित उच्यते—सोऽष्टप्रकारः। उक्तञ्च—

**कम्मे सिप्पे सिलोगे य, संजोग-समीवओ य संजूहे।**
**ईसरियाऽवच्चेण य, तद्धियअत्थो उ अट्ठविहो ॥**

ताद्धितिकः पदार्थः

तत्र कर्मतो यथा—तृणहारकः। शिल्पतो यथा—तन्तुवायः। 'श्लोकतः' श्लाघातो यथा—श्रमणः संयत इत्यादि। संयोगतो यथा—राज्ञः श्वसुरः। समीपे यथा—गिरिसमीपे नगरम्। संव्यूहतो यथा—मलयवतीकार इत्यादि। ऐश्वर्यतो यथा—राजा युवराज इत्यादि। अपत्यतः—तीर्थकरमाता चक्रवर्त्तिमाता इत्यादि ॥

उक्तस्तद्धितः। सम्प्रति धातुकृत उच्यते—भू सत्तायाम् परस्मैभाषा इत्यादि। नैरुक्तः—मह्यां शेते महिष इत्यादि ॥ ३२६ ॥ आद्यानां त्रयाणां पदानामेष पदार्थः। सम्प्रत्याख्यातिकपदस्य मिश्रपदस्य च पदार्थमाह—

धातुकृतः नैरुक्तश्च पदार्थः

**कारगकओ चउत्थे, मिस्सपदे मिस्सओ चउत्थो उ।**
**सामासिओ सत्तविहो, हवइ पयत्थो उ नायव्वो ॥ ३२७ ॥**

आख्यातिकः मिश्रश्च पदार्थः

'चतुर्थे' आख्यातिके पदे पदार्थः 'कारककृतः' क्रियाकृतः। मिश्रपदे मिश्रपदार्थः। तत्र यः सामासिकः पदार्थः स सप्तविधो ज्ञातव्यः, स च प्रागेवोपदर्शितः ॥ ३२७ ॥

उक्तः पदार्थः। इदानीमाक्षेपं प्रसिद्धिं चाह—

**अक्खेवो सुत्तदोसा, पुच्छा वा तत्तो निण्णयपसिद्धी।**
**आयपया दो सुत्ते, उवरिल्ला तिन्नि अत्थम्मि ॥ ३२८ ॥**

आक्षेपः निर्णयप्रसिद्धिश्च

आक्षेपो नाम यत् सूत्रदोषा उच्यन्ते पृच्छा वा क्रियते। 'ततः' तदनन्तरं 'निर्णयप्रसिद्धिः' प्रत्यवस्थानम्। एतेषु च सूत्र-पदादिषु पञ्चसु मध्ये आद्ये द्वे पदे सूत्रेऽन्तर्भवतः, 'उपरितनानि त्रीणि' पदार्थप्रभृतीनि पदानि अर्थे भवन्ति ॥ ३२८ ॥

अथ पदस्य किं परिमाणम्? अत आह—

**अत्थवसा हवइ पयं, अत्थो इच्छियवसेण विन्नेओ।**
**इच्छा य पकरणवसा, पगरणओ निच्छओ सत्थे ॥ ३२९ ॥**

यत्रार्थोपलब्धिस्तत् पदम्, अतोऽर्थवशाद्भवति पदम्। अर्थस्य किं परिमाणम्? अत आह—अर्थ ईप्सितवशेन विज्ञेयः, इच्छावशेनेत्यर्थः। इच्छायाः किं प्रमाणम्? अत आह—इच्छा च 'प्रकरणवशात्' प्रकरणानुरोधत इच्छायाः परिमाणम्। प्रकरणस्य च निश्चयः

---

१ °ही, बोद्धव्वे कम्मधारय दिगू य। तप्पुरिसऽव्वइभावे इतिरूपा गाथा चूर्णौ ॥

'शास्त्रे' शास्त्रानुसारतः ॥ ३२९ ॥ गतं लक्षणद्वारम् । एवंगुणयुक्तस्य सूत्रस्य कोऽर्हः ? इत्यनेन सम्बन्धेन तदर्हद्वारमापतितम् । तत्र सोऽर्हः उण्डिकादिदृष्टान्तस्योपनयभूतस्तत आह—

**तदर्हद्वारम्**

**उंडिय भूमी पेढिय, पुरिसग्गहणं तु पढमओ काउं ।**
**एवं परिक्खियम्मी, दायव्वं वा न वा पुरिसे ॥ ३३० ॥**

नवे नगरे निवेश्यमाने प्रथमतः 'उण्डिका' या यस्य योग्या भूमिस्तस्य तत्प्रदानार्थं मुद्रा पात्यते, ततो भूमिशोधनम्, तदनन्तरं पीठिका । एवमत्रापि प्रथमतः पुरुषग्रहणं कृत्वा तदनन्तरं परीक्षा कर्त्तव्या—किमयमपरिणामकः ? अतिपरिणामकः ? परिणामको वा ? इति । एवं पुरुषे परीक्षिते दातव्यं न वा ? अपरिणामिकेऽतिपरिणामिके वा न दातव्यं परिणामिके दातव्यमिति गाथासङ्क्षेपार्थः ॥ ३३० ॥ साम्प्रतमेनामेव विवरीषुराह—

**अभिनवनगरनिवेसे, समभूमिविरेयणऽक्खरविहन्नू ।**
**पाडेइ उंडियाओ, जा जस्स सठाणसोहणया ॥ ३३१ ॥**
**खणणं कोट्टण ठवणं, पेढं पासाय रयण सुहवासो ।**
**इय संजम नगरुंडिय, लिंगं मिच्छत्तसोहणयं ॥ ३३२ ॥**
**वय इट्टगठवणनिभा, पेढं पुण होइ जाव सूयगडं ।**
**पासाओ जहिँ पगयं, रयणनिभा हुंति अत्थपया ॥ ३३३ ॥**

अभिनवे नगरे निवेश्यमाने प्रथमतो भूमिः परीक्ष्यते । परीक्ष्य च तस्याः समभूमिविरचनं विधीयते । तदनन्तरमक्षरविधिज्ञो या यस्य योग्या भूमिस्तस्य तस्याः प्रदानार्थं 'उण्डिकाः' अक्षरसहिता मुद्रिकाः पातयति । ( ग्रन्थाग्रं २५०० ) ततः स्वस्थानस्य शोधनता—शोधनम् ॥ ३३१ ॥

ततः स्वस्याः स्वस्या भूमेः खननम् । तदनन्तरं दुघणैरिष्टकाशकलानि प्रक्षिप्य तेषां कुट्टनम् । ततस्तस्योपरि इष्टकानां स्थापनम्, तच्च तावद् यावत् पीठम् । ततस्तस्य पीठकस्योपरि प्रासादकरणम् । तदनन्तरं तेषां प्रासादानां रत्नैरापूरणम् । ततः सुखेन वासः—परिवसनम् । एष दृष्टान्तः, अयमर्थोपनयः—भूमिग्रहणस्थानीयं पुरुषग्रहणम्, शुद्धं पुरुषं परीक्ष्य तस्य प्रव्रज्यादानमित्यर्थः । ततः 'इति' एवमुक्तप्रकारेण नगरस्थानीये संयमे स्थाप्यते । तत उण्डिकास्थानीयं रजोहरणादि लिङ्गं दीयते । तदनन्तरं मिथ्यात्वस्याज्ञानस्य च कचवरस्थानीयस्य शोधनम् ॥ ३३२ ॥

ततः शोधयित्वा मिथ्यात्वं समूलमुत्खत्य स्थिरीकरणनिमित्तं सम्यक्त्वद्रुघणैर्यच्छेषमवतिष्ठते मिथ्यात्वपुद्गलात्मकं तत् कुट्टयित्वा भस्मच्छन्नाग्निमिव कृत्वा तत उपरि इष्टकास्थापननिभानि व्रतानि दीयन्ते । तत **आवश्यक**मादिं कृत्वा यावत् **सूत्रकृतं** तावत् पीठं भवति । ततो प्रकाभ्यां प्रकृतं तौ कल्प-व्यवहारौ प्रासादस्थानीयौ दीयेते । तत्रार्थपदानि यानि तानि रत्ननिभानि ॥ ३३३ ॥

---

१ पाडंति उं° ता० ॥

गतं तदर्हद्वारम् । अधुना पर्षद्वारम्, यस्याः कल्प-व्यवहारौ दीयेते सा शैलघनादिभिर्दृष्टान्तैः परीक्षितव्येति तानेव दृष्टान्तानाह—

**पर्षद्द्वारम्**

**सेलघण कुडग चालिणि, परिपूणग हंस महिस मेसे य ।**
**मसग जलूग बिराली, जाहग गो भेरि आभीरी ॥ ३३४ ॥**

प्रथमः[1] शैलघनेन दृष्टान्तः । तत्र शैल इति मुद्गप्रमाणः पाषाणो मुद्गशैलः, घनः पुष्करसंवर्त्तको महामेघः । तद्दृष्टान्तभावना एवम्—

मुद्गशैल-घनदृष्टान्तः

मुग्गसेलस्स पुक्खलसंवट्टगस्स य महामेहस्स विसंवाओ । मुद्गसेलगो[2] भणइ—जइ तुमं मम तिलतुसमित्तमवि सक्केसि खंडिउं तो सच्चं तुमं पोक्खलसंवट्टउ त्ति । सो पडिभणइ—जइ तुमं एगधारानिवायमवि सक्केसि सहिउं तो सच्चं तुमं मुग्गसेलो त्ति । एवं पडिभणित्ता मुट्ठिप्पमाणमित्ताहिं धाराहिं वरिसिउं पयट्टो । ततो सत्तरत्तं वरिसित्ता चिंतेइ—सो विराओ होज्जा । तओ ट्ठिओ । तओ मुग्गसेलो चिगचिगंतो अच्छइ । ताहे सो मुग्गसेलओ तं गज्जइ आगारेइ य, जहा—जं तं भणियं तं कहिं गयं ? ति । मेहो लज्जिओ विलक्खीभूओ । एवं सेलसमं सिस्समेगो आयरिओ गाहेउं न सक्को । तओ[3] अन्नो भणइ—अहं गाहेमि । सो वि किलिस्सित्ता निव्विज्जइ, न सक्कइ गाहेउं ॥ ॥ ३३४ ॥ एतदेवाह—

**उल्लेऊण न सक्का, गज्जइ इय मुग्गसेलओ रन्ने ।**
**तं संवट्टगमेहो, सोउं तस्सोवरिं[4] पडइ ॥ ३३५ ॥**
**रविउ[5] त्ति ठिओ मेहो, उल्लो य न व त्ति गज्जइ य सेलो ।**
**सेलसमं गाहिस्सं, निव्विज्जइ गाहगो एवं ॥ ३३६ ॥**

आर्द्रीकर्तुं न शक्यः 'इति' एवं मुद्गशैलकोऽरण्ये गर्जयति । 'तच्च' मुद्गशैलवचनं श्रुत्वा संवर्त्तकमेघस्तस्योपरि 'पतति' सप्तरात्रं वर्षतीत्यर्थः ॥ ३३५ ॥

तदनन्तरं द्रावित इति विचिन्त्य स्थितो मेघः । आर्द्रो न वा ? 'इति' एवं 'शैलः' मुद्गशैलो गर्जयति । एष दृष्टान्तः, उपनयमाह—शैलसमं ग्राहयिष्यामि इति कृतप्रतिज्ञः 'एवं' पुष्करावर्त्तकदृष्टान्तप्रकारेण ग्राहको निर्विद्यते ॥ ३३६ ॥

न केवलं निर्विद्यते किञ्चायमपरो दोषः—

मुद्गशैलसमं शिक्षयतो दोषाः

**आयरिए सुत्तम्मि य, परिवाओ सुत्त-अत्थपलिमंथो ।**
**अण्णेसिं पि य हाणी, पुट्ठा वि न दुद्ददा वंझा ॥ ३३७ ॥**

आचार्ये परिवादो यथा—अयमयोग्यः शिक्षापयितुम्, कथमन्यथा ईदृशं शिक्षयति ? । सूत्रपरिवादो यथा—नूनमेतादृशमेवेदं सूत्रं यदेतादृशः पठति । सूत्रा-ऽर्थपलिमन्थ एवम्—यावत् स ग्राह्यते तावदात्मना न गुणयति न चार्थं परिभावयति ततः स्वतः सूत्रा-ऽर्थव्याघातः । तथा 'अन्येषामपि' श्रोतॄणां सूत्रा-ऽर्थहानिः, निरन्तरं तच्छिक्षणे व्यापृतत्वात् । न च तस्य

१ प्रथमतः शैल° त० ॥ २ मुग्गसे° भा० ॥ ३ तत्थ अ° मो० ॥ ४ तस्सुप्परिं ता० ॥ ५ दवि° मो० ॥

तथाविधशिष्ये कश्चिदुपकारः, केवलं सुबहुरपि तत्र क्लेशः क्रियमाणो निरर्थकः । एतदेव प्रतिवस्तूपमया दर्शयति–स्पृष्टाऽपि बन्ध्या गौर्न दुग्धदा भवति, एवं सोऽपि शिक्ष्यमाणो न किञ्चिदवगाहते ॥ ३२७ ॥ शैलघनप्रतिपक्षे च शिष्ये कृष्णभूमकल्पे दातव्यम् । तथा चाह—

कृष्णभूम्युदाहरणम्

वुट्ठे वि दोणमेहे, न कण्हभोमाउ लोट्टए उदयं ।
गहण-धरणासमत्थे, इय देयमछित्तिकारिम्मि ॥ ३३८ ॥

कृष्णभूमे प्रदेशे द्रोणमेघेऽपि वृष्टे यद् यत्र पतत्युदकं तत्तत्रैव प्रविशति, न पुनस्तस्मात् कृष्णभूमादन्यत्र लोटते । 'इति' एवं ग्रहण-धारणासमर्थे अव्यवच्छित्तिकारिणि देयं सूत्रम् ॥ ३३८ ॥ अधुना कुटद्वारमाह—

कुटोदाहरणम्

भाविय इयरे य कुडा, पसत्थ-अपसत्थभाविया दुविहा ।
पुप्फाईहिँ पसत्था, सुर-तिल्लाईहिँ अपसत्था ॥ ३३९ ॥
वम्मा य अवम्मा वि य, पसत्थवम्मा य हुंति अग्गिज्झा ।
अपसत्थअवम्मा वि य, तप्पडिवक्खा भवे गिज्झा ॥ ३४० ॥

'कुडाः' घटाः । ते द्विधा–भाविता इतरे च । तत्र ये भावितास्ते द्विधा–प्रशस्तभाविता अप्रशस्तभाविताश्च । तत्र ये पुष्पादिभिर्भावितास्ते प्रशस्तभाविताः । सुरा-तैलादिभिर्भाविताः 'अप्रशस्ताः' अप्रशस्तभाविताः । पुष्पादिभिरित्यत्राऽऽदिग्रहणात् कर्पूरादिपरिग्रहः । सुरा-तैलादिभिरित्यत्र वशादिग्रहणम् ॥ ३३९ ॥

तत्र ये प्रशस्तभावितास्ते द्विविधाः–वाम्या अवाम्याश्च । वाम्या नाम ये तं भावं च्यावयितुं शक्याः, इतरे अवाम्याः । येऽप्यप्रशस्तभावितास्तेऽपि द्विधा–वाम्या अवाम्याश्च । तत्र ये प्रशस्तभाविता वाम्या ये चाप्रशस्तभाविता अवाम्यास्तेऽग्राह्याः । ये तु 'तत्प्रतिपक्षाः' प्रशस्तभाविता अवाम्या ये चाप्रशस्तभाविता वाम्यास्ते ग्राह्याः । एते द्रव्यकुटाः । एवं भावकुटाः शिष्या अपि परिभावनीयाः ॥ ३४० ॥ तथा चाह—

कुप्पवयण-ओसन्नेहिँ भाविया एवमेव भावकुडा ।
संविग्गेहिँ पसत्था, वम्माऽवम्मा य तह चेव ॥ ३४१ ॥

'एवमेव' अनेनैव द्रव्यकुटदृष्टान्तप्रकारेण भावकुटा अपि द्रष्टव्याः । तद्यथा–भाविता अभाविताश्च । तत्र भाविता द्विविधाः–प्रशस्तभाविता अप्रशस्तभाविताश्च । तत्र ये कुप्रवचनैरवसन्नैश्च भावितास्तेऽप्रशस्तभाविताः, ये संविग्नैर्भावितास्ते 'प्रशस्ताः' प्रशस्तभाविताः । एकैके द्विविधाः–वाम्या अवाम्याश्च । तत्र ये प्रशस्तभाविता वाम्या ये चाप्रशस्तभाविता अवाम्या एते अग्राह्याः । ये च प्रशस्तभाविता अवाम्या ये चाप्रशस्तभाविता वाम्या एते द्वयेऽपि ग्राह्याः । ये अवाम्यास्ते सुचिरेणापि कालेन तं भावं न परित्यजन्ति, ततः पश्चात्ते निश्रापदं लब्ध्वा पापपरा जायन्ते । ग्राह्या नाम कथनयोग्याः, अग्राह्या अकथनीयशास्त्राः ॥ ३४१ ॥

जे पुण अभाविया ते, चउव्विहा अहविमो गमो अन्नो ।
छिड्डकुड खंड बोडे, सगले य परूवणा तेसिं ॥ ३४२ ॥

---

१ शिष्यमा° ले० मा० ॥ २ °भूमिक° मो० ॥ ३ °भूमिप्र° मो० त० ॥ ४ °तत्रैव मो० ॥
५ °कुड भिन्न खंडे सग° ता० ॥

ये पुनस्तैलादिभिरभावितास्ते निर्विवादं परिग्राह्याः । एतदेकेषामाचार्याणां मतेन भणितम् । अथवाऽयमन्यो गमः, किमुक्तं भवति ?–अन्ये आचार्या यदा कुटद्वारं प्राप्तं भवति तदा ते एवं प्ररूपयन्ति–द्विविधाः कुटाः–द्रव्यकुटा भावकुटाश्च । द्रव्यकुटाश्चतुर्विधाः, तद्यथा–छिद्रकुटः खण्डकुटो बोडकुटः सकलकुटः । 'तेषां' चतुर्णामपि प्ररूपणा कर्त्तव्या, सा चैवम्–छिद्रकुटो नाम यस्याधश्छिद्रम्, तत्र यत् प्रक्षिप्यते तत् सर्वं गलति । खण्डकुटो नाम यस्य कर्णौ बोटौ, स पानीयमूनं गृह्णाति । बोटकुटो यस्यैकपार्श्वे कपालभेदः, तत्र स्तोकं तिष्ठति । सकलो नाम सम्पूर्णस्तत्र यत् क्षिप्यते तत् सर्वं तिष्ठति । एवं शिष्या अपि चत्वारो भवन्ति, तद्यथा–छिद्रकुटसमानः खण्डकुटसमानो भिन्नकुटसमानः सकलकुटसमानश्च । एते भावकुटाः । छिद्रकुटसमानो यावत् कथ्यते तावत् स्मरति, उत्थितः किमपि न स्मरति । खण्डकुटसमान ऊनं गृह्णाति । भिन्नकुटसमानः स्तोकम् । सकलकुटसमानः समस्तम् । तथा चास्या एव गाथाया इयं व्याख्यानभूता गाथा—

जे पुण अभाविया ते, वि गज्झ चउहा कुडा व होंतऽण्णे ।
छिड्डकुड बोड खंडे, सगले य परूवणा तेसिं ॥

ततो नाधिकृतव्याख्यानविरोधः । एतेषां सकलकुटसदृशं वर्जयित्वा शेषाणां ये मुद्गशैलसमानस्य दोषास्ते द्रष्टव्याः । सकलकुटसमानस्य त्वव्यवच्छित्तिकारित्वात् कथनीयम् ॥ ३४२ ॥

सम्प्रति चालनीदृष्टान्तो यथा—चालिन्यामुदकं प्रक्षिप्यमाणमेवाधस्तादपगच्छति । एवं यस्यैकेन कर्णेन प्रविशति द्वितीयेन निर्गच्छति स चालनीसमानस्तस्यापि न कथनीयम्, मुद्गशैलस्येवानेकदोषप्रसङ्गात् ॥

सेले य छिड्ड चालिणि, मिहो कहा सोउ उट्ठियाणं तु ।
छिड्डाऽऽह तत्थ विट्ठो, सरिंसु सुमरामि नेयाणिं ॥ ३४३ ॥
एगेण विसइ बीएण नीइ कन्नेण चालिणी आह ।
धन्न त्थ आह सेलो, जं पविसइ नीइ वा तुज्झं ॥ ३४४ ॥

मुद्गशैल-छिद्रकुट-चालनी-समानां शिष्याणां मिथः संकथाः

तेषां मुद्गशैल-च्छिद्रकुट-चालनीसमानानां शिष्याणां व्याख्यां श्रुत्वोत्थितानामेवंरूपा मिथः कथा प्रावर्त्तत–कथयत आर्याः ! केन किमवधारितम् ? । तत्र च्छिद्रकुटसमानो ब्रूते–यावत् तत्र मण्डल्यामुपविष्ट आसीत् (आसं) तावत् स्मृतवान्, उत्थितस्य सर्वं विस्मृतम् ॥ ३४३ ॥

चालनीसमान आह—ममैकेन कर्णेन 'विशति' प्रविशति द्वितीयेन निर्गच्छति । शैलसमानः प्राह–धन्याः स्थ यूयम् यद् युष्माकं कर्णेषु प्रविशति निर्गच्छति च, मम तु मन्दभागस्य मूलत एव न प्रविशति ॥ ३४४ ॥ चालनीप्रतिपक्षस्य कथयितव्यम्, यत आह—

तावसखउरकढिणयं, चालणिपडिवक्खु न सवइ दवं पि ।

चालिन्याः प्रतिपक्षस्तापसस्य भाजनं खउरम्, बिल्वरस-भल्लातकरसाभ्यां लिप्तत्वात् 'कठि-

१ धन्नो त्थ ता० विना ॥ २ नीति वि य तु° ता० ॥ ३ "जाव तत्थ मंडलीए अच्छिताइओ ताव सुमरियाइओ अहं, उट्ठियस्स सव्वं विस्सरितं" इति चूर्णिकृतः ॥

नम्' अतिशयेन घनं तद् 'द्रवमपि' पानीयमपि, आस्तामन्यदित्यपिशब्दार्थः, न श्रवति, तादृशस्याव्यवच्छित्तिकारित्वाद् दातव्यम् ॥ अधुना परिपूणकदृष्टान्तः—

परि-पूणक दृष्टान्तः

**परिपूणगं पिव गुणा, गलंति दोसा य चिट्ठंति ॥ ३४५ ॥**

परिपूणको नाम येन घृतपूर्णयोग्यं पानं गाल्यते, तत्र सारो गलति कल्मषं तिष्ठति, एवं यस्य गुणा गलन्ति दोषास्तिष्ठन्ति स परिपूणकसमानः, तस्मिन्न कथनीयम्, शैलसमानोक्तदोषप्रसङ्गात् ॥ ३४५ ॥

आह किं भट्टारकवचनेऽपि दोषाः सन्ति येनोच्यते 'दोषास्तिष्ठन्ति' इति ? तत्राह—

**सव्वण्णुप्पामण्णा, दोसा उ न हुंति जिणमये के वि ।**
**जं अणुवउत्तकहणं, अपत्तमासज्ज व हवंति ॥ ३४६ ॥**

सर्वज्ञप्रामाण्यान्न केचिद् जिनमते दोषा विद्यन्ते । उक्तञ्च—

वीतरागा हि सर्वज्ञाः, न मिथ्या ब्रुवते वचः ।
यस्मात् तस्माद् वचस्तेषां, तथ्यं भूतार्थदर्शनम् ॥

केवलं यद् अनुपयुक्तस्याचार्यस्य कथनम् अथवा परः श्रोता अपात्रं तद् आसाद्य गुणा अपि सर्पमुखे प्रविष्टं दुग्धमिव दोषीभवन्ति ॥ ३४६ ॥ सम्प्रति हंसदृष्टान्तभावनामाह—

हंसदृ-ष्टान्तः

**अंबत्तणेण जीहाइ कूइया होइ खीरमुदगम्मि ।**
**हंसो मोत्तूण जलं, आपियइ पयं तह सुसीसो ॥ ३४७ ॥**

परिपूणकप्रतिपक्षो हंसः । तथाहि–हंसस्य जिह्वा अम्ला, ततो जिह्वाया अम्लत्वेन तत्सम्पर्कतः क्षीरमुदके कूचिका भवन्ति, ततो जलं मुक्त्वा यत् 'पयः' क्षीरं कूचिकाभूतं तद् आपिबति । एवं यो गुणान् गृह्णाति दोषान् त्यजति तस्य हंससमानस्य दातव्यम् ॥३४७॥

महिषदृष्टान्तमाह—

महिष-दृष्टान्तः

**सयमवि न पियइ महिसो, न य जूहं पिबइ लोलियं उदयं ।**
**विग्गह-विकहाहिँ तहा, अथक्कपुच्छाहि य कुसीसो ॥ ३४८ ॥**

यथा महिषस्तृषापीडितः पानीयं पास्यामीति बुद्ध्या कञ्चिद् ह्रदमवतीर्णः । स प्रथममेव प्रविष्टः सन् सर्वमुदकं लोलयति–कलुषयति तावद् यावत् कर्दमीभवति । तच्च तथाकर्दमीभूतं नात्मना पिबति नापि यूथं पिबति । एवं यः शिष्यः प्रारब्धे व्याख्याने विग्रहेण–यथा अमुको भिक्षायां न गच्छति अमुक एतादृशस्तादृश इति विकथाभिर्नानाप्रकाराभिः यदि वा 'अथक्कपृच्छाभिः' अप्रस्तावपृच्छाभिराचार्यं तथा परिश्रमयति यथा न तस्य कथयति नाप्यन्यस्य गणस्य स एष कुशिष्यस्तस्मै न कथनीयम् ॥ ३४८ ॥

यस्तु महिषसदृशप्रतिपक्षो मेषसदृशस्तस्मै कथनीयम् । तथा चाह—

मेषदृ-ष्टान्तः

**अवि गोपयम्मि वि पिबे, सुढिओ तणुयत्तणेण तुंडस्स ।**
**न करेइ कलुस तोयं, मेसो एवं सुसीसो वि ॥ ३४९ ॥**

---

१ हवेज्जा ता० ॥ २ जिब्भाए कूतिगा ता० ॥ ३ आतियति पयं तह सुसिस्सो ता० ॥ ४ पियति कलुसितं तोयं ता० ॥ ५ य अभागी ता० ॥

'मेषः' एडकः सः 'अपि' सम्भावनायां गोष्पदेऽपि 'तोयं' पानीयं जानुभ्यामधो निपत्य "कुढिओ"त्ति कुब्जीभूतो भूत्वा 'कुण्डस्स' वदनस्य तनुत्वेन पिबति, न च तथा पिबन् तत् तोयं कलुषं करोति । एवं यः सुशिष्य आचार्यमनुरञ्जयन् गृह्णाति स मेषसदृश इति तस्मै दातव्यम् ॥ ३४९ ॥ सम्प्रति मसकदृष्टान्तमाह—

मशक-दृष्टान्तः

मसगो व्व तुदं जच्चाइएहिँ निच्छुब्भई कुसीसो वि ।

यथा मसगो लगन्नेव दुःखापयति, ततः पश्चादुड्डाप्यते । एवं यः शिष्यो जात्यादिभिस्तुदति—हीलयति स तुदन् निष्काश्यते, तादृशस्य दानेऽसङ्खडादिदोषप्रसङ्गात् ।

जलौका-दृष्टान्तः

जलुगा व अदूमिंतो, पियइ सुसीसो वि सुयनाणं ॥ ३५० ॥

मसकप्रतिपक्षो जलौका, यथा सा शरीरे लग्ना अदुःखापयन्ती रुधिरमापिबति, उक्तञ्च—

दंसो तिक्खनिवाएण, अप्पणो वहमिच्छई ।
जलुगा वि सदेयत्थं, मद्दवेणोपसप्पई ॥

एवं यः शिष्य आचार्यम् 'अदूनयन्' अदुःखापयन् श्रुतज्ञानमापिबति तस्मिन् सुशिष्ये दातव्यम् ॥ ३५० ॥ अधुना बिडालीदृष्टान्तमाह—

बिडाली-दृष्टान्तः

छड्डेउं भूमीए, खीरं[1] किल पिवइ मुद्ध मज्जारी ।
परिसुट्ठियाण पासे, सिक्खइ एवं विणयभंसी ॥ ३५१ ॥

'मुग्धा' अपण्डिता मार्जारी किल क्षीरं भूमौ छर्दयित्वा पिबति । एवं यो गौरवमात्मनो धारयन् मण्डल्यां न शृणोति, किन्तु यदा पर्षदः श्रोतार उत्थिता भवन्ति तदा तेषामनुभाषमाणानां पार्श्वे उपविश्य शृणोति तस्मै न दातव्यम् ॥ ३५१ ॥ अधुना जाहकदृष्टान्तमाह—

जाहक-दृष्टान्तः

पाउं थोवं थोवं, खीरं पासाणि जाहगो लिहइ ।
एमेव जियं काउं, पुच्छइ मइमं न खेएइ ॥ ३५२ ॥

जाहकः[2] स्तोकं स्तोकं क्षीरं पीत्वा पार्श्वाणि लेढि । एवमेव यो मतिमान् पूर्वगृहीतं जितं कृत्वा पृच्छति न पुनः खेदयति गुरुम्, तस्मिन् जाहकसदृशे दातव्यम् ॥ ३५२ ॥

गोदृष्टान्तमाह—

गोदृष्टान्तः

अन्नो दुज्झिहि कल्लं, निरत्थयं किं वहामि से चारिं ।
चउचरणगवी य मया, अवण्ण हाणी य[3] मरुयाणं ॥ ३५३ ॥
मा णे हुज्ज अवण्णो, गोवज्झा मा पुणो य न दलिज्जा ।
वयमवि दोज्झामो पुण, अणुग्गहो अन्नदूहे वि ॥ ३५४ ॥
सीसा पडिच्छगाणं, भरो त्ति ते वि य हु सीसगभरो त्ति ।
न करिंति सुत्तहाणी, अन्नत्थ वि दुल्लहं तेसिं ॥ ३५५ ॥

एकेनाविरतेन चतुर्णां चरणानां—चतुर्वेदब्राह्मणानां गौर्दत्ता । ते तां दिने दिने वारकेण दुहन्ति । तत्र यदा यस्य वारको भवति स तदा चिन्तयति—सुपोषितामप्येनां कल्येऽन्यो धोक्ष्यति, ततः पोषणफलं नैवाहमुपजीविष्यामीति किमिति निरर्थिकामस्यै(मस्याः) चारिं

१ °ई जह पिबत्ति ता० ॥ २ जाहकः तिर्यग्विशेषः ॥ ३ य बडुयाणं ता० विना ॥

वहामि ? । एवं चिन्तयित्वा दुग्ध्वा तां मुञ्चति । तत एवं सा चारिरहिता मृता । तेषां च मरुकाणामवर्णो जातः, यथा–अमी गोहन्तार इति । पुनर्दानहानिश्च जाता, मारयन्तीति कृत्वा न कोऽपि तेभ्यः पुनर्गोदानं ददातीत्यर्थः । एवं गोस्थानीया आचार्याः, धिग्जातिस्थानीयाः शिष्याः, ते चिन्तयन्ति–वयं ध्रुवाः, प्रतीच्छकाः सूत्रार्थं गृहीत्वा गन्तुकामाः, ततस्ते करिष्यन्ति प्रत्युपेक्षण-भिक्षा-पादधावनानि । प्रतीच्छका अपि चिन्तयन्ति–एष शिष्याणां भारः, वयं सूत्रा-ऽर्थौ गृह्णीमः । एवं शिष्यैः प्रतीच्छकैश्चाचार्यस्याक्रियमाणे स सर्वमात्मना करोति । ततो वातिक-पैत्तिक-श्लेष्मिकैः रोगातङ्कैर्गृहीतः किं ददातु ?, एवं सूत्रा-ऽर्थहानिर्जाता । अन्यत्रापि च गच्छान्तरे तेषां श्रुतज्ञानं दुर्लभम् ॥

तथैकेनाविरतेन चतुर्णां चतुर्वेदानामेका गौर्दत्ता । तत्र यदा यस्य वारको भवति स तदा चिन्तयति–माऽस्माकमवर्णो भूयात्, यथा–अमीभिर्गोहत्या कृता, मा च पुनर्गोघातकत्वमवधार्य भूयो गां न दद्यात्, अन्यच्च वयं पुनरपि स्ववारके धोक्ष्यामः, अन्यदुग्धेऽपि च मम महाननुग्रहः । एवं चिन्तयित्वा प्रभूतं तृणपानीयं ददाति । ईदृशेष्वाचार्यभक्तिमत्सु दातव्यम् ॥ ३५३ ॥ ३५४ ॥ ३५५ ॥

सम्प्रति भेरीदृष्टान्तमाह—

भेरी-दृष्टान्तः

**कोमुइया[1] संगामि[य]या य दुब्भूइया य भेरीओ ।**
**कण्हस्स आसि तइया, असिवोवसमी चउत्थी उ ॥ ३५६ ॥**

**बारवती** नगरी । **कण्हो** वासुदेवो । तस्स तिण्णि भेरीतो–**कोमुइया संगामिया दुब्भूतिया य** गोसीसचंदणमईयातो देवयापरिग्गहियातो । चउत्थी **असिवोवसमणी**, सा जत्थ तालिज्जइ तत्थ छम्मासे सव्वरोगा पसमंति जो तं सद्दं सुणति ॥

अक्षरगमनिका–कृष्णस्य तदा तिस्रो भेर्य आसन्, तद्यथा–**कौमुदिकी साङ्ग्रामिकी दुर्भूतिका** च । चतुर्थी **अशिवोपशमनी** ॥ ३५६ ॥ तस्या उत्पत्तिमाह—

**सक्कपसंसा गुणगाहि केसवा नेमिवंद सुणदंता ।**
**आसरयणस्स हरणं, कुमारभंगे य पुययुद्धं ॥ ३५७ ॥**
**नेहि जितो मि त्ति अहं, असिवोवसमीऍ संपयाणं च ।**
**छम्मासिय घोसणया, प[2]समेति न जायए अन्नो ॥ ३५८ ॥**
**आगंतु वाहिखोभो, महिड्ढि मोल्लेण कंथ डंडणया ।**
**अट्ठम आराहण अन्न भेरि अन्नस्स ठवणं च ॥ ३५९ ॥**

सक्को समाए भणति–केसवा सव्वे गुणगाहिणो नीययुद्धं च न करेंति । तत्थ एगो देवो असद्दहंतो भणइ–अहं अगुणे गिण्हावेमि नीययुद्धं च कारेमि त्ति । कण्हस्स नेमिवंदगस्स सखंधवारस्स पट्ठिल्लियस्स अंतरा सुणहरूवं कसिणं दुब्भिगंधं मयल्लयं विउव्वियं । दंता से पंडरया अतीव सोभमाणा विउव्विया । ताहे सो खंधावारो जाहे तं पएसं पत्तो ताहे उत्तरिज्जएहिं मुहं ठइत्ता अन्येन प्रदेशेन गया (गयो) । कण्हेणं पच्छा एंतेण पुच्छियं । सुणहो कुहिओ

---

१ °मुइभूया संगा° ता० ॥ २ °समति न य जा° ता० ॥

त्ति । ताहे सो तेण चेव पएसेण आगतो, सुइ न चेव ठइयं, न वि य विरूवं कयं, एयं च पुणो भणियं—अहो ! सुणयस्स पंडुरा दंता सोहंति । जाहे न खुभितो ताहे पडिइंतस्स आसरयणमणेण अवहरियं । कहियं वासुदेवस्स । संबाइया कुमारा निग्गया । ते युद्धे भग्गा । ततो सयं वासुदेवो निग्गतो । दिट्ठो अणेण आसो निज्जंतो । भणितो अणेणं—किं आसं हरसि ? । देवो भणइ—अमुगो विज्जाहरो, जुद्धं मग्गामि । वासुदेवो भणइ—बाढं जुज्झामो । 'केरिसेणं ?'ति पुच्छितो भणति—पुएहिं । वासुदेवो भणति—नाहमेरिसेणं जुद्धेण जुज्झामि, पराजितो हं, नेहि आसं । ताहे देवो सरूवं काउं भणइ—सच्चं सक्को भासइ । कहियमणेण सव्वं । भणइ—वरं मग्गसु । वासुदेवो भणइ—मम असिवोवसमणिं भेरिं देह, जीए ताडियाए जत्थ सद्दो सुव्वइ तत्थ छम्मासे रोगायंको न भवइ, पुव्वुप्पण्णा खिप्पामेव उवसमंति । दिन्ना भेरी । गतो देवो ॥

अक्षरगमनिका—शक्रस्य स्वसभायां केशवानां प्रशंसा, यथा—गुणग्राहिणः केशवा इति, उपलक्षणमेतत्, नीचयुद्धाकारिणश्च । ततो नेमिवन्दनार्थं कृष्णो प्रचलितेऽन्तरा शुनो विकुर्वणम्, दन्ताश्च शोभनाः कृताः । कृष्णेन तथैव दन्ताः प्रशंसिताः । ततः प्रत्यागच्छतोऽश्वरत्नहरणम् । तत्र च शम्बप्रभृतीनां कुमाराणां भङ्गे स्वयं वासुदेवे युद्धार्थमुपस्थिते देवः पुतयुद्धमुक्तवान् । ततो वासुदेवो ब्रूते—नय अश्वम्, जितोऽहमस्मीति । ततः प्रत्यक्षीभूय वरयाच्ञानन्तरमशिवोपशमिन्या भेर्याः सम्प्रदानं कृतवान् । ततः 'षण्मासिकी' षष्ठे षष्ठे मासे तस्या घोषणा । ततः पूर्वोत्पन्नो रोगः प्रशाम्यति, अन्यश्च षण्मासान् यावन्न जायते ॥ ३५७ ॥ ३५८ ॥

तत्थ अन्नदेसीओ महड्ढितो वाणिओ सीसवेयणाते गहिओ आगओ । तस्स वेज्जेणं गोसीसचंदणमुवइट्ठं । अण्णत्थ अलब्भमाणे रहस्सियं बहुमुल्लं दाउं ततो भेरीए खंडमेगं गहियं । तेण भेरीताडएणं तत्थऽण्णं खंडं लाइयं । एवमन्नन्नखंडप्पयाणेण तेण सा भेरी कंथा कया । पच्छा से तारिसो सद्दो न होइ, न य रोगा उवसमंति । ततो लोगस्स बहू रोगे जाणित्ता सद्दं च तारिसं असुणमाणेण कण्हेण भेरी जोयाविया जाव कंथा कया । ततो सो भेरिपालो सकुलो उच्छादितो । ततो पुणो वि अट्ठमेणं भत्तेणं तं देवं आराहित्ता अण्णा भेरी मग्गिया । लद्धा । अण्णो भेरीपालो ठवितो । सो आयरेण रक्खइ । एवं जो सीसो आलावए लद्धे समाणे अण्णं लोइयं लोउत्तरियं वा आलावगं लाएइ सो वि कंथं करेइ । तस्मात् तस्यापि न दातव्यम् ॥

अक्षरगमनिका—व्याधिना क्षोभो यस्यासौ व्याधिक्षोभः आगन्तुको महर्द्धिकः, तस्य मूल्येन भेरीखण्डप्रदानम् । एवमन्यान्यदाने सा कन्थाऽभवत् । ततो भेरीपालस्य दण्डनम् । अष्टमेन देवस्याराधनम् । अन्यभेरीप्रदानम् । अन्यस्य भेरीपालस्य स्थापनम् । एवं सूत्रा-ऽर्थौ कन्थीकुर्वतो न दातव्यम् ॥ ३५९ ॥ इदानीमाभीरीदृष्टान्तमाह—

मुक्कं तया अगहिए, दुपरिग्गहियं कयं तया कलहो । आभीरी-
पिट्टणय इयर विक्किय, गएसु चोरेहि ऊणऽग्घो ॥ ३६० ॥ दृष्टान्तः

१ चोरा य ऊ° ता० ॥

मा निण्हव इय दाउं, उवजुंजिय देहि किं विचिंतेसि ।
विच्चामेलणदाणे, किलिस्ससी [1]तं च हं चेव ॥ ३६१ ॥

एगा आभीरी सगडम्मि घयस्स भरित्ता भत्तारेण समं नगरं विक्कया गया अण्णेहिं आभीरेहिं घयविक्कएहिं समं । तत्थ सो आभीरो उवरिं विलग्गओ सगडस्स हेट्ठा आभीरी तीसे आभीरीए घयघडए पणामेति । तत्थ तेण नायं–गहितो । तीए नायं–न ताव मुंचति । ततो घडो पडिता भिन्नो । ताहे सा आभीरी भणति–तुमे अगहितो चेव मुक्को । आभीरो भणइ–तुमाए दुग्गहियं कयं । एवं तेसिं 'तुमं तुमं'ति भणंताणं कलहो जातो । पच्छा सो आभीरो सगडातो उयरित्ता निसेट्टं पिट्टित्ता । जं पि चिट्ठइ घयं तं पि छड्डियल्लयंतं तेसिं भंडंताणं सुणएहिं चट्टियं भूमीए वा पविट्ठं । ताव अण्णेहिं घयविक्कएहिं घयं विक्कीयं । ताहे ताइं पविक्कीयाइं । जाओ ऊणो अग्घो । तेसु य घयविक्कएसु सगामं गएसु तावं एक्कल्लयाइं जायाइं चोरेहिं उच्छूढाइं ॥

अक्षरगमनिका—आभीरी ब्रूते–त्वयाऽगृहीते मुक्तम् । आभीरः प्राह–दुःपरिगृहीतं त्वया कृतम् । एवं तयोर्विवदतोः कलहो जातः । आभीर्याः पिट्टनम् । इतरेषु च विक्रायकेषु गतेषु चौरग्रहणं घृतस्य च ऊनोऽर्घः । एष दृष्टान्तः, अयमर्थोपनयः—एवं यः शिष्य आलापकं व्यत्याम्रेडयन् आचार्यैः 'मा एवं भण' इत्युक्तो ब्रूते–त्वयैवैवमालापको दत्तः । आचार्यः प्राह–नाहमेवं दत्तवान् किन्तु त्वया विनाशितः । स प्राह–मा निह्नुव, न वर्त्तते स्वयमेव दत्त्वाऽन्यथा वक्तुम्, अद्यापि न किमपि विनष्टम्, उपयुज्य देहि, माऽन्यद् विचिन्तय, व्यत्याम्रेडनेन हि दाने त्वं चाहं च क्लिश्यावहे इति । एवं यो निष्ठुरं वदति कलहं वा कुरुते तस्मै न दातव्यम् ॥ ३६० ॥ ३६१ ॥

बिइया आभीरी तहेव नगरं गया । तहेव घयघडो भिन्नो । ताहे आभीरी भणइ–न तुमं दोसो, मम एस दोसो । आभीरो भणइ–न तुमं, ममं ति । ताहे सा वालुया गहिया । उण्होदएण ताविता सीयलं काउं सव्वं घयं निरवसेसं गहियं । सत्थिल्लएहिं समं गया । न य चोरेहिं गहिया । न य घयस्स ऊणो अग्घो जातो ॥

एवं यः शिष्यो 'मा व्यत्याम्रेडय' इत्युक्तः सन् मिथ्यादुष्कृतं ददाति 'मया विनाशितम्' इति । यदि वाऽऽचार्यैरेवानुपयुक्तैस्तदा दत्तं ततस्ते ब्रुवते–मिथ्यादुष्कृतम्, मयैवानुपयुक्तेनाऽन्यथा प्रदत्तमिति । तत एतावता उपशाम्यति । तस्मादेतादृशस्य दातव्यम् ॥

साम्प्रतमेतेषां मुद्गशैलसदृशादीनामाभीरीसदृशपर्यवसानानां दाना-ऽदाने प्रायश्चित्तमाह—

योग्या-ऽयोग्यशिष्याय वाचनाऽदान-दाने प्रायश्चित्तम्

सेल-कुडछिद्द-चालिणि, सुद्धो चउगुरुय घडदुवे होंति ।
परिपूणग महिस मसए, विरालि आभीरि एमेव ॥ ३६२ ॥
एमेव गोणि भेरी, हंसे मेसे य जाहग जलूगा ।
चउलहुगमबाणम्मी, पावति एएसु आयरिओ ॥ ३६३ ॥

१ तं अहं ता० ॥ २ °लट्टं वि° भा० चूर्णौ च ॥ ३ विक्कयके° कां० मो० त० । विक्कयिके° डे० ॥

मुद्गशैल-छिद्रकुट-चालनीसमानानां पुनरपात्राणामेव कार्ये समापतिते सूत्रमर्थं वा प्रयच्छन् शुद्धः, न खलु तत्र स्वस्यान्येषां वा शिष्याणां सूत्रा-ऽर्थहानिः । अकार्ये पुनरेतेषु सूत्रा-ऽर्थौ प्रयच्छतश्चतुर्गुरु । तथा 'घटद्विके' प्रशस्तवाच्येऽप्रशस्तवाच्ये अथवा खोडकुटे भिन्नकुटे व्याख्यानवृत्त्येव सम्प्रहृतश्चतुर्ष्वेतेषु प्रायश्चित्तं प्रत्येकं चतुर्गुरु । परिपूणकसदृशे [ महिषसमाने ] मशकतुल्ये बिडालीसमाने आभीरीसदृशेऽप्रशस्तगौसमुपलक्षितद्विजातीयतुल्ये कन्थाकारिभेरीपालकसदृशे एतेषु सप्तसु सूत्रा-ऽर्थौ प्रयच्छतः प्रत्येकं प्रायश्चित्तम् 'एवमेव' चतुर्गुरुकमित्यर्थः ॥ ३६२ ॥

एतेषां ये प्रतिपक्षा हंसादयो ये च प्रशस्तगो-भेरीदृष्टान्तसूचितास्तेषां सूत्रा-ऽर्थौ प्रयच्छन् शुद्धः । यदि पुनर्न ददाति तदा प्रायश्चित्तं प्राप्नोति चतुर्लघु ॥ ३६३ ॥

प्रकारान्तरेण पर्षन्निरूपणार्थमाह—

पर्षदः

**जाणंतिया अजाणंतिया य तह दुव्वियड्डिया चेव ।**
**तिविहा य होइ परिसा, तीसे नाणत्तगं वोच्छं ॥ ३६४ ॥**

अथवा त्रिविधा पर्षत्, तद्यथा—जानती अजानती दुर्विदग्धा च । 'तस्याः' त्रिविधाया अपि नानात्वं वक्ष्ये ॥ ३६४ ॥ प्रतिज्ञातमेव करोति—

जानती पर्षत्

**गुण-दोसविसेसन्नू, अणभिग्गहिया य कुस्सुइमतेसु ।**
**सा खलु जाणगपरिसा, गुणतत्तिल्ला अगुणवज्जा ॥ ३६५ ॥**

या गुण-दोषविशेषज्ञा 'कुश्रुतिमतैः' अपरकुतीर्थिकसिद्धान्तमतैरनभिगृहीता, गाथायां सप्तमी तृतीयार्थे, सा खलु "गुणतत्तिल्ला" गुणयत्नवती अगुणवर्जा जानती पर्षत् ॥ ३६५ ॥

सम्प्रति येऽस्याध्ययनस्य योग्यास्तानाह—

**खीरमिव रायहंसा, जे घोट्टंति उ गुणे गुणसमिद्धा ।**
**दोसे वि य छड्डुंता, ते वसभा धीरपुरिस त्ति ॥ ३६६ ॥**

ये 'गुणसमृद्धाः' विनयादिगुणसमन्विताः क्षीरमिव राजहंसा गुणान् 'घोटयन्ति' आस्वादयन्ति, येऽपि केचनानुपयोगप्रभवा दोषास्तानपि च 'छर्दयन्ति' परित्यजन्ति ते 'वृषभाः' निशीथेन गीतार्था धीरपुरुषा अधिकृतस्याध्ययनस्य योग्याः ॥ ३६६ ॥ अजानतीं पर्षदमाह—

अजानती पर्षत्

**जे होंति पगयमुद्धा, मिगछावग-सीह-कुक्कुरगभूया ।**
**रयणमिव असंठविया, सुहसण्णप्पा गुणसमिद्धा ॥ ३६७ ॥**

ये प्रकृत्या—स्वभावेन मुग्धा मृग-सिंह-कुक्कुरशावभूता, गाथायां शावशब्दस्यान्यत्रोपनिपातः प्राकृतत्वात्, भूतशब्द औपम्ये, ततोऽयमर्थः—यथा मृगादिशावा अरण्यादानीय यदि रोचते तर्हि भद्रकाः क्रियन्ते अथवा क्रूराः, एवं ये प्रकृत्या मुग्धाः परतीर्थिकैश्चाभाविताः ते यथा भण्यन्ते तथा कुर्वन्ति । तथा रत्नमिव असंस्थापिताः, यथा रत्नमसंस्थापितं यादृशोऽभिप्रायस्तादृशं घटित्वा क्रियते एवमेतेऽपि यथा रोचते तथा क्रियन्ते । तथा चाह—सुखप्रज्ञापनीयाः 'गुणसमृद्धाः' विनयादिगुणनिधयः ॥ ३६७ ॥

१ °ताः यथा रत्नमसंस्थापिताः यथा रत्न° दे० मो० बिना ॥

**जे खलु अभाविया कुस्सुतीहिँ न य ससमए गहियसारा ।**
**अकिलेसकरा सा खलु, वयरं छक्कोडिसुद्धं वा ॥ ३६८ ॥**

ये खलु 'कुश्रुतिभिः' कुसिद्धान्तैः अभाविता न च स्वसमये गृहीतसारा सा खल्वक्लेशकरा अजानती पर्षत् । षट्कोटिशुद्धं वज्रमिव गुणनिधानम् । षट्कोटिशुद्धं नाम यत् स्वभावतः षट्स्वपि दिक्षु शुद्धम् ॥ ३६८ ॥ सम्प्रति दुर्विदग्धां पर्षदमाह—

दुर्विदग्धा पर्षत्

**किंचिम्मत्तग्गाही, पल्लवगाही य तुरियगाही य ।**
**दुवियड्ढगा उ एसा, भणिया परिसा भवे तिविहा ॥ ३६९ ॥**

किञ्चिन्मात्रग्राहिणः पल्लवग्राहिणः त्वरितग्राहिणः । एवमेषा दुर्विदग्धा पर्षत् 'त्रिविधा' त्रिप्रकारा भणिता ॥ ३६९ ॥ तत्र किञ्चिन्मात्रग्राहिणीमाह—

**नाऊण किंचि अन्नस्स जाणियव्वे न देतिँ[2] ओगासं ।**
**न य निज्जितो वि लज्जइ, इच्छइ य जयं गलरवेण ॥ ३७० ॥**

ज्ञात्वा किञ्चिद् अन्यस्य ज्ञातव्ये नावकाशं ददाति, न च निर्जितोऽपि लज्जते, केवलं 'गलरवेण' महागलप्रमाणेनारटन् जयमिच्छति ॥ ३७० ॥ पल्लवग्राहिणीमाह—

**न य कत्थइ निम्मातो, ण य पुच्छइ परिभवस्स दोसेण ।**
**वत्थी व वायपुण्णो, फुट्टइ गामिल्लगवियड्ढो ॥ ३७१ ॥**

ग्रामेयकेषु विदग्धो ग्रामेयकविदग्धो न च कुत्रचिन्निर्मातः, सर्वत्र पल्लवमात्रग्राहित्वात् । न च परं पृच्छति, 'परिभवो मे भविष्यति' इति परिभवस्य दोषेण । केवलं बस्तिरिव वातपूर्णः 'पण्डितोऽयम्' इति लोकप्रवादगर्वितः 'स्फुटति' स्फुटन्निव तिष्ठति ॥ ३७१ ॥

त्वरितग्राहिणीमाह—

दुर्विदग्ध-वैयाकरण-दृष्टान्तः

**दुरहियविज्जो पव्वंतनिवासो वावदूक कीकाको[3] ।**
**खलिकरण भोइपुरतो, लोगुत्तर पेढियागीते ॥ ३७२ ॥**

एकः पुरुषो व्याकरणसूत्राणि किञ्चित् पठितानि कृत्वा प्रत्यन्तं ग्रामं गत्वा ब्रूते—अहं वैयाकरणः । तत्र स ग्रामेयकैराभीरैः परिगृहीतः । वृत्तिः पुष्टा कृता । ततः सुखेन तत्र निवसति । अन्यदा तत्र वावदूकश्छात्रैः परिवृतः पुस्तकभारेण समागतः । ततस्तैः प्रत्यन्तग्रामवासिभिस्तस्य शिष्याः पृष्टाः—क एष समागतः ? । तैरवादि—वैयाकरणः । ततस्ते प्रत्यन्तग्रामवासिनो ब्रुवते—अस्माकमप्यस्ति वैयाकरणः, तेन सह शब्दगोष्ठी भवतु । तैः प्रतिश्रुतम् । जात एकत्र मेलापकः । ततो दुरधीतविद्येनोक्तम्—काग इति कथं भण्यते ? । वैयाकरणेनोक्तम्—काक इति । ( [4]एवमुक्ते स मौनमध्यतिष्ठत् । ) दुरधीतविद्येनोक्तम्—अन्योऽपि लोकः काकमेव भणति, को विशेषो व्याकरणस्य ? अहं भणामि 'कीकाकः' । ततो ग्रामेयकैर्हसितम् उत्कृष्टिश्च कृता 'अस्माकं पण्डितेनैष पराजितः' इति । पश्चात् स वैयाकरणः प्रद्वेषमापन्नो नगरं गत्वा यस्य भोजिकस्य स ग्रामस्तेन कर्षयित्वा तस्य पुरतः खलीकृत्य ग्रामान्निष्काशितः । एष दृष्टान्तः ।

---

१ छक्कोडिपरिसुद्धं भा० ता० विना ॥ २ °ति ऊवासं ता० ॥ ३ °कारो ता० विना ॥ ४ कोष्ठकान्तर्गतोऽयं पाठो लेखकप्रमादप्रविष्टः । असुसुक्षायमत्र ॥

एवं लोकोत्तरेऽपि कोऽपि कस्याप्याचार्यस्य शिष्यः किञ्चित् पीठिकामात्रं शिक्षयित्वा एकाकी प्रत्यन्तनगरं गत्वा तद्गतानन्यानगीतार्थान् द्रावयति, अकरणीयान्यपि च करोति, अप्रायश्चित्तेऽपि च प्रायश्चित्तं ददाति, अन्यं पूजा-सत्कार-गौरवहानिभयतो न च पृच्छति । पश्चादन्ये गीतार्थास्तत्रागतास्तैर्द्दीवितः प्रायश्चित्तं च तस्य दत्तं दिक् च तस्यापहृता ॥

गाथाक्षरयोजना त्वियम्—दुरधीतविद्यः कोऽपि प्रत्यन्तनिवासः । तत्रैको 'वावदूकः' महाविद्वान् वैयाकरणः समागतः । तस्य तेन विवादे 'क्रीकारः कृतः' उपहासपूर्वकमुत्कृष्टिः कृता । ततः स वैयाकरणो वावदूको नगरं गत्वा भोजिकपुरतस्तस्य खलीकरणमकार्षीत् । एवं लोकोत्तरेऽपि 'पीठिकागीते' पीठिकामात्रेण गीतार्थकर्त्तव्यं या करोति सैषा दुर्विदग्धा पर्षत् ॥ ३७२ ॥

**आयरियत्तणतुरितो, पुव्वं सीसत्तणं अकाऊणं ।**
**हिंडति चोप्पायरितो, निरंकुसो मत्तहत्थि व्व ॥ ३७३ ॥**

कोऽपि शिष्यो दशवैकालिकमात्रं पठित्वा आचार्यत्वत्वरितः प्रत्यन्तं ग्रामं नगरं वा गत्वा पीठिकायां निविष्ट आत्मानमाचार्यमभिमन्यते । स एवं शिष्यत्वमकृत्वा निरङ्कुशो मत्तहस्तीव 'चोप्पो' चोक्षो मूर्खः सन् आचार्यो 'हिण्डते' परिभ्रमति ॥ ३७३ ॥

कीदृशं तस्य मूर्खत्वम्? अत आह—

**छन्नालयम्मि काऊण कुंडियं अभिमुहंजली सुदितो ।**
**गेरू पुच्छति पसिणं, किन्नु हु सा वागरे किंचि ॥ ३७४ ॥**

'गेरुकः' परिव्राजकः 'षट्नाले' त्रिदण्डे कुण्डिकां कृत्वा कृताञ्जलिरभिमुखः 'स्वादृतः' पादपतितः 'पृच्छति' प्रश्नयति, किन्तु सा कुण्डिका तथाऽऽपृच्छ्यमाना किञ्चित् परिव्राजकस्य व्यागृणो(णा)ति? नैव किञ्चन । यादृशं तस्याः कुण्डिकाया आचार्यत्वं तादृशमेतस्यापि ॥३७४॥

**सीसा वि य तूरंती, आयरिया वि हु लहुं पसीयंति ।**
**तेण[2] दरसिक्खियाणं, भरितो लोगो पिसायाणं ॥ ३७५ ॥**

शिष्या अप्याचार्यपदपरिपालनाय त्वरन्ते, आचार्या अपि 'लघु' शीघ्रं प्रसीदन्ति, न पुनः परिभावयन्ति, यथा—नाद्यापि परिपूर्णमधीतमिति । तत ईषच्छिक्षितानामत एव 'पिशाचानां' ग्रथिलानां लोको भृतः ॥ ३७५ ॥

**तेगिच्छ मते पुच्छा, अम्हि वालुंक देवि कहि चिण्णा ।**
**तोसत्थेण कहंति य, विज्जनिसिद्धे ततो दंडो ॥ ३७६ ॥**

एगो विज्जो राउले ओलग्गइ[3] । सो मतो । रण्णा पुच्छियं—अत्थि से पुत्तो? । कहियं—अत्थि, नवरं विज्जयमसिक्खितो । रण्णा भणियं—वच्च, पढाहि, तदवत्था चेव ते भोगा । ततो अन्नत्थ गंतुं पढितुमारद्धं । तत्थ अइयाए पुरोहडे चरंतीए गलए वालुंकं लग्गं, चिर्भिटमित्यर्थः । सा विज्जसमीवमाणिया । विज्जेण पुच्छियं—कहिं चिण्णा एसा? । कहियं—पुरोहडे । तेण नायं—चिब्भिडं लग्गं ति । पोत्तं गलए बंधिउं तहा बलियं जहा तस वि भग्गं,

१ °बैकं चोक्ख° भा० ॥ २ सो उ दर° ता० ॥ ३ ओल° ता० ॥

निग्गयं गलग्गातो । तेण वेज्जपुत्तेण चिंतियं—एस उवातो विज्जियाए किरियाए । पडिनियत्तो रण्णो अल्लीणो । पुच्छितो रण्णा—सिक्खियं विज्जयं ? ति । तेण भणियं—सिक्खियं । ततो रण्णा 'सिग्घं सिक्खियं, अहो ! मेहावी'ति सक्कारो कतो । अन्नया रण्णो महादेवीए गल-गंडं उट्ठितं । सो वाहितो भणइ—कहिं चिण्णेल्लिया ? । तेहिं भणियं—पुच्छामो । इयरेण भणियं—भण 'पुरोहडे' । तेहिं चिंतियं—नूणं वेज्जरहस्समेयं । ततो भणियं—पुरोहडे चिण्णा । पच्छा तेण गलए साडगेण आवेढेत्ता मारिया । पच्छा रण्णा अण्णे विज्जा पुच्छिया—किं सत्थनिद्देसेण कया किरिया ? उयाहु ओसत्थेण ? । तत्थ विवादे विज्जेहिं निसेहिओ । पच्छा सारीरेण दंडेण दंडितो ॥

अक्षरगमनिका—'चिकित्सके' वैद्ये मृते राज्ञः पृच्छा—अस्ति तस्य पुत्रः ? । कथितम्—अस्ति, परमशिक्षितो वैद्यकस्य । राज्ञा भणितम्—अन्यत्र गत्वा पठ । स गतः । तत्र वालुङ्कमजागले वस्त्रावेष्टनेन भिद्यमानं दृष्ट्वा 'लब्धं वैद्यरहस्यम्' इति विचिन्त्य प्रतिनिवृत्तः । तत्र देव्या गलगण्डमभवत् । स आकारितः पृष्टवान्—क्व चीर्णा ? । 'तोषार्थेन' तोषनिमित्तं कथयन्ति—पुरोहडे । ततः सा पोतावेष्टनेन मारिता । स विवादे वैद्येन निषिद्धः । ततः शारीरो दण्डस्तस्य राज्ञा कृतः । एष दृष्टान्तः ॥ २७६ ॥ उपनयमाह—

कारणनिसेवि लहुसग, अगीयपच्चय विसोहि दट्ठूण ।
सव्वत्थ एवं पवंतगमण गीयागते दंडो ॥ २७७ ॥

आचार्येणान्यस्य कस्यापि साधोः कारणनिषेविणोऽगीतप्रत्ययनिमित्तं किञ्चिद् यथालघु प्रायश्चित्तं दत्तम्, विशोधिः प्रायश्चित्तमित्यनर्थान्तरम्, तद् दृष्ट्वा चिन्तयति—सर्वत्रैवं प्राय-श्चित्तं दातव्यम् । ततः प्रत्यन्ते ग्रामे नगरे वा तस्य गमनम् । तत्र गतः स ब्रूते—अह-मपि जानामि प्रायश्चित्तम् । तत्र निष्कारणं प्रतिसेविते भणति—भण 'मया कारणे प्रतिसेवि-तम्' । तत एवमुक्ते स ब्रूते—त्वं शुद्धस्तथापि किञ्चिदगीतार्थत्वप्रत्ययं प्रायश्चित्तं ददामि । एवं-कुर्वन् पश्चादन्येषां गीतार्थानामागमनम् एतैरन्यैर्गीतार्थैर्दृष्टः । तैर्द्रावितो दिक् च तस्यापहृता । ईदृशा ये पुरुषाः सा दुर्विदग्धा पर्षत् । एतस्या यो ददाति सूत्रमर्थं वा तस्मै प्रायश्चित्तं चतु-र्गुरु । जानत्या अजानत्याश्च सूत्रा-ऽर्थाप्रदाने चतुर्लघु ॥ २७७ ॥ अथवा द्विविधा पर्षत् लौकिकी लोकोत्तरा च । तत्र लौकिकी पञ्चविधा, तामेवाह—

द्विविधा पर्षत्

पूरंती छत्तंतिय, बुद्धी मंती रहस्सिया चेव ।
पंचविहा खलु परिसा, लोइय लोउत्तरा चेव ॥ २७८ ॥

पूरयन्ती छत्रवती बुद्धिर्मन्त्री राहस्यिकी च एवं लौकिकी लोकोत्तरा च खलु पञ्चविधा पर्षत् ॥ २७८ ॥ तत्र लौकिकीं पञ्चप्रकारामपि दर्शयति—

पञ्चविधा लौकिकी पर्षत्

पूरंतिया महाणो, छत्तविदिन्ना उ ईसरा बितिया ।
ससमयकुसला उ मंती, लोइय तह रोहिणिज्जा वा ॥ २७९ ॥

महाजनः पूरयन्तिका पर्षत् । वितीर्णच्छत्रा ईश्वरा द्वितीया छत्रान्तिका । स्वसमयकु-

शला तृतीया बुद्धिपर्षत् । चतुर्थी मन्त्री । पञ्चमी राहस्यिकी 'रोहिणीया नाम' वर्द्धिका-अन्तःपुरमहत्तरिका । एषा लौकिकी पञ्चप्रकारा पर्षत् ॥ ३७९ ॥ तत्र पूरयन्तिकामाह—

पूरयन्तिका छत्रान्तिका च

**नीइम्मियम्मि पूरति, रण्णो परिसा न जा घरमतीति ।**
**जे पुण छत्तविदिण्णा, अयंति ते बाहिरं सालं ॥ ३८० ॥**

यदा राजा निर्गच्छति तस्मिन् निर्गते यः कोऽपि महान् जनः स सर्वोऽपि राज्ञो ढौकते यावद्गृहं नायाति सा पर्षत् पूरयन्तिका । ये पुनः 'छत्रवितीर्णाः' प्रदत्तच्छत्रा राजानो भटभोजिकाश्च ते बाह्यां शालां यावदागच्छन्ति शेषा वार्यन्ते एषा छत्रान्तिका छत्रवती पर्षत् ॥ ३८० ॥ बुद्धिपर्षदमाह—

बुद्धि-पर्षत्

**जे लोग-वेय-समएहिँ कोविया तेहिँ पत्थिवो सहिओ ।**
**समयमतीतो परिच्छइ, परप्पवायागमे चेव ॥ ३८१ ॥**

ये 'लोक-वेद-समयेषु' लोके वेदे समये चेत्यर्थः 'कोविदाः' कुशलास्तैः सहितः पार्थिवः 'समयम्' अवसरम् 'अतीतः' प्राप्तः सन् परप्रवादानामागमाः परप्रवादागमास्तान् परीक्षते एषा बुद्धिपर्षत् ॥ ३८१ ॥ मन्त्रिपर्षदमाह—

मन्त्रि-पर्षत्

**जे रायसत्थकुसला, अतक्कुलीया हिता परिणया य ।**
**माइकुलीया वसिया, मंतेति निवो रहे तेहिं ॥ ३८२ ॥**

ये 'राजशास्त्रेषु' कौटिल्यप्रभृतिषु कुशला राजशास्त्रकुशलाः 'अतत्कुलीयाः' न राजकुले भवाः न पैतृकेण सम्बन्धेन सम्बद्धा इत्यर्थः 'हिताः' हितान्वेषिणः 'परिणताः' वयसा 'मातृकुलीयाः' मातृकेण सम्बन्धेन सम्बद्धाः 'वशिकाः' आयत्ताः तैः सह रहसि नृपो मन्त्रयति एषा मन्त्रिपर्षद् ॥ ३८२ ॥ रोहिणीयां पर्षदमाह—

रोहिणीया पर्षद्

**कुविया तोसेयव्वा, रयस्सला वारअऽण्णमासत्ता ।**
**छण्ण पगासे य रहे, मंतयते रोहिणिज्जेहिं ॥ ३८३ ॥**

या देवी राज्ञः कुपिता तां रोहिणीया निवेदयन्ति । ते वा दूतत्वेन प्रसादननिमित्तं प्रेष्यन्ते, यथा—युष्माभिः सा देवी तोषयितव्या । तथा या 'रजस्वला' ऋतुस्नाता तां रोहिणीयाः कथयन्ति । यस्या वा यस्मिन् दिवसे वारकस्तं राज्ञस्तस्याः कथयन्ति । याऽपि कन्या यौवनप्राप्ता तामपि परिणयनाय राज्ञे निवेदयन्ति । 'अन्नमासत्त'त्ति अन्यासक्ता—व्यभिचारिणीत्यर्थः तामपि राज्ञः कथयन्ति, यथा—एषा [2]देवी दुश्चारिणीति । अन्यान्यपि यानि च्छन्नानि प्रकाशानि च 'रहांसि' रतिकार्याणि तानि रोहिणीयैः सह राजा मन्त्रयते । एषा पञ्चमी राहस्यिका पर्षत् ॥ ३८३ ॥

तदेवमुक्ता पञ्चप्रकाराऽपि लौकिकी पर्षत् । सम्प्रति लोकोत्तरे पञ्चविधां पर्षदमाह—

पञ्चविधा लोकोत्तरा पर्षद्

**आवासगमादी या (जा), सुत्तकड पुरंतिया भवे परिसा ।**
**दसमादि उवरिमसुया, हवति उ छत्तंतिया परिसा ॥ ३८४ ॥**

आवश्यकमादिं कृत्वा यावत् सूत्रकृतमङ्गं तावदधीतश्रुता पूरयन्ती पर्षत्, न खल्वत्र

१ अयंति ता० ॥ २ देव ! दु° डे० ले० भा० ॥

कश्चनापि साधुः पठन् निरुध्यते । दशाश्रुतस्कन्धमादिं कृत्वा येषामुपरितनानि श्रुतानि सा छत्रान्तिका पर्षत्, तत्र हि ये परिणामिकास्ते न निवार्यन्ते, शेषास्त्वपरिणामिका अतिपरिणामिकाश्च निवार्यन्ते ॥ ३८४ ॥

**लोइय-वेइय-सामाइएसु सत्थेसु जे समोगाढा ।**
**ससमय-परसमयविसारया य कुसला य बुद्धिमती ॥ ३८५ ॥**

ये च लौकिकेषु वैदिकेषु सामायिकेषु च शास्त्रेषु समवगाढाः स्वसमय-परसमयविशारदाः कुशलाः सा बुद्धिमती पर्षत् ॥ ३८५ ॥ आह किं प्रयोजनं बुद्धिपर्षदा ? तत आह—

**आसन्नपतीभत्तं, खेयपरिस्समजतो तहा सत्थे ।**
**कहमुत्तरं च दाहिसि, अमुगो किर आगतो वादी ॥ ३८६ ॥**

बुद्धिपर्षदा सह श्रमं कुर्वत आसन्नप्रतिभत्वमुपजायते । तथा यः शास्त्रे निरन्तरव्याख्याकरणतः खेदपरिश्रमस्तस्य जयो भवति । कदाचित् परिश्रमे जातेऽपि व्याख्याकरणतस्तं परिश्रममपनयति । तथा सा बुद्धिपर्षद् एवं शिक्षयते–अमुकः किल आगतो वादी ततः कथं त्वमुत्तरं दास्यसि ? । एवं बुद्धिपर्षदा सह कृताभ्यासः सुखं परप्रवादिनं निगृह्णाति ॥ ३८६ ॥

उक्ता बुद्धिपर्षद् । मन्त्रिपर्षदमाह—

**पुव्वं पच्छा जेहिं, सिंगणादितविही समणुभूतो ।**
**लोए वेदे समए, कयागमा मंतिपरिसा उ ॥ ३८७ ॥**

यैः पूर्वं गृहवासे पश्चात् श्रमणभावे 'शृङ्गनादितविधिः' सर्वेषु कार्येषु मध्ये शृङ्गभूतं यत् कार्यं तत् शृङ्गनादितमुच्यते तद्विधिः समनुभूतः सा लोके वेदे समये च कृतागमा मन्त्रिपर्षद् ॥ ३८७ ॥ एतदेव व्याचिख्यासुराह—

**गिहवासे अत्थसत्थेहिँ कोविया केइ समणभावम्मि ।**
**कज्जेसु सिंगभूयं, तु सिंगनादिं भवे कज्जं ॥ ३८८ ॥**

पूर्वं गृहवासे अर्थशास्त्रेषु पश्चात् श्रमणभावे स्वसमय-परसमयेषु ये केचित् कोविदाः सा मन्त्रिपर्षद् । कार्येषु शृङ्गभूतं यत् कार्यं तत् शृङ्गनादितं भवति ॥ ३८८ ॥

किं तद् ? इत्याह—

**तं पुण चेइयनासे, तद्दव्वविणासणे दुविहभेदे ।**
**भत्तोवहिवोच्छेदे, अभिवायण-बंध-घायादी ॥ ३८९ ॥**

'तत्' पुनः शृङ्गनादितं कार्यं 'चैत्यविनाशः' लोकोत्तमभवन-प्रतिमाविनाशः, 'तद्द्रव्यविनाशनं' चैत्यद्रव्यविनाशनं चैत्यद्रव्यविद्रावणम्, तथा द्विविधो भेदः–मरणमुत्प्रव्राजनं वा, यो वा 'भक्तं' भिक्षां वारयति उपधिं वा, यथा–मा कोऽप्यमीषां भक्तमुपधिं वा दद्यादिति भक्तव्यवच्छेद उपधिव्यवच्छेदो वा, तथा कोऽपि धिग्जातीयो ब्रूते–ब्राह्मणान् अभिवादयत–वन्दध्वमिति, यो वा बन्धापयति पिट्टयति, आदिग्रहणाद् यो निर्विषयानाज्ञापयति आक्रोशयति वा प्रद्विष्टो राजादि, तद् अभिवादन-बन्ध-घातादि च शृङ्गनादितं कार्यम्, तद्विधियैः समनुभूतः सा मन्त्रिपर्षद् ॥ ३८९ ॥

---

१ भत्तं पाणं वा भा० ॥

**वितहं ववहरमाणं, सत्थेण वियाणतो निहोडेइ ।**
**अम्हं सपक्खदंडो, न एरिसो दिक्खिए दंडो ॥ ३९० ॥**

राजादिं वितथं व्यवहरन्तं मन्त्रिपर्षदन्तर्गतो 'विज्ञायकः' स्वसमय-परसमयशास्त्रकुशलः शास्त्रेण 'निहेठयति' सुखं वारयति, यथा—अस्माकं सपक्षे दण्डो भवति सङ्घो दण्डं करोतीत्यर्थः, न च राजा प्रभवति, नापि प्रपन्नदीक्षाकस्यैतादृशो दण्डः । एषा मन्त्रिपर्षत् ॥ ३९० ॥

सम्प्रति राहस्यिकीं पर्षदमाह—

**सल्लुद्धरणे समणस्स चाउकण्णा रहस्सिया परिसा ।**
**अज्जाणं चउकण्णा, छक्कण्णा अट्ठकण्णा वा ॥ ३९१ ॥**

द्विविधं शल्यम्—द्रव्यशल्यं भावशल्यं च । द्रव्यशल्यं कण्टकादि । भावशल्यं माया-निदान-मिथ्यात्वानि, अथवा भावशल्यं मूलोत्तरगुणातिचारः । ततः श्रमणस्य भावशल्योद्धरणे आचार्यसमीपे आलोचयत इत्यर्थः राहस्यिकी पर्षद् भवति । कथम्भूता ? इत्यत आह—'चतुष्कर्णा' द्वावाचार्यस्य द्वौ साधोरिति चत्वारः कर्णा यत्र सा । तथा आर्याणां चतुष्कर्णा षट्कर्णा वा । तत्र यदा निर्ग्रन्थी निर्ग्रन्थ्याः पुरत आलोचयति तदा चतुष्कर्णा, यथा निर्ग्रन्थस्य निर्ग्रन्थपार्श्वे आलोचयतः । यदा त्वद्वितीयस्थविरगुरुसमीपे आलोचयति सद्वितीया भिक्षुकी तदा षट्कर्णा । सद्वितीयतरुणगुरुसमीपे सद्वितीयाभिक्षुक्या आलोचयन्त्या अष्टकर्णा ॥ ३९१ ॥ तत्र प्रथमतः संयतस्य चतुष्कर्णा भावयति—

**आलोयणं पउंजइ, गारवपरिवज्जितो गुरुसगासे ।**
**एगंतमणावाए, एगो एगस्स निस्साए ॥ ३९२ ॥**

एकान्ते अनापाते 'एकः' अद्वितीयः 'एकस्य' अद्वितीयस्याचार्यस्य 'निश्रया' तत्पुरत इत्यर्थः 'गौरवपरिवर्जितः' ऋद्धि-रस-सातगौरवपरित्यक्तः, गौरवाद्धि सम्यगालोचयितव्यं न भवतीति तत्प्रतिषेधः, 'गुरुसमीपे' आलोचनार्हाचार्यसमीपे आलोचनां प्रयुङ्क्ते ॥ ३९२ ॥

कथम् ? इत्याह—

**विरहम्मि दिसाभिग्गह, उक्कुडुतो पंजली निसेज्जा वा ।**
**एस सपक्खे परपक्खे मोत्तु छण्णं निसिज्जं च ॥ ३९३ ॥**

एकान्तेऽपि यत्र कोऽपि न तिष्ठति तत्र 'विरहे' छन्ने प्रदेशे पूर्वं गुरोर्निषद्यां कृत्वा पूर्वामुत्तरां चरन्तिकां वा दिशमभिगृह्य वन्दनकं दत्त्वा उत्कुटुकः प्रबद्धाञ्जलिः अथाऽसौ व्याधिमान् प्रभूतं चाऽऽलोचनीयं ततो निषद्यामनुज्ञाप्यालोचयति । एष सपक्षे आलोचनाविधिः । 'परपक्षे' नाम संयती तत्र च्छन्नं मुक्त्वा आलोचना दातव्या, निषद्या च न कार्यते । इयमत्र भावना—यदा संयती संयतस्य पुरत आलोचयति तदा छन्नं वर्जयति, किन्तु यत्र लोकस्य संलोकस्तत्राऽऽलोचयति, निषद्यां चाऽऽचार्यस्य न करोति, आत्मनाऽप्युत्थिता आलोचयति ॥ ३९३ ॥ श्रमणीमधिकृत्यालोचनाविधेश्चतुष्कर्णत्वमाह—

**आलोयणं पउंजइ, गारवपरिवज्जिया उ गणिणीए ।**
**एगंतमणावाए, एगा एगाएँ निस्साए ॥ ३९४ ॥**

श्रमणी गौरवपारेवर्जिता गणिन्याः पुरत आलोचनां प्रयुङ्क्ते । क? इत्याह—एकान्तेऽनापाते 'एका' अद्वितीया 'एकस्याः' अद्वितीयाया गणिन्या निश्रया । ततो गुरुसमीपे श्रमणस्येव श्रमण्या अपि गणिन्याः पुरत आलोचयन्त्याश्चतुष्कर्णा पर्षद् भवति ॥ ३९४ ॥

षट्कर्णामाह—

आलोयणं पउंजइ, एगंते बहुजणस्स संलोए ।
अब्बितियथेरगुरुणो, सबिईया भिक्खुणी निहुया ॥ ३९५ ॥

अद्वितीयस्थविरगुरुसमीपे सद्वितीया भिक्षुकी 'निभृता' निर्व्यापारा न दिशो नापि विदिश आलोकयति, नापि यत्किञ्चिदुल्लापयतीत्यर्थः । एवम्भूता सती एकान्ते बहुजनस्य संलोके आलोचनां प्रयुङ्क्ते ॥ ३९५ ॥ अथ कीदृशी तस्या द्वितीया भवति? इत्यत आह—

नाण-दंसणसंपन्ना, पोढा वयस परिणया ।
इंगियागारसंपन्ना, भणिया तीसे बिइज्जिया ॥ ३९६ ॥

ज्ञान-दर्शनसम्पन्ना 'प्रौढा' समर्था या संयतस्य तस्या वा भावं विज्ञाय न मन्त्रणं कर्तुं ददाति, किन्तु वदति यद्यालोचितं तर्हि व्रजामो नो चेदालोचनयाऽपि न प्रयोजनमिति । तथा 'वयसा परिणता' परिणतवयाः । तथा 'इङ्गिताकारसम्पन्ना' इङ्गितेनाऽऽकारेण च यस्य यादृशो भावस्तस्य तं जानातीत्यर्थः । एवम्भूता सा तस्या द्वितीया भणिता । सा पुनः कियद्दूरे तिष्ठति? उच्यते—एके सूरयो वदन्ति—यत्रोभयोराकारा दृश्यन्ते तावन्मात्रे । अपरे ब्रुवते—यत्र श्रवणं शब्दस्येति ॥ ३९६ ॥ अष्टकर्णामाह—

आलोयणं पउंजइ, एगंते बहुजणस्स संलोए ।
सब्बितियतरुणगुरुणो, सब्बिइया भिक्खुणी निहुया ॥ ३९७ ॥

एकान्ते बहुजनस्य संलोके सद्वितीयस्य तरुणगुरोः समीपे सद्वितीया भिक्षुकी निभृता आलोचनां प्रयुङ्क्ते । तत्र भिक्षुक्या यादृशी द्वितीया तादृशी प्रागुक्ता ॥ ३९७ ॥

सम्प्रति यादृश आचार्यस्य द्वितीयस्तादृशमाह—

नाणेण दंसणेण य, चरित्त-तव-विणय-आलयगुणेहिं ।
वयपरिणामेण य अभिगमेण इयरो हवइ जुत्तो ॥ ३९८ ॥

ज्ञानेन दर्शनेन चारित्रेण तपसा विनयेन 'आलयगुणैः' बहिश्चेष्टाभिः प्रतिलेखनादिभिरुपशमगुणेन च तथा वयःपरिणामेन 'अभिगमेन' सम्यक्शास्त्रार्थकौशलेन युक्तो भवति आचार्यस्य 'इतरः' द्वितीयः ॥ ३९८ ॥

उक्ता पञ्चप्रकाराऽपि पर्षद् । सम्प्रति 'कयाऽधिकारः?' इति प्रतिपादयति—

छत्तंतियाएँ पगयं, जइ पुण सा होज्जिमेहि उववेया ।
तो देंति जेहिँ पगयं, तदभावे ठाणमादीणि ॥ ३९९ ॥

अत्र च्छत्रान्तिकया पर्षदा 'प्रकृतम्' अधिकारः । शेषाः पर्षद उच्चरितसदृशा इति प्ररूपिताः । तत्र यदि सा छत्रान्तिका पर्षद् 'एभिः' वक्ष्यमाणैर्गुणैरुपेता भवति तदा यकाभ्या-

१ सब्बितिया ता० ॥

मत्र प्रकृतं तौ कल्प-व्यवहारौ सूरयो ददति । 'तदभावे' वक्ष्यमाणगुणाभावे स्थानादीनि आदिग्रहणेन प्रकीर्णकानां परिग्रहः ददति ॥ ३९९ ॥ अथ के ते गुणाः ? इत्यत आह—

कल्प-व्यवहार-श्रवणाऽध्ययनाधिकारिणो गुणाः

बहुस्सुए चिरपव्वइए, कप्पिए य अचंचले ।
अवट्ठिए य मेहावी, अपरिस्सावी य जे विऊ ॥ ४०० ॥
पत्ते य अणुण्णाते, भावतो परिणामगे ।
एयारिसे महाभागे, अणुओगं सोउमरिहइ ॥ ४०१ ॥

बहुश्रुतश्चिरप्रव्रजितः कल्पिकोऽचञ्चलः अवस्थितो मेधावी अपरिश्रावी यश्च 'विद्' विद्वान् प्रभूताशेषशास्त्रपरिमलितबुद्धिः ॥ ४०० ॥

'पत्ति'त्ति पात्रं प्राप्तो वा, तथा अनुज्ञातः सन् भावतः परिणामकः, एतादृशो महाभागोऽनुयोगं श्रोतुमर्हति, सामर्थ्यात् कल्प-व्यवहारयोः । एष द्वारगाथाद्वयसङ्क्षेपार्थः । विस्तरार्थः प्रतिद्वारं वक्ष्यते ॥ ४०१ ॥ तत्र प्रथमं बहुश्रुतद्वारमाह—

बहुश्रुतद्वारम्

तिविहो बहुस्सुओ खलु, जहण्णओ मज्झिमो उ उक्कोसो ।
आयारपकप्पे कप्प नवम-दसमे य उक्कोसो ॥ ४०२ ॥

त्रिविधः खलु बहुश्रुतः, तद्यथा—जघन्यो मध्यम उत्कृष्टश्च । तत्र 'आचारप्रकल्पः' निशीथं तद्धारी जघन्यो बहुश्रुतः । मध्यमः 'कप्प' त्ति कल्प-व्यवहारधरः । उत्कृष्टो नवम-दशमपूर्वधरः ॥ ४०२ ॥ सम्प्रति चिरप्रव्रजितद्वारमाह—

चिरप्रव्रजितद्वारम्

चिरपव्वइओ तिविहो, जहण्णओ मज्झिमो य उक्कोसो ।
तिवरिस पंचग मज्झो, वीसतिवरिसो य उक्कोसो ॥ ४०३ ॥

चिरप्रव्रजितस्त्रिविधः, तद्यथा—जघन्यो मध्यम उत्कृष्टश्च । तत्र त्रिवर्षप्रव्रजितो जघन्यश्चिरप्रव्रजितः । पञ्चवर्षप्रव्रजितो मध्यमः । विंशतिवर्षप्रव्रजित उत्कृष्टः ॥ ४०३ ॥

अथ केन बहुश्रुतेन चिरप्रव्रजितेन चाधिकारः ? इत्यत आह—

बहुसुय चिरपव्वइओ, उ एत्थ मज्झेसु होति अहिगारो ।
एत्थ उ कमे विभासा, कम्हा उ बहुस्सुओ पढमं ॥ ४०४ ॥

अत्र बहुश्रुतश्चिरप्रव्रजितश्च यो मध्यस्ताभ्यामधिकारः । गाथायां सप्तमी तृतीयार्थे । अत्र 'कमे' क्रमविषये विभाषा कर्त्तव्या, सा चैवम्—कस्मात् प्रथमं बहुश्रुत उक्तः ? यतः प्रथमं प्रव्रज्या भवति, ततः श्रुतम्, ततः प्रथमं चिरप्रव्रजितस्योपादानं युज्यते; नैष दोषः, नियमविशेषप्रदर्शनार्थं ह्येवमुपादानम्—यो बहुश्रुतः स नियमाच्चिरप्रव्रजितः, येन त्रिवर्षप्रव्रजितस्य निशीथमुद्दिश्यते, पञ्चवर्षप्रव्रजितस्य कल्प-व्यवहारौ, विंशतिवर्षप्रव्रजितस्य दृष्टिवादः, तेन न दोष इति ॥ ४०४ ॥ सम्प्रति कल्पिकद्वारमाह—

कल्पिकद्वारम्

सुत्ते अत्थे तदुभय, उव्वट्ट विचार लेव पिंडे य ।
सिज्जा वत्थे पाए, उग्गहण विहारकप्पे य ॥ ४०५ ॥

कल्पिको द्वादशविधः, तद्यथा—सूत्रे १ अर्थे २ 'तदुभयस्मिन्' सूत्रार्थोभयलक्षणे ३

---

१ पढमो ता० ॥ २ उवट्ठ वीचा° ता० ॥

उपस्थापनायां ४ विचारे ५ पात्रलेपे ६ पिण्डे ७ तथा शय्यायां ८ वस्त्रे ९ पात्रे १० अवग्रहणे ११ विहारकल्पे च १२ । एष प्रतिद्वारगाथासमासार्थः ॥ ४०५ ॥

साम्प्रतमेनामेव विवरीषुः प्रथमतः सूत्रकल्पिकमाह—

सूत्र-कल्पिकः

**सुत्तस्स कप्पितो खलु, आवस्सगमादि जाव आयारो ।**
**तेण पर तिवरिसादी, पकप्पमादी य भावेणं ॥ ४०६ ॥**

**आवश्यक**मादिं कृत्वा यावदाचारस्तावत् सर्वोऽपि सूत्रस्य कल्पिको भवति, न खल्वेतावत् सूत्रं यावत् कोऽपि पठन् विनिवार्यते । ततः परं त्रिवर्षप्रव्रजितमादिं कृत्वा यद् यद् **व्यवहारे** दशमोद्देशकपर्यन्ते यथा भणितं तत् तथोपदिश्यते यावद्विंशतिवर्षपर्यायः सर्वश्रुतानुपाती भवति । नवर**माचारप्रकल्प**मादिं कृत्वा यान्यपवादबहुलान्यध्ययनानि यानि चातिशायीन्य**रुणोपपात**प्रभृतीनि तानि यदा भावे परिणतो भवति तदोद्दिश्यन्ते ॥ ४०६ ॥

आह त्रिषु वर्षेष्वपरिपूर्णेष्वाचारे पठिते किं कुर्यात्? अत आह—

**सुत्तं कुणति परिजितं, तदत्थगहणं पइण्णगाइं वा ।**
**इति अंग-ऽज्झयणेसुं, होति कमो जाहगो नायं ॥ ४०७ ॥**

यत् पठितं सूत्रं तत् परिजितं कुर्यात् । यदि वा तस्य सूत्रस्यार्थग्रहणं विदध्यात्, प्रकीर्णकादि वा सूत्रतोऽर्थतश्चाधीते । एवमङ्गानामध्ययनानां चातिशायिनां यावत् कल्पिको भवति तावदेष क्रमो ज्ञातव्यः । जाहकज्ञातं चात्र पूर्वोपन्यस्तमुपन्यसनीयम्, जाहक इव परिजितौ सूत्रा-ऽर्थौ कुर्यादिति भावार्थः ॥ ४०७ ॥ अर्थकल्पिकमाह—

अर्थ-कल्पिकः

**अत्थस्स कप्पितो खलु, आवासगमादि जाव सूयगडं ।**
**मोत्तूणं छेयसुयं, जं जेणऽहियं तदट्ठस्स ॥ ४०८ ॥**

**आवश्यक**मादिं कृत्वा यावत् **सूत्रकृत**मङ्गं तावद् यद् येनाधीतं स तस्यार्थस्य कल्पिको भवति । **सूत्रकृताङ्ग**स्योपर्यपि छेदश्रुतं मुक्त्वा यद् येनाधीतं सूत्रं स तस्य—सूत्रस्य समस्तस्याप्यर्थस्य कल्पिको भवति । छेदसूत्राणि पुनः पठितान्यपि यावदपरिणतस्तावन्न श्राव्यते, यदा तु परिणतो भवति तदा कल्पिकः ॥ ४०८ ॥ अधुना तदुभयकल्पिकमाह—

तदुभय-कल्पिकः

**तदुभयकप्पिय जुत्तो, तिगम्मि एगाहिएसु ठाणेसु ।**
**पियधम्मऽवज्जभीरू, ओवम्मं अजवइरेहिं ॥ ४०९ ॥**

तदुभयं—सूत्रमर्थश्च तस्मिन् कल्पिको युक्तः । किमुक्तं भवति?—यो द्वावपि सूत्रा-ऽर्थौ युगपद् ग्रहीतुं समर्थः स तदुभयकल्पिकः । अथवा तदुभयकल्पिकः 'त्रिके एकाधिकयोः स्थानयोर्युक्तः' त्रिकं नाम सूत्रमर्थस्तदुभयं च, तत्र सूत्रादर्थोऽधिकः, अर्थादधिकमुभयम्, एवमेकस्मादर्थादधिके ये उभे स्थाने सूत्रा-ऽर्थरूपे तत्र युक्तः—योग्यः स तदुभयकल्पिकः । अथवा प्रियधर्मा इति चत्वारो भङ्गाः सूचिताः—प्रियधर्मा नामैको न दृढधर्मा १ दृढधर्मा नामैको न प्रियधर्मा २ एकः प्रियधर्माऽपि दृढधर्माऽपि ३ एको न प्रियधर्मा नापि दृढधर्मा ४ । अत्र चतुर्थभङ्गोऽवस्तु । शेषभङ्गत्रिके यत एकस्मादेकैकगुणयुक्तात् स्थानाद् प्रथमभङ्गरू-

---

१ परिणतं मो० ले० त० ॥ २ °त्तूण छेदसुत्तं ता० ॥

पाद् द्वितीयभङ्गरूपाद् वा येऽधिके स्थाने प्रियधर्मत्व-दृढधर्मत्वलक्षणे तयोर्युक्तः । स च नियमादवद्यभीरुर्भवति, अवद्यं—कर्म तस्माद्भीरुः, तत आह—“अवज्जभीरू” स तदुभयकल्पिकः । अत्रौपम्यमार्यवज्रैः, [सः] बालभावे कर्णाभ्याहृतं सूत्रं कृतवान्, पश्चात् तस्योद्दिष्टं समुद्दिष्टमनुज्ञातम् अर्थश्च तदैव द्वितीयपौरुष्यां कथितः । एवमन्यस्यापि द्रष्टव्यम् ॥ ४०९ ॥

तथा चाह—

**पुव्वभवे वि अहीयं, कण्णाहडगं व बालभावम्मि ।**
**उत्तममेहाविस्स व, दिज्जति सुत्तं पि अत्थो वि ॥ ४१० ॥**

यस्य पूर्वभवेऽधीतमागच्छति बालभावे वा कर्णाहृतं कृतं तस्य, उत्तममेधाविनो वा युगपत्सूत्रमप्यर्थोऽपि च दीयते । एष उभयकल्पिकः ॥ ४१० ॥ साम्प्रतमुपस्थापनाकल्पिकमाह—

उपस्थापनाकल्पिकः

**अप्पत्ते अकहित्ता, अणहिगयऽपरिच्छणे य चउगुरुगा ।**
**दोहि गुरू तवगुरुगा, कालगुरू दोहि वी लहुगा ॥ ४११ ॥**

सूत्रेऽसमाप्ते उपस्थाप्यमाने उपस्थापयितुः प्रायश्चित्तं चत्वारो गुरुकाः । कथम्भूताः ? इत्याह—द्वाभ्यां गुरवः, तद्यथा—तपसाऽपि गुरुकाः कालेनापि गुरुकाः । अथ सूत्रं प्राप्तस्तथापि तस्यार्थमकथयित्वा यदि तमुपस्थापयति तदा तस्य चत्वारो लघुकाः, नवरं कालेनैकेन लघवः । अथ कथितोऽर्थः परं नाद्याप्यधिगतः अथवाऽधिगतः परमद्यापि न सम्यक् तं श्रद्दधाति तमनधिगतार्थमश्रद्दधानं वा उपस्थापयतश्चत्वारो लघुकाः, नवरमेकेन तपसा लघवः । अथाधिगतार्थमप्यपरीक्ष्योपस्थापयति तदा चत्वारो लघुकाः, तपसाऽपि कालेनापि च लघवः । न केवलमेतत् प्रायश्चित्तं किन्त्वाज्ञादयश्च दोषाः । तथा सर्वत्र षण्णां जीवनिकायानां यद् विधास्यति तत् सर्वमुपस्थापयन् प्राप्नोति । तस्माद् यत एवं प्रायश्चित्तमाज्ञादयश्च दोषास्तस्मादपठिते षड्जीवनिकासूत्रे नाप्यनधिगतेऽर्थे नापि तस्मिन्नपरीक्षिते उपस्थापना कर्त्तव्या ॥ ४११ ॥

अथ कियन्तः षड्जीवनिकायामर्थाधिकाराः ? तत आह—

षड्जीवनिकाया अर्थाधिकाराः

**जीवा-ऽजीवाभिगमो, चरित्तधम्मो** (ग्रन्थाग्रम्—२०००) **तहेव जयणा य ।**
**उवएसो धम्मफलं, छज्जीवणियाएँ अहिगारा ॥ ४१२ ॥**

षड्जीवनिकायामिमे पञ्चाधिकाराः, तद्यथा—प्रथमो जीवा-ऽजीवाभिगमः । द्वितीयो महाव्रतसूत्रादारभ्य चारित्रधर्मः । तृतीयो “जयं चरे जयं चिट्ठे” (दश० अ० ४ गा० ८) इत्यादिना यतना । तदनन्तरमुपदेशः । ततो धर्मफलम् । एते च विस्तरतो दशवैकालिकटीकातः परिभावनीयाः ॥ ४१२ ॥ तत्राऽऽस्तामुपस्थापना, कथं स प्रव्राजयितव्यः ? इति तदेवोच्यते । तत्र षड्विधो द्रव्यकल्पो वक्तव्य इति तमभिधित्सुराह—

षट्प्रकारो द्रव्यकल्पः

**पव्वावण मुंडावण, सिक्खावण उवट्ठ संभुंजणा य संवसणा ।**
**एसो उ दवियकप्पो, छव्विहतो होति नायव्वो ॥ ४१३ ॥**

---

१ इत आरभ्याग्रेतना गाथाश्चूर्णिकृता क्रमभेदेन व्याख्याता दृश्यन्ते—अप्पत्ते अकहित्ता० ४११ पढिए य कहिय० ४१४ पव्वावण मुंडावण० ४१३ जीवाजीवाभिगमो० ४१२ अप्पत्ते अकहित्ता० ४१५ ॥

२ सिक्खावण उवट्ठ भुंज संवसणा ता० ॥

प्रव्राजना नाम यो धर्मे कथितेऽकथिते वा प्रव्रजामीत्यभ्युत्थितः [सः] प्रथमतः पृच्छ्यते–कस्त्वम्? कुतो वा समागतः? किंनिमित्तं वा प्रव्रजिष्यति? । तत्र यदा पृच्छापरिशुद्धो भवति तदा प्रव्राजयितुमभ्युपगम्यते, अभ्युपगम्य च प्रशस्तेषु द्रव्यादिष्वाचार्यः स्वयमेवाष्टाग्रहणं करोति । एतावता प्रव्राजनाद्वारम् । तदनन्तरं स्थिरहस्तेन लोचे कृते रजोहरणमर्पयित्वा तस्य सामायिकसूत्रं दीयते, ततः–"सामायिकं मे दत्तम् इच्छामोऽनुशिष्टिम्" इति; सूरयो ब्रुवते–निस्तारकपारगो भव, क्षमाश्रमणानां गुणैर्वर्धस्व । एषा मुण्डापना । "सिक्खावण"त्ति तदनन्तरं द्विविधामपि शिक्षां ग्राह्यते, तद्यथा–ग्रहणशिक्षामासेवनाशिक्षां च । ग्रहणशिक्षा नाम पाठः, आसेवनाशिक्षा सामाचारीशिक्षणम् । यदा द्विविधामपि शिक्षां ग्राहितो भवति तदा स उपस्थाप्यते प्रशस्तेषु द्रव्य-क्षेत्रादिषु । द्रव्यतः शालिकरणे इक्षुकरणे चैत्यवृक्षे वा । क्षेत्रतः पद्मसरसि सानुनादे चैत्यगृहे वा । कालतश्चतुर्थ्यष्टम्यादिवर्जितासु तिथिषु । भावतोऽनुकूले नक्षत्रे, यदि तस्य जन्मनक्षत्रं न ज्ञायते तदाऽऽचार्यस्यानुकूले नक्षत्रे सुन्दरे मुहूर्त्ते यथाजातेन लिङ्गेन; तद्यथा–रजोहरणेन निषद्याद्वयोपेतेन मुखपोतिकया चोलपट्टेन च वामपार्श्वे स्थापयित्वा एकैकं महाव्रतं त्रीन् वारान् उच्चार्यते यावद् रात्रिभोजनम् । अथ ते द्वौ त्रयो बहवो वा भवेयुस्ततो यथावयोवृद्धम्; अथ ते क्षत्रिया राजपुत्राः तत्र यः स्वत एवासन्नतर आचार्यस्य स रत्नाधिकः क्रियते, इतरो लघुः; अथ द्वावप्युभयतः पार्श्वयोः समौ व्यवस्थितौ तदा तौ द्वावपि समरत्नाधिकौ व्रतेषूच्चारितेषु प्रदक्षिणां कारयित्वा पादयोः पात्यते (पात्येते) भाण्यते (भाण्येते) च–महाव्रतानि ममारोपितानि, इच्छामोऽनुशिष्टिम्, शेषाणामपि साधूनां निवेदयामि । गुरुर्भणति–निवेदय । इदं च भणति–निस्तारकपारगो भव, क्षमाश्रमणानां च गुणैर्वर्धस्व । एवमुपस्थिते द्विविधः सङ्गहः साधोः, यथा–अहं तव आचार्यः, अमुकस्ते उपाध्यायः । साध्व्यास्त्रिविधः सङ्ग्रहः, तत्र तृतीया अमुका ते प्रवर्त्तिनी । एवमुपस्थाप्य केषाञ्चित् पञ्चकल्याणकं केषाञ्चिदभक्तार्थं केषाञ्चिदाचाम्लं केषाञ्चिन्निर्विकृतिकमपरेषां न किञ्चित्, किं बहुना? यद् यस्य तपःकर्म आवलिकागतं स तद् दत्त्वा तेन सहैकत्र मण्डल्यां सम्भुङ्क्ते, संवसनं च करोति । शैक्षकपरिपालना चेयम्–यावन्नोपस्थाप्यते तावन्न भिक्षां हिण्डापयितव्यः ॥ ४१३ ॥ कथं पुनरुपस्थापनीयः? इत्यत आह—

पढिए य कहिय अहिगय, परिहर उवठावणाए सो कप्पो ।
छक्कं तीहिँ विसुद्धं, परिहर नवगेण भेदेण ॥ ४१४ ॥

सूत्रं प्रथमतः पाठयित्वा तदनन्तरमर्थं कथयित्वा ततः 'अधिगतोऽनेनार्थः, सम्यक् श्रद्धानविषयीकृतश्च' इति परीक्ष्य यदा 'षट्कं' षड्जीवनिकायान् 'त्रिभिः' मनो-वाक्-कायैर्विशुद्धं भावतो न परानुवृत्त्या परिहरति । कथं परिहरति? इत्यत आह–नवकभेदेन षट्कम्, मनसा स्वयं परिहरति अन्यैः परिहारयति परिहरन्तमन्यं समनुजानाति, एवं वाचा कायेन च प्रत्येकं त्रयस्त्रयो भेदा द्रष्टव्याः ॥ ४१४ ॥

१ °प्यसि त° डे० त० कां० ॥ २ °कः पा° भा० मो० ॥

एष उपस्थापनायाः कल्पः । सम्प्रति विचारकल्पमाह—

विचार-कल्पः

अप्पत्ते अकहित्ता, अणहिगयऽपरिच्छणम्मि चउगुरुगा ।
दोहि गुरू तवगुरुगा, कालगुरू दोहि वी लहुगा ॥ ४१५ ॥
पढिते य कहिय अहिगय, परिहरति वियारकप्पिओ सो उ ।
तिविहं तीहि विसुद्धं, परिहर नवगेण भेदेणं ॥ ४१६ ॥

सूत्रे सप्तसप्तकलक्षणे ओघनिर्युक्तिलक्षणे वा अप्राप्ते यदि विचारभूमावेकाकिनं प्रस्थापयति तदा तस्य प्रायश्चित्तं चत्वारो गुरुकाः । ते च द्वाभ्यां गुरुकाः, तद्यथा—तपोगुरुकाः कालगुरुकाश्च । अथ प्राप्तेऽपि श्रुते तदर्थमकथयित्वा कथनेऽपि 'अधिगतस्तदर्थो न वा ?' इत्यपरिज्ञाय अधिगतमपि 'सम्यक् श्रद्धाति न वा ?' इत्यपरीक्ष्य यदि प्रेषयति तदा प्रत्येकमकथनेऽनधिगमेऽपरीक्षणे च तस्य प्रायश्चित्तं चत्वारो लघुकाः । ते च विचाराधिकारात् सर्वत्रापि च द्वाभ्यां लघवः, तद्यथा—तपोलघुकाः काललघुकाश्च । न केवलमेतत् प्रायश्चित्तं किन्त्वाज्ञादयश्च दोषाः । संयमविराधना त्वेवम्—सोऽप्राप्तश्रुतादित्वादेकाकी प्रस्थापितः षट्सु जीवनिकायेषु संज्ञां व्युत्सृजेत्, उच्चारं चाऽस्थण्डिले व्युत्सृजन् कुर्यात् । विरुद्धदिगादिषु व्युत्सर्जनेनाऽऽयुषोऽपगमत आत्मविराधना ॥ ४१५ ॥ तस्माद्—

यदा सूत्रं सप्तसप्तकादिरूपं पठितं भवति तस्य चार्थः कथितोऽधिगतोऽधिगम्य च सम्यक् श्रद्धानविषयीकृतस्ततो निशीथोक्तेन प्रकारेण परीक्ष्यमाणः 'त्रिविधं' सचित्तमचित्तं मिश्रं च स्थण्डिलं परिहारविषयेण नवकभेदेन 'त्रिभिः' मनो-वाक्-कायैर्विशुद्धं परिहरति, तद्यथा—सचित्तं स्थण्डिलं तद् मनसा स्वयं न गच्छति नाप्यन्यान् गमयति न चाप्यन्यं गच्छन्तमनुजानाति । एवं वाचा ३ कायेनापि ३ । एवं मिश्रमचित्तं चापातसंलोकादिदोषदुष्टम् । स भवति विचारकल्पिकः ॥ ४१६ ॥ विचारभूमौ गतेन स्थण्डिले उपवेष्टव्यम्, अतः स्थण्डिले वक्तव्ये येऽर्थाधिकारास्तानभिधित्सुर्द्वारगाथामाह—

### स्थण्डिलनिरूपणा

स्थण्डिल-निरूपणायाम-र्थाधिकाराः

भेया सोहि अवाया, वज्जणया खलु तहा अणुण्णा य ।
कारणविही य जयणा, थंडिल्ले होंति अहिगारा ॥ ४१७ ॥

प्रथमतो भेदाः स्थण्डिलस्य वक्तव्याः । तदनन्तरं स्थण्डिले व्युत्सृजतः 'शोधिः' प्रायश्चित्तम् । ततोऽपायाः । तदनन्तरं वर्जनद्वारम् । ततः परमनुज्ञा । ततः कारणविधिः । तदनन्तरं यतना । एते वक्ष्यमाणाः स्थण्डिले अधिकाराः ॥ ४१७ ॥

तत्र प्रथमतो भेदद्वारप्रतिपादनार्थमाह—

स्थण्डिलस्य भेदाः

अचित्तेण अचित्तं, मीसेण अचित्त छक्कमीसेणं ।
सचित्त छक्कएणं, अचित्त चउभंग एक्केक्के ॥ ४१८ ॥

अचित्ते स्थण्डिले पन्थानमधिकृत्य त्रयो भेदाः—अचित्तं स्थण्डिलमचित्तेन पथा गम्यते १; अचित्तं मिश्रेण पथा २, केन मिश्रेण ? इत्यत आह—षट्कायमिश्रेण; तथा अचित्तं 'सचि-

१ सप्तसप्तिकाख्या आचाराङ्गसूत्रे द्वितीयश्रुतस्कन्धे द्वितीया चूलिका ॥

तेन पथा' स पन्थाः सचित्तः, कथम्? इत्याह—'षट्केन' षड्भिर्जीवनिकायैः १; एवमचित्ते स्थण्डिले त्रयो भेदाः। एवं मिश्रे ३ सचित्ते ३ च। एतेषां अचित्त-मिश्र-सचित्तानामेकैकस्मिन् भङ्गे चतुर्भङ्गी ॥ ४१८ ॥ तामेवोपदर्शयति—

**अणवायमसंलोए, अणवाए चेव होति संलोए।**
**आवायमसंलोए, आवाए चेव संलोए ॥ ४१९ ॥**

अनापातमसंलोकमिति प्रथमो भङ्गः, अनापातं संलोकवदिति द्वितीयः, आपातवदसंलोकमिति तृतीयः, आपातवत् संलोकवदिति चतुर्थः। गाथायां मत्वर्थीयप्रत्ययस्य लोपः प्राकृतत्वात्, अभ्रादित्वाद्वा अकारप्रत्ययः। अमीषां चतुर्णां भङ्गानां प्रथमो भङ्गोऽनुज्ञातः, शेषाः प्रतिकुष्टाः। निर्ग्रन्थीनां तृतीयोऽनुज्ञातः ॥ ४१९ ॥ चतुर्थं स्थण्डिलं व्याख्यानयति—

आपातवत् संलोकवत् स्थण्डिलम्

**तत्थाऽऽवायं दुविहं, सपक्ख-परपक्खतो उ नायव्वं।**
**दुविहं होइ सपक्खे, संजय तह संजतीणं च ॥ ४२० ॥**
**संविग्गमसंविग्गा, संविग्ग मणुण्ण एतरा चेव।**
**असंविग्गा वि य दुविहा, तप्पक्खिय एयरा चेव ॥ ४२१ ॥**

'तत्र' आपातवत्-संलोकवतोर्मध्ये 'आपातम्' आपातवद् द्विविधं ज्ञातव्यम्, तद्यथा—'स्वपक्षतः परपक्षतश्च' स्वपक्षापातवत् परपक्षापातवच्चेत्यर्थः। तत्र 'स्वपक्षे' स्वपक्षविषये द्विविधमापातवत्, तद्यथा—'संयतानां संयतीनां च' संयतापातवत् संयत्यापातवच्चेति भावः ॥४२०॥

संयता अपि द्विविधाः—संविग्ना असंविग्नाश्च। संविग्ना उद्यतविहारिणः, असंविग्नाः शिथिलाः पार्श्वस्थादयः। संविग्ना अपि द्विविधाः—'मनोज्ञाः' साम्भोगिकाः 'इतरे' अमनोज्ञाः—असाम्भोगिकाः। असंविग्ना अपि द्विविधाः—'तत्पाक्षिकाः' संविग्नपाक्षिकाः 'इतरे' असंविग्नपाक्षिकाः ॥ ४२१ ॥ उक्तं स्वपक्षापातवत्। सम्प्रति परपक्षापातवत् प्राह—

**परपक्खे वि य दुविहं, माणुस तेरिच्छगं च नायव्वं।**
**एक्केक्कं पि य तिविहं, पुरिसित्थि नपुंसगं चेव ॥ ४२२ ॥**

'परपक्षेऽपि' परपक्षविषयेऽप्यापातवद् द्विविधं ज्ञातव्यम्—'मानुषं तैरश्चं च' मनुष्यापातवत् तिर्यगापातवच्चेत्यर्थः। 'एकैकमपि' मानुषं तैरश्चं च त्रिविधम्, तद्यथा—पुरुषवत् स्त्रीवद् नपुंसकवच्च, पुरुषापातवत् स्त्र्यापातवद् नपुंसकापातवच्चेति भावः ॥ ४२२ ॥

**पुरिसावायं तिविहं, दंडिय कोडुंबिए य पागइए।**
**ते सोयऽ-सोयवादी, एमेव नपुंस-इत्थीसु ॥ ४२३ ॥**

'पुरुषापातं' पुरुषापातवत् त्रिविधम्, तद्यथा—'दण्डिके कौटुम्बिके प्राकृते च' दण्डिकपुरुषापातवत् कौटुम्बिकपुरुषापातवत् प्राकृतपुरुषापातवच्चेत्यर्थः। दण्डिका राजकुलानुगताः, कौटुम्बिकाः शेषा महर्द्धिकाः, इतरे प्राकृताः। 'ते च' त्रयोऽपि प्रत्येकं द्विविधाः—शौचवादिनोऽशौचवादिनश्च। 'एवमेव' अनेनैव प्रकारेण नपुंसक-स्त्रियोरपि वक्तव्यम्। किमुक्तं भवति?—नपुंसकापातवत् स्त्र्यापातवच्च प्रत्येकं प्रथमतो दण्डिकादिभेदतस्त्रिविधम्। ततः शौचवाद्यशौचवादिभेदतः पुनरेकैकं द्विविधम् ॥ ४२३ ॥

उक्तं मनुष्यापातवद् । अधुना तिर्यगापातवदाह—

**दित्तमदित्ता तिरिया, जहण्णमुक्कोस मज्झिमा तिविहा ।**
**एमेवित्थि-नपुंसा, दुगुंछिय-ऽदुगुंछिया नवरं ॥ ४२४ ॥**

तिर्यञ्चो द्विविधाः—दृप्ता अदृप्ताश्च । दृप्ता दर्पवन्तः, अदृप्ताः शान्ताः । ते प्रत्येकं त्रिविधाः—जघन्या उत्कृष्टा मध्यमाश्च । जघन्या एडकादयः, मध्यमा महिषादयः, उत्कृष्टा हस्त्यादयः । एते किल पुरुषा उक्ताः । एवमेव स्त्री-नपुंसका अपि वक्तव्याः । नवरं ते दृप्ता अदृप्ताश्च प्रत्येकं द्विविधा विज्ञेयाः, तद्यथा—जुगुप्सिता अजुगुप्सिताश्च । जुगुप्सिता गर्दभ्यादयः, इतरे अजुगुप्सिताः । उक्तमापातवत् । संलोकवद् मनुष्येष्वेव द्रष्टव्यम् । ते च मनुष्यास्त्रिविधाः, तद्यथा—पुरुषाः स्त्रियो नपुंसकाश्च । एकैके प्रत्येकं त्रिविधाः—प्राकृताः कौटुम्बिका दण्डिकाश्च । पुनरेकैके द्विविधाः—शौचवादिनोऽशौचवादिनश्च । उक्तञ्च—

आलोगो मणुएसुं, पुरिसित्थि-नपुंसगाण बोधव्वो ।
पायय कुडुंबि दंडिय, असोय तह सोयवादीणं ॥

तदेवमापात-संलोकौ चरमभङ्गे, द्वितीयेऽऽपातः, तृतीये संलोकः । उक्ता भेदप्रभेदयुक्ता एते स्थण्डिलभेदाः ॥ ४२४ ॥ गतं भेदद्वारम् । अधुना शोधिद्वारमाह—

**मणुय-तिरिएसु लहुगा, चउरो गुरुगा य दित्ततिरिएसु ।** शोधिद्वारम्
**तिरियनपुंसित्थीसु य, मणुयत्थि-नपुंसगे गुरुगा ॥ ४२५ ॥**

मनुष्याणां शौचवादिनां पुरुषाणां तिरश्चां च पुरुषाणामदृप्तानामापाते गाथायां सप्तमी षष्ठ्यर्थे संज्ञां व्युत्सृजतः प्रायश्चित्तं चत्वारो लघुकाः । "गुरुगा य दित्ततिरिएसु" इति दृप्तानां तिरश्चामापाते चत्वारो गुरुकाः । तथा 'तिर्यङ्नपुंसक-स्त्रीषु' तिर्यग्योनीनां नपुंसक-स्त्रीणां दृप्तानामापाते "मणुस्सत्थी (मणुयत्थि) नपुंसगे" इति मनुष्याणां स्त्री-नपुंसकानां शौचवादिनामापाते प्रत्येकं प्रायश्चित्तं चत्वारो गुरुकाः ॥ ४२५ ॥

**मणुय-तिरियपुंसेसुं, दोसु वि लहुगा तवेण कालेण ।**
**कालगुरू तवगुरुगा, दोहिँ गुरू अद्धोकंती वा ॥ ४२६ ॥**

मनुष्याणामशौचवादिनां पुरुषाणां तिरश्चामदृप्तानां पुरुषाणामापाते द्वयानामपि पृथक् पृथक् प्रायश्चित्तं चत्वारो लघुकास्तपसा कालेन च लघवः । मनुष्यस्त्री-नपुंसकानामशौचवादिनामापाते चत्वारो गुरुकाः द्वाभ्यां गुरुकाः, तद्यथा—कालगुरुकास्तपोगुरुकाः । अर्द्धापक्रान्तिर्वा द्रष्टव्या । सा चैवम्—तिरश्चां दृप्तानां पुरुषाणामापाते मनुष्याणां गृहिणां पाषण्डिनां वा पुरुषाणामशौचवादिनामापाते चत्वारो लघुकाः कालगुरुकाः, तिर्यक्स्त्री-नपुंसकानामदृप्तानामजुगुप्सिता-

१ "मणुयतिरिएसु' गाथाष्टकं कण्ठ्यम् । सोधि त्ति गतम् ।" इत्यनेन चूर्णिग्रन्थेन चूर्णिकृता "भद्द तिरी पासंडे०" ४२९ गाथां यावत् शोधिद्वारसत्कं गाथाष्टकमावेदितम् इति "पागय कोडुंबिय०" इति ४२७ गाथाटीकायां टीकाकृद्भिः "उक्तं च" इति उल्लिख्य यद् "पागइयऽसोयवादी०" इत्यादि गाथात्रिकं निष्टङ्कितं तत् चूर्णिकारमतेन भाष्यसत्कमिति सम्भावयामः । न खल्वेतद् "पागइयसोयवादी०" इत्यादिकं गाथात्रिकमस्मत्पार्श्ववर्तिनीषु भाष्यप्रतिषु क्वापि दृश्यते ॥

नीमापाते कालगुरुकाः चत्वारो लघुकाः, तेषामेव तिर्यक्स्त्री-नपुंसकानां दृप्तानां जुगुप्सितानां चापाते चत्वारो लघुकास्तपोगुरवः, मनुष्यस्त्री-नपुंसकानामशौचवादिनामपि त एव तपोगुरवश्चत्वारो लघुकाः ॥ ४२६ ॥ इयमेकेषामाचार्याणां मतेनार्द्धावक्रान्तिरुपदर्शिता । सम्प्रति भाष्यकारोऽन्यथाऽर्द्धावक्रान्तिमाह—

**पागय कोडुंबिय दंडिए य अस्सोय-सोयवादीसु ।**
**चउगुरुगा जमलपया, अहवा चउ छ च गुरु-लहुगा ॥ ४२७ ॥**

प्राकृते कौटुम्बिके दण्डिनि च प्रत्येकमशौचवादिनि शौचवादिनि चार्द्धावक्रान्तिरवसेया। सा चैवम्—प्राकृतानामशौचवादिनां पुरुषाणामापाते चत्वारो लघुकास्तपसा कालेन च लघवः, तेषामेव शौचवादिनां प्राकृतपुरुषाणामापाते त एव चत्वारो लघवः कालगुरुकाः; कौटुम्बिकानामशौचवादिनां पुरुषाणामापाते कालगुरुकाश्चत्वारो लघवः, तेषामेव कौटुम्बिकपुरुषाणां शौचवादिनामापाते चत्वारो लघवस्तपोगुरुकाः; दण्डिकपुरुषाणामशौचवादिनामापाते तपोगुरुकाश्चतुर्लघवः, तेषामेव शौचवादिनामापाते चतुर्लघवो द्वाभ्यां गुरुकास्तपसा कालेन च। उक्तञ्च—

पागइयऽसोयवादी, पुरिसाणं लहुग दोहि वी लहुगा ।
ते चेव य कालगुरू, तेसिं चिय सोयवादीणं ॥
ते च्चिय लहु कालगुरू, कोडुंबीणं असोयवादीणं ।
तेसिं चिय ते चेव उ, तवगुरुगा सोयवादीणं ॥
दंडिय असोय ति च्चिय, सोयम्मि य दोहि गुरुग चउलहुगा ।
एस पुरिसाण भणिओ, इत्थि-नपुंसाण वी एवं ॥

"चउगुरुगा जमलपदा" इति 'यमलपदानि' स्त्री-नपुंसकलक्षणानि चतुर्गुरुकानि वक्तव्यानि । तानि चैवम्—प्राकृतस्त्रीणामशौचवादिनीनामापाते चत्वारो गुरुकाः द्वाभ्यां लघवः, तद्यथा—तपसा कालेन च, तासामेव शौचवादिनीनां चत्वारो गुरुकाः कालगुरवः; कौटुम्बिकस्त्रीणामशौचवादिनीनामापाते कालगुरवश्चत्वारो गुरुकाः, तासामेव शौचवादिनीनामापाते तपोगुरुकाश्चत्वारो गुरवः; एवमेव दण्डिकस्त्रीणामशौचवादिनीनामपि, शौचवादिनीनां च चत्वारो गुरुका द्वाभ्यां गुरवस्तपसा कालेन च; एवमेव नपुंसकानामप्यापाते वक्तव्यम् । अत्रैव मतान्तरमाह—अथवा स्त्रीणामापाते चतुर्गुरुका उक्तप्रकारेण तपसा कालेन च विशेषिताः । नपुंसकानामापाते षड्लघवो यथोक्तक्रमेण तपः-कालविशेषिताः ॥ ४२७ ॥

सम्प्रति तिर्यगापातमधिकृत्यार्द्धापक्रान्तिमाह—

**तिरिएसु वि एवं चिय, अदुगुंछ-दुगुंछ-दित्त-ऽदित्तेसु ।**
**अमणुण्णेयर लहुगो, संजतिवग्गम्मि चउगुरुगा ॥ ४२८ ॥**

'एवमेव' अनेनैव प्रकारेण तिर्यक्ष्वजुगुप्सित-जुगुप्सित-दृप्ता-ऽदृप्तेष्वर्द्धापक्रान्तिरवसेया, तद्यथा—प्राकृतपुरुषगृहीतानामदृप्तानां तिर्यक्पुरुषाणामापाते चत्वारो लघवो द्वाभ्यां लघुकास्तपसा कालेन च, तेषामेव च दृप्तानां त एव चत्वारो लघवः कालगुरुकाः; कौटुम्बिकपरि-

१ °नां चापा° के० ॥

गृहीतानामपि तिर्यक्पुरुषाणामदृप्तानामापाते च त एव कालगुरुकाश्चत्वारो लघवः, तेषामेव दृप्तानां तपोगुरवश्चत्वारो लघुकाः; दण्डिकपरिगृहीतानां तिर्यक्पुरुषाणामदृप्तानामापाते त एव चत्वारो लघवस्तपोगुरुकाः, तेषामेव दृप्तानामापाते चतुर्लघुका द्वाभ्यां गुरवस्तपसा कालेन च; तथा प्राकृतपरिगृहीतानां स्त्रीणां नपुंसकानां च तिरश्चामजुगुप्सितानामापाते चत्वारो गुरुका द्वाभ्यां लघवस्तपसा कालेन च, तेषामेव जुगुप्सितानामापाते चत्वारो गुरुकाः कालगुरवः; कौटुम्बिकपरिगृहीतानां तिर्यक्स्त्री-नपुंसकानामापाते त एव कालगुरुकाश्चत्वारो गुरवः, तेषामेव जुगुप्सितानामापाते चत्वारो गुरुकास्तपोगुरवः; एत एव दण्डिकपरिगृहीतानामपि तिर्यक्स्त्री-नपुंसकानामदृप्तानामापाते द्रष्टव्याः, दृप्तानामापाते चत्वारो गुरुका द्वाभ्यां गुरवः कालेन तपसा च । उक्ता तिर्यक्ष्वप्यर्द्धापक्रान्तिः, सम्प्रति स्वपक्षापाते शोधिमाह—अमनोज्ञानाम्—असाम्भोगिकानां संविग्नानाम् इतरेषां च—असंविग्नानामापाते प्रायश्चित्तं लघुको मासः । 'संयतीवर्गे समापतति' संयतीनामापाते चत्वारो गुरुकाः ॥ ४२८ ॥

सम्प्रति प्रागुक्तमेवार्थमुपदिदर्शयिषुराह—

**भद्द तिरी पासंडे, मणुयाऽसोएहिँ दोहिँ लहु लहुगा ।**
**कालगुरू तवगुरुगा, दोहि गुरू अड्ढोकंति दुगे ॥ ४२९ ॥**

भद्रेषु—अदृप्तेषु तिर्यक्षु पुरुषेषु मनुष्येषु गृहस्थेषु पाषण्डिषु चाऽशौचवादिष्वापतत्सु चत्वारो लघुकाः द्वाभ्यां लघवः । मनुष्यस्त्री-नपुंसकानां शौचवादिनामापाते चत्वारो गुरुका द्वाभ्यां गुरवः, तद्यथा—तपोगुरुकाः कालगुरुकाश्च । शेषेषु तु तिर्यग्-मनुष्यभेदेषु 'द्विके' तपः-काललक्षणे 'अर्द्धापक्रान्तिः' कचित् तपोगुरुका कचित् कालगुरुकेत्येवंरूपाऽवसातव्या । सा च प्राक् प्रदर्शिता ॥ ४२९ ॥ गतं शोधिद्वारम् । इदानीमपायद्वारमाह—

**अमणुण्णेयरगमणे, वितहायरणम्मि होइ अहिगरणं ।** अपाय-
**पउरदवकरण दट्ठुं, कुसील सेहादिगमणं च ॥ ४३० ॥** द्वारम्

अमनोज्ञानाम्—असाम्भोगिकानां संविग्नानाम् इतरेषां च—असंविग्नानां गमने—आपाते सति वितथाचरणे दृश्यमाने भवति परस्परमधिकरणम् । इयमत्र भावना—आचार्याणां परस्परमन्यथा सामाचार्यः, ततोऽसाम्भोगिकानां सामाचारीवितथाचरणदर्शने 'नैषा सामाचारी' इति परस्परमधिकरणं प्रवर्त्तते । इतरे कुशीलाः पार्श्वस्थादयस्ते प्रचुरेण वारिणा पुतप्रक्षालनं कुर्वन्ति, ततस्तेषां कुशीलानां प्रचुरद्रवेण पुनर्निर्लेपकरणं दृष्ट्वा शैक्षकाणाम् आदिशब्दात् शौचवादिनां मन्दधर्मिणां च गमनं तेषां समीपे भवति ॥ ४३० ॥

**निग्गंथाणं पढमं, सेसा खलु होंति तेसि पडिकुट्ठा ।**
**दव अप्प कलुस असती, अवण्ण पुरिसेसु पडिसेहो ॥ ४३१ ॥**

यत एवमापाते दोषास्तस्मान्निर्ग्रन्थानां प्रथमं स्थण्डिलम्—अनापातमसंलोकमित्येवंरूपम्, शेषाणि त्रीणि खलु 'तेषां' निर्ग्रन्थानां 'प्रतिकुष्टानि' प्रतिषिद्धानि । अथ परपक्षापातं तत्रापि पुरुषापातं व्रजति तदा नियमतो द्रवमकलुषं परिपूर्णं च नेतव्यम्, अन्यथा 'द्रवे' पानीये अल्पे कलुषे वा यदि वा 'असति' विना पानीयेन गतो भवेत् ततस्ते दृष्ट्वा 'अवर्णम्'

अश्लाघां कुर्युः, यथा—अशुचयोऽमी, न केवलमवर्णं कुर्युः किन्तु प्रतिषेधोऽपि तैः क्रियते, यथा—मा कोऽप्यमीषामशुचीनां भक्तं पानं वा दद्यात्। एष पुरुषेषु—पुरुषापाते दोषः ॥४३१॥

सम्प्रति स्त्री-नपुंसकापाते दोषानाह—

आय पर तदुभए वा, संकाईया हवंति दोसाओ।
पंडित्थिसंगगहिते, उड्डाहो पडिगमणमादी ॥ ४३२ ॥

स्त्रीणां नपुंसकानां चापाते आत्मनि परे तदुभयस्मिन् वा शङ्कादयो दोषा भवन्ति। तत्राऽऽत्मनि साधुः शङ्काविषयीक्रियते, यथा—एष किमप्युद्भ्रामयति?; परैः स्त्री नपुंसको वा शङ्क्यते, यथा—एते पापकर्माण एनं साधुं कामयन्ते इति; तदुभयस्मिन् यथा-द्वावप्येतौ परस्परमत्र मैथुनार्थमागतौ। तदेवमुक्ता शङ्का। आदिशब्दादवर्णादिदोषपरिग्रहः। तथा स्त्र्यापाते नपुंसकापाते वा स साधुरात्म-परोभयसमुत्थेन दोषेण स्त्रिया पण्डकेन वा सार्द्धं सङ्गं—मैथुनं कुर्यात्, तत्र केनचिदगारेण दृष्ट्वा गृहीतः स्यात् ततः प्रवचनस्योड्डाहः। तथा स उड्डाहित इति कृत्वा प्रतिगमनादीनि कुर्यात् ॥ ४३२ ॥

अस्मिन्नेव चतुर्थे स्थण्डिले तिर्यगापाते दोषानाह—

आहणणादी दित्ते, गरहियतिरिएसु संकमादीया।
एमेव य संलोए, तिरिए वज्जित्तु मणुएसु ॥ ४३३ ॥

'दृप्ते' दृप्ततिर्यगापाते आहननादयो दोषाः। आहननं शृङ्गादिभिस्ताडनम्, आदिशब्दाद् मूर्च्छागमन-मारणादिपरिग्रहः। 'गर्हितेषु तिर्यक्षु' गर्हिततिर्यक्स्त्री-नपुंसकापाते शङ्का मैथुने, आदिशब्दात् प्रतिसेवेतापीत्यादयो दोषाः। यथा आपाते दोषा उक्ता एवमेव संलोकेऽपि तिर्यग्योनिकान् वर्जयित्वा मनुष्येषु द्रष्टव्याः। किमुक्तं भवति?—एषां संलोके नास्ति कश्चिदनन्तरोदितो दोषः, मनुष्याणां तु स्त्री-पुरुष-नपुंसकानां संलोके ये आपाते दोषास्ते वेदितव्याः ॥ ४३३ ॥ यद्यपि कदाचिदात्म-परोभयसमुत्था मैथुने दोषा न भवेयुस्तथाप्यमी सम्भाव्यन्ते—

जत्थऽम्हे[2] पासामो, जत्थ य आयरइ नातिवग्गो णे।
परिभव कामेमाणो, संकेयगदिन्नको वा वि ॥ ४३४ ॥

यत्र वयममुमागच्छन्तं पश्यामो यत्र चाऽस्माकं ज्ञातिवर्गो निरन्तरम् 'आचरति' विचारार्थमागच्छति तत्रास्माकं परिभवं कामयमानो दत्तसङ्केतो वा समागच्छति ॥४३४॥ किञ्च—

कलुस दवे असतीय[3] व, पुरिसालोए हवंति दोसाओ।
पंडित्थीसु[1] वि य तहा, खद्धे वेउव्विए मुच्छा ॥ ४३५ ॥

'द्रवे' पानीये कलुषे 'असति' अविद्यमाने वा पुरुषालोके 'दोषाः' प्रागुक्ता अवर्णादयो भवन्ति। तथा पण्डः—नपुंसकः, पण्डेषु स्त्रीषु च संलोकमानेषु खद्धे वैकुर्विके वा सागारिके दृष्टे मूर्च्छा भवेत्। इयमत्र भावना—नपुंसकः स्त्री वा सागारिकं स्वभावत एवातिस्थूलं लम्बं च-यदि वा कषायितम् अथवा वातदोषेण वैकुर्विकं दृष्ट्वा तद्विषयाभिलाषमूर्च्छामापन्ना तं साधुमुपसर्गयेत् तस्मात् त्रयाणामपि संलोको वर्जनीयः ॥ ४३५ ॥

---

१ °डित्थीसुं य° ता० ॥ २ °म्हे पत्तामो ता० ॥ ३ °तीए व पुरिसलोए ता० विना ॥

गतं चतुर्थं स्थण्डिलम्, इदानीं तृतीयमापातवदसंलोकमधिकृत्य दोषानाह—

**आयसमुत्था तिरिए, पुरिसे दव कलुस असति उड्डाहो ।**
**आयोभय इत्थीसुं, अतिंति जिंते य आसंका ॥ ४२६ ॥**

तिर्यगापाते आत्मसमुत्था दोषाः, तद्यथा—स्त्रीणां नपुंसकानां चापाते मैथुनाशङ्कादयो दोषाः । दृप्तानां तिर्यक्पुरुषाणामापाते आत्मन उपघातः । तथा 'पुरुषे' मनुष्यपुरुषापाते द्रवे कलुषे असति वा प्रवचनस्योड्डाहः । तथा स्त्रीषु चशब्दान्नपुंसकेष्वागच्छत्सु गच्छत्सु च 'आत्मोभयविषया' आत्मोभयग्रहणं परस्योपलक्षणं आत्म-परोभयविषया आशङ्का । सा च प्रागेव भाविता ॥ ४२६ ॥

**आवायदोस तइए, बिइए संलोयतो भवे दोसा ।**
**ते दो वि नत्थि पढमे, तहिँ गमणं तत्थिमा मेरा ॥ ४२७ ॥**

तृतीये स्थण्डिले आपातदोषः, द्वितीये च संलोकतो दोषा भवन्ति ते वेदितव्याः । ते च 'द्वयेऽपि' आपातदोषाः संलोकदोषाश्च प्रथमे स्थण्डिले न सन्ति ततस्तत्र गमनं विधेयम् । तत्रेयं मर्यादा ॥ ४२७ ॥ तामेवाह—

**कालमकाले सण्णा, कालो तइयाएँ सेसगमकालो ।**
**पढमा पोरिसि आपुच्छ पाणगमपुप्फिअण्णदिसिं ॥ ४२८ ॥**

द्विविधा संज्ञा, तद्यथा—कालेऽकाले च । तत्र काले तृतीयस्यां पौरुष्याम्, 'शेषकं' सर्वमपि प्रातःप्रभृतिकमकालः । तत्र तावदकालसंज्ञायां विधिरुच्यते 'कथं गन्तव्यम्?'—तत्र यदि प्रथमायां पौरुष्यां भवेत् तदा पात्रमुद्ग्राह्य पानकनिमित्तं व्रजति; अथ नोद्ग्राहयति पात्रं ततो लोको जानीयात्, यथा—एष बहिर्गमननिमित्तं पानीयं गृह्णाति, ततश्चतुर्थरसिकं न दद्यात् । अपि चोद्ग्राहिते पात्रेऽयमधिको गुणः—कोऽपि श्राद्धो ग्रामान्तरं नगरान्तरं वा गन्तुकामः प्रधावितः श्रद्धायामुत्पन्नायां तं प्रतिलाभयेत्, सोऽपि लाभो भवति शङ्काऽपि च नोपजायते, यथा—एष बहिर्गमनाय पानकनिमित्तं हिण्डते । स पुनः कीदृशं पानीयं गृह्णीयाद्? अत आह—'अपुष्पितं' अच्छं सुगन्धं चतुर्थरसिकम्, न भवति तादृशं तत उष्णोदकादि गृह्णीयात् । "अण्णदिसि"मिति यस्यां दिशि संज्ञाभूमिः तस्यां पानकस्य न गन्तव्यम्, यदि पुनस्तस्यां गच्छति ततोऽतिरिक्तं ग्रहीतव्यम् । यदि द्वौ जनौ तदा तथा गृह्णाति यथा तृतीयस्याप्युद्धरति, किं बहुना? यावन्तो व्रजन्ति तावतां योग्यमतिरिक्तं तथा गृह्णाति यथैकस्योद्धरति । एवं पानीयं गृहीत्वा समागतो बहिः प्रतिश्रयस्य पादौ प्रमार्ज्य दण्डकं स्थापयित्वा ऐर्यापथिकीं प्रतिक्रम्य आलोच्य गुरोः पानकं दर्शयित्वाऽऽपृच्छति । गुरुमापृच्छ्य 'संज्ञाभूमिं व्रजामि' इति गच्छति । तत्र यद्यन्योऽपि कश्चिद्व्रजति तर्हि यथैकस्योद्धरति तावत्प्रमाणं मात्रके पानकं गृह्णाति । तच्चोद्ग्राहितं पात्रमन्यस्य समर्प्य दण्डकं प्रमार्ज्य आवश्यिकीं कृत्वा व्रजति । यथोक्तविपरीतकरणे सर्वत्र प्रायश्चित्तं मासलघु ॥ ४२८ ॥ उक्तमेवार्थं स्पष्टतरमुपदर्शयति—

**अतिरेगगहणउग्गाहियम्मि आलोय पुच्छियं गच्छे ।**
**एसा उ अकालम्मी, अणहिंडिय हिंडिए काले ॥ ४२९ ॥**

पात्रे उद्ग्राहिते एकजनातिरेकेण पानीयस्य ग्रहणं कर्त्तव्यम्। कृत्वा च गुरोः पुरत आलोच्य गुरुमापृच्छ्य संज्ञाभूमिं गच्छेत्। एषाऽकाले संज्ञा उक्ता। सम्प्रति कालसंज्ञा वक्तव्या—'काले' कालसंज्ञा अहिण्डिते हिण्डिते वा। इयमत्र भावना—तृतीयस्यां पौरुष्यां कालस्य प्रतिक्रमणे कृते यावन्नाद्यापि भिक्षावेला भवति तावत् संज्ञाभूमिं व्रजति; अथवा हिण्डिते समुद्दिष्टे भाजनेषु च प्रदत्तकल्पेषु यावन्नावगाहते चतुर्थपौरुषीकालस्तावद्गच्छति; अथोत्सूरे भिक्षावेला चिरं वा हिण्डितस्ततोऽवगाढायामपि चरमपौरुष्यां गच्छति ॥ ४३९ ॥

तत्र को विधिः ? इत्याह—

**कप्पेऊणं पाए, एक्केक्कस्स उ दुवे पडिग्गहगे।**
**दाउं दो दो गच्छे, तिण्हट्ठ दवं च घेत्तूणं ॥ ४४० ॥**

'पात्राणि कल्पयित्वा' त्रीन् कल्पान् पात्राणां निर्लेपनाय दत्त्वा 'एकैकस्य' आत्मीयात्मीयसङ्घाटकस्य द्वौ द्वौ पतद्ग्रहकौ दत्त्वा द्वौ द्वौ संज्ञाभूमिं गच्छेयाताम्। कथम् ? इत्याह—त्रयाणामर्थाय द्रवं गृहीत्वा। पानकं हि तावत्प्रमाणं ग्रहीतव्यं यावत् पश्चादेकस्योद्धरति। इयमत्र भावना—ये ये सङ्घाटवन्तस्तेषां तेषामेको द्वौ पतद्ग्रहौ धारयति, द्वितीयश्चान्येन समं याति, तेषु चागतेषु ये प्रागितरे स्थितास्ते व्रजन्ति, इतरे चागताः पात्राणि धारयन्ति, यावन्तश्च गच्छन्ति तावतां योग्यमेकातिरिक्तं पानकं मात्रके गृह्णन्ति ॥ ४४० ॥

कथं पुनस्ते गच्छन्ति ? इत्यत आह—

**अजुयलिया अतुरिया, विगहारहिया[3] वयंति पढमं तु।**
**निसिइत्तु डगलगहणं, आवडणं वच्चमासज्ज ॥ ४४१ ॥**

'अयुगलिताः' न समश्रेणीकयुगलरूपतया स्थिताः 'अत्वरिताः' त्वरिरहिताः 'विकथारहिताः' स्त्री-भक्तादिकथा अकुर्वाणाः 'प्रथमम्' अनापातासंलोकलक्षणं स्थण्डिलं व्रजन्ति। तत्र 'निषद्य' उपविश्य नोर्द्धस्थिता इत्यर्थः, ऊर्द्धस्थितानां सम्यक्प्रत्युपेक्षणाऽसम्भवात् 'डगलग्रहणं कुर्वन्ति' ये भूमावसम्बद्धाः पुतनिर्लेपनाय लेष्टुकास्ते डगलकास्तानाददते, आदाय चैतेषां भूमावापतनं कुर्वन्ति येन वृश्चिकादिस्ततोऽपसरति। उक्तञ्च—

"ते डगले टिट्टिवेइ ततो जो तत्थ विच्छुगादी सोऽवसरति" त्ति।

तेषां च डगलकानां प्रमाणं 'वर्चः' पुरीषमासाद्य प्रतिपत्तव्यम्। यो भिन्नवर्चाः स त्रीन् डगलकान् गृह्णाति, अन्यो द्वावेकं वा ॥ ४४१ ॥

**आलोइऊण य दिसा, संडासगमेव संपमज्जित्ता।**
**पेहिय पमज्जिएसु य, जयणाए थंडिले निसिरे ॥ ४४२ ॥**

---

१ "तं च अतिरेगं घेत्तव्वं, केत्तियं ? जइ दो जंतया तो तहा गेण्हति जधा एगस्स उव्वरति। एवं जत्तिया वच्चंति तत्तियाणं घेत्तुं जधा उवरिं एगस्स उव्वरति तधा घेत्तव्वं। आगतो बाहिं पडिस्सयस्स पाए पमज्जेत्ता दंडयं ठवेत्ता इरियावहियं पडिक्कमेत्ता आलोइत्ता दाइत्ता आपुच्छित्ता "जामो सण्णाभूमिं"न्ति जति कोइ वच्चति उग्गाहणयातो तप्पमाणं मत्तए पाणयं गेण्हति जधा एगस्स उव्वरितं, ताधे उग्गाहणयं अण्णस्स दातुं दंडयं पमज्जित्ता आवस्सियं काउं वच्चंति। एत्थ सव्वत्थ अकरणे मासलहु। एस अकालसण्णाए विधी।" इति चूर्णिः॥ २ तथा हि° भा० त० ॥ ३ °या य अंति ता० विना ॥

स्थण्डिलं गत्वा तत्र दिशामापात-संलोकवर्जनार्थमालोकनं कुर्यात् । दिश आलोक्य तदनन्तरं सण्डासकं सम्प्रमार्ज्य प्रेक्षितेषु प्रमार्जितेषु च भूप्रदेशेषु स्थण्डिले पुरीषं 'निसृजेत्' व्युत्सृजेत् । कथम्? इत्याह–'यतनया' "दिसि पवण गाम सूरिए" ( गा० ४५६ )त्यादिवक्ष्यमाणलक्षणया । तत् पुनरनापातासंलोकं स्थण्डिलमेभिर्वक्ष्यमाणैर्दशभिः स्थानैर्विशुद्धं ज्ञातव्यम् ॥ ४४२ ॥ तान्येवाह—

विशुद्धं स्थण्डिलम्

**अणावायमसंलोए, परस्स अणुवघातिए ।**
**समे अज्झुसिरे यावि, अचिरकालकयम्मि य ॥ ४४३ ॥**
**विच्छिन्ने दूरमोगाढेऽनासन्ने बिलवज्जिए ।**
**तसपाण-बीयरहिए, उच्चारादीणि वोसिरे ॥ ४४४ ॥**

अनापातमसंलोकं १ परस्यानौपघातिकं २ समं ३ अशुषिरं ४ अचिरकालकृतं ५ विस्तीर्णं ६ दूरमवगाढं ७ अनासन्नं ८ बिलवर्जितं ९ त्रसप्राण-बीजरहितं १० यत् स्थण्डिलं तत्र 'उच्चारादीनि' उच्चार-प्रश्रवणप्रभृतीनि व्युत्सृजेत् ॥ ४४३ ॥ ४४४ ॥

एष एककः संयोगो दर्शितः । सम्प्रति द्विकादिसंयोगानुपदर्शयति—

**एग-दु-ती-चउ-पंचग-छग-सत्तग-अट्ठ-नवग-दसगेहिं ।**
**संजोगा कायव्वा, भंगसहस्सं चउव्वीसं ॥ ४४५ ॥**

अमीषामनन्तरोदितानां दशानां पदानामेक-द्वि-त्रि-चतुः-पञ्च-षट्-सप्ता-ऽष्ट-नव-दशकैः संयोगाः कर्त्तव्याः । तेषु च भङ्गाः सर्वसङ्ख्यया 'चतुर्विंशं' चतुर्विंशत्यधिकं सहस्रम् ।

अथ कस्मिन् संयोगे कियन्तो भङ्गकाः? उच्यते–इह भङ्गानामानयनाय करणमिदम्–दशादयोऽङ्का एकैकेन हीनास्तावत् स्थाप्यन्ते यावत् पर्यन्त एकः । ततस्ते यथाक्रममेभी राशिभिर्गुणयितव्याः, तद्यथा–दशक एककेन, नवकः पञ्चभिः, अष्टकः पञ्चदशभिः, सप्तकस्त्रिंशता, षट्को द्वाचत्वारिंशता, पञ्चकोऽपि द्वाचत्वारिंशता, चतुष्कस्त्रिंशता, त्रिकः पञ्चदशभिः, द्विकः पञ्चकेन, एकक एककेन । स्थापना—

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| १० | ९ | ८ | ७ | ६ | ५ | ४ | ३ | २ | १ |
| १ | ५ | १५ | ३० | ४२ | ४२ | ३० | १५ | ५ | १ |

अमीषां चामीभिर्गुणाकारैर्गुणने जाता एककादिसंयोगेष्वियं भङ्गसङ्ख्या, तद्यथा–एककसंयोगे दश, द्विकसंयोगे पञ्चचत्वारिंशत्, त्रिकसंयोगे विंशं शतम्, चतुष्कसंयोगे द्वे शते दशोत्तरे, पञ्चकसंयोगे द्वे शते द्विपञ्चाशदधिके, षट्कसंयोगे द्वे शते दशोत्तरे, सप्तकसंयोगे विंशं शतं, अष्टकसंयोगे पञ्चचत्वारिंशत्, नवकसंयोगे दश, दशकसंयोगे एकः; एकं च वसत्यादिषु विविक्ते प्रदेशे स्थण्डिलमिति । सर्वभङ्गसङ्ख्या एकत्र मीलयित्वा रूपाधिका क्रियते ततश्चतुर्विंशं भङ्गसहस्रं भवति । [ उक्तं च—]

भंगाणयणे करणं, दसगातो ओसरंतो जावेक्को ।
एए उ गुणेयव्वा, इमेहिँ रासीहिँ जहक्कमसो ॥

एक्कग पंचग चउर, तीसा बावाल पंच आ अप्पा ।
परतो बायालीसा, पडिलोममवेहि आवेक्को ॥
एक्कगसंजोगादी, गुणिया लद्धा हवंति एमेते ।
मिलिया रूवाहिकया, भंगसहस्सं चउव्वीसं ॥ ॥ ४४५ ॥

सम्प्रत्येतानि दश शुद्धानि पदानि व्याख्यातव्यानि । ये च यत्र दोषास्ते तत्र कथनीयाः । तत्राऽऽपातवत् संलोकवच्च पूर्वं व्याख्यातम् । इदानीं परस्यौपघातिकमाह—

औपघातिकं स्थण्डिलम्

आया पवयण संजम, तिविहं उवघातियं मुणेयव्वं ।
आराम वच्च अगणी, घायादऽसुती य अन्नत्थ ॥ ४४६ ॥

इह पूर्वार्द्धपदानां पश्चार्द्धपदानां च यथाक्रमं योजना । सा चैवम्—'औपघातिकम्' उपघातप्रयोजनकं स्थण्डिलं त्रिविधं ज्ञातव्यम्, तद्यथा—आत्मोपघाति प्रवचनोपघाति संयमोपघाति च । तत्राऽऽत्मोपघाति आरामः, तत्र हि संज्ञां व्युत्सृजतो 'घातादि' पिट्टनादि । प्रवचनोपघाति 'वर्चः' वर्चोगृहम्, तद्धि जुगुप्सितमशुच्यात्मकत्वात्, ततस्तत्र संज्ञाव्युत्सर्गे ईदृशा एते इति प्रवचनोपघातः । संयमोपघाति 'अग्निः' अग्निस्थानम्, तत्र हि संज्ञाव्युत्सर्गे तेऽग्न्यारम्भिणः 'अन्यत्र' अस्थण्डिलेऽग्निस्थानं कुर्वन्ति त्यजन्ति वा तां संज्ञामस्थण्डिले ॥ ४४६ ॥

सम्प्रति विषमे स्थण्डिले दोषानाह—

विषमं शुषिरं च स्थण्डिलम्

विसम पलोट्टणि आया, इयरस्स पलोट्टणम्मि छक्काया ।
झुसिरम्मि विच्छुगादी, उभयक्कमणे तसादीया ॥ ४४७ ॥

विषमे स्थण्डिले साधुः प्रलोटेत—पतेदिति भावः, तत्र चाऽऽत्मा विराध्येत । 'इतरस्य' पुरीषस्य प्रश्रवणस्य च प्रलोटने षट् काया विराध्यन्ते, तथाहि प्रतीतमेतत्—पुरीषं प्रश्रवणं वा प्रलोटत् षट् कायान् विराधयति, एषा संयमविराधना । शुषिरे दोषानाह—शुषिरे संज्ञादि व्युत्सृजतो वृश्चिकादिभिरात्मनो विराधना, आदिशब्दात् सर्पादिपरिग्रहः । उभयं—संज्ञा प्रश्रवणं तेनाऽऽक्रमणे 'त्रसादयः' त्रस-स्थावरप्राणा विराध्यन्ते, एषा संयमविराधना ॥ ४४७ ॥

अथ कीदृशं चिरकालकृतं स्थण्डिलम्? अत आह—

चिरकालकृतं स्थण्डिलम्

जे जम्मि उउम्मि कया, पयावणादीहिँ थंडिला ते उ ।
होंति इयरे चिरकया, वासावुत्थे य बारसगं ॥ ४४८ ॥

यानि स्थण्डिलानि यस्मिन् ऋतौ प्रतापनादिभिः कृतानि तानि तस्मिन्नचिरकालकृतानि भवन्ति । यथा—हेमन्ते कृतानि हेमन्त एवाचिरकालकृतानि । 'इतराणि तु' ऋत्वन्तरव्यवहितानि चिरकालकृतानि, अस्थण्डिलानि तानीति भावः । यत्र पुनरेकं वर्षारात्रं सगोधनो ग्राम उषितस्तत्र 'द्वादशकं' द्वादश संवत्सराणि स्थण्डिलम्, ततः परमस्थण्डिलं भवति ॥ ४४८ ॥

सम्प्रति विस्तीर्णमाह—

विस्तीर्णं दूरावगाढं च स्थण्डिलम्

हत्थायामं चउरस, जहण्ण उक्कोस जोयणविछक्कं ।
चउरंगुलप्पमाणं, जहण्णयं दूरमोगाढं ॥ ४४९ ॥

१ °लम् पर° के० बिना ॥

जघन्यं विस्तीर्णं 'चतुरस्रं' चतसृष्वपि दिक्षु हस्तायामम्, उत्कृष्टं 'योजनद्विषट्कं' द्वादश योजनानि, तच्च चक्रवर्तिस्कन्धावारनिवेशे प्रतिपत्तव्यम्। दूरावगाढमाह—यत्राधस्तात् 'चतुरङ्गुलप्रमाणमचित्तं' चत्वार्यङ्गुलान्यचित्ता भूमिः तद् जघन्यं दूरमवगाढम्, अर्थात् पञ्चाङ्गुलप्रभृतिकमचित्तं यस्याधस्तात् तद् उत्कृष्टं दूरमवगाढम् ॥ ४४९ ॥ साम्प्रतमासन्नमाह—

आसन्नं स्थण्डिलम्

दव्वासन्नं भवणाइयाण तहियं तु संजमा-ऽऽयाए ।
आया-पवयण-संजमदोसा पुण भावमासन्ने ॥ ४५० ॥

आसन्नं द्विविधम्—द्रव्यतो भावतश्च । तत्र द्रव्यासन्नं भवनादीनां निकटम्, आदिग्रहणाद् देवकुलानां ग्रामस्य क्षेत्रस्य पथो वृक्षस्य च परिग्रहः । यस्य हि वृक्षस्य हस्तिपदप्रमाणः स्कन्धस्तस्य समन्ततो हस्तो वर्जयितव्यः । तत्र यदि द्रव्यासन्ने व्युत्सृजति ततः संयमे आत्मनि च विराधना । तत्र यद् गृहादीनामासन्नं तत् स्थण्डिलं परित्यज्यान्यत्र स्थण्डिलं कुर्युः, अथवा पानीयेन तत् प्रक्षालयेयुः ततः संयमविराधना । आत्मविराधना पिट्टनादिभावात् । भावासन्नं नाम तावत् तिष्ठति यावत् संज्ञा मनाग् नागच्छति, ततोऽनधिसहः स्थण्डिलं गन्तुमशक्नुवन् अस्थण्डिले भवनादीनां वा प्रत्यासन्ने व्युत्सृजेत्, तत्र चाऽऽत्मविराधना संयमविराधना च प्राग्वत् । अथास्थण्डिलमिति कृत्वा सागारिको वा तिष्ठतीति संज्ञां धारयत्यात्मविराधना, मरणस्य ग्लानत्वस्य वाऽवश्यम्भावात्; अनधिसहेन च सता तेन लोकपुरतोऽस्थाने संज्ञाव्युत्सर्गे पुनर्जङ्घादिलेपने वा प्रवचनोपघातः ॥ ४५० ॥

सबिले त्रसप्राण-बीजोपेते दोषानाह—

सबिलं त्रसप्राण-बीजसहितं च स्थण्डिलम्

होंति बिले दो दोसा, तसेसु बीएसु वा वि ते चेव ।
संजोगतो य दोसा, मूलगमा होंति सविसेसा ॥ ४५१ ॥

बिले संज्ञां व्युत्सृजतो द्वौ दोषौ, तद्यथा—आत्मविराधना संयमविराधना च । तत्र यदा बिले प्रविशन्त्या संज्ञया प्रश्रवणेन तद्गता जीवा बाध्यन्ते तदा संयमविराधना, सर्पादिभक्षणे आत्मविराधना । त्रसेषु बीजेषु च 'तावेव' द्वौ दोषौ संयमा-ऽऽत्मविराधनालक्षणौ । तत्र त्रसेषु बीजेषु च प्राणव्यपरोपणात् संयमविराधना सुप्रतीता । त्रसेष्वात्मविराधना तेभ्य उपद्रवसम्भवात्, बीजेष्वात्मविराधना बीजकोशावयवानामतितीक्ष्णानां पदेषु लग्नतः (लगनतः) पादप्रलोटनतः पततो वा । तदेवमेकैकस्मिन् वर्जनीये स्थण्डिले दोषा उक्ताः । अस्माच्च 'मूलगमाद्' एककसंयोगरूपाद् द्विक-त्रिकादिपदानां संयोगतः 'सविशेषाः' बहुबहुतरका [दोषाः] भवन्ति ज्ञातव्याः—द्विकसंयोगे द्विगुणाः त्रिकसंयोगे त्रिगुणा यावद् दशसंयोगे दशगुणा इति ॥ ४५१ ॥ सम्प्रति प्रागुक्तमपि प्रायश्चित्तमन्याचार्यपरिपाट्या मनाग् विशेषप्रदर्शनार्थतया च पुनराह—

पंथम्मि य आलोए, झुसिरम्मि तसेसु चेव चउलहुगा ।
पुरिसावाए य तहा, तिरियावाए य[1] ते चेव ॥ ४५२ ॥

पथ आसन्ने पुरुषाणामालोके शुषिरे त्रसाकुले च संज्ञां व्युत्सृजतः प्रायश्चित्तं चत्वारो

१ य तह चेव ता० विना ॥

लघुकाः । तथा सर्वमनुष्यपुरुषापाते सर्वतिर्यक्पुरुषापाते च प्रत्येकं 'त एव' चत्वारो लघवः । सर्वग्रहणं मनुष्येषु कौटुम्बिकादिभेदपरिग्रहार्थम् ॥ ४५२ ॥ तिर्यक्षूत्कृष्टादिभेदसङ्ग्रहार्थमाह—

**इत्थि-नपुंसावाए, भावासन्ने बिले य चउगुरुगा ।**
**पणगं लहुयं गुरुगं, बीए सेसेसु मासलहुं ॥ ४५३ ॥**

सर्वासां प्राकृतादिभेदभिन्नानां स्त्रीणामापाते सर्वनपुंसकापाते च तथा भावासन्ने बिलसहिते च स्थण्डिले व्युत्सृजतः प्रत्येकं चत्वारो गुरुकाः । प्रत्येकबीजसङ्कुले स्थण्डिले लघूनि पञ्चरात्रिन्दिवानि, अनन्तबीजसङ्कुले गुरुकाणि । 'शेषेषु' अशुद्धेषु स्थण्डिलेषु मासलघु । यच्चान्यदापद्यते तदपि सर्वमाप्नोति । यत्रासामाचारीकरणं तत्रापि मासलघु ॥ ४५३ ॥

**अपमज्जणा अपडिलेहणा य दुपमज्जणा दुपडिलेहा ।**
**तिय मासिय तिय पणगं, लहु काल तवे चरिम सुद्धो ॥ ४५४ ॥**

संज्ञां व्युत्स्रष्टुकामो न प्रत्युपेक्षते न प्रमार्जयति मासलघु तपोगुरु काललघु, न प्रत्युपेक्षते प्रमार्जयति मासलघु कालगुरु तपोलघु, न प्रमार्जयति प्रत्युपेक्षते मासलघु द्वाभ्यां लघु । एवं 'त्रिके' त्रिषु स्थानेषु मासिकं लघु कालेन तपसा चोक्तप्रकारेण विशेषितम् । अथ प्रत्युपेक्षते प्रमार्जयति तत्र दुष्प्रत्युपेक्षिते दुष्प्रमार्जिते रात्रिन्दिवपञ्चकं लघु तपोगुरु काललघु, दुष्प्रत्युपेक्षिते सुप्रमार्जिते रात्रिन्दिवपञ्चकं लघु तपोलघु कालगुरु, सुप्रत्युपेक्षिते दुष्प्रमार्जिते रात्रिन्दिवपञ्चकं लघु द्वाभ्यां लघुकम् । एवं 'त्रिके' त्रिषु स्थानेषु पञ्चकं कालेन तपसा चोक्तप्रकारेण विशेषितम् । 'चरमे' सुप्रत्युपेक्षितं सुप्रमार्जितमित्येवं रूपे भङ्गे 'शुद्धः' न प्रायश्चित्तभाक् ॥ ४५४ ॥

**खुड्डे धावण झुसिरे, तिक्खुत्तो अपडिलेहणा लहुगो ।**
**घर-वावि-वच्च-गोवय-ठिय-मल्लगछड्डणे लहुगा ॥ ४५५ ॥**

इयमपि गाथाऽन्याचार्यपरिपाटिसूचिका ततो न पुनरुक्तता नाऽपि विरोधः, मतान्तरत्वात् । 'क्षुल्लकं' स्तोकं यदि 'धावनं' प्रलोठनमित्यर्थः तत्र, तथा शुषिरे स्थण्डिले, तथा त्रिकृत्वोऽप्रत्युपेक्षणायां प्रत्येकं प्रायश्चित्तं लघुको मासः । तथा यदि गृहे संज्ञां व्युत्सृजति, वाप्याम्, वर्चोगृहे वर्चस उपरि वा, गोष्पदे वा, ऊर्द्धस्थितो वा, तथा मल्लके व्युत्सृज्य यदि परिष्ठापयति तदा सर्वेष्वेतेषु स्थानेषु प्रायश्चित्तं प्रत्येकं चत्वारो लघवः ॥ ४५५ ॥

गतमपायद्वारम् । इदानीं वर्जनाद्वारमाह—

वर्जना-द्वारम्

**दिसि-पवण-गाम-सूरिय-छायाएँ पमज्जिऊण तिक्खुत्तो ।**
**जस्सुग्गहो त्ति काऊण वोसिरे आयमे वा वि ॥ ४५६ ॥**

उत्तरदिक् पूर्वदिक् च लोके पूज्या, ततस्तस्याः पृष्ठप्रदाने लोकमध्येऽवर्णवादो भवति, वानमन्तरं वा किञ्चिन्मिथ्यादृष्टि कुप्येत्, तथा च सति जीवितव्यस्य विनाशः; तस्माद् दिवा रात्रौ च पृष्ठं पूर्वस्याम्, उत्तरस्यां तु दिवा, दक्षिणस्यां दिशि रात्रौ निशाचराः सञ्चरन्ति ततस्तस्यां पृष्ठं रात्रौ वर्जयेत् । उक्तञ्च—

उभे मूत्र-पुरीषे तु, दिवा कुर्यादुदङ्मुखः ।
रात्रौ दक्षिणतश्चैव, तथा चाऽऽयुर्न हीयते ॥

तथा यतः पवनस्ततः पृष्ठं न कुर्यात्, मा लोको भूयात्—अर्धन्त्येतदेत इति, नाशिकायां चार्शांसि मा भूवन् । तथा ग्रामस्य सूर्यस्य च पृष्ठं न दातव्यम्, लोकेऽवर्णवादसम्भवात् । तथाहि—सूर्यस्य ग्रामस्य वा पृष्ठदाने लोको ब्रूते—न किञ्चिज्जानन्त्येते यल्लोकोद्द्योतकरस्यापि सूर्यस्य यस्मिन् ग्रामे स्थीयते तस्यापि च पृष्ठं ददतीति । तथा संसक्तग्रहणिश्छायायां व्युत्सृजेद् येन द्वीन्द्रियविनाशो न भवति । तथा 'त्रिकृत्वः' त्रीन् वारान् प्रमार्ज्य उपलक्षणमेतत् प्रत्युपेक्ष्य च व्युत्सृजेत् । तत्राप्रत्युपेक्षणेऽप्रमार्जने दुष्प्रत्युपेक्षणे दुष्प्रमार्जने च प्रायश्चित्तं प्रागुक्तम् । तथा "यस्यावग्रहः सोऽनुजानीयात्" इति अनुज्ञाय व्युत्सृजेद् आचमेद्वा । एष गाथार्थः ॥ ४५६ ॥ साम्प्रतमेनामेव विवरीषुराह—

**उत्तर पुव्वा पुज्जा, जम्माएँ निसीयरा अभिवडंति ।**
**घाणारसा य पवणे, सूरिय गामे अवण्णो उ ॥ ४५७ ॥**

उत्तरा पूर्वा च लोके पूज्या, ततो दिवा रात्रौ च पूर्वस्यामुत्तरस्यां वा पृष्ठं न दद्यात् । तथा याम्या—दक्षिणा तस्यां रात्रौ 'निशाचराः' देवाः 'अभिपतन्ति' समागच्छन्ति, ततस्तस्यां रात्रौ पृष्ठं न दद्यात् । तथा यतः पवनस्ततः पृष्ठकरणेऽशुभगन्धघ्राणिः नाशिकायां चार्शांस्युपजायन्ते, तस्मात् पवनस्यापि पृष्ठं न कर्त्तव्यम् । सूर्यस्य ग्रामस्य च पृष्ठकरणे अवर्णो लोकमध्ये यथाऽभिहितः प्राक्, ततस्तयोरपि न दातव्यं पृष्ठमिति ॥ ४५७ ॥

"छायाए" ( गाथा ४५६ ) इति व्याख्यानार्थमाह—

**संसत्तग्गहणी पुण, छायाए निग्गयाएँ वोसिरइ ।**
**छायाऽसति उण्हम्मि वि, वोसिरिय मुहुत्तगं चिट्ठे ॥ ४५८ ॥**

संसक्ता द्वीन्द्रियैर्ग्रहणिः—कुक्षिर्यस्यासौ संसक्तग्रहणिः, स द्वीन्द्रियरक्षणार्थं छायायां वृक्षादेर्निर्गतायां व्युत्सृजति । अथ च्छायाऽद्यापि न निर्गच्छति मध्याह्न एव संज्ञाप्रवृत्तेः, ततश्छायायाः असति—अभावे उष्णेऽपि स्वशरीरच्छायां पुरीषस्य कृत्वा व्युत्सृजति, व्युत्सृज्य च[3] 'मुहूर्त्तकम्' अल्पं मुहूर्त्तं तथैव तिष्ठति, येनैतावता कालेन स्वयोगतः परिणमन्ति । अन्यथोष्णेन महती परितापना स्यात् ॥ ४५८ ॥

अथ व्युत्सृजन् स्वोपकरणं कथं धरति ? इत्यत आह—

**उवगरणं वामगऊरुगम्मि मत्तो य दाहिणे हत्थे ।**
**तत्थऽण्णत्थ व पुंसे, तिहिँ आयमणं अदूरम्मि ॥ ४५९ ॥**

'उपकरणं' दण्डकं रजोहरणं च वामे ऊरौ स्थापयति, मात्रकं दक्षिणहस्ते क्रियते, डगलकानि च वामहस्तेन धरणीयानि । ततः संज्ञां व्युत्सृज्य तत्रान्यत्र वा प्रदेशे डगलकैः पुतं 'पुंसयति' रूक्षयति । पुंसयित्वा त्रिभिः नावापूरकैः चुलुकैरित्यर्थः 'आचमनं' निर्लेपनं करोति । उक्तञ्च—

तिहिं नावाए पूरएहिं आयमइ निलेवेति वा । नावापूरओ नाम पसती इति ।

---

१ "लोगो भणति—एयं चेव अरघाति, अरिसाओ वा खुब्भंति" इति चूर्णिः ॥ २ निसियराऽभिसं देवा ता० ॥ ३ च मुहूर्त्तं तथैव भा० मो० विना ॥

तद्यपि चाचमनमदूरे करोति । यदि पुनर्दूरे आचमति तत उड्डाहः । कश्चिद् दृष्ट्वा चिन्तयेत्—अनिर्लेप्य पुते गत एष इति ॥ ४५९ ॥ सम्प्रत्यालोके प्रायश्चित्तविधिमाह—

आलोगं पि य तिविहं, पुरिसि-त्थि-नपुंसकं च बोधव्वं ।
लहुगा पुरिसालोए, गुरुगा य नपुंस-इत्थीसु ॥ ४६० ॥

आलोकमपि च 'त्रिविधं' त्रिप्रकारम्, तद्यथा—पुरुषालोकं स्त्र्यालोकं नपुंसकालोकम् । गाथायां पदैकदेशे पदसमुदायोपलक्षणानि । तत्र पुरुषालोके प्रायश्चित्तं चत्वारो लघुकाः, स्त्र्यालोके नपुंसकालोके च चत्वारो गुरुकाः ॥ ४६० ॥ तदेवमचित्तं स्थण्डिलमचित्तेन पथा भणितम् । अथ सचित्तेन मिश्रेण वा यदा तद् गच्छति तदेदं प्रायश्चित्तम्—

छक्काय चउसु लहुगा, परित्त लहुगा य गुरुग साहारे ।
संघट्टण परियावण, लहु गुरुगऽतिवायणे मूलं ॥ ४६१ ॥

'षट्कायाः' पृथिव्यप्तेजोवायुवनस्पतित्रसरूपाः । तेषां मध्ये 'चतुर्षु' पृथिव्यप्तेजोवायुरूपेषु सङ्घट्टनादिषु लघुकाः प्रायश्चित्तम्, 'परित्ते' प्रत्येकवनस्पतिकायेऽपि च लघुकाः, "साहारे" अनन्तवनस्पतिकायिके सङ्घट्टनादिषु गुरुकाः, तथा द्वीन्द्रियादीनां सङ्घट्टने परितापने च यथायोगं लघुका गुरुकाश्च प्रायश्चित्तम्, 'अतिपातने' विनाशे मूलम् । इयमत्र भावना—पृथिवीकायं सङ्घट्टयति मासलघु, परितापयति मासगुरु, अपद्रावयति जीविताद् व्यपरोपयतीत्यर्थः चतुर्लघु । एवमप्काये तेजस्काये वायुकाये प्रत्येकवनस्पतिकाये च द्रष्टव्यम् । उक्तञ्च—

छक्कायादिमचउसू, तह य परित्तम्मि होंति वणकाए ।
लहु-गुरुमासो चउलहु, घट्टण परिताव उद्दवणे ॥

एतत् प्रायश्चित्तमेकैकस्मिन् दिवसे सङ्घट्टनादिकरणे । यदि पुनर्द्वौ दिवसौ पृथिव्यादि सङ्घट्टयति तदा मासगुरु, परितापयति चतुर्लघु, जीविताद् व्यपरोपयति चतुर्गुरु । त्रीन् दिवसान् निरन्तरं पृथिव्यादीन् सङ्घट्टयति चतुर्लघु, परितापयति चतुर्गुरु, अपद्रावयति षड्लघु । निरन्तरं चतुरो दिवसान् सङ्घट्टने चतुर्गुरु, परितापने षड्लघु, अपद्रावणे षड्गुरु । पञ्च दिवसान् निरन्तरं पृथिव्यादीनां सङ्घट्टने षड्लघु, परितापने षड्गुरु, अपद्रावणे मासिकच्छेदः । षड् दिवसान् निरन्तरं सङ्घट्टने षड्गुरु, परितापने मासिकच्छेदः, अपद्रावणे चतुर्मासच्छेदः । सप्त दिवसान् निरन्तरं पृथिव्यादीनां सङ्घट्टने मासिकच्छेदः, परितापने चतुर्मासिकः, अपद्रावणे षाण्मासिकः । अष्टौ दिवसान् निरन्तरं पृथिव्यादीनां सङ्घट्टने चातुर्मासिकच्छेदः, परितापने षाण्मासिकः, अपद्रावणे मूलम् । उक्तञ्च—

दोहिं दिवसेहिं मासगुरुए आढवेत्ता चउगुरुए ठाति जाव अट्ठहिं सपयं ति ।

अनन्तवनस्पतिकं यदि सङ्घट्टयति तदा मासगुरु, परितापयति चतुर्लघु, अपद्रावयति चतुर्गुरु । द्विदिवसादिनिरन्तरसङ्घट्टनादिषूत्तरोत्तरैकैकस्थानवृद्धितः सप्तभिर्दिनैर्मूलम् । द्वीन्द्रियं सङ्घट्टयति चतुर्लघु, परितापयति चतुर्गुरु, जीविताद् व्यपरोपयति षड्लघु । अत्र द्व्यादिदिवसनिरन्तरसङ्घट्टनादिषु षड्भिर्दिवसैर्मूलम् । त्रीन्द्रियं सङ्घट्टयतश्चतुर्गुरु, परितापयतः षड्लघु,

१ गाथेयं चूर्णौ नास्त्याहता ॥

जीविताद्व्यपरोपयतः षड्गुरु, अत्र पञ्चभिर्दिवसैर्मूलम् । चतुरिन्द्रियं सङ्घट्टयतः षड्लघु, परितापयतः षड्गुरु, जीविताद्व्यपरोपयतो मासिकच्छेदः, अत्र चतुर्भिर्दिवसैर्मूलम् । पञ्चेन्द्रियं सङ्घट्टयतः षड्गुरु, परितापयतः छेदः, अपद्रावयतो मूलम्, अत्र द्वयोर्दिवसयोरनवस्थाप्यम्, त्रिषु दिवसेषु पाराञ्चितम् ॥ ४६१ ॥ गतं वर्जनाद्वारम्, अधुनाऽनुज्ञाद्वारमाह—

पढमिल्लुगस्स असती, वाघातो[1] वा इमेहिँ ठाणेहिं । (अनुज्ञा-द्वारम्)
पडिणीय तेण वाले, खेत्तुदग निविट्ठ थी अपुमं ॥ ४६२ ॥

प्रथममेव प्रथमिल्लुकम्, प्राकृतत्वात् स्वार्थे इल्लुकप्रत्ययः । प्रथमम्—अनापातासंलोकलक्षणं स्थण्डिलं तत् नास्ति ततस्तस्य प्रथमस्याभावे । अथवा सतोऽप्येभिः स्थानैर्व्याघातो भवेत् । तान्येव स्थानान्याह—"पडिणीय" इत्यादि । प्रत्यनीकस्तत्र तिष्ठति । स्तेना वा पथि द्विविधाः, तद्यथा—उपकरणस्तेनाः शरीरस्तेना वा । 'व्याला वा' तत्र सर्पादयो विद्यन्ते । क्षेत्रं वा तत्र जातम् । उदकेन वा तत् स्थण्डिलमास्तृतम्[2] । ग्रामो व्रजिका स्कन्धावारो वा तत्र निविष्टः । स्त्री नपुंसको वा तत्र मैथुनार्थी संयतानागच्छतः प्रतीक्षते ॥ ४६२ ॥

पढमासति वाघाए, पुरिसालोगम्मि होति जयणाए ।
मत्तग अपमज्जण डगल कुरुअ तिविहे दुविहभेदो ॥ ४६३ ॥

एवं प्रथमस्य स्थण्डिलस्याभावे व्याघाते वा द्वितीयं स्थण्डिलमनापातसंलोकवद् मन्तव्यम् । तत्र संयतानां साम्भोगिकानां संविग्नानामालोके गन्तव्यम्, तदभावे असाम्भोगिकानामपि । तत्रापरिणताः पूर्वमेव ग्राहयितव्याः, यथा—केषाञ्चिदाचार्याणां विसदृश्यः सामाचार्यः ततो यूयं मा तान् वितथसामाचारीकान् दृष्ट्वा प्रतिनोदयेत, तेऽपि यदि नोदयन्ति तर्ह्युदासीनाः तिष्ठथ (तिष्ठत) । एवमसङ्खडादयो दोषाः परिहृता भवन्ति । असाम्भोगिकानामप्यापातस्यासम्भवे यत्र पार्श्वस्थादीनामालोकस्तत्र गच्छन्ति । तस्याप्यभावे यत्र पार्श्वस्थादीनामापातस्तत्र व्रजन्ति । तत्र क्षुल्लकादयोऽपरिणताः पूर्वं ग्राहयितव्याः, यथा—एते निर्धर्माणो जिनाज्ञाप्रकोपिनो वितथमाचरन्ति, तद् मा यूयमेतेषां चेष्टितं चित्ते कुरुत यथा 'एतत् सुन्दरम्' इति । संयत्यापातवच्च सर्वप्रयत्नेन परिहरेत्, अन्यथा कृतसङ्केतका अत्र समागच्छन्तीति शङ्कादयः आत्म-परोभयसमुत्थाश्च दोषाः सम्भवन्ति । एषा स्वपक्षे यतना । सम्प्रति परपक्षेऽभिधीयते । तत्र—पार्श्वस्थाद्यापातवतोऽसम्भवे "पुरिसालोगम्मि होति जयणाए" इति 'पुरुषालोके' पुरुषालोकवति गन्तव्यम्, तत्र यतनया भवति कर्तव्यमाचमनादि । तामेव यतनामाह—"मत्तग अपमज्जण डगल कुरुग" त्ति प्रत्येकं मात्रकं ग्रहीतव्यम्, प्रत्येकं च प्रचुरं द्रवम्, डगलकानां चाप्रमार्जनम्—न तानि डगलकानि प्रमार्ज्यन्ते हीलनादोषसम्भवात्, कुरुकुचाश्चाचमनानन्तरं कर्तव्या । "तिविहे दुविहभेओ" इति, त्रिविधे प्रत्येकं द्विविधो भेदो द्रष्टव्यः । इयमत्र भावना—त्रिविधः परपक्षः, तद्यथा—पुरुषः स्त्री नपुंसकः । एकैकः पुनर्द्विधा—शौचवादी अशौचवादी च, अथवाऽन्यथा प्रत्येकं द्विभेदता—श्रावकोऽश्रावकश्च । अथवा त्रिविधो भेदो नाम स्थविरो मध्यमस्तरुणश्च, यदि वा प्राकृतः कौटुम्बिको दण्डिकश्च ।

१ °तो तस्सिमेहिं ता० ॥ २ °मावृतम् त० ॥

एते च त्रयो भेदा यथा पुरुषस्य तथा स्त्री-नपुंसकयोरपि द्रष्टव्याः । तेषु यतनया गन्तव्यम् ॥ ४६३ ॥ कथम्? इत्यत आह—

**तेण परं पुरिसाणं, असोयवादीण वच्च आवायं ।**
**इत्थि-नपुंसालोए, परम्मुहो कुरुकुया सा य ॥ ४६४ ॥**

'ततः' पुरुषालोकवतः स्थण्डिलात् 'परतः' पुरुषालोकवतः स्थण्डिलस्यासति पुरुषाणामशौचवादिनाम् 'आपातम्' आपातवत् स्थण्डिलं व्रजेत् । तत्र च यतना प्रागुक्ता द्रष्टव्या । तस्याप्यसम्भवे शौचवादिनामप्यापातवद् गन्तव्यम् । तस्यासम्भवे स्त्र्यालोके नपुंसकालोके वा गन्तव्यम् । इयमत्र भावना—प्रथमतोऽशौचवादिनीनां स्त्रीणामालोके गन्तव्यम्, तत्र गतः सन् तासां पराङ्मुख उपविशेत्, यतना च सा कुरुकुचादिका कर्त्तव्या । तस्याप्यसम्भवे शौचवादिनीनामप्यालोके गन्तव्यम् । तदभावे नपुंसकानामशौचवादिनामालोके । तस्यासम्भवे शौचवादिनामप्यालोके । यतना सर्वत्र सैव ॥ ४६४ ॥

**तेण परं आवायं, पुरिसेयर-इत्थियाण तिरियाणं ।**
**तत्थ वि य परिहरेज्जा, दुगुंछिए दित्तऽदित्ते य ॥ ४६५ ॥**

'ततः परं' शौचवादिनामपि नपुंसकानामालोकस्यासम्भवे 'पुरुषेतरस्त्रीणां' पुरुष-नपुंसक-स्त्रीणां तिरश्चामापाते व्रजेत्, तत्रापि दृप्तानदृप्तांश्च जुगुप्सितान् परिहरेत्, अपरिहारे यतनां कुर्यात् । अयमत्र भावार्थः—शौचवादिनां नपुंसकानामालोकासम्भवे तिर्यक्पुरुषाणामदुष्टानामापाते व्रजेत्, तस्यासम्भवे दुष्टानामापाते व्रजेत्, तत्रेयं यतना—दण्ड-हस्ता वारंवारेण व्युत्सृजन्ति । उक्तञ्च—

तेण परं पुरिसाणं, असोयवादीण वच्च आवायं ।
पच्छित्थि-नपुंसाणं, आलोय परम्मुहा कुरुया ॥
पच्छा तिरिपुरिसाणमदुट्ठ-दुट्ठाण वच्च आवायं ।
दुट्ठेसु दंड-हत्था, वारंवारेण वोसिरणं ॥

तस्याप्यभावे तिर्यक्स्त्रीणामजुगुप्सितानामापातं व्रजेत् । तदसम्भवे जुगुप्सितानामप्यापातम् । तदभावे तिर्यग्नपुंसकानामजुगुप्सितानामापातम् । तदभावे जुगुप्सितानामप्यापातम्, केवलं तत्र तथोपविशन्ति यथा परस्परं सर्वे सर्वे प्रेक्षन्ते ॥ ४६५ ॥

**तत्तो इत्थि-नपुंसा, तिविहा तत्थ वि असोयवाईणं ।**
**तहियं च सद्दकरणं, आउलगमणं कुरुकुया य ॥ ४६६ ॥**

ततः स्त्री-नपुंसकानामापाते गन्तव्यम् । ते च स्त्री-नपुंसकास्त्रिविधाः, तद्यथा—प्राकृताः कौटुम्बिका दाण्डिकाश्च । ते च प्रत्येकं द्विधा—शौचवादिनोऽशौचवादिनश्च । तत्र प्रथमतोऽशौचवादिनामापाते व्रजनीयम् । तत्र च शब्दकरणमाकुलगमनं कुरुकुचा च कार्या । इयमत्र भावना—जुगुप्सितानामपि नपुंसकानामापातवतोऽसम्भवे मनुष्यस्त्रीणामशौचवादिनीनामापाते गन्तव्यम्, केवलं स्थविरसहितैः प्रविशद्भिश्च परस्परं महान्तः शब्दा उच्चारणीया येन तास्तान्

१ खण्डि° त० मो० ॥

शब्दान् श्रुत्वा निर्गच्छन्ति, आकुलीभूताश्च तत्र प्रविशन्ति येन 'व्याकुला अमी' इति ता दृष्टिविक्षेपादिकं न कुर्वन्ति, अगर्त्तादिषु च स्थानेषु संज्ञां व्युत्सृजन्ति यथा शेषोऽपि लोको दूरस्थः प्रेक्षते, तेऽपि च साधवस्तथा उपविशन्ति यथा परस्परं प्रेक्षन्ते । तत एवमात्म-परोभयदोषा न सम्भवन्ति । उक्तं च—

तत्थ पुण थेरसहिया, आउलसद्दं करिंति पविसंता ।
जह सद्देणं ताओ, निंति ततो अगत्तमादीसु ॥
ठाणेसु वोसिरंती, पेच्छंति य जह परोप्परं सव्वे ।
आय-परोभयदोसा, ते एवं वज्जिया होंति ॥

आचमनानन्तरं च कुरुकुचा कर्त्तव्या, चशब्दान्मृत्तिकया हस्त-पुतप्रक्षालनं बहिर्मात्रकस्य कल्प इति परिग्रहः । तदसम्भवे शौचवादिनीनामपि मनुष्यस्त्रीणामापाते, तस्याभावे नपुंसका-नामशौचवादिनामप्यापाते, तदसम्भवे शौचवादिनामप्यापाते गन्तव्यम् । सर्वत्रापि यतनाऽनन्तरोक्तैव ॥ ४६६ ॥

**इत्थि-नपुंसावाते, जा उण जयणा उ मत्तगादीया ।**
**पुरिसावाए जयणा, स च्चेव उ मत्तगादीया ॥ ४६७ ॥**

स्त्र्यापाते नपुंसकापाते च या पुनर्यतना मात्रकादिका अनन्तरमुक्ता सैव पुरुषापातेऽपि प्राग् मात्रकादिका यतना द्रष्टव्या । एवं तावदचित्तं स्थण्डिलं चतुःप्रकारमचित्तेन पथा गम्य-मुक्तम् । तदभावे मिश्रेणापि पथा तदपवादेन गच्छेत्, तदभावे सचित्तेनापि, तत्रापि यतना सैव प्रागुक्ता । उक्तं च—

एवं अच्चित्तेणं, पहेण जयणाओ भणिय चउभंगो ।
मीस-सच्चित्तपहेसु य, एस च्चिय भंग-जयणाओ ॥

सम्प्रति मिश्रं वक्तव्यम्, यतोऽचित्तस्थण्डिलासम्भवेऽपवादतो मिश्रमपि गम्यते । तदपि चानापातासंलोकादिभेदतश्चतुष्प्रकारम्, तस्यापि च त्रयः पन्थानः, तद्यथा—अचित्तो मिश्रः सचित्तश्च ॥ ४६७ ॥ तानेवाह—

**अच्चित्तेणं मीसं, मीसं मीसेण छक्कमीसेणं ।**
**सच्चित्तछक्कएणं, मीसे चउभंगिग पदेसे ॥ ४६८ ॥**

मिश्रं स्थण्डिलमचित्तेन पथा गम्यम् । तदभावे मिश्रेण, केन मिश्रेण? इत्यत आह—'षट्क-मिश्रेण' षड्जीवनिकायमिश्रेण । तदभावे मिश्रे स्थण्डिले षट्कायसचित्तेन पथा गन्तव्यम् । उक्तञ्च—

पढममचित्तपहेणं, मीसं मीसेण छक्कमीसेणं । (ग्रन्थाग्रम्— ३५०० )
सच्चित्तछक्कएणं, मीसं तू थंडिलं गच्छे ॥

तच्च मिश्रं स्थण्डिलमध्वनि ग्रामानुग्रामं पथि व्रजतो द्रष्टव्यम् । तत्र मात्रकैर्यतना कर्त्तव्या । अथ मात्रकाणि न विद्यन्ते व्युत्सृजतां परिष्ठापयतां च सागारिकसम्पातस्तदा धर्मास्तिकाया-दिप्रदेशान् निश्रीकृत्य व्युत्स्रष्टव्यम् । उक्तञ्च—

जहियं पुण सागारिय, धम्मादिपएस तहिय निस्साए ।
वोसिरइ एय मीसं, भणिय समासेण थंडिलं ॥

उक्तं मिश्रं स्थण्डिलम् । तदभावेऽपवादतः सचित्तमपि गन्तव्यम् । तदप्यनापातासंलोकादिभेदतश्चतुःप्रकारम् । तस्यापि च त्रयः पन्थानः, तद्यथा—अचित्तो मिश्रः सचित्तश्च ॥ ४६८ ॥ तत्र येन क्रमेण गन्तव्यं तं क्रममाह—

**अच्चित्तेण सचित्तं, मीसेण सचित्त छक्कमीसेण ।**
**सच्चित्त छक्कएणं, सचित्त चउभंगिय पदेसे ॥ ४६९ ॥**

सचित्तमपि स्थण्डिलं चतुर्भङ्गिकम् । तत्र प्रथमतोऽनापातासंलोकं गन्तव्यम्, तदभावे द्वितीयम्, तदभावे तृतीयम्, तदभावे चतुर्थमपि । तत्र यतना प्रागेवोक्ता । तत्र च प्रथमतोऽचित्तेन पथा गन्तव्यम् । तदभावे तत् सचित्तं मिश्रेण पथा गम्यम्, केन मिश्रेण? इत्यत आह—'षट्कमिश्रेण' षड्जीवनिकायमिश्रेण । तस्यासम्भवे सचित्तेन पथा सचित्तं गन्तव्यम्, केन सचित्तेन? 'षट्केन' षड्जीवनिकायैः । अत्रापि मात्रकैर्यतना कर्त्तव्या । मात्रकाणामभावे व्युत्सर्गे परिष्ठापने वा सागारिकसम्भवे धर्मास्तिकायादिप्रदेशानां निश्रा कर्त्तव्या । उक्तञ्च —

ज च्चिय मीसे जयणा, सेव सचित्ते वि होइ कायव्वा ।
मत्तादि अपरिसेसा, जा धम्मादीपएसा उ ॥ ॥ ४६९ ॥

तदेवमुक्तं स्थण्डिलम् । इदानीमेतस्य यः कल्पिकस्तमभिधित्सुराह—

**पढिय सुय गुणियमगुणिय, धारमधार उवउत्तो परिहरति ।**
**आलोयाऽऽयरियादी, आयरिओ विसोहिकारो से ॥ ४७० ॥**

यस्मादजानतः प्रायश्चित्तं तस्माद् येन सप्तसप्तकादिसूत्रं पठितं पाठतः श्रुतमर्थतः तच्च 'गुणितम्' अभ्यस्तं वा स्यादगुणितं वा धारितं वा स्यादनवधारितं वा तथापि यः उपयुक्तः सन् स्थण्डिलं 'परिहरति' उक्तप्रकारेणोपयुक्तः परिभोगयति स विचारे कल्पिकः । तथा तेन स्थण्डिलसूत्रेण पठितेन वा श्रुतेन वा गुणितेन वा अगुणितेन वा धारितेन वा अधारितेन वा उपयुक्तो वाऽनुपयुक्तो वा यां विराधनां करोति तामाचार्यादेरालोचयति । प्रथमत आचार्यस्य पुरत आलोचयति, तदभावेऽन्यस्याप्युपाध्यायादेरालोचिते च 'से' तस्य 'विशोधिकारः' प्रायश्चित्तप्रदानेन शुद्धिकर्त्ता आचार्यः । किमुक्तं भवति?—यद् आचार्याः प्रायश्चित्तं ददति तेन स शुद्धिमापद्यते ॥ ४७० ॥ गतं विचारद्वारम् । अधुना लेपद्वारमाह—

**पात्रलेपनिरूपणा**

लेप-कल्पिक-द्वारम्

**अप्पत्ते अकहित्ता, अणहिगयऽपरिच्छणे य चउगुरुका ।**
**दोहि गुरू तवगुरुगा, कालगुरू दोहि वी लहुगा ॥ ४७१ ॥**

'सूत्रे' पात्रैषणालक्षणे[3] अप्राप्ते यदि लेपस्याऽऽनयनाय प्रेषयति तदा तस्य प्रायश्चित्तं चत्वारो गुरुकाः [ द्वाभ्यां गुरुकाः, ] तद्यथा—तपोगुरुकाः कालगुरुकाश्च । अथ प्राप्तेऽपि श्रुते तदर्थ-

---

१ चतुर्विधम् भा० ॥ २ यदा आचा° त० डे० ॥ ३ पात्रैषणाख्यमाचाराङ्गसूत्रे द्वितीयश्रुतस्कन्धे षष्ठमध्ययनम् ॥

मकथयित्वा कथनेऽपि 'अधिगतस्तदर्थो न वा' इत्यपरिज्ञाय अधिगतमपि 'सम्यक् श्रद्दधाति न वा' इत्यपरीक्ष्य यदि प्रेषयति तदा प्रत्येकमकथनेऽनधिगतेऽपरीक्षणे च तस्य प्रायश्चित्तं चत्वारो लघुका द्वाभ्यां लघवः, तद्यथा—तपोलघुकाः काललघुकाश्च । यत एवं प्रायश्चित्तमाज्ञादयश्च दोषास्तस्मात् सूत्रे प्रासे तत्रापि कथिते तत्राप्यधिगते स परीक्ष्य लेपस्यानयनाय प्रेषणीयः । एष लेपस्य कल्पिकः ॥ ४७१ ॥

**अज्जकालिय लेवं, वयंति अवियाणिऊण सब्भावं ।**
**ते वत्तव्वा लेवो, दिट्ठो तेलोक्कदंसीहिं ॥ ४७२ ॥**

केचित् प्रवचनस्य 'सद्भावं' रहस्यम् 'अविज्ञाय' अविदित्वा अद्यकालिकं लेपं पात्रस्य वदन्ति—न एष पात्रस्य लेपः सर्वज्ञैरुक्तः किन्त्वद्य कल्येऽधुनातनसूरिभिः प्रवर्तितः; ते वक्तव्याः—दृष्टः खलु पात्रस्य लेपस्त्रैलोक्यदर्शिभिः ॥ ४७२ ॥ एनामेव गाथां व्याचिख्यासुः प्रथमतः पूर्वार्द्धं व्याख्यानयन् लेपस्य जिनानुपदिष्टत्वं भावयति—

**आया पवयण संजम, उवघाओ दिस्सए जओ तिविहो ।**
**तम्हा वयंति केई, न लेवगहणं जिणा बेंति ॥ ४७३ ॥**

यस्माल्लेपे गृह्यमाणे त्रिविध उपघातो दृश्यते, तद्यथा—आत्मनः प्रवचनस्य संयमस्य च; तस्मात् केचिद् वदन्ति—न लेपग्रहणं जिना ब्रुवते; न खलु भगवन्तः सावद्यं वचनमुच्चरन्ति ॥ ४७३ ॥ कथं पुनरात्म-प्रवचन-संयमोपघातः ? इत्यत आह—

**रहपडण उत्तमंगादिभंजणा घट्टणे य करघातो ।**
**अह आयविराहणया, जक्खुल्लिहणे पवयणम्मि ॥ ४७४ ॥**
**गमणाऽऽगमणे गहणे, तिट्ठाणे संजमे विराहणया ।**
**महि सरि उम्मुग हरिया, कुंथू वासं रयो व सिया ॥ ४७५ ॥**

रथस्य—शकटस्य पतने उत्तमाङ्गादेः शरीरावयवस्य भङ्गः, तथा भाजनस्य लेपे दत्ते घट्टकेन तद् दत्तलेपं पात्रं घट्टयतः 'करघातः' करस्य पीडा, एषा आत्मविराधना । यक्षाः—श्वानस्तैः शकटस्याक्षोऽनेकधा जिह्वयोल्लिखितः, साधुरपि च तत्र लेपं गृह्णाति, तमपि च भोजनयोग्ये पात्रे दास्यति ततो 'यक्षोल्लिखने' यक्षोल्लिखितलेपग्रहणे 'प्रवचने' प्रवचनस्योपघातः ॥ ४७४ ॥

तथा 'त्रिस्थाने' त्रिषु स्थानेषु च 'संयमे' संयमस्य विराधना, तद्यथा—लेपग्रहणाय गमने लेपं गृहीत्वा पुनर्वसतावागमने लेपग्रहणे च । तथाहि—गच्छतामागच्छतां तत्र वा मह्याः—सचित्तपृथिवीकायस्य विराधना, सरित्—नदी तत्र गमने आगमने चाऽप्कायविराधना, तथा कदाचित् तैः शाकटिकैरग्निकाय उद्दीपितो भवेत् तत्र कथमप्यनुपयोगत उल्मुकचालनेऽग्निकायविराधना, यत्राग्निस्तत्र वायुरिति वायुविराधना, हरितकायाक्रमणे वनस्पतिकायविराधना, तथा लेपे कुन्थ्वादयः प्राणा लग्ना भवेयुस्ततस्तद्ग्रहणे त्रसकायविराधना, तथा गमने आगमने तत्र वा वर्षं पतेत् रजो वा सचित्तवातोद्धूतमापतितं स्यात् ततस्तद्विराधनाऽपि तत्राबसेया । तदेवं यत आत्म-प्रवचन-संयमानामुपघातो न च यथा पिण्डैषणा पात्रैषणा वा

---

१ अविभाविऊण ता० ॥

जिनैर्भणिता तथा लेपैषणाऽपि तस्मान्न जिनोपदिष्टः पात्रस्य लेपः । तदेतदसमीचीनम्, पात्रलेपस्य जिनैरर्थत उक्तत्वात् । पात्रैषणायां हि त्रिविधं पात्रमुक्तम्, तद्यथा—यथाकृतमल्पपरिकर्म सपरिकर्म च । तत्राल्पपरिकर्मणः सपरिकर्मणश्चावश्यं लेपेन कार्यमिति सामर्थ्यादुक्तो जिनैः पात्रस्य लेपः । अन्यच्चौघनिर्युक्तौ प्रपञ्चेन लेपैषणाऽप्यभिहिता । तस्माद् दृष्टत्रैलोक्यदर्शिभिर्लेपः ॥ ४७५ ॥ यच्च वदसि आत्मोपघातादयो दोषा इति तत्र प्रत्युत्तरमाह—

**दोसाणं परिहारो, चोयग जयणाएँ कीरए तेसिं ।**
**पाते उ अलिप्पंते, ते दोसा होंतऽणेगगुणा ॥ ४७६ ॥**

हे नोदक ! ये दोषास्त्वया प्रागात्मोपघातादय उक्तास्तेषां परिहारो यतनया क्रियते, यतनया गच्छत आगच्छतो लेपग्रहणं च कुर्वतो न कश्चिदात्मोपघातादिको दोष इति भावः । पात्रे तु अलिप्यमाने ते आत्मोपघातादयो दोषाः 'अनेकगुणाः' अनेकप्रकारा भवन्ति ॥ ४७६ ॥ कथम् ? इति चेद् अत आह—

**उड्डादीणि उ विरसम्मि भुंजमाणस्स होंति आयाए ।**
**दुग्गंधि भायणं ति य, गरहति लोगो पवयणम्मि ॥ ४७७ ॥**

अलेपितं किल पात्रमतीव विरसं भवति, तस्मिन् भुञ्जानस्य विरसगन्धाघ्राणत ऊर्द्धादीनि भवन्ति । ऊर्द्धं—वमनम्, आदिशब्दादरुचि-मान्द्यादिपरिग्रहः । एते आत्मनि दोषाः । तथा लोको भिक्षां ददानो दुर्गन्धि भाजनं दृष्ट्वा 'गर्हयति' ईदृशा एवामी पापोपचिता इति । एष प्रवचने उपघातः ॥ ४७७ ॥ यदप्युक्तम् "यक्षोल्लिखितलेपग्रहणे प्रवचनोपघातः" ( गा० ४७४ ) तदेतत् तावदतिसूक्ष्मम्, अन्येऽपि खलु महान्तः प्रवचनोपघाता अवश्यकर्त्तव्यतया यतनया परिहियन्ते किं पुनर्नैषः ? इति प्रतिपादयन्नाह—

**पवयणघाया अन्ने, वि अत्थि ते उ जयणाएँ कीरंति ।**
**आयमणभोयणाई, लेवे तव मच्छरो को णु ॥ ४७८ ॥**

अन्येऽपि खलु 'आचमन-भोजनादयः' काञ्जिकेनाचमनं कायिक्या आचमनमनाचमनं वा पात्रे भोजनं मण्डल्यां भोजनमित्येवमादयः 'प्रवचनघाताः' प्रवचनोपघाताः सन्ति परं तेऽप्यवश्यकर्त्तव्यतया 'यतनया' सागारिकरक्षणादिरूपया क्रियन्ते । एवमवश्यग्रहीतव्ये लेपे यतनया तत्कालदृष्टदोषपरिहारादिलक्षणया गृह्यमाणे को नु तव मत्सरः ? नैवासौ युक्त इति ॥ ४७८ ॥ सम्प्रत्यन्यानपि पात्रालेपे दोषानाह—

**खंडम्मि मग्गियम्मी, लोणे दिन्नम्मि अवयवविणासो ।**
**अणुकंपादी पाणम्मि होति उदगस्स उ विणासो ॥ ४७९ ॥**

अलेपिते पात्रे कस्मिंश्चित् प्रयोजने समापतिते खण्डं याचितम्, तया चाऽविरत्या खण्डमिति भ्रान्त्याऽनाभोगेन सैन्धवादि लवणं दत्तम्, तस्मिंश्चालेपिते भाजने केचिदवयवा अद्याप्यम्लाः सन्ति, ततस्तैरवयवैस्तस्य लवणस्य पृथिवीकायस्य विनाशः । तथा पानके याचिते कयाचिदविरत्या एते उदकस्य स्वादं न जानन्तीत्यनुकम्पया आदिशब्दादनाभोगेन वा उदकं दीयते तत एवमुदकस्याम्लावयवसंस्पर्शतो विनाशः ॥ ४७९ ॥

१ उड्डाती विरसम्मि ता० ॥ २ अलित्ते पाये मो० ॥

**पूयलियलग्ग अगणी, पलीवणं गाममादिणं होज्जा ।**
**रोट्टपणगा तरुम्मि, भिगु-कुंथादी य छट्ठम्मि ॥ ४८० ॥**

कयाचिदविरत्याऽनाभोगतः साङ्गारा पूपलिका दत्ता भवेत् तत्राम्लावयवसंस्पर्शतस्तस्य विध्वंसः; यद्वा स पूपलिकालग्नोऽग्निर्दहेत्, स च साधुर्न चेतयते ततः प्रदीप्ते पात्रे परितापलगनतः सहसा तत् पात्रं त्यजेत्, तच्च कण्टकवृत्यादिमध्ये पतितमिति कृत्वा तद्दाहप्रसङ्गतो 'ग्रामादीनां' ग्रामस्य नगरस्य पाटकस्य वा प्रदीपनं भवेत्, ततो महती अग्निकायस्य विराधना । यत्राग्निस्तत्र वायुरिति वायुविराधना । वनस्पतिविराधनामाह—"रुट्टे"त्यादि । कयाचिदविरत्या 'रोट्टः' लोट्टो दत्तः, सोऽम्लावयवसंस्पर्शतः प्राणविपत्तिमाप्नोति । तथा भृगुर्नाम श्लक्ष्णा राजिस्तासु पनकः सम्मूर्च्छति, सोऽन्न-पानग्रहणतो विध्वंसमापद्यते । एषा 'तरौ' वनस्पतिकाये विराधना । भृगुषु पनके सम्मूर्च्छिते कुन्थ्वादयोऽपि सम्मूर्च्छन्ति, तेऽवयवानामम्लभावेनान्न-पानग्रहणतो वा विराध्यन्ते । एषा 'षष्ठे' त्रसकाये विराधना । एवं षण्णामपि कायानां पात्रस्यालेपने विराधना ॥ ४८० ॥

यदप्युक्तम् "लेपैषणा भगवद्भिर्नोक्ता" ( गा० ४७५ ) इति तत्र प्रतिविधानमाह—

**पायग्गहणम्मि उ देसियम्मि लेवेसणा वि खलु वुत्ता ।**
**तम्हा उ आणणा लिंपणा य लेवस्स जयणाए ॥ ४८१ ॥**

पात्रग्रहणे देशिते खलु लेपैषणाऽप्युक्ता द्रष्टव्या, लेपमन्तरेणावश्यं षड्जीवनिकायविराधनात्, यथोक्तमनन्तरम् । तस्माज्जिनोपदिष्टत्वाल्लेपस्य यतनया आनयनम्, तेन च पात्रस्य लेपनं कर्त्तव्यम् ॥ ४८१ ॥ पर आह—यतनया लेपस्यानयनादि कर्त्तव्यं तत एवं क्रियताम्—

**हत्थोवघाय गंतूण लिंपणा सोसणा य हत्थम्मि ।**
**सागारिए पभू जिंघणा य छकायजयणाए ॥ ४८२ ॥**

'यस्माल्लेपस्यानयने भारेण हस्तोपघातः तस्मात् तत्र गत्वा पात्रस्य लेपनं कर्त्तव्यम्' इति नोदकवचनम् । इदमपि नोदकवचः—लिप्तस्य पात्रस्य हस्ते धरणतः शोषणा कर्त्तव्या । अत्रोभयत्रापि प्रत्युत्तरमग्रे दास्यते । तथा व्रजता प्रत्यासन्नं शय्यातरशकटमवलोक्य 'सागारिकपिण्ड एषः' इति कृत्वा न वर्जनीयम् किन्तु तत्रैव लेपग्रहणं कार्यम्, तथा तस्य शकटस्य यः प्रभुः प्रभुसन्दिष्टो वा तमनुज्ञापयेत्, अनुज्ञाप्य च कटुगन्धपरिज्ञानाय नाशामसंस्पर्शयन् तं लेपं जिघ्रेत्, तदनन्तरं लेपस्य ग्रहणं षट्काययतनया कर्त्तव्यमित्येष द्वारगाथासङ्क्षेपार्थः ॥ ४८२ ॥

साम्प्रतमेनामेव विवरीषुः प्रथमतः "गंतूण लिंपणे"ति द्वारं व्याख्यानयति—

**चोयगवयणं गंतूण लिंपणा आणणे बहू दोसा ।**
**संपातिमादिघातो, अहिउस्सग्गो य गहियम्मि ॥ ४८३ ॥**

नोदकवचनम्—तत्र शकटसमीपे गत्वा पात्रस्य लेपनं कर्त्तव्यम्, यतो लेपस्यानयने बहवो दोषाः; तथाहि—भारेण हस्तोपघातः पूर्ववत्, तथा सम्पातिमानाम् आदिशब्दादसम्पा-

१ पूवलि° ता० ॥ २ होति ता० ॥ ३ "वणस्सतिविराधणा—अतिछडाणं रोट्टो दिण्णो होज्जा, सो विद्धंसति अंबभावेण" इति चूर्णिः ॥ ४ चोदक° मो० मा० ॥

तिमानां च जीवानां तत्र पतितानामुपघातः, स च कदाचिदधिको लेपो गृहीतो भवेत् ततस्तस्मिन्नधिके गृहीते 'उत्सर्गः' परिष्ठापनिकादोषः सम्पद्यते । उक्तञ्च—

मारे हत्थुवघातो, तत्थ य संपादिणो पडंते य ।
पारिट्ठावणिदोसो, अहिगम्मि य होइ आणीए ॥

एवमुक्ते आचार्यः प्राह—नोदक ! तत्र पात्रे लिप्यमाने सविशेषतरा आत्मोपघातादयो दोषाः ॥ ४८३ ॥ तथा चाह—

एवं पि भाणभेदो, वियावडे अत्तणो उ उवघाओ ।
निस्संकियं च पायम्मि गिण्हणे ईयरहा संका ॥ ४८४ ॥

'एवमपि' तत्र गत्वा पात्रलेपनेऽपि ऊर्द्धस्थितो लेपं गृहीत्वा भाजने प्रक्षिपति, तत्र व्यापृतस्य सतः कदाचिद् हस्ताद् भाजनं पतेत्, तत एवं व्यापृते भाजनभेदः । तथा कथमपि शकटस्य पतनत आत्मनश्चोपघातः । किञ्च पात्रे लेपस्य ग्रहणे गृहीत्वा च तत्रैव पात्रस्य लेपने क्रियमाणे तेषां साक्षात् पश्यतामेवं निःशङ्कितं भवति, यथा—एतेनाशुचिना लेपेन भोजनपात्रममी लिम्पन्ति; ततो महान् प्रवचनोपघातः । 'इतरथा' तत्र पात्रालेपने शरावे च लेपस्य ग्रहणे शङ्कोपजायते—किं पात्रस्य लेपनाय उत दुःखयतः पादस्य पिण्डीबन्धनाय लेपमाददते ? ततो न प्रवचनोपघातः ॥ ४८४ ॥

यदप्युक्तं "भारेण हस्तोपघातः" ( गा० ४८२ ) इति तत्रापि प्रत्युत्तरमाह—

जइ वा हत्थुवघाओ, आणिज्जंतम्मि होइ लेवम्मि ।
पडिलेहणादि चेट्ठा, तम्हा उ न काइ कायव्वा ॥ ४८५ ॥

यदि लेपे आनीयमाने भारेण हस्तोपघात इति नानयनं क्रियते तर्हि न कदाचिदपि प्रतिलेखनादिका क्रिया कर्त्तव्या, तत्रापि यथायोगं हस्त-पादादेरुपघातसम्भवात् । तस्माद्यथा प्रतिलेखनादिका क्रियाऽवश्यं कर्त्तव्या तत्करणे गुणसम्भवाद् एवं लेपानयनमपि ॥ ४८५ ॥

तदेवं "हत्थोवघाय गंतूण लिंपणा" (गा० ४८२) इति व्याख्यातम् । अधुना "सोसणा य हत्थम्मि" ( ४८२ ) इति व्याख्यानयति—

जति नेवं तो पुणरवि, आणेउं लिंपिऊण हत्थम्मि ।
अच्छति धारेमाणो, सद्दवनिक्खेवपरिहारी ॥ ४८६ ॥

यदि नाम तत्र गत्वा पात्रं लेपनीयमिति नैवमिष्यते अनन्तरोदितानेकदोषप्रसङ्गात् ततः पुनरपि किञ्चिद् वक्तव्यम्—लेपमानीय पात्रं लिप्त्वा 'सद्रवनिक्षेपपरिहारी' सद्रवनिक्षेपपरिहारमिच्छन् हस्ते पात्रं धारयन् तावत् तिष्ठति यावल्लेपस्य शोषो भवति एवं क्रियताम् ॥४८६॥

अत्राऽऽचार्यः प्राह—

एवं पि हु उवघातो, आयाए संजमे पवयणे य ।
मुच्छादी पवडंते, तम्हा उ न सोसए हत्थे ॥ ४८७ ॥

१ °र्य आह डे० त० ॥ २ चोदक कां० मो० भा० ॥ ३ एवं भायण° ता० ॥ ४ इहर° ता० ॥
५ गाथेयं नास्त्याहता चूर्णिकृता ॥ ६ °ष्यं क्रियते त° डे० त० ॥

'एवमपि' हस्ते धृत्वा पात्रलेपस्य शोषणेऽपि 'हु:' निश्चितमुपघातः आत्मनः संयमस्य प्रवचनस्य च । तत्राऽऽत्मोपघातो मूर्च्छया आदिशब्दात् पात्रभारेण च प्रतिपतति वेदितव्यः । संयमोपघातः षट्कायानामुपरि पतनात् । प्रवचनोपघातः पतन्तं दृष्ट्वा लोको ब्रूयात् 'दुर्दृष्टधर्माणोऽमी' इति । उक्तञ्च—

कायाणमुवरि पडणे, आयाए संजमे पवयणे य ।
उण्हेण व भारेण व, मुच्छा पवडंति आयाए ॥
कायोवरि पवडंते, अह होही संजमे विराहणया ।
पवयणे अदिट्ठधम्मा, पडंत दट्ठुं वए लोगो ॥

यस्मादेते दोषास्तस्मान्न हस्ते पात्रं शोषयितव्यम् । अत्र सर्वत्र नोदकस्यैवं ब्रुवतो यथाच्छन्द इति कृत्वा चतुर्गुरुकं प्रायश्चित्तम् ॥ ४८७ ॥

एवमाचार्यो नोदकं प्रतिहत्य साम्प्रतमात्मना यतनासामाचारीमाह—

**दुविहा य होंति पाता, जुण्णा[1] य नवा य जे उ लिप्पंति ।**
**जुण्णे दाएऊणं, लिंपति पुच्छा य इयरेसिं ॥ ४८८ ॥**

यानि पात्राणि लिप्यन्ते तानि द्विविधानि भवन्ति । तद्यथा—जीर्णानि नवानि च । तत्र यानि जीर्णानि तानि नियमत आचार्याणां दर्शनीयानि, यथा—ईदृशो लेपः क्षमाश्रमणाः! पात्राणाममेतनो वर्त्तते ततः सम्प्रति लिम्पामि न वा ?। तत्रैवं दर्शयित्वा यद्यनुज्ञा जाता ततस्तानि जीर्णानि लिम्पति नेतरथा । अदर्शयित्वा लेपने प्रायश्चित्तं मासलघु । यानि पुनर्नवानि तान्यवश्यं लेपनीयानीति कृत्वा आचार्यस्याप्रच्छयाऽपि तेषाम् 'इतरेषां' नवानां लेपनं कर्त्तव्यम् ॥ ४८८ ॥ अथ जीर्णानामदर्शने को दोषः ? इत्यत आह—

**पाडिच्छग-सेहाणं, नाऊणं कोइ आगमण[2] मायी ।**
**दढलेवे वि उ पाए, लिंपति मा तेसि दिज्जिज्जा ॥ ४८९ ॥**
**अहवा वि विभूसाए, लिंपति जा सेसगाण परिहाणी ।**
**अपडिच्छणे य दोसा, सेहे काए[3] यतोऽदाए ॥ ४९० ॥**

कश्चिन्मायी शिष्याणां प्रातीच्छिकानां चाऽऽगमनं ज्ञात्वा 'मा तेषां दद्याद्' इति कृत्वा दृढलेपान्यपि पात्राणि भूयो[4] लिम्पति ॥ ४८९ ॥

अथवा 'न शोभनोऽमेतनो लेपः' इति विभूषानिमित्तमजीर्णलेपमपि पात्रं भूयः कोऽपि लिम्पति । एवं मायया विभूषानिमित्तं वा भाजनेषु तेषु लिप्तेषु या 'शेषकाणां' साधूनां प्रातीच्छिकानां शिष्याणां च परिहाणिस्तां स मायी विभूषार्थी वा प्राप्नोति । तमेव दर्शयति—"अपडिच्छणे य" इत्यादि । केचित् प्रातीच्छिकाः समागतास्तद्योग्यानि च पात्राणि न सन्ति लिप्तानि तिष्ठन्तीति कृत्वा, तत एवं पात्रैर्विना तेषां प्रातीच्छिकानामप्रतीच्छने ज्ञान-दर्शन-चारित्रपरिहाणिः । "सेहे काए"त्ति तथा शैक्षः कश्चिदुपस्थितोऽथ च भाजनं न विद्यते

१ जुण्णा नवा चेव जे उ ता० ॥ २ °गमं मा° ता० ॥ ३ °ए अतो मो० विना ॥ ४ °योऽपि लि° डे० कां० ॥

लिप्तमस्तीति कृत्वा, ततो भाजनं विना कथं स प्रव्राज्यते इति सोऽप्रव्राजितः कायविराधनां कुर्यात्, सा च तन्निमित्तेति ज्ञान-दर्शन-चारित्रपरिहाणिप्रत्ययं कायविराधनाप्रत्ययं च प्रायश्चित्तं प्राप्नोति । यत एवमदर्शिते दोषास्तस्माद् जीर्णानि दर्शयेत् ॥ ४९० ॥

अथ केन विधिना लेपस्य ग्रहणादि कर्त्तव्यम्? अत आह—

लेपग्रहण-विधिः

**पुव्वण्हे लेवगमं, लेवग्गहणं सुसंवरं काउं ।**
**लेवस्स आणणा लिंपणा य जयणाएँ कायव्वा ॥ ४९१ ॥**

पूर्वाह्णे लेपनिमित्तं गमं—गमनं कृत्वा तत्र च यतनया लेपग्रहणं च कृत्वा ततः सुसंवरं यथा भवत्येवं लेपस्य यतनयाऽऽनयनं कर्त्तव्यम् । आनीते च यतनया पात्रस्य लेपना ॥ ४९१ ॥ एनामेव गाथां व्याचिख्यासुराह—

**पुव्वण्हे लेपगहणं, काहं ति चउत्थगं करेज्जाहि ।**
**असहू वासियभत्तं, अकारऽलंभे व बिंतियरे ॥ ४९२ ॥**

साधुना प्रतिक्रमणचरमकायोत्सर्गस्थितेन चिन्तनीयम्—किमद्य भाजनानि लेपनीयानि न वा?, तत्र यदि लेपनीयानि ततः पूर्वाह्णे लेपग्रहणमहं करिष्यामीति विचिन्त्य 'चतुर्थकम्' अभक्तकं कुर्यात् । अथ 'असहः' असमर्थश्चतुर्थभक्तं कर्त्तुं तर्हि पर्युषितं गृह्णाति भक्तम् । अथ पर्युषितम् 'अकारकम्' अपथ्यं यदि वा न लभ्यते ततः पौरुषीं न करोति किन्त्वितरे साधवो मध्याह्ने हिण्डित्वा तस्मै भक्तं ददति ॥ ४९२ ॥

**कयकिइकम्मो छंदेण छंदितो भणति लेव घिच्छामि ।**
**तुब्भं वियाणिमट्ठो, आमं तं कित्तियं किं वा ॥ ४९३ ॥**
**सेसे वि पुच्छिऊणं, कयउस्सग्गो गुरूण नमिऊण ।**
**मल्लग-रूए गेण्हइ, जति तेसिं कप्पितो होति ॥ ४९४ ॥**

कृतं कृतिकर्म—वन्दनं येन स कृतकृतिकर्मा । किमुक्तं भवति?—स लेपानयनाय गन्ता प्रथममाचार्याणां वन्दनकं ददाति, दत्त्वा ब्रूते—इच्छाकारेण सन्दिशत । एवमुक्ते सूरयोऽभिदधति—"छन्देण" छन्दसा विज्ञपयेति भावः । एवं छन्दसा 'छन्दितः' निमन्त्रितः सन् भणति—गत्वा लेपं ग्रहीष्यामि । एवमुक्त्वाऽऽचार्यान् शेषसाधूंश्च वक्ति—युष्माकमप्यस्ति लेपेन प्रयोजनमानीयताम् । तत्र यो वक्ति आमं तं प्रति ब्रूते- कियन्तमानयामि? किं वा लेपम्? । तत्र यद् भणति तद् इच्छामीति प्रतिपद्य 'कृतोत्सर्गः' उपयोगकायोत्सर्गं कृत्वा गुरून् नमस्कृत्य आवश्यिकीं कृत्वा यदि तेषां पात्र-वस्त्राणां कल्पिकस्ततो गृहेषु गत्वा मल्लकं रूतं च गृह्णाति ॥ ४९३ ॥ ४९४ ॥ अथाकल्पिकस्तत आह—

**गीयत्थपरिग्गहिते, अयाणओ रूय-मल्लए घेत्तुं ।**
**छारं च तत्थ वच्चति, गहिए तसपाणरक्खट्ठा ॥ ४९५ ॥**

यः 'अज्ञायकः' अगीतार्थः स गीतार्थेन परिगृहीतानि रूत-मल्लकानि 'गृहीत्वा' गृहीते सति लेपे सम्पातिमत्रसप्राणरक्षार्थं तत्र मल्लकेषु क्षारं च गृहीत्वा व्रजति ॥ ४९५ ॥

१ °वदाणं ले° ता० ॥ २ करिस्सामि ता० विना ॥ ३ °षु रक्षां च त० ॥

सम्प्रति यदधस्ताद् भणितं "सागारिय" ( गा० ४८२ ) त्ति तद्व्याख्यानार्थमाह—

**वच्चंतेण य दिट्ठं, सागारिदुचक्कगं तु अब्भासे ।**
**तत्थेव होइ गहणं, न होति सो सागरियपिंडो ॥ ४९६ ॥**

तेन गृहीतरूत-मल्लक-क्षारेण व्रजता यदि सागारिकस्य—शय्यातरस्य द्विचक्रकं—शकटम् 'अभ्यासे' निकटे प्रदेशे दृष्टम् ततस्तत्रैव तस्य लेपग्रहणं भवति । यतः स न भवति सागारिकपिण्ड इति ॥ ४९६ ॥ सम्प्रति प्रभुद्वारमाह—

**गंतुं दुचक्कमूलं, अणुण्णविज्जा पभुं तु साहीणं ।**
**एत्थ य पभु त्ति भणिए, कोई गच्छे निवसमीवं ॥ ४९७ ॥**
**किं देमि त्ति नरवई, तुब्भं खरमक्खिया दुचक्कि त्ति ।**
**सो य पसत्थो लेवो, एत्थ य भद्देयरे दोसा ॥ ४९८ ॥**

गत्वा द्विचक्रमूलं शकटस्य 'स्वाधीनं' प्रत्यासन्नं प्रभुमनुज्ञापयेत्, अननुज्ञापने प्रायश्चित्तं मासलघु, तस्मात् प्रायश्चित्तभीरुणा नियमतः प्रभोरनुज्ञापना कर्त्तव्या । अत्र प्रभुरित्युक्ते कश्चिच्चिन्तयति—राजानं मुक्त्वा कोऽन्यः प्रभुः ? इति राजाऽनुज्ञापनीय उक्तः, एवं चिन्तयित्वा नृपसमीपं गच्छेत्, गत्वा च तं राजानं धर्मलाभयेत् ॥ ४९७ ॥

तत्र स नरपतिर्ब्रूयात्—किं ददामि ? । साधुर्वदति—युष्माकं 'द्विचक्राणि' शकटानि खरेण—तैलेन म्रक्षितानि सन्ति, तत्र च यो लेपः स प्रशस्त इति तमनुजानीत । अत्र 'भद्रेतरदोषाः' भद्रकदोषाः प्रान्तदोषाश्च । तत्र भद्रकदोषा इमे—स राजाऽनुज्ञापितः सन् ब्रूयाद्—अहो ! निर्ममत्वा भगवन्त एतदप्ययाचितं न गृह्णन्ति, ततः स आज्ञापयेत्—यानि कानिचिन्मम विषये शकटानि तानि सर्वाण्यपि तैलेन म्रक्षणीयानि । प्रान्तः पुनरेवं चिन्तयेत्—अहो ! अमी अशुचयो यदेतन्मां याचन्ते, नूनं सर्वमिदं नगरममीभिर्धर्षयितव्यमिति प्रद्वेषं यायात्, प्रद्विष्टश्च घोषापयेत्, यथा—मम राज्ये न कोऽपि शकटं तैलेन म्रक्षयेत् किन्तु घृतेनान्येन वा ॥ ४९८ ॥

**तम्हा दुचक्कपतिणा, तस्संदिट्ठेण वा अणुण्णाते ।**
**कडुगंधजाणणट्ठा, जिंघे नासं अघट्टंतो ॥ ४९९ ॥**

यस्मादेवं भद्रक-प्रान्तदोषास्तस्माद्राजा नानुज्ञापयितव्यः । कोऽनुज्ञापयितव्यः ? इति चेद् उच्यते—यस्तस्य द्विचक्रस्य—शकटस्य पतिः—स्वामी यो वा तेन—शकटपतिना सन्दिष्टः, तेन द्विचक्रपतिना तत्सन्दिष्टेन वाऽनुज्ञाते तैलस्य किल कटुको गन्ध इति 'कटुगन्धज्ञानार्थं' कटुगन्धोऽस्ति न वेति परिज्ञानार्थं नासाम् 'अघट्टयन्' असंस्पृशन् तं लेपं दूरस्थो जिघ्रति । घ्राते च यदि कटुको गन्धः समायाति ततस्तैललेप इति कृत्वा तं समादत्ते ॥ ४९९ ॥

सम्प्रति "छक्कायजयणाए" ( गा० ४८२ ) इति व्याख्यानयति—

**हरिए बीए चले जुत्ते, वच्छे साणे जलट्ठिए ।**
**पुढवी संपातिमा सामा, महावाते महियाऽमिते ॥ ५०० ॥**

हरिते बीजे वा साधौ शकटे वा प्रतिष्ठिते, तथा चले बलीवर्दाभ्यां युक्ते वा शकटे,

---

१ °ण्णातो ता० ॥

तथा शकटेन सह बद्धे वत्से, शकटस्याधः स्थिते शुनि वा, तथा जलस्योपरि स्थिते, पृथिव्यां वा–सचित्तपृथिवीकायस्योपरि प्रतिष्ठिते शकटे, तथा सम्पातिमेषु–त्रसगणेषु सत्सु, तथा 'श्यामा' रात्रिस्तस्याम्, महावाते वा वाति, महिकायां निपतन्त्यां लेपग्रहणं नानुज्ञातम्। नाप्यमितस्य लेपस्य ग्रहणम्। एष द्वारगाथासङ्क्षेपार्थः। व्यासार्थस्तु प्रतिद्वारं वक्ष्यते ॥५००॥

तत्र यद्यप्यनन्तरं प्रायश्चित्तगाथाद्वयं तथापि नाव्याख्यातेषु द्वारेषु तद् व्याख्यातुं शक्यमिति प्रथमतो द्वाराणि व्याख्यायन्ते। तत्र हरितद्वारं बीजद्वारं चाधिकृत्याह—

**हरिए बीएँ पतिट्ठिय, अणंतर परंपरे य बोधव्वे।**
**परिताणंते य तहा, चउभंगो होति नायव्वो ॥ ५०१ ॥**

हरिते बीजे च साधौ शकटे वा अनन्तरं परम्परके वा प्रतिष्ठिते प्रत्येकं चतुर्भङ्गी भवति ज्ञातव्या। गाथायां पुंस्त्वं प्राकृतत्वात्। तथा हरिते बीजे च प्रत्येकं परीत्तेऽनन्ते च साधौ शकटे वाऽनन्तर-परम्परप्रतिष्ठिते प्रत्येकं चतुर्भङ्गी। इयमत्र भावना–हरितेषु साधुरनन्तरप्रतिष्ठितो नो परम्परप्रतिष्ठितः १ परम्परप्रतिष्ठितो नानन्तरप्रतिष्ठितः २ अनन्तरप्रतिष्ठितोऽपि परम्परप्रतिष्ठितोऽपि ३ नानन्तरप्रतिष्ठितो नापि परम्परप्रतिष्ठितः ४। एवं बीजेष्वपि साधुमधिकृत्य चतुर्भङ्गी। एवं गन्त्रीमप्यधिकृत्य हरितेषु बीजेषु च प्रत्येकं चतुर्भङ्गी द्रष्टव्या–हरितेष्वनन्तरं प्रतिष्ठिता गन्त्री नो परम्परप्रतिष्ठिता इत्यादि। एवं सर्वसङ्कलनया चतुर्भङ्गीचतुष्टयं जातम्। चतुर्भङ्गीद्विकं तु साधु-गन्त्रीसंयोगतो द्रष्टव्यम्। तद्यथा–हरितेषु साधुर्गन्त्री वाऽनन्तरप्रतिष्ठिता नो परम्परप्रतिष्ठिता इत्यादि भङ्गचतुष्टयं प्राग्वत्। एवं बीजेष्वपि। सर्वसङ्ख्यया षट् चतुर्भङ्ग्यः। एतच्च चतुर्भङ्गीषट्कं किल प्रत्येकेषु हरित-बीजेषूक्तम्। एवमनन्तेष्वपि द्रष्टव्यम्। एवं मिश्रेष्वपि ॥ ५०१ ॥ साम्प्रतमत्रैव प्रायश्चित्तमुच्यते—

**चउरो लहुगा गुरुगा, मासो लहु गुरु य पणग लहु गुरुयं।**
**छसु परितऽणंत मीसे, बीजे य अणंतर परे य ॥ ५०२ ॥**

हरिते चशब्दसंसूचिते प्रत्येकेऽनन्तर-परम्परभेदतस्त्रिप्वाद्येषु भङ्गेषु चत्वारो लघुका वक्तव्याः। इयमत्र भावना–प्रत्येकेषु हरितेषु साधावनन्तरप्रतिष्ठिते प्रथमे भङ्गे प्रायश्चित्तं चतुर्लघु, द्वितीये परम्परप्रतिष्ठिते चतुर्लघु, तृतीये भङ्गेऽनन्तरपरम्परप्रतिष्ठिते द्वे चतुर्लघुके, चरमे भङ्गे शुद्धः। तथा प्रत्येकहरितेषु साधौ गन्त्र्यां चानन्तरप्रतिष्ठितायां द्वे चतुर्लघुनी,

---

१ गाथेयं चूर्णिकृता इत्थंरूपा स्वीकृताऽस्ति—

**हरिते बीएसु तहा, अणंतर परंपरे य बिचउक्के।**
**आता दुपदं च पयट्ठितं तु एत्थं तु चउभंगो ॥**

**चूर्णिः**—हरिते॰ गाथा। हरितेसु साधू अणंतरपतिट्ठिओ णो परंपरपतिट्ठितो वा चउभंगो। एवं बीएसु वि चउभंगो। हरितेसु भंडी अणंतरपतिट्ठिता णो परंपरपतिट्ठिता चउभंगो। एवं बीएसु वि चउभंगो। बिचउक त्ति साधुम्मि हरितेसु एगो चउभंगो, बितिओ बीएसु। एवं भंडीए वि दो चउभंगा भणिता। आता दुपतं च पतिट्ठितं तु एत्थं तु (पतिट्ठितं ति एत्थं पि प्र॰) चउभंगो। दो इति वाक्यशेषः। आय त्ति साधू। हरितेसु साधू भंडी य अणंतरपतिट्ठिताणि णो परंपरपतिट्ठिताणि चउभंगो। एवं बीएसु वि चउभंगो ॥

द्वितीयभङ्गेऽपि परम्परप्रतिष्ठितायां द्वे चतुर्लघुके, तृतीये भङ्गे उभयोरुभयत्र प्रतिष्ठितयोश्चत्वारि चतुर्लघुकानि, चरमे भङ्गे शुद्धः । तथा हरितेष्वनन्तेषु साधावनन्तरप्रतिष्ठिते प्रायश्चित्तं चतुर्गुरुकम्, द्वितीयेऽपि परम्परप्रतिष्ठिते चतुर्गुरु, तृतीयेऽनन्तरपरम्परप्रतिष्ठिते द्वे चतुर्गुरुके, चरमे शुद्धः । गव्यामप्यनन्तहरितेऽनन्तरप्रतिष्ठितायां चतुर्गुरु, परम्परप्रतिष्ठितायामपि चतुर्गुरु, उभयप्रतिष्ठितायां द्वे चतुर्गुरुके, चरमे शुद्धः । अनन्तहरितेषु साधौ गव्यां चानन्तरप्रतिष्ठितायां द्वे चतुर्गुरुके, परम्परप्रतिष्ठितायामपि द्वे चतुर्गुरुके, उभयप्रतिष्ठितायां चत्वारि चतुर्गुरुकाणि, चरमे शुद्धः । तथा मिश्रेषु प्रत्येकहरितेषु साधावनन्तरप्रतिष्ठिते मासलघु, परम्परप्रतिष्ठितेऽपि मासलघु, उभयप्रतिष्ठिते द्वे मासलघुके, चरमे भङ्गे शुद्धः । गव्यामप्यनन्तरप्रतिष्ठितायां मासलघु, परम्परप्रतिष्ठितायामपि मासलघु, उभयप्रतिष्ठितायां द्वे मासलघुके, चरमे भङ्गे शुद्धः । साधौ गव्यां चाऽनन्तरप्रतिष्ठितायां द्वे मासलघुके, परम्परप्रतिष्ठितायामपि द्वे मासलघुके, उभयप्रतिष्ठितायां चत्वारि मासलघूनि, चरमे भङ्गे शुद्धः । तथा मिश्रेष्वनन्तहरितेषु साधावनन्तरप्रतिष्ठिते मासगुरु, परम्परप्रतिष्ठितेऽपि मासगुरु, उभयप्रतिष्ठिते द्वे मासगुरुके, चतुर्थे शुद्धः । गव्यामपि अनन्तरप्रतिष्ठितायां मासगुरु, परम्परप्रतिष्ठितायामपि मासगुरु, उभयप्रतिष्ठितायां द्वे मासगुरुके, चरमे शुद्धः । साधौ गव्यां चानन्तरप्रतिष्ठितायां द्वे मासगुरुके, परम्परप्रतिष्ठितायामपि द्वे मासगुरुके, उभयप्रतिष्ठितायां चत्वारि मासगुरुकाणि, चरमभङ्गे शुद्धः । "पणग लहु गुरुग"मिति बीजेषु प्रत्येकेषु सचित्तेषु मिश्रेषु वा प्रत्येकं साधावनन्तरप्रतिष्ठिते लघुरात्रिन्दिवपञ्चकम्, परम्परप्रतिष्ठितेऽपि लघुपञ्चकम्, उभयप्रतिष्ठिते द्वे लघुपञ्चके, चरमभङ्गे शुद्धः । तथा गव्यामनन्तरप्रतिष्ठितायां लघुपञ्चकम्, परम्परप्रतिष्ठितायामपि लघुपञ्चकम्, उभयप्रतिष्ठितायां द्वे लघुपञ्चके, चरमभङ्गे शुद्धः । साधौ गव्यां चानन्तरप्रतिष्ठितायां द्वे लघुपञ्चके, परम्परप्रतिष्ठितायामपि द्वे लघुपञ्चके, उभयप्रतिष्ठितायां चत्वारि लघुपञ्चकानि, चरमभङ्गे शुद्धः । एवमनन्तेषु रात्रिन्दिवपञ्चकं गुरुकं द्रष्टव्यम् । एवं बीजे चशब्दाद्धरिते च प्रत्येके सचित्तेऽनन्ते सचित्ते मिश्रे चानन्तरे परम्परे च 'षट्सु' षट्सु भङ्गेषु यथायोगं प्रायश्चित्तमवगन्तव्यम् ॥ ५०२ ॥

इदानीं चलादिद्वारप्रतिपादनार्थमाह—

**दव्वे भावे य चलं, दव्वम्मी दुट्ठियं तु जं दुपयं ।**
**आयाएँ संजमम्मि य, दुविहा उ विराहणा तत्थ ॥ ५०३ ॥**

चलं नाम द्विविधम्, तद्यथा—द्रव्यतो भावतश्च । तत्र द्रव्यतश्चलं यद् 'द्विपदं' शकटं दुस्थितम्, तत्र लेपं गृह्णतश्चतुर्गुरुकम् । यतस्ततो द्विविधा विराधना—आत्मनि संयमे च । तत्रात्मविराधना शकटेन पतताऽभिघातसम्भवात् । संयमविराधना शकटे सञ्चाल्यमाने प्राणजात्युपमर्दनात् ॥ ५०३ ॥

**भावचल गंतुकामं, गोणाईअंतराइयं तत्थ ।**
**जुत्ते वि अंतरायं, चित्तसचलणे य आयाए ॥ ५०४ ॥**

१ °त्मनि वि° कां० डे० ॥ २ °जातेरुप° मो० ॥

भावचलं नाम 'गन्तुकामं' योज्यमानमित्यर्थः, तत्र यावद् लेपो गृह्यते तावद् बलीवर्दानां चारि-पानीयनिरोधनम्, आदिशब्दान्मनुष्याणामप्यन्तरायम् । ततो भावचलेऽपि लेपं गृह्णतश्चत्वारो लघुकाः । गतं चलद्वारम् । अधुना युक्तद्वारमाह–"जुत्ते वी"त्यादि, युक्तं नाम–योक्त्रितबलीबर्दं तत् स्थापयित्वा यदि लेपं गृह्णाति ततः प्रायश्चित्तं चत्वारो गुरुकाः, यतस्तत्रापि स एवान्तरायदोषः । अन्यश्चायम्–ते बलीवर्दा वित्रस्येयुः, तत्र गन्ध्या चलन्त्या चरणाक्रमणे आत्मविराधना, संयमविराधना त्रसादिनिपातः ॥ ५०४ ॥ सम्प्रति वत्सद्वारं श्वद्वारं चाह—

**वच्छो भएण नासति, भंडिक्खोभे य आयवावत्ती ।**
**आया पवयण साणे, काया य भएण नासंते ॥ ५०५ ॥**

यत्र शकटे वत्सो बद्धः श्वा वा यस्याधस्तात् तिष्ठति बद्धो वा वर्त्तते, तत्र वत्से लेपं गृह्णतश्चत्वारो लघुकाः शुनि चत्वारो गुरुकाः; यतो वत्सो भयेन नश्यति, तस्मिंश्च नश्यति गन्ध्याः 'क्षोभे' चलने आत्मव्यापत्तिः; तथा श्वा समागच्छन्तमपूर्वं दृष्ट्वा दशति तत्रात्मोपघातः, शुना लीढं लेपममी गृह्णन्तीति प्रवचनोपघातः, भयेन नश्यति शुनि 'कायाः' पृथिवीकायादयो विनाशमापद्यन्ते ततः संयमोपघातश्च ॥ ५०५ ॥

सम्प्रति जलस्थितद्वारं पृथिवीस्थितद्वारं चाह—

**जो चेव य हरिएसुं, सो चेव गमो उ उदग पुढवीए ।**

य एव गमः प्राग् हरितेषूक्तः स एवोदके पृथिव्यां च वेदितव्यः । इयमत्र भावना–सचित्ते उदके साधुरनन्तरप्रतिष्ठितो न परम्परप्रतिष्ठित इत्यादि चतुर्भङ्गी, गन्ध्यामप्येवं चतुर्भङ्गी, उभयोरपि चतुर्भङ्गी, तदेवं चतुर्भङ्गीत्रयं सचित्ताप्काये । एवं मिश्राप्कायेऽपि चतुर्भङ्गीत्रयमवसातव्यम् । उभयमीलने चतुर्भङ्गीषट्कम् । एवं चतुर्भङ्गीषट्कं पृथिवीकायेऽपि भावनीयम् । तत्र सचित्तेऽप्काये साधावनन्तरप्रतिष्ठिते प्रायश्चित्तं चतुर्लघु, परम्परप्रतिष्ठितेऽपि चतुर्लघु, उभयप्रतिष्ठिते द्वे चतुर्लघुके, चरमभङ्गे शुद्धः । गन्ध्यामप्यनन्तरप्रतिष्ठितायां चतुर्लघु, परम्परप्रतिष्ठितायामपि चतुर्लघु, उभयप्रतिष्ठितायां द्वे चतुर्लघुके, चरमे शुद्धः । साधु-गन्ध्योरनन्तरप्रतिष्ठितयोर्द्वे चतुर्लघुके, परम्परप्रतिष्ठितयोरपि द्वे चतुर्लघुके, उभयोरुभयत्र प्रतिष्ठितयोश्चत्वारि चतुर्लघुकानि, चरमभङ्गे शुद्धः । मिश्रेऽप्काये साधावनन्तरप्रतिष्ठिते मासलघु, परम्परप्रतिष्ठितेऽपि मासलघु, उभयप्रतिष्ठिते द्वे मासलघुके, चरमे शुद्धः । एवं गन्ध्यामपि भङ्गचतुष्टये वक्तव्यम् । साधु-गन्ध्योरनन्तरप्रतिष्ठितयोर्द्वे मासलघुके, परम्परप्रतिष्ठितयोरपि द्वे मासलघुके, उभयोरुभयत्र प्रतिष्ठितयोश्चत्वारि मासलघुकानि, चरमभङ्गे शुद्धः । एवं पृथिवीकायेऽपि चतुर्भङ्गीषट्के प्रायश्चित्तमवगन्तव्यम् ॥ सम्प्रति सम्पातिमद्वारं श्यामाद्वारं चाह—

**संपाइमा तसगणा, सामाए होइ चउभंगो ॥ ५०६ ॥**

"संपातिमा" इत्यादि । अथ के नाम सम्पातिमा येषु पतत्सु लेपो न गृह्यते ?, किं त्रसाः स्थावरा वा ? तत्राह—सम्पातिमास्त्रसगणा न स्थावराः । तेषु सम्पातिमेषु पतत्सु यदि लेपं गृह्णाति तदा तस्य प्रायश्चित्तं चत्वारो लघुकाः । श्यामा–रात्रिस्तत्र चतुर्भङ्गी, तद्यथा–रात्रौ लेपं गृह्णाति रात्रावेव च भाजनस्य लेपं ददाति, अत्र प्रायश्चित्तं चत्वारो लघुकास्तपसा कालेन

च गुरवः, रात्रौ लेपं गृहीत्वा दिवसे भाजनस्य ददाति चत्वारो लघुकास्तपोगुरुकाः काललघवः, दिवसे लेपं गृहीत्वा रात्रौ भाजनस्य ददाति चत्वारो लघुकास्तपोलघवः कालगुरुकाः, दिवसे गृहीत्वा दिवस एव ददाति शुद्धः ॥ ५०६ ॥ महावातादिद्वारत्रयमाह—

**वायम्मि वायमाणे, महियाए चेव पवडमाणीए ।**
**नाणुण्णायं गहणं, अमियस्स य मा विगिंचणया ॥ ५०७ ॥**

'वाते' महावाते वाति तथा महिकायां प्रपतन्त्यां लेपस्य ग्रहणं नानुज्ञातं तीर्थकर-गणधरैः, महावाते वाति तदुद्धूतानां त्रस-स्थावराणां लेपसम्पर्कतो विनाशसम्भवात् महिकायां निपतन्त्यामप्कायविराधनात् । तथा अमितस्यापि लेपस्य ग्रहणं नानुज्ञातम्, मा भूद् 'विवेचनिका' परिष्ठापनिकेति कृत्वा । तत्र महावाते वाति लेपं गृह्णतः प्रायश्चित्तं चतुर्लघु । महिकायामपि निपतन्त्यां चतुर्लघु । अमितग्रहणे मासलघु ॥ ५०७ ॥

एतदेव प्रायश्चित्तं प्रतिपादयन्नाह—

**चल-जुत्त-वच्छ-महिया-तसेसु सामाएँ चेव चतुलहुगा ।**
**दव्वचल साण गुरुगा, मासो लहुओ उ अमियम्मि ॥ ५०८ ॥**

भावतश्चले बलीवर्दयुक्ते वत्से निबद्धे तथा महिकायां निपतन्त्यां त्रसेषु सम्पातिमेषु निपतत्सु श्यामायां च लेपं गृह्णतः प्रत्येकं प्रायश्चित्तं चत्वारो लघुकाः । द्रव्यचले शुनि वा स्थिते चत्वारो गुरुकाः । अमिते गृहीते लघुको मासः । विशेषभावना तु प्रतिद्वारं प्रागेव कृता ॥ ५०८ ॥

**एतद्दोसविमुक्कं, घेत्तुं छारेण अक्कमित्ताणं ।**
**चीरेण बंधिऊणं, गुरुमूल पडिकमाऽऽलोए ॥ ५०९ ॥**

ये एते हरितादयोऽनन्तरं दोषा उक्तास्तैर्मुक्तं लेपं गृहीत्वा 'मा सम्पातिमानां वधो भूयात्' [ इति ] तं 'क्षारेण' भस्मना आक्रम्य चीवरेण बद्ध्वा गुरुपादमूलमागच्छति, आगम्य चैर्यापथिकीं प्रतिक्रम्यालोचयति ॥ ५०९ ॥

**दंसिय छंदिय गुरु सेसए य ओमत्थियस्स भाणस्स ।**
**काउं चीरं उवरिं, रूयं च छुभेज्ज तो लेवं ॥ ५१० ॥**

आलोच्य लेपं गुरोर्दर्शयति । दर्शयित्वा गुरुं लेपेन 'छन्दयति' निमन्त्रयति । गुरुनिमन्त्रणानन्तरं शेषकानपि साधून् निमन्त्रयति । ततो यावता यस्यार्थस्तस्य तावन्तं दत्त्वा एकस्य भाजनस्य 'अवमन्थितस्य' अवाङ्मुखीकृतस्योपरि चीवरं कृत्वा तत्र लेपं रूतं च प्रक्षिपेत् ॥ ५१० ॥

सम्प्रति लेपदानविधिमाह—

**अंगुट्ठ-पएसिणि-मज्झिमाहिँ घेत्तुं घणं ततो चीरं ।**
**आलिंपिऊण भाणं, एक्कं दो तिन्नि वा वट्टे ॥ ५११ ॥**

अङ्गुष्ठेन प्रदेशिन्या मध्यमया चाङ्गुल्या लेपं गृहीत्वा घनं च चीवरमादाय तत्र लेपं प्रक्षिप्य निष्पीडयेत्, निष्पीड्य च एकैकभाजनमेकं द्वौ त्रीन् वा वारान् लेपयेत् । अधिकं

१ °रे णिबं° ता० ॥ २ तु तं ची° ता० ॥

तु लेपमल्लकनिमित्तं सरूतकं पेषयेत् । अथ न दातव्योऽल्लको यदि वा तत्राप्युद्धरितः ततः सरूतकं तं क्षारे परिष्ठापयेत् । अन्यच्चान्यच्च भाजनं लिप्त्वाऽन्यदन्यद् वारंवारेण घट्टणपाषाणेन घट्टयति ॥ ५११ ॥ तथा चाह—

अण्णोण्णे अंकम्मी, अण्णं घट्टेति वारवारेण ।
आणेइ तमेव दिणे, दवं रएउं अभत्तट्ठी ॥ ५१२ ॥

अन्यस्मिन् भाजने घट्टिते अन्यद् अन्यद् भाजनमङ्के स्थापयित्वा वारंवारेण घट्टयति । तत्र यदि उद्वानो लेपो यदि च तस्य द्रवेण कार्यं समुत्पन्नं स चाऽऽत्मनाऽभक्तार्थी ततः सोऽभक्तार्थी तस्मिन्नेव दिने पात्रं लेपेनोपरज्य उद्वाने लेपे तेन 'द्रवं' पानीयमानयति । अथ नोद्वानस्ततोऽन्येषामभक्तार्थिनामहिण्डमानानां वा तत् पात्रं समर्प्यान्येन पानीयमानयेत् ॥ ५१२ ॥

अभतट्ठीणं दाउं, अण्णेसिं वा अहिंडमाणाणं ।
हिंडेज्ज असंथरणे, असती घेत्तुं अरइयं तु ॥ ५१३ ॥

यदि स भक्तार्थी न च पात्रस्य लेपोऽद्यापि शुष्कस्ततः 'असंस्तरणे' भोजनमन्तरेण संस्तरीतुमशक्तौ अभक्तार्थिनामन्येषां वा साधूनामहिण्डमानानां तत् पात्रं समर्प्य हिण्डेत । असति अन्येषामभक्तार्थिनामहिण्डमानानां वा अभावे तद् 'अरञ्जितम्' अद्याप्यपरिणतलेपं गृहीत्वा हिण्डेत ॥ ५१३ ॥

न तरिज्जा जति तिण्णि उ, हिंडावेउं ततो णु छारेण ।
ओयत्तेउं हिंडइ, अन्ने व दवं से गिण्हंति ॥ ५१४ ॥

यदि त्रीणि पात्राणि हिण्डापयितुं न शक्नोति ततः 'नु' निश्चितं तत् पात्रमुपाश्रये क्षारेण 'अवनम्य' स्थगयित्वा हिण्डते । यदि वा 'से' तस्य योग्यं द्रवमन्ये गृह्णन्ति ततो रिक्तपात्रवहने न कश्चिद्धार इत्यदोषः ॥ ५१४ ॥

लित्थारियाणि जाणि उ, घट्टगमादीणि तत्थ लेवेण ।
संजमभूतिनिमित्तं, ताइं भूईएँ लिंपिज्जा ॥ ५१५ ॥

'तत्र' पात्रलेपने यानि लेपेन घट्टकादीनि 'लेत्थारियाणि' देशीपदमेतत् खरण्टितानि 'संजमभूतिनिमित्तं' संयमविभूतिहेतोः 'भूत्या' क्षारेण तानि लिम्पेद् येन तत्संस्पर्शतस्त्रसानां स्थावराणां वा विनाशो न भवति ॥ ५१५ ॥

एवं लेवग्गहणं, आणयणं लिंपणाय जयणा य ।
भणियाणि अतो वोच्छं, परिकम्मविहिं तु लित्तस्स ॥ ५१६ ॥

'एवम्' उक्तेन प्रकारेण लेपस्य ग्रहणम् आनयनं पात्रस्य लेपनाय सर्वत्र यतना एतानि भणितानि । अत ऊर्द्धं पुनर्लिप्तस्य परिकर्मविधिं वक्ष्यामि ॥५१६॥ तमेवाभिधातुकाम आह—

लित्ते छाणिय छारो, घणेण चीरेण बंधिउं उण्हे ।
उव्वत्तण परियत्तण, अंछिय धोए पुणो लेवो ॥ ५१७ ॥

पात्रे लिप्ते सति यः 'क्षाणितः' गालितः 'क्षारः' भस्म स तत्र प्रक्षिप्यते, ततो घनेन

१ अक्कमिउं अण्णं ता० ॥ २ असइ घेत्तुं ता० ॥ ३ उव्वुण्णेउं ता० ॥ ४ लेवो ता० ॥

चीरेण बद्धा उष्णे ध्रियते, तत्र च पात्रस्योद्वर्तनं परिवर्तनं च तावत् कर्तव्यं यावद् लेपः शुष्को भवति, ततः पात्रम् 'अञ्छयते' आकृष्यते, आकृष्य पानीयेन प्रक्षाल्यते, ततः प्रक्षालिते सति पुनरपि लेपो दीयते ॥ ५१७ ॥

**काउं सरयत्ताणं, पत्ताबंधं अबंधगं कुज्जा ।**
**साणाइरक्खणट्ठा, पमज्ज छाउण्हसंकमणा ॥ ५१८ ॥**

पात्रे भूयो लिप्ते सति तस्योपरि 'सरजस्त्राणं' रजस्त्राणसहितं पात्राबन्धम् 'अबन्धकम्' अग्रन्थिकं कुर्यात् । कस्मादबन्धकं कुर्याद् ? अत आह—'श्वादिरक्षणार्थं' शुन आदिशब्दान्मर्कट-मार्जारादिभ्योऽपि रक्षणार्थम्, अन्यथा हि ग्रन्थौ दत्ते सपात्रबन्धं पात्रं श्वादिभिर्नीयते । तथा छायायामुष्णे च पात्रस्य 'सङ्क्रमणे(णा)' प्रमृज्य तत् पात्रं स्थापयितव्यम् ॥५१८॥

**तद्दिवसं पडिलेहा, कुंभमुहादीण होइ कायव्वा ।**
**छण्णे य निसिं कुज्जा, कयकज्जाणं विवेगो उ ॥ ५१९ ॥**

यस्मिन् दिने पात्रलेपनं तस्मिन्नेव दिवसे 'कुम्भमुखादीनां' घटकण्ठादीनाम् आदिशब्दात् स्थालीकण्ठादिपरिग्रहः 'प्रत्युपेक्षा भवति कर्तव्या' कुटकण्ठादीनि तस्मिन् दिने आनेतव्यानीत्यर्थः । किमर्थम् ? इत्यत आह–'निशि' रात्रौ तेषामुपरि छन्ने प्रदेशे लिप्तानि पात्राणि कुर्यादित्येवमर्थम् । तदनन्तरं तेषां घटमुखादीनां कृतकार्याणां 'विवेकः' परिष्ठापनिका ॥५१९॥

**अट्टगहेउं लेवाहिगं तु सेसं सरूयगं पीसे ।**
**अहवा वि न दायव्वो, सरूयगं छारे तो उज्झे ॥ ५२० ॥**

'शेषम्' अधिकं लेपम् 'अट्टकहेतोः' अट्टकनिमित्तं सरूतकं पेषयेत् । अथवाऽपि न दातव्योऽट्टकस्ततस्तमधिकं सरूतकं लेपं 'क्षारे' भस्मनि 'उज्झेत्' परिष्ठापयेत् । अयं चार्थो यत्र भणितुमुचितस्तत्र प्रागेवोपदर्शितः (गा० ५११) । सम्प्रति तु गाथाक्रमानुलोमत उक्तः ॥५२०॥

**पढम-चरिमाउ सिसिरे, गिम्हे अद्धं तु तासि वज्जित्ता ।**
**पायं ठवे सिणेहादिरक्खणट्ठा पवेसे वा ॥ ५२१ ॥**

'शिशिरे' शीतकाले प्रथमचरमे पौरुष्यौ वर्जयित्वा 'ग्रीष्मे' उष्णकाले 'तयोः' प्रथमचरमपौरुष्योरर्द्धमर्द्धं वर्जयित्वा पात्रमुष्णे स्थापयेत् । प्रथमचरमपौरुष्यादिकाले तु मध्ये प्रवेशयेत् । किमर्थम् ? इत्याह–'स्नेहादिरक्षार्थं' स्नेहः–अवश्यायः आदिशब्दाद् महिका-हिम-वर्षादिपरिग्रहः तद्रक्षणार्थम् । इयमत्र भावना–शिशिरकाले प्रथमायां पौरुष्यामतिक्रान्तायामुष्णे ददाति, चरमायां तु पौरुष्यामनवगाढायां मध्ये प्रवेशयति, अन्यथा शिशिरकाले कालस्य स्निग्धतया प्रथमायां चरमायां च पौरुष्यामवश्यायादिपतनभावतो लेपविनाशप्रसङ्गात् । उष्णकाले तु प्रथमायाः पौरुष्या अर्धेऽपक्रान्ते पात्रमुष्णे दद्यात्, चरमायास्तु पौरुष्याः पश्चिमेऽर्द्धेऽनवगाढे मध्ये प्रवेशयेत्, कालस्य रूक्षतया तत ऊर्द्धं पश्चादवश्यायादिसम्भवात् ॥ ५२१ ॥

**उवयोगं च अभिक्खं, करेति वासादि-साणरक्खट्ठा ।**

---

१ पात्रब° डे० त० ॥ २ °रकालस्य डे० ॥

**वावारेति व अण्णे, गिलाणमादीसु कज्जेसु ॥ ५२२ ॥**

उष्णे च पात्रे दत्ते सति स वर्षादिभ्यो रक्षणार्थम्, वर्षं—वृष्टिः आदिशब्दाद् हिमप्रपातादिपरिग्रहः, श्वा—कुक्कुरस्तद्रक्षणार्थम् 'अभीक्ष्णम्' अनवरतमुपयोगं करोति । यदि वा ग्लानादिप्रयोजनेषु समापतितेष्वन्यान् साधून् व्यापारयति, स तु तत्रैव रक्षयन् तिष्ठति ॥५२२॥ अथ कियन्तः पात्रस्य लेपा दीयन्ते ? इत्याह—

**एक्को यँ जहन्नेणं, बिय तिय चेत्तारि पंच उक्कोसा ।**
**संजमहेउं लेवो, वज्जित्ता गारव विभूसं ॥ ५२३ ॥**

पात्रस्य संयमहेतोर्जघन्येनैको लेपो दातव्यः, मध्यमतो द्वौ त्रयो वा, उत्कर्षतश्चत्वारः पञ्च वा वर्जयित्वा गौरवं विभूषां च । गौरवेणात्मनो महर्द्धिकत्वमननलक्षणेन विभूषया वा न लेपो दातव्यः, किन्तु संयमस्फातिनिमित्तमिति ॥ ५२३ ॥

**अणवट्ठंते तह वि उ, सव्वं अवणेतु तो पुणो लिंपे ।**
**तज्जाय सचोप्पडयं, घट्ट रएउं ततो धोवे ॥ ५२४ ॥**

उत्कर्षतः पञ्चस्वपि लेपेषु यदि स लेपः नावतिष्ठते—न पात्रेण सह लोलीभवति 'ततः' तस्मिन्ननवतिष्ठमाने सर्वं लेपमपनीय ततः पुनर्मूलतः पात्रं लिम्पेत् यथा स लेपोऽवतिष्ठते । "तज्जाए"त्यादि । इह यद् अलाब्वादिपात्रं तैलादिना 'सचोप्पडं' सस्नेहं तत्र च धूलिः प्रभूता लग्ना तं लेपं घट्टकपाषाणेन घट्टयित्वा तद्गतेनैव च लेपेन भूयस्तत् पात्रं रञ्जयित्वा ततः प्रक्षालयति एष तज्जातो नाम लेपः ॥ ५२४ ॥ सम्प्रति लेपस्यैव भेदानाह—

**तज्जाय-जुत्तिलेवो, दुचक्कलेवो य होइ नायव्वो ।**
**मुद्दियनावाबंधो, तेणगबंधो य पडिकुट्ठो ॥ ५२५ ॥**

त्रिविधो लेपो भवति ज्ञातव्यः, तद्यथा—तज्जातलेपो युक्तिलेपो द्विचक्रलेपश्च । द्विचक्रलेपो नाम शकटलेपः । तत्र लिप्यमानं लिप्तं वा यदि पात्रं कथमपि भङ्गमाप्नुयात् ततोऽन्यस्याभावे मुद्रितनौबन्धेन बध्नीयात् न स्तेनकबन्धेन, यतो मुद्रितनौबन्ध एव तीर्थकरैरनुज्ञातः स्तेनकबन्धस्तु प्रतिक्रुष्टः ॥ ५२५ ॥ साम्प्रतमेनामेव गाथां विवरीषुस्तज्जातलेपस्य प्राग्व्याख्यातत्वात् शेषपदव्याख्यानार्थमाह—

**जुत्ती उ पत्थरादी, पडिकुट्ठा सा उ सन्निही काउं ।**
**दय सुकुमाल असन्निहि, दुचक्कलेवो अतो इट्ठो ॥ ५२६ ॥**

'युक्तिः' पदैकदेशे पदसमुदायोपचाराद् युक्तिलेपः 'प्रस्तरादिः' प्रस्तरादिकृतः, आदिशब्दाच्छर्करा-लोहकिट्ट-केदारमृत्तिकादिपरिग्रहः, सा च युक्तिः सन्निधिरिति कृत्वा तीर्थकरगणधरैः 'प्रतिक्रुष्टा' निराकृता । तज्जातलेपश्च कदाचिदवाप्यते । तत एतेषु लेपेषु मध्ये शकटलेपः सुन्दरः, यतस्तस्मिन् सुकुमारतया पानजातयो जन्तवः स्पष्टा दृश्यन्ते, दृश्यमानेषु च तेषु दया (दयां) कर्तुं शक्यते, न च तत्र सन्निधिदोषः, अतः सुन्दरत्वात् स एव द्विचक्रलेप इष्टः ॥ ५२६ ॥

---

१ उ ता० ॥ २ चउरो य पंच ता० ॥

**संजमहेउं लेवो, न विभूसाए वयंति तित्थयरा ।**
**सति-असतीदिट्ठंतो, विभूसाए होंति चउगुरुगा ॥ ५२७ ॥**

लेपः पात्रस्य दातव्यः संयमहेतोर्न विभूषया, उपलक्षणमेतत्, नापि गौरवेण इति भगवन्तस्तीर्थकरा वदन्ति । संयमहेतोः पुनर्दीयमाने लेपे यदि विभूषा भवति तथापि सा संयमहेतुरेव । अत्र सत्या असत्याश्च दृष्टान्तः । तथाहि—सत्यप्यात्मानं विभूषयति असत्यपि, केवलं सती कुलाचारनिमित्तमात्मानं विभूषयतीति तुल्यमपि तद्विभूषणमदुष्टम्, इतरा जारतोषणनिमित्तमिति दोषवत् । एवं यथा सत्यसत्यौ तथा साधू, यथा विभूषणं तथा लेपः, यथा कुलाचारस्तथा संयमः, यथा जारतोषणं तथा असंयमः । विभूषया लेपं ददतः प्रायश्चित्तं चत्वारो गुरुकाः, उपलक्षणमेतत्, तेन गौरवेणापि ददत एतत् प्रायश्चित्तमवसातव्यम् ।

उक्तञ्च—

संजमहेऊ लेवो, न विभूसा गारवेण वा देयो ।
चउगुरुग विभूसाए, लिंपिंते गारवेणं वा ॥  ॥ ५२७ ॥

**भिज्जिज्ज लिप्पमाणं, लित्तं वा असइए पुणो बंधे ।**
**मुद्दियनावाबंधे, न तेणबंधेण बंधेज्जा ॥ ५२८ ॥**

तत् पात्रं लिप्यमानं लिप्तं वा कथमपि हस्तपतनादिना भिद्येत न चान्यत् पात्रं विद्यते ततस्तत् पात्रं भूयो मुद्रितनौबन्धेन बध्नीयात् न स्तेनकबन्धेन ॥ ५२८ ॥

सम्प्रति लेपस्य जघन्यादिभेदानाह—

**खर अयसि-कुसुंभ सरिसव, कमेण उक्कोस मज्झिम जहन्नो ।**
**नवणीए सप्पि वसा, गुले य लोणे अलेवो उ ॥ ५२९ ॥**

खरसंज्ञकेन तिलतैलेन यो लेपः स उत्कृष्टः, अतसीतैलेन कुसुम्भतैलेन च मध्यमः, सर्षपतैलेन जघन्यः । उक्तञ्च—

सो पुण लेवो खरसन्हएण उक्कोसओ मुणेयव्वो ।
अयसि-कुसुंभिय मज्झो, सरिसवतिल्लेण य जहन्नो ॥

'नवनीतेन' म्रक्षणेन 'सर्पिषा' घृतेन वसया च निर्वृत्तो लेपोऽलेपो ज्ञातव्यः, तस्य पात्रे सम्यग् लगनाभावाद् जुगुप्सितत्वाच्च । तथा गुडभृतेषु लवणभृतेषु वा शकटेषु तिलतैलम्रक्षितेष्वपि यो लेपः सोऽप्यलेपः, तस्यापि लवणाद्यवयवयोगतोऽप्रशस्तत्वात् ॥ ५२९ ॥

तदेवमुक्तो लेपस्य विधिः । साम्प्रतं लेपकल्पिकमाह—

**पढिय सुय गुणियमगुणिय, धारमधार उवउत्तो परिहरति ।**
**आलोयायरियादी, आयरिओ विसोहिकारो से ॥ ५३० ॥**

यस्मादजानतः प्रायश्चित्तं तस्माद् येन ओघनिर्युक्तिसूत्रम् इयं वा कल्पपीठिका पठिता स्यात् श्रुता वा 'गुणिता' अत्यन्तमभ्यस्तीकृता स्याद् अगुणिता वा सा धारिता वा स्याद्

१ गाथेयं चूर्णौ भिज्जिज्ज० ५२८ गाथाऽनन्तरं व्याख्याताऽस्ति ॥ २ °तो भूसा° ता० ॥ ३ तेणप्पणं तु बं° ता० ॥

अधारिता वा तथापि चेदुपयुक्तः सन् सूत्रोक्तप्रकारेण लेपं 'परिहरति' परिभोगयति स लेपकल्पिकः। तेन च लेपसूत्रेण पठितेनापठितेन वा गुणितेनागुणितेन वा धारितेनाधारितेन वा उपयुक्ते वाऽनुपयुक्ते वा यां विराधनामापद्यते तामाचार्यादेः पुरत आलोचयति, प्रथमत आचार्यस्य, तदभावे उपाध्यायादेरपि। आलोचिते च "से" तस्य प्रायश्चित्तप्रदानेन विशोधिकारक आचार्यः ॥ ५३० ॥ उक्तो लेपकल्पिकः। सम्प्रति पिण्डकल्पिकमाह—

पिण्डकल्पिकः

**अप्पत्ते अकहित्ता, अणहिगयऽपरिच्छणे य चउगुरुगा।**
**दोहिँ गुरू तवगुरुगा, कालगुरू दोहि वी लहुगा ॥ ५३१ ॥**

सूत्रं नाम प्रागासीदाचारगतं **पिण्डैषणाध्ययनम्**, इदानीं तु **दशवैकालिकगतं पिण्डैषणाध्ययनम्**, तस्मिन् 'अप्राप्ते' अपठिते यदि पिण्डस्यानयनाय तं प्रेषयति तदा तस्य प्रायश्चित्तं चत्वारो गुरुकाः, कथम्भूताः? इत्याह—द्वाभ्यां गुरवः, तद्यथा—तपसाऽपि गुरुकाः कालेनापि च गुरुकाः। अथ सूत्रं प्राप्तस्तथापि यदि तस्यार्थमकथयित्वा प्रेषयति तदा चत्वारो लघुकाः, नवरमेकेन कालेन लघवः। अथ कथितोऽर्थः परं नाद्याप्यधिगतः अथवाऽधिगतः परमद्यापि न तं सम्यक् श्रद्दधाति तमनधिगतार्थमश्रद्दधानं वा प्रेषयतश्चत्वारो लघुकास्तपसैकेन लघवः। अथाधिगतार्थमप्यपरीक्ष्य प्रेषयति तदा चत्वारो लघुका द्वाभ्यां लघवः, तद्यथा—तपसा कालेन च ॥ ५३१ ॥ यत एवं प्रायश्चित्तमतः—

**पढिए य कहिय अहिगय, परिहरती पिंडकप्पितो[1] एसो।**
**तिविहं तीहिँ विसुद्धं, परिहरनवगेण भेदेणं ॥ ५३२ ॥**

**पिण्डैषणाध्ययने** पठिते तस्यार्थे कथिते तेन चाधिगते उपलक्षणमेतत् सम्यक् श्रद्धिते च यः 'त्रिविधम्' उद्गमशुद्धमुत्पादनाशुद्धमेषणाशुद्धं 'त्रिभिः' मनोवाक्कायैर्विशुद्धं परिहारविषयेण नवकेन भेदेन परिहरति, तद्यथा—मनसा न गृह्णाति नाप्यन्यैर्ग्राहयति न च गृह्णन्तमनुजानीते, एवं वाचा कायेनापि प्रत्येकं त्रिकं त्रिकमवसातव्यम्, एष पिण्डकल्पिकः। अत्र **पिण्डनिर्युक्तिः** सर्वा वक्तव्या, सा च ग्रन्थान्तरत्वात् स्वस्थाने एव स्थिता प्रतिपत्तव्या ॥ ५३२ ॥ इह तु षोडशानामुद्गमदोषाणां प्रायश्चित्तमभिधित्सुराह—

**गुरुगा अहे य चरमतिग मीस बायर सपच्चवायहडे।**
**कड पूइए य गुरुगो, अज्झोयरए य चरमदुगे ॥ ५३३ ॥**

"अहे य"त्ति आधाकर्म गृह्णतः प्रायश्चित्तं चत्वारो गुरुकाः। "चरमतिय"त्ति औद्देशिकं द्विविधम्—ओघेन विभागेन च; तत्र विभागतो द्वादशविधम्, तद्यथा—उद्दिष्टं कृतं कर्म च; उद्दिष्टं चतुर्विधम्—औद्देशिकं समुद्देशिकमादेशिकं समादेशिकं च; कृतमपि चतुर्विधम्, तद्यथा—उद्देशकृतं समुद्देशकृतमादेशकृतं समादेशकृतं च; कर्मापि चतुःप्रकारम्, तद्यथा—उद्देशकर्म समुद्देशकर्म आदेशकर्म समादेशकर्म च; त्रयश्चतुष्कका द्वादश। इह यावन्तः केचन भिक्षाचराः समागच्छन्ति तावतः सर्वान् उद्दिश्य यत् क्रियते तद् उद्देशिकमुच्यते, पाषण्डिन उद्दिश्य क्रियमाणं समुद्देशम्, श्रमणानुद्दिश्याऽऽदेशम्, निर्ग्रन्थानधिकृत्य समादेशम्। उक्तञ्च—

---

१ °तो सो उ ता° ॥

**जावंतिव उद्देसो, पासंडीणं भवे समुद्देसो ।**
**समणाणं आदेसो, निग्गंथाणं समादेसो ॥**

एतस्मिन् द्वादशविधे विभागोद्देशिके यत् चरमं त्रिकं—समुद्देशकर्म आदेशकर्म समादेशकर्म च तत्र गृह्यमाणे प्रत्येकं चत्वारो गुरुकाः तपः-कालविशेषिताः । "मीस"त्ति मिश्रजातं त्रिविधम्—यावन्तिकमिश्रं पाषण्डिकमिश्रं स्वगृहमिश्रं च; तत्र पाषण्डिमिश्रे स्वगृहमिश्रे च प्रत्येकं चत्वारो गुरुकाः तपः-कालगुरवः । "बायर"त्ति द्विविधा प्राभृतिका—सूक्ष्मा बादरा च; तत्र बादरायां गृह्यमाणायां चत्वारो गुरुकाः । "सपच्चवायहडे"त्ति यत्र यत्र ग्रामादौ सप्रत्यपायमभ्याहृतं तत्र तत्र चत्वारो गुरुकाः । तदेवं येषूद्गमभेदेषु गुरुकास्ते उक्ताः, सम्प्रति येषु मासगुरु तान् प्रतिपादयति—"कड पूइए य" इत्यादि । कृते उद्देशिके चतुःप्रकारेऽपि प्रत्येकं मासगुरुकं तपः-कालविशेषितम्, तद्यथा—यावन्तिके मासगुरु, समुद्देशकृते तपोगुरुकं मासगुरु, आदेशकृते कालगुरुकं मासगुरु, समादेशकृते मासगुरु द्वाभ्यां गुरुकं तपोगुरुकं कालगुरुकं च । "पूतिए"त्ति भावपूतिकं द्विविधम्—सूक्ष्मं बादरं च; तत्र सूक्ष्मे नास्ति प्रायश्चित्तम्; बादरं द्विविधम्—उपकरणे भक्तपाने च; अत्र भक्तपानपूतिके मासगुरु । "अज्झोयरए य चरमदुगे"त्ति अध्यवपूरकं त्रिविधम्, तद्यथा—यावन्तिकमध्यवपूरकं पाषण्डाध्यवपूरकं स्वगृहाध्यवपूरकं च; तत्र पाषण्डाध्यवपूरके स्वगृहाध्यवपूरके च प्रत्येकं मासगुरु ॥ ५३३ ॥ उक्तानि गुरुकप्रायश्चित्तानि । अधुना लघुकप्रायश्चित्तान्यभिधित्सुराह—

**ओह-विभागुद्देसे, चिरठविए पागडे य उवगरणे ।**
**लोगुत्तर पामिच्चे, परियट्टिय कीय परभावे ॥ ५३४ ॥**
**सग्गाममिहडि गंठी, जहन्न जावंति ओयरे लहुओ ।**
**इत्तरठविए सुहुमा, पणगं लहुगा य सेसेसु ॥ ५३५ ॥**

ओघौद्देशिके मासलघु । विभागौद्देशिके—उद्देशे मासलघु, समुद्देशे मासलघु तपोगुरु, आदेशे मासलघु कालगुरु, समादेशे मासलघु द्वाभ्यां गुरु । स्थापितं द्विविधम्—चिरस्थापितमित्वरस्थापितं च; तत्र चिरस्थापिते मासलघु । प्रादुष्करणं द्विविधम्—प्रकटकरणं प्रकाशकरणं [च]; तत्र प्रकटकरणे मासलघु । उपकरणपूतिके मासलघु । प्रामित्यं द्विविधम्—लौकिकं लोकोत्तरिकं च; लोकोत्तरिके मासलघु । परिवर्तितमपि द्विधा—लौकिकं लोकोत्तरिकं च; तत्र लोकोत्तरिके परिवर्तिते मासलघु । क्रीतं द्विविधम्—द्रव्यक्रीतं भावक्रीतं च; तत्र द्रव्यक्रीतं द्विविधम्—आत्मद्रव्यक्रीतं परद्रव्यक्रीतं च; भावक्रीतमपि द्विधा—आत्मभावक्रीतं परभावक्रीतं च; परभावक्रीते मासलघु । स्वग्रामाभ्याहृते मासलघु । "गंठि"त्ति ग्रन्थिपिहितमुच्यते, यत्र गुड-घृतादिभाजनमुखे पोतेन चर्मणा वा स्थगयित्वा दवरकेणोपरि ग्रन्थिर्दीयते, ग्रन्थिसहिता मुद्रा वा तदुपचाराद् ग्रन्थिरित्यर्थः, तस्मिन्नुद्भिद्यमाने मासलघु । मालापहृतं द्विविधम्—जघन्यमुत्कृष्टं च; तत्र जघन्ये मालापहृते मासलघु । तथा यावन्तिकेऽध्यवपूरके मासलघु । तदेवं यत्र यत्र मासलघु तत् तत् स्थानमुक्तम्, इदानीं ययोः पञ्च रात्रिन्दिवानि ते वदति—"इत्तरठविए" इत्यादि । इत्वरस्थापिते पञ्च रात्रिन्दिवानि । सूक्ष्मप्राभृतिकाया-

मपि पञ्च रात्रिन्दिवानि । "लघुका य सेसेसु"त्ति येऽन्ये उद्गमदोषास्तेषु सर्वेष्वपि प्रत्येकं चत्वारो लघुकाः, तद्यथा—औद्देशिके कर्मणि १ यावन्तिके मिश्रजाते २ प्रकाशकरणे ३ आत्मद्रव्यक्रीते ४ परद्रव्य(ग्रन्थाग्रम्—४०००)क्रीते ५ आत्मभावक्रीते ६ लौकिकेऽपमित्ये ७ लौकिके परिवर्त्तिते ८ परग्रामाभ्याहृते निष्प्रत्यपाये ९ पिहितोद्भिन्ने १० कपाटोद्भिन्ने ११ उत्कृष्टे मालापहृते १२ आच्छेद्ये १३ अनिसृष्टे १४ एतेषु चतुर्दशसु स्थानेषु चत्वारो लघुकाः ॥ ५३४ ॥ ५३५ ॥

तदेवमुक्तमुद्गमदोषेषु प्रायश्चित्तम् । इदानीमुत्पादनादोषेषु तदभिधित्सुराह—

**दुविह निमित्ते लोभे, गुरुगा मायाएँ मासियं गुरुयं ।**
**सुहुमे वयणे लहुओ, सेसे लहुगा य मूलं च ॥ ५३६ ॥**

निमित्तं त्रिविधम्—अतीतविषयं प्रत्युत्पन्नविषयमनागतविषयं च; तत्र 'द्विविधे निमित्ते' प्रत्युत्पन्नविषयेऽनागतविषये च तथा लोभे च प्रत्येकं चत्वारो गुरुकाः । मायायां मासगुरु । 'सूक्ष्मे' [सूक्ष्म]चैकित्स्ये वचनसंस्तवे च प्रत्येकं लघुको मासः । शेषेषु तु समस्तेषूत्पादनादोषेषु प्रत्येकं चत्वारो लघवः, नवरं मूलकर्मणि मूलम् ॥ ५३६ ॥

सम्प्रति दशस्वेषणादोषेषु प्रायश्चित्तमाह—

**ससरक्खे ससिणिद्धे, पणगं लहुगा दुगुंछ संसत्ते ।**
**उकुट्टऽणंते गुरुगो, सेसे सव्वेसु मासलहू ॥ ५३७ ॥**

शङ्किते—पञ्चविंशतेर्दोषाणां मध्ये यत् शङ्कितं तन्निष्पन्नमापद्यते प्रायश्चित्तम् । म्रक्षिते—'सरजस्केन' सचित्त-मिश्रपृथिवीकायरजोम्रक्षितेन हस्तेन मात्रकेण वा भिक्षां गृह्णतः पञ्च रात्रिन्दिवानि; सचित्त-मिश्राप्कायस्निग्धेन हस्तेन मात्रकेण वा भिक्षामाददानस्य पञ्च रात्रिन्दिवानि; अचित्तेन जुगुप्सितेन—विष्ठा-मूत्र-मद्य-मांस-लशुन-पलाण्डुप्रभृतिना म्रक्षिते गृह्यमाणे चत्वारो लघुकाः; गुड-घृत-तैलादिभिरपि कीटिकासंसक्तैर्म्रक्षितमाददानस्य चत्वारो लघवः; पुरःकर्मणि पश्चात्कर्मणि च चतुर्लघुकाः, अन्ये मासलघु प्रतिपन्नवन्तः; उत्कुट्टितेऽनन्ते सचित्ते वनस्पतिकायिके मासगुरु; चूर्णेऽप्यनन्ते सचित्ते मासगुरु; "सेसे सव्वेसु मासलहू" परीत्ते प्रत्येके कुट्टिते चूर्णे वा प्रत्येकं मासलघु; मिश्रे परीत्ते सर्वत्र मासलघु; अनन्ते मासगुरु; तथा मृत्तिकालिप्तहस्ते यावन्तः सेटिकादयो मृत्तिकाया भेदास्तेषु सर्वेषु मासलघु ॥ ५३७ ॥ निक्षिप्ते प्रायश्चित्तमाह—

**चउलहुगा चउगुरुगा, मासो लहु गुरु य पणग लहु गुरुगं ।**
**छसु परितऽणंत मीसे, बीए य अणंतर परे य ॥ ५३८ ॥**

प्रत्येकसचित्तानन्तरप्रतिष्ठितमाददानस्य चत्वारो लघुकाः, प्रत्येकसचित्तपरम्परप्रतिष्ठितमपि चत्वारो लघवः । अनन्तसचित्तानन्तरप्रतिष्ठितमाददानस्य चत्वारो गुरुकाः, अनन्तसचित्तपरम्परप्रतिष्ठितमपि गृह्णतश्चत्वारो गुरुकाः । प्रत्येकमिश्रेऽनन्तरप्रतिष्ठितं परम्परप्रतिष्ठितं वा गृह्णतो मासलघु । अनन्तमिश्रेऽनन्तरं परम्परया वा प्रतिष्ठितमाददानस्य मासगुरु । बीजेषु

१ °म्रक्षितेन गृ° डे० भा० ॥ २ °चत्वारो गुरुकाः डे० त० ॥ ३ मासगुरु डे० त० ॥

परीत्तेष्वनन्तरं परम्परं वा प्रतिष्ठितं गृह्णतः पञ्च रात्रिन्दिवानि लघुकानि, अनन्तेषु गुरुकाणि । अन्ये तु ब्रुवते—प्रत्येकमिश्रेऽनन्तरं परम्परं वा प्रतिष्ठितमाददानस्य लघु रात्रिन्दिवपञ्चकम्, अनन्तमिश्रेऽनन्तरं परम्परं वा प्रतिष्ठितं गृह्णतो गुरुकमिति । तथाऽपरे—प्रत्येके सचित्तमनन्तरप्रतिष्ठितं गृह्णतश्चतुर्लघवः, परम्परप्रतिष्ठितं मासलघु; तथा प्रत्येके मिश्रेऽनन्तरप्रतिष्ठितमाददानस्य लघुको मासः, परम्परप्रतिष्ठितं गृह्णतो लघु रात्रिन्दिवपञ्चकम्; अनन्ते मिश्रेऽनन्तरप्रतिष्ठिते मासगुरु, परम्परप्रतिष्ठिते गुरु रात्रिन्दिवपञ्चकमिति । उक्तञ्च—

पुढवी आऊ तेऊ, [य] परित्ते चेव तह य वणकाये ।
चउलहु अणंतरम्मी, सच्चित्ते परंपरे मासो ॥
मीसाणंतर लहुगो, लहुपणग परंपरे परित्तेसु ।
एए चेव य गुरुगा, होंति अणंते पइट्ठाणे ॥ इति ।

त्रसकायेऽनन्तरप्रतिष्ठितं गृह्णतश्चतुर्लघुकम्, परम्परप्रतिष्ठितं गृह्णतो मासलघु; "तसकाये चतुलहुगा, अणंतर परंपरट्ठिए लहुगो" इति वचनात् ॥ ५३८ ॥ एवं षड्जीवनिकायेषु प्रत्येकेऽनन्ते मिश्रे च पृथिव्यादौ बीजे च प्रत्येकेऽनन्ते मिश्रे चानन्तरं परम्परं च प्रतिष्ठितमाददानस्य प्रायश्चित्तमिति । अधुना पिहितं संहरणं चाधिकृत्य प्रायश्चित्तमाह—

**एमेव य पिहियम्मी, लहुगा दव्वम्मि चेव अपरिणए ।**

'एवमेव' अनेनैव प्रकारेण पिहितेऽपि प्रायश्चित्तं वक्तव्यम् । किमुक्तं भवति ?—यथा निक्षिप्ते प्रायश्चित्तमुक्तमेवं येन द्रव्येण सचित्तेनाचित्तेन मिश्रेण वाऽनन्तरं परम्परकं वा पिधीयते तत्रापि द्रष्टव्यम्, नवरमचित्तेन गुरुकेण पिहिते गृह्णतश्चतुर्गुरुकम् । संहरणे—येन मात्रकेण भिक्षां दातुकामस्तत्र यदि किञ्चित् प्रक्षिप्तं वर्त्तते तदन्यत्र संहृत्य ददाति तच्च संह्रियमाणमद्याप्यपरिणतं तस्मिन्नपरिणते द्रव्ये संहृते गृह्णतश्चत्वारो लघुकाः । दायके—प्रगलिते नपुंसके चत्वारो गुरुकाः, पिञ्जन-कर्त्तन-श्लक्ष्णखण्डकरण-प्रमर्दनप्रवृत्तेषु प्रत्येकं मासलघु, शेषेषु दायकदोषेषु चत्वारो लघुकाः । उन्मिश्रे—सचित्तानन्तमिश्रे चतुर्गुरु, मिश्रानन्तमिश्रे मासगुरु, सचित्तप्रत्येकमिश्रे चतुर्लघु, प्रत्येकमिश्रमिश्रे मासलघु ॥

**वीसुम्मीसे[2] पणगं, अणंतबीए य पणग गुरू ॥ ५३९ ॥**

'विष्वगुन्मिश्रे' प्रत्येकबीजोन्मिश्रे लघु रात्रिन्दिवपञ्चकम्, अनन्तबीजोन्मिश्रे गुरु रात्रिन्दिवपञ्चकम् । अपरिणते—द्रव्यापरिणते कायनिष्पन्नम्, ये कायाः प्रत्येकरूपा अनन्तरूपा वा अपरिणतास्तन्निष्पन्नमित्यर्थः; तत्र पृथिव्यादिष्वपरिणतेषु चतुर्लघुकम्, अनन्तेष्वपरिणतेषु चतुर्गुरु । उक्तञ्च—

दव्वापरिणते चउलहु, पुढवादी चउगुरू अणंतेसु ।

"भावापरिणते दोण्हं तु भुंजमाणाणमेगो तत्थ निमंतए" इत्येवंरूपे लघुको मासः, "भावापरिणते लहुगो" इति वचनात् । लिप्ते—आद्येषु त्रिषु भङ्गेषु चत्वारो लघुकाः, चरमभङ्गेऽनेषणायां चतुर्गुरवः । छर्दिते—आद्येषु त्रिषु भङ्गेषु प्रत्येकं चतुर्लघुकम्, चरमभङ्गेऽनाचीर्णम् ॥५३९॥

१ अनन्तेऽन° त० विना ॥ २ वीउम्मीसे ता० ॥

**संजोग सइंगाले, अणंतमीसे वि चउगुरू होंति ।**
**वीसुम्मीसे मासो, सेसे लघुका उ सव्वेसु ॥ ५४० ॥**

संयोजना द्विविधा—अन्तर्बहिश्च; तत्रान्तःसंयोजनायां चत्वारो लघवः, बहिःसंयोजनायां चत्वारो गुरुकाः । अन्ये त्वन्तर्बहिर्वा संयोजनायां चत्वारो गुरुका इति प्रतिपन्नाः । प्रमाणातिरिक्तमाहारयति चत्वारो लघवः । "सइंगाले"त्ति साङ्गारे आहार्यमाणे चत्वारो गुरुकाः । सधूमे चतुर्लघु । निष्कारणे चतुर्लघु । सचित्तानन्तमिश्रे चतुर्गुरुकम्; एतच्च प्रागेव स्वस्थानेऽभिहितम् । तथा 'विष्वगुन्मिश्रे' पृथिवीकायादिभिः प्रत्येकैर्मिश्रैरुन्मिश्रे लघुको मासः, अनन्तैरुन्मिश्रे गुरुकः । "सेसे लहुगा उ सव्वेसु" 'शेषेषु सर्वेष्वपि' ग्रहणैषणाभेदेषु ग्रासैषणाभेदेषु च चत्वारो लघुकाः, ते च तथैव योजिताः ॥ ५४० ॥

गतः पिण्डकल्पिकः । सम्प्रति शय्याकल्पिकमाह—

शय्या-कल्पिकः

**दुविहा[1] हवंति सेज्जा, दव्वे भावे य दव्व खायाती ।**
**साहूहिं परिग्गहिया, ते च्चेव[2] उ भावओ सेज्जा ॥ ५४१ ॥**

द्विविधा भवन्ति शय्याः—द्रव्यतो भावतश्च । तत्र द्रव्यतः 'खातादयः' खातमुच्छ्रितं खातोच्छ्रितं च । एता द्रव्यशय्याः साधुभिः परिगृहीता भावतः शय्या भवन्ति ॥ ५४१ ॥

**रक्खण गहणे तु तहा, सेज्जाकप्पो उ होइ दुविहो उ ।**
**सुन्ने बाल गिलाणे, अव्वत्ताऽऽरोवणा भणिया ॥ ५४२ ॥**

शय्यायां कल्पते इति शय्याकल्पः शय्याकल्पिक इत्यर्थः । स द्विविधः—तस्या भावशय्याया रक्षणे ग्रहणे च । तत्र रक्षणे प्रोच्यते—वसतिर्नियमतस्तावद् रक्षयितव्या, यदि पुनर्भिक्षादिप्रयोजनतो गच्छन्तः शून्यां वसतिं कुर्वन्ति बालं ग्लानमव्यक्तं वा वसतिपालं स्थापयन्ति तदा 'आरोपणा' प्रायश्चित्तं भणिता ॥ ५४२ ॥ तामेवोपदर्शयति—

**पढमम्मि य चउलहुया[3], सेसेसुं मासियं मुणेयव्वं ।**
**दोहि गुरू इक्केणं, चउत्थपए दोहि वी लहुयं ॥ ५४३ ॥**

प्रथममिह गाथाक्रमप्रामाण्यात् शून्यमुच्यते । यदि शून्यां वसतिं कुर्वन्ति तदाऽऽरोपणा चत्वारो लघुका द्वाभ्यां गुरवः, तद्यथा—तपोगुरुकाः कालगुरुकाश्च । अथ बालं स्थापयन्ति तदा मासलघु तपोगुरु काललघु । ग्लानं स्थापयन्ति मासलघु तपोलघु कालगुरु । 'चतुर्थपदे' अव्यक्तस्थापनलक्षणे मासलघु द्वाभ्यामपि लघुकम्, तद्यथा—तपसा कालेन च ॥ ५४३ ॥

उक्ताऽऽरोपणा । साम्प्रतमेतेष्वेव दोषा वक्तव्याः, तत्र प्रथमं तावच्छून्ये दोषानाह—

वसति-शून्यकरणे दोषाः

**मिच्छत्त बडुग चारण, भडाण मरणं तिरिक्ख-मणुयाणं ।**
**आदेस वाल निकेयणे य सुन्ने भवे दोसा ॥ ५४४ ॥**

शून्यायां वसतौ कृतायां कदाचित् शय्यातरस्य मिथ्यात्वगमनम्, बटुकप्रवेशः, चारणप्रवेशः, भटप्रवेशः, तिरश्चां मनुष्याणां वा तत्र मरणम्, 'आदेशाः' प्राघूर्णकास्तत्प्रवेशः, व्यालप्रवेशः । एते शून्ये उपाश्रये कृते दोषा भवन्ति । तथा 'निःकेतने' प्रसूतायाः स्त्रियास्तिरश्च्या वा निष्कासने दोषाः ॥ ५४४ ॥ तत्र प्रथमं मिथ्यात्वद्वारमाह—

---

१ °हा य होंति ता० ॥ २ स च्चेव य भा° ता० ॥ ३ °हुयं ता० ॥

सोवा पच्चिमपच्चिय, अकयञ्जु अदक्खिणा दुविह छेदो ।
भरियभरागमनिच्छुभ, गरिहा न लभंति वऽन्नत्थ ॥ ५४५ ॥
भेदो य मासकप्पे, जदलंभे[1] विहारादि पावते अन्नं ।
बहिभुत्त निसागमणे, गरिह विणासा य सविसेसा ॥ ५४६ ॥

ते साधवो भिक्षादिनिमित्तं सर्वमात्मीयं भाण्डमादाय शून्यां वसतिं कृत्वा गताः, शय्यातरश्चागतः, दृष्टा तेन शून्या वसतिः, पृष्टं कस्यापि पार्श्वे—क गताः साधवः ?, गृहमानुषैरुक्तम्—दृश्यते शून्या वसतिस्तस्मादवश्यमन्यत्र गताः । इदं तेषां वचः श्रुत्वा यदि प्रीतिकमुपजायते यथा—यदि 'गता गता नाम' इति तदाऽऽरोपणा चत्वारो लघुकाः । अथ तस्याप्रीतिकमुत्पद्यते यथा—'अकृतज्ञाः' एते एनमप्युपचारं न जानन्ति यथा 'आपृच्छ्य गन्तव्यम्' अथवा 'अदाक्षिण्याः' निःस्नेहास्ततोऽनापृच्छया गता इति तदा चतुर्गुरुकम् । तथा द्विविधश्छेदः, तथाहि—स प्रद्विष्टस्तेषामन्येषां वा साधूनां तद्द्रव्यस्य वसतिलक्षणस्यान्यद्रव्याणां वा भक्तपानादीनां व्यवच्छेदं कुर्यात् । "भरियभरागमनिच्छुभ"त्ति ततः स कषायितः शय्यातरो यदा ते साधवो भरितभाजनभरेणावनमन्त आगच्छन्ति तदा स्थानं न दद्यात् । तत्र यदि दिवा निष्कासयति तदा चत्वारो लघवः । तथा तैर्भरितैर्भाजनैः सहान्यां वसतिं याचमाना आगाढादिपरितापनामाप्नुवन्ति तन्निष्पन्नमपि तेषां प्रायश्चित्तं चतुर्लघु । तथा जनमध्ये गर्हामाप्नुवन्ति—किं यूयमकाण्डे एवं निष्कासिताः ? । ततः 'न भव्या एते' इत्यन्यत्रापि ते वसतिं न लभन्ते । अन्यत्र च वसतिमलभमाना ग्रामादौ व्रजन्ति ततो मासकल्पभेदः । तत्र च विहारक्रमे या विराधना तन्निष्पन्नाऽपि तेषामारोपणा । तथाऽन्ये साधवो विहारादिनिर्गतास्तत्र समागताः, तत्र चान्या वसतिर्न विद्यते, स च शय्यातरस्तेषां दोषेणान्येषामपि न ददाति, ततो विहाराद्यागता वसतेरलाभे यत्ते श्वापद-स्तेनादिभ्योऽनर्थमाप्नुवन्ति तन्निष्पन्नमपि तेषां प्रायश्चित्तम् । एवं तावत् कृतभिक्षाटनमात्राणामुक्ता दोषाः । अथ बहिरेव भुक्त्वा रात्रावागता वसतिं न लभन्ते तदाऽऽरोपणा चतुर्गुरु, सविशेषतराश्च गर्हादयो दोषाः, विनाशश्च श्वापदादिभ्यः । अथवा स शय्यातरः प्रथमं सम्यग्दृष्टिर्भूतः पश्चाद् 'अनापृच्छया गताः' इति भावविपरिणामतो मिथ्यात्वं यायात् ॥ ५४५ ॥ ५४६ ॥ गतं मिथ्यात्वद्वारम् । अधुना बटुकद्वारमाह—

सुन्नं दट्ठुं बडुगा, उभासिते ठाह जइ गया समणा ।
आगम पवेसऽसंखड, सागरि दिन्नं ति य दियाणं ॥ ५४७ ॥
संभिच्चेण व अच्छह, अलियं न करेमेऽहं[2] तु अप्पाणं ।
उड्डंचग अहिगरणं, उभयपओसं च निच्छूढा ॥ ५४८ ॥
सागरिय-संजयाणं, निच्छूढा तेण-अगणिमाईहिं ।
जं काहिंति पदुट्ठा, उभयस्स वि ते तमावज्जे ॥ ५४९ ॥

शून्यां वसतिं दृष्ट्वा 'बटुकाः' चाटाः सागारिकम् 'अवभाषन्ते' याचन्ते—अस्माकमुपाश्रयं प्रयच्छत । शय्यातरो ब्रूते—तत्र श्रमणास्तिष्ठन्ति । बटुकैरुक्तम्—गतास्ते । शय्यातरः प्राह—

---

[1] विहादि ता० ॥ [2] °रेमि हं ता० ॥

तर्हि तिष्ठत यूयं यदि गताः श्रमणाः । ते स्थिताः । आगताः साधवः प्रवेष्टुं प्रवृत्ता वसतौ बटुकैर्निवारिताः—माऽत्र प्रविशथ, वयमग्रे तिष्ठामः । ततः 'असङ्खडं' कलहः परस्परमुपजायते । बटुका ब्रुवते—वसतिरस्माकं स्वामिना दत्ता, किमत्र युष्माकम्? । इतरेऽपि वदन्ति—स्वामिनैवास्माकमपि वसतिरदायि । ततः साधवः शय्यातरसकाशं गच्छन्ति । स ब्रूते—यूयमनापृच्छया शून्यं कृत्वा गताः, मया ज्ञातम्—गता यूयं येन शून्यीकृता दृश्यते वसतिः, अतो मया 'द्विजानां' बटुकानां दत्ता वसतिः 'इति' तस्मात् 'संवृत्येन' परस्परसञ्चिन्त्या यूयं बटुकाश्चैकत्र स्थाने तिष्ठत, नाहमात्मानमलीकं करोमि । तत्र यदि संवृत्येन तिष्ठन्ति तत्र पठतां प्रतिलेखनां च कुर्वतां संयतभाषाभिश्च 'उड्डञ्चकान्' देशीपदमेतद् उपहासान् कुर्युः, ततः 'अधिकरणम्' असङ्खडम् । अथवा शय्यातरो भद्रकः ततस्तान् बटुकान् निष्काशयेत्, तथा च सति 'अधिकरणं' संयतप्रयोगेण वयं निष्काशिताः तस्माद् ज्ञातव्यं संयतानाम् । अथवा 'निच्छूढाः' निष्काशिताः सन्त उभयेषामपि सागारिकस्य संयतानां चोपरि प्रद्वेषं गच्छेयुः । ततस्ते एवं 'निक्षिप्ताः' निष्काशिताः सन्तः प्रद्विष्टाः स्तेनप्रयोगतोऽग्न्यादिप्रक्षेपतश्च 'उभयस्यापि' सागारिकस्य संयतानां च यद् अनर्थजातं करिष्यन्ति 'तदपि' तन्निष्पन्नमपि प्रायश्चित्तं 'ते' संयताः शून्यवसतिकारिण आपद्यन्ते ॥ ५४७ ॥ ५४८ ॥ ५४९ ॥

गतं बटुकद्वारम् । इदानीं चारणद्वारं भटद्वारं चाह—

**एमेव चारण भडे, चारण उड्डंचगा उ अहिगतरा ।**
**निच्छूढा व पदोसं, तेणा-ऽगणिमाइ जह बडुया ॥ ५५० ॥**

'एवमेव' बटुकगतेनैव प्रकारेण चारणे भटे च दोषा वक्तव्याः । किमुक्तं भवति?—ये बटुकेषु दोषा उक्तास्ते चारणे भटे च प्रत्येकमवसातव्याः । नवरं चारणा(णे) बटुकेभ्योऽधिकतराः, यतस्ते 'उदञ्चकाः' याचकाः । इयमत्र भावना—ते चारणाः प्रपञ्चबहुलाः, ततः संयतान् प्रपञ्च्य तेभ्यो याचन्ते, ततस्तैः सहैकनिवासेऽधिकतरा दोषाः । तथा चारणा भटाश्च निष्काशिताः प्रद्वेषमापन्नाः स्तेनाग्न्यादिभिरुभयेषामप्यनर्थं कुर्युर्यथा बटुका इति ॥ ५५० ॥

इदानीं तिर्यञ्चरणद्वारं मनुष्यमरणद्वारमादेशद्वारं चाह—

**छड्डणिका उड्डाहो, घाणारिस सुत्तऽत्थ अच्छंते ।**
**इति उभयमरणदोसा, आएस जहा बडुगमाई ॥ ५५१ ॥**

शून्यां वसतिं दृष्ट्वा गवादिस्तिर्यङ् अनाथमनुष्यो वा प्रविश्य म्रियते तं यदि गृहस्थैरसंयतैः परिष्ठापयन्ति तदा 'छर्दने' परिष्ठापने षण्णां कायानां पृथिव्यादीनां विराधना । अथाऽऽत्मना परिष्ठापयन्ति तदा प्रवचनस्योड्डाहः 'उचिता एतेऽस्य कर्मणः' इति । अथवा कोऽप्येवं शङ्केत, यथा-एतैरेवायं मारितः । अथवा जुगुप्सा भवेत्—अशुचयोऽमी यद् मृतकमाकर्षन्ति । अथैतद्दोषभयान्न ते स्वयं परिष्ठापयन्ति नाप्यन्यैस्त्याजयन्ति तर्हि मृतकगन्धेन संयतानां नासार्शांसि जायेरन् । तथाऽस्वाध्यायिकमिति कृत्वा सूत्रपौरुषीं न कुर्वन्ति मासलघु, अर्थपौरुषीं न कुर्वन्ति मासगुरु । सूत्रपौरुषीमर्थपौरुषीं चाकुर्वतां यदि सूत्रं नश्यति

१ शून्या कृता भा० विना ॥

चतुर्लघु, अर्थो नश्यति चतुर्गुरु । अवर्णश्च लोकेऽभूपजायते—ग्राममध्येऽपि वसन्तः स्मशाने तिष्ठन्ति । 'इति' उपप्रदर्शने, एवम् 'उभयस्य' तिरश्चो मनुष्यस्य वा मरणे दोषाः । गतं तिर्यग्-मनुष्यमरणद्वारम् । अधुनाऽऽदेशद्वारमाह—"आदेस जहा बडुगमादी" । 'आदेशाः' प्राघूर्णकास्ते केचन शय्यातरस्य समागताः, शून्यां च वसतिं दृष्ट्वा शय्यातरेण तत्र मुक्ताः, ततो बटुक-चारण-भटेषु ये दोषास्तेऽत्रापि योजनीयाः ॥ ५५१ ॥

गतमादेशद्वारम् । अधुना व्यालद्वारं निष्केतनद्वारं चाह—

**अहिगरण मारणाऽणीणियम्मि अच्छंते वालि आयवहो ।**
**तिरितीय[1] जहा वाले, सुतिमणुस्सीएँ उड्डाहो ॥ ५५२ ॥**

'व्यालः' नाम सर्पः शून्यं दृष्ट्वा वसतौ प्रविशेत्, तत आगताः सन्तः श्रमणा यदि तं निष्काशयन्ति तदाऽधिकरणम्, हरितकायादीनां मध्येन तस्य गमनात् । अथवा स निष्काश्यमानः प्रद्वेषगमनतो दशेत् ततो मरणम् । अथवा निष्काशने जनसम्मिलनतः स सर्पो लोकेन मार्येत । अथैतद्दोषभीता न तं सर्पं निष्काशयन्ति ततस्तस्मिन् व्याले तिष्ठति आत्मविराधना, तेन भक्षणात् । एते च व्याले दोषाः । अथ निष्केतने तानाह—"तिरितीए" इत्यादि । यदि तिर्यक्स्त्री प्रसूता निष्काश्यते ततः सा यथा व्यालस्तथैव नियमत इतस्ततो गच्छन्ती हरितकायादीन् व्यापादयेत्, बालकानां च तत्सम्बन्धिनां तां विना तथा चानीयमानानां मरणसम्भवः । अथैवं दोषभयात् सा न निष्काश्यते तदा सा तिष्ठन्ती यदा तदा वा साधूनामनर्थं कुर्यात्, तत आत्मविराधना । अथ प्रसूता मानुषी निष्काश्यते तथा (तदा) 'एतेषामियम्' इति प्रवचनोड्डाहः । साऽपि च निष्काश्यमाना कायान् विराधयेत् । लोको वा ब्रूयात्—निरनुकम्पा एते यद् बालसहितामिमां निष्काशयन्ति । सा वा निष्काश्यमाना प्रद्वेषतः साधूनामालं दद्यात् चेटरूपं वा मारयेत् ॥ ५५२ ॥

**छड्डेउं व जइ गया, उज्झमणुज्झंति होंति दोसा उ ।**
**एवं ता सुन्नाए, बाले[2] ठविते इमे दोसा ॥ ५५३ ॥**

अथवा सा तत्र प्रसूता सती तं चेटरूपं त्यक्त्वा गच्छेत् ततस्तं यदि 'उज्झन्ति' परित्यजन्ति तदा निरनुकम्पतादोषः । अथ नोज्झन्ति तदा उड्डाहः । एवमेते तावत् शून्यायां वसतौ दोषाः । बाले स्थाप्यमाने पुनरिमे ॥ ५५३ ॥—

बाले वसति रक्षके स्थाप्यमाने दोषाः

**बलि धम्मकहा किड्डा, पमज्जणाऽऽवरिसणा य पाहुडिया ।**
**खंधार अगणि भंगे, मालव-तेणा[3] य नाती य ॥ ५५४ ॥**

बलिद्वारं धर्मकथाद्वारं क्रीडाद्वारं प्रमार्जनद्वारम् आवर्षणद्वारं प्राभृतिकाद्वारं स्कन्धावारद्वारम् अग्निद्वारं भङ्गद्वारं मालव[द्वारं] स्तेनद्वारं ज्ञातिद्वारं च । एतैर्द्वारैर्बाले रक्षके स्थाप्यमाने दोषा वक्तव्याः ॥ ५५४ ॥ तत्र प्रथमं बलिद्वारमधिकृत्य दोषानाह—

**साभाविय तन्नीसाएँ आगया भंडगं अवहरंति ।**
**नीणेमि त्ति व बाहिं, जा पविसइ ता हरंतऽन्ने ॥ ५५५ ॥**

1 °रितीए जहा ता० ॥ 2 बाल ठवेंते ता० ॥ 3 °णा त नायी य ता० ॥

साधवः कदाचनापि कारणवशतः सप्राभृतिकायां शय्यायां स्थिताः, सप्राभृतिका नाम सार्वजनिका यत्राऽऽगत्य बलिः प्रक्षिप्यते, तत्र ये बलिकारकास्ते द्विधा तत्र समागच्छेयुः, तद्यथा–स्वभावेन वा 'उपकरणं वा हरिष्यामि' इति कैतवेन वा। तत्र ये बलिकारकाः स्वाभाविका नोपकरणहरणप्रवृत्तास्ते 'तन्निश्रया' बलिनिश्रयाऽऽगताः सन्तो बलिं कुर्वन्तो बालमेकाकिनं दृष्ट्वा सञ्जातहरणबुद्धयो भाण्डकमपहरन्ति। अथवा बलिना प्रक्षिप्यमाणेनोपकरणं लेपयुक्तं क्रियते ततः स बालो वक्ति–बहिर्नयाम्युपकरणं येन न लेपयुक्तं क्रियते, ततः स बालो यावद् बहिर्निर्गतः प्रविशति तावदत्रान्तरेऽपहरन्त्युपकरणमन्ये ॥ ५५५ ॥

स्वभावत इति गतम्। कैतवमधिकृत्याह—

**एमेव कइयवा ते, निच्छूढं तं हरंति से उवहिं।**
**बाहिं च तुमं अच्छसु, अवणेहुवहिं व जा कुणिमो ॥ ५५६ ॥**

'एवमेव' अनेनैव प्रकारेण कैतवात् 'ते' समागता उपधिमपहरेयुः, तथाहि–केचन धूर्ता उपधिं हर्तुकामाः कैतवात् समागत्य क्षुल्लकं ब्रुवते–क्षुल्लक! एष बलिः समागच्छति ततस्त्वं बहिर्निर्गच्छ, एवं तं बहिर्निष्काश्य 'से' तस्योपधिमपहरन्ति। अथवेदं वदन्ति–वयं बलिं करिष्यामः, ततो यावद् वयं बलिं कुर्मस्तावत् त्वं बहिस्तिष्ठ, मा कूरेण खरण्टयिष्यते(ष्यसे), एवं तं निष्काश्य तस्योपधिमपहरन्ति। यदि वा ते एवं ब्रूयुः–यावद् वयं बलिं कुर्मस्तावदभ्यन्तरादात्मीयमुपधिमुपनय, स च बालस्तत्कार्यमजानन् एकवारं च सर्वमुपकरणं नेतुमशक्नुवन् स्तोकं गृहीत्वा निर्गत्य बहिः स्थापयित्वा यावदन्यस्य प्रविशति तावत् तदुपकरणमभ्यन्तरस्थितं धूर्तैरपह्रियते ॥ ५५६ ॥ तदेवं बलिद्वारं गतम्। अधुना धर्मकथाद्वारमाह—

**कतिएण सभावेण व, कहापमत्ते हरंति से अण्णे।**
**किड्डा सयं व रिंखा, पासति व तहेव किड्डगं ॥ ५५७ ॥**

केचन पुरुषाः 'धर्मं शृणुमः' इति कैतवेन वा स्वभावेन वा समागच्छेयुः। तत्र स्वभावत आगतानां बालमेकाकिनं दृष्ट्वा हरणबुद्धिरुपजायते। इतरे तु प्रथमत एव हरणबुद्ध्यैव समागतास्ते क्षुल्लकं ब्रुवते–कथय धर्मकथामस्माकमिति; ततः स कथां कथयितुं प्रवृत्तः प्रबन्धेन च कथयति, कथाप्रमत्ते केचिदग्रत उपविष्टाः शृण्वन्ति, अन्ये तस्योपकरणमपहरन्ति। गतं धर्मकथाद्वारम्। क्रीडाद्वारमाह—"किड्डा" इत्यादि। क्रीडायामपि द्विकं वक्तव्यम्। किमुक्तं भवति?–क्रीडानिमित्तमपि केचन स्वभावत आगच्छेयुः कैतवेन वा। स्वभावतोऽप्यागतानां बालमेकाकिनं दृष्ट्वा हरणबुद्धिरुल्लसति, तत्र स स्वयं बालः क्रीडति गोलादिना। अथ कदाचित् स क्षुल्लको ब्रूयात्–न वर्त्ततेऽस्माकं क्रीडा; ततस्ते वदन्ति–यद्येवं तर्हि रिङ्खाः कुरु, कः कियन्तो वारान् रिङ्खति? एवं स बालो रिङ्खाः करोति; अथ ब्रूते–न कल्पन्ते संयतानां रिङ्खा अपि कर्तुमिति; ततस्ते वदन्ति–यद्येवमस्मान् क्रीडतः पश्य, ततः स कौतुकेन क्रीडतः पश्यति; एवं स्वयं क्रीडया रिङ्खाभिर्वा पश्यन् वा क्रीडाप्रमत्त उपजायते; ततस्तथैवान्ये तेन सह क्रीडन्ति, अन्ये हरन्त्युपकरणमिति ॥ ५५७ ॥ सम्प्रति प्रमार्जनद्वारमावर्षणद्वारं च युगपदाह—

१ °तः समाग° भा० ॥

**जो चेव बलीएँ गमो, पमज्जणाऽऽवरिसणे वि सो चेव ।**

य एव बलिद्वारे गम उक्तः स एव प्रमार्जने आवर्षणे च द्रष्टव्यः । किमुक्तं भवति ?–प्रमार्जननिमित्तमावर्षणनिमित्तं वा केचित् स्वभावेन अपरे कैतवेन समागच्छन्ति, समागत्य च बलिद्वारोक्तेन प्रकारेणोपकरणमपहरन्तीति ॥ इदानीं प्राभृतिकाद्वारमाह—

**पाहुडियं वा गेण्हसु, परिसाडणियं व जा कुणिमो ॥ ५५८ ॥**

'प्राभृतिका' भिक्षाऽपि भण्यते अर्चनिकाऽपि । तत्रोभयमप्यधिकृत्य दोषानाह–कैतवेन स्वभावेन वा केचन ब्रूयुः–क्षुल्लक ! भिक्षां गृहाण, अथवा द्वारे निर्गच्छ यावद् वयं 'परिशाटनिकाम्' अर्चनिकां कुर्मः । एवमुक्तः स यावद् भिक्षामाददाति बहिर्वा निर्गच्छति तावत् तस्योपकरणं हरन्तीति ॥ ५५८ ॥ गतं प्राभृतिकाद्वारम् । अधुना स्कन्धावारद्वारमग्निद्वारं चाह—

**खंधारभया नासति, एस व एइ त्ति कइयवे[1] णस्स ।**
**अगणिभया व पलायति, नस्ससु अगणी वे[2] एति त्ति ॥ ५५९ ॥**

कोऽपि स्वभावतः स्कन्धावारभयान्नश्यति ब्रूते च–एष सराजकः स्कन्धावारः समागच्छति, स च तथा स्वभावतो नश्यन् बालमेकाकिनं दृष्ट्वाऽपहरेत् । अपरः कैतवेन ब्रूते–एष क्षुल्लक ! स्कन्धावारः समायाति तस्माल्लघु पलायस्व पलायस्व, ततः स बालो नश्यति; इतरे उपधिमपहरन्ति । अग्निभयादपि कोऽपि स्वभावतः पलायते, स च पलायमानो वक्ति–बहिरागच्छति नश्यतामिति । केचित् पुनः कैतवेन ब्रूयुः–मन्दभाग्याः ! नश्यत नश्यत, अग्निः समागच्छति ॥ ५५९ ॥ ततः किम् ? इत्याह—

**उवहीलोभ भया वा, न नीति न य तत्थ किंचि नीणेइ ।**
**गुत्तो व सयं डज्झइ, उवहिं च विणा उ जा हाणी ॥ ५६० ॥**

'उपधिलोभात्' 'उपधिर्मध्ये तिष्ठति तं मुक्त्वा कथमहं यामि ? मा कश्चिदपहरेत्' इत्युपधेर्लोभतोऽग्निभयाद् वा स बालो बहिर्न निर्गच्छति, न च तत्र बहिः किञ्चिद् निष्काशयति, ततः कथमप्यग्निसमागमने स मध्ये गुप्तः सन् स्वयं दह्यते । कैतवेनाग्न्यागमं कथयित्वा बालं विप्रलभ्योपधिमपहरन्ति । उपधिं च विना या हानिस्तां साधवः प्राप्नुवन्ति ॥ ५६० ॥

गतं स्कन्धावारद्वारमग्निद्वारं च । सम्प्रति मालवद्वारं स्तेनद्वारं चाह—

**मालवतेणा पडिया, इयरे वा नासती जणेण समं ।**
**न य गेण्हइ सारुवहिं, तप्पडिबद्धो व हीरेज्जा ॥ ५६१ ॥**

मालवा एव स्तेना मालवस्तेनाः, ते मालवग्रहणेन द्वारगाथायां (गा० ५५४) सूचिताः । 'इतरे' अन्ये स्तेनाः, स्तेनग्रहणेन । केचित्तु कैतवेन स्वभावेन वा ब्रूयुः–मालवस्तेना इतरस्तेना वा पतिताः, तत्र ये कैतवेन ब्रुवते ते पत्तनस्य ग्रामस्य वा भङ्गे जाते उपधिमपहरन्ति । स्वभावेन कथने स बालो भयान्न सारमुपधिं गृह्णाति, अग्रहणे च तदभावे महती हानिः । अथवा स तस्मिन्नुपधौ प्रतिबद्धः सन् मालवस्तेनैरितरैर्वा सोपधिरपह्रियेत ॥ ५६१ ॥

गतं मालवद्वारं स्तेनद्वारं च । सम्प्रति ज्ञातिद्वारमाह—

---

१ कैयवे नस्स ता० विना ॥ २ व पलेति ता० ॥

सज्झायगेहि नीते, एंति व नीय त्ति नट्ठे जं उवहिं ।
कहिँ नीय त्ति कइयवे, कहिए अन्नस्स सो कहए ॥ ५६२ ॥
चिंधेहिँ आगमेउं, सो वि य साहेइ तुह निया पत्ता ।
²नेमो उवहिग्गहणं, तेहिँ व हं पेसितो हरइ ॥ ५६३ ॥

स्वज्ञातिकाः स्वभावत आगताः, तैरेकाकी दृष्टः क्षुल्लकः, तैर्नीतेऽन्ये पश्चादुपधिमपहरेयुः, ततस्तन्निष्पन्नं तेषां साधूनां प्रायश्चित्तम् । अथवाऽन्येन केनापि ते स्वज्ञातय आगच्छन्तो दृष्टाः, तेनाऽऽगत्य क्षुल्लकस्य कथितम्—निजकास्तव समागच्छन्तीति, ततः स पलायितः, तस्मिन्नष्टे यमुपधिं जघन्यं मध्यमुत्कृष्टं वाऽपहरन्ति तन्निष्पन्नं तेषां प्रायश्चित्तम् । एवं तावत् स्वभावतः स्वज्ञातीनामागमने दोषा उक्ताः, अधुना कैतवेन तदागमनकथनतो दोषानाह—कोऽपि कैतवेनागत्य धूर्तो ब्रूते—क्षुल्लक ! क ते निजकाः सन्ति ? । तेन कथितम् अमुके ग्रामे नगरे वा । तेनान्यस्य धूर्तस्य कथितं 'मा स्वयमहं ब्रुवाणो लक्ष्ये' इति ॥ ५६२ ॥

सोऽपि अन्यो धूर्तस्तेषां स्वज्ञातीनां चिह्नानि नामानि चागम्य तस्य क्षुल्लकस्य समीपमागच्छति, आगत्य ब्रूते—स त्वममुकानां निजकः; क्षुल्लको वक्ति—कुतस्त्वं जानासि ?; इतरो ब्रूते—किं न जानामि ते मातरममुकनामिकां पितरं चामुकमीदृशेन वर्णेन रूपेण वा ? । एवं संवादे कृते स क्षुल्लको वदति—सत्यमहं तेषां निजकः; ततः स धूर्तो भाषते—ते निजकास्तव कृते समागता मयाऽमुकप्रदेशे दृष्टाः, सम्प्रति अन्ये प्रविशन्ति वदन्ति च ते—त्वामात्मीयं नेष्याम इति; ततः स पलायते, इतरे उपधिमपहरन्ति । अथवा वक्ति—तैरहं तवोदन्तवाहकः प्रेषितः; ततः स विश्वासं गच्छति, विश्वस्तस्य चोपधिमपहरेत् । अथवा वदेत्—तवाऽऽनयननिमित्तमहं तैः प्रेषितः; एवमुक्ते स बालः पलायते, इतरे तूपधिमपहरन्ति ॥ ५६३ ॥

एते पदे न रक्खति, बाल गिलाणे तहेव अव्वत्ते ।
निद्दा-कहापमत्ते, वत्ते वि य जे भवे भिक्खू ॥ ५६४ ॥

'एतानि' बलिप्रभृतीनि 'पदानि' स्थानानि बालो न रक्षति, स्वाभाविकेषु कैतवेषु ²वैतेषु स्थानेषु बालो विप्रतार्यते इति भावः । तथा ग्लानः 'अव्यक्तो वा' अगीतार्थो यद्वा 'व्यक्तः' गीतार्थोऽपि च यो भवेद् भिक्षुर्निद्रा-कथाप्रमत्तः सोऽप्येतानि पदानि न रक्षति । कथास्तरङ्गवत्यादयो द्रष्टव्याः ॥ ५६४ ॥ ग्लानद्वारमव्यक्तद्वारं चाधिकृत्यैतदेव विशेषत आह—

एमेव गिलाणे वी, सयकिड्ड-कहा-पलायणे मोत्तुं ।
अव्वत्तो उ अगीतो, रक्खणकप्पे परोक्खो उ ॥ ५६५ ॥

'एवमेव' अनेनैव प्रकारेण ग्लानेऽपि दोषा वक्तव्याः, नवरं स्वयंक्रीडा-कथा-पलायनानि मुक्त्वा । इयमत्र भावना—ये बाले दोषास्ते ग्लानेऽपि, नवरं यस्तस्यात्मसमुत्थो दोषः स्वयंक्रीडात्मकः कथादोषो भयेन पलायनदोषश्च स न भवति, किन्तु स वारयितुमसमर्थः, न वा तं कोऽपि गणयति, ग्लानत्वात् । अन्यच्च स क्षुधा पिपासयाऽन्यया वा वेदनया परिताप्यमानः सन् कूजेत्, ततो लोको ब्रूयात्—अहो ! निरनुकम्पाः साधवो यदमुं त्यक्त्वा हिण्डन्ते;

१ नट्ठे उव° ता० ॥ २ मो० विनाऽन्यत्र—°षु चैतेकेषु स्थर° ले० । °षु चैकेषु स्था° कां० ॥

अपथ्यं वा लोकानीतमकल्पिकं स प्रतिसेवेतेति। तथा अव्यक्तो नाम 'अगीतः' अगीतार्थः स रक्षणकल्पे परोक्षः। किमुक्तं भवति ?—सः 'स्वाभाविके कैतवे वा कथमुपकरणं रक्षणीयम् ?' इति न जानाति, न वा 'स्वाभाविकेषु ग्लानत्वादिषु केन प्रकारेणात्मा निस्तारयितव्यः ?, कथं वा उपकरणम् ?' अतः प्रागुक्तं (गा० ५६४) "ग्लानोऽव्यक्तश्चैतानि पदानि न रक्षति"। योऽपि च व्यक्तः सोऽपि यदि निद्रालुर्भवति तरङ्गवत्यादिकथाकथनव्यसनी वा तदा न रक्षति, प्रमादबहुलत्वात् ॥ ५६५ ॥

तम्हा खलु अब्बाले, अगिलाणे वत्तमप्पमत्ते य।
कप्पइ य वसहिपालो, धिइमं तह वीरियसमत्थो ॥ ५६६ ॥

यस्माद् बालादीनामेते दोषास्तस्माद् यः खल्वबालोऽग्लानो व्यक्तो निद्रा-कथादिभिरप्रमत्तः, पुनः कथम्भूतः ? इत्याह—'धृतिमान्' यस्तृषा क्षुधा वा परितापितोऽपि न शून्यां वसतिं कृत्वा भक्तपानाय गच्छति स इति भावः, 'वीर्यसम्पन्नः' बलवान्, यः स्तेनानापततो निरोद्धुं समर्थः अग्न्यादिसम्भवे तूपधिमात्मानं च निस्तारयति ईदृशः कल्पते वसतिपालः ॥ ५६६ ॥

अथ कियन्त ईदृशा वसतिपालाः स्थापयितव्याः ? तत आह—

सति लंभम्मि अणियया, पणगं जा ताव होंति अच्छित्ती।
जहन्नेण गुरू चिट्ठइ, तस्संदिट्ठो विमा जयणा ॥ ५६७ ॥

सति भैक्षस्य लाभे अनियता वसतिपालाः स्थापयितव्याः। अयमत्र भावः—यत्रैकः सङ्घाटको भैक्षस्य प्रचुरस्य लाभतोऽन्येषां त्रयाणां चतुर्णां चात्मनश्च पर्याप्तमानयति तत्र यावद्भिस्तिष्ठद्भिर्गच्छस्य पर्याप्तं भवति तावन्तस्तिष्ठन्ति; अथवा आचार्यादयः पञ्च तिष्ठन्ति यैर्गच्छः समस्तोऽपि सङ्गृहीतो वर्त्तते; अथवा यो ज्ञायते 'एष सूत्रा-ऽर्थग्रहण-धारणासमर्थोऽव्यवच्छित्तिं करिष्यति' स आचार्यस्य सहायस्तिष्ठति। अथैवमपि न निस्तरन्ति ततो जघन्यतो गुरुरेककस्तिष्ठति शेषाः सर्वे हिण्डन्ते। अथाऽऽचार्योऽपि कुलादिकार्येषु निर्गच्छति ततो य आचार्येण सन्दिष्टः 'मयि निर्गते सर्वमेतस्य पुरत आलोचनादि कार्यम्' स तिष्ठति। ततो यत्र तानि बलिप्रभृतीनि पदानि स्वभावतः कैतवेन वा प्राप्तानि भवन्ति तत्र तेन वसतिपालेनेयं यतना कर्त्तव्या ॥ ५६७ ॥ तत्र बलिपाते तावदाह—

अप्पुव्वमतिहिकरणे, गाहा ण य अण्णभंडगं छिविमो।
भणइ व अठायमाणे, जं नासइ तुज्झ तं उवरिं ॥ ५६८ ॥

साधवो हि कारणेन सप्राभृतिकायामपि शय्यायां स्थिता भवेयुः। साधूनां चेयं सामाचारी—ऋतुबद्धे काले बद्ध उपधिस्तिष्ठति वर्षास्वबद्धः, तत्र सप्राभृतिकायां वसतौ वर्षास्वपि समस्तं भाण्डकमेकायोगं प्रकुर्वन्ति, ततो यदि बलिकाराः समागच्छन्ति तथापि न कश्चिद् दोषः। अथ ते कथमपहरणं कर्तुकामा ज्ञातव्याः ? उच्यते—अपूर्वान् दृष्ट्वा, ये स्वाभाविकास्ते प्रतिदिवसमागच्छन्तः परिचिताः, ये त्वपूर्वास्ते हर्तुकामा विज्ञेयाः। ये वा अतिथौ—

१ °णगं व जतो व हो° ता० ॥ २ गाथेयं चूर्णिकृता कारणे सपाहुडि० ५६९ गाथानन्तरं व्याख्याताऽस्ति ॥

विशिष्टतिथ्यभावे बलिकरणाय समागतास्तेऽपि हर्तुकामा द्रष्टव्याः । तेऽपि यदि ब्रूयुः—निर्गच्छत वयं बलिं करिष्यामः, तदा गाथा वक्तव्या—

न वि लोणं लोणिज्जइ, न वि तुप्पिज्जइ घयं व तेल्लं वा ।
किह नाम लोगडंभग!, वट्टम्मि ठविज्जए वट्टो? ॥
अन्नं भंडेहि वणं, वणकुट्टग! जत्थ ते वहइ चंचू ।
भंगुरवणवुग्गाहित!, इमे हु खदिरा बइरसारा ॥

ततो जानते 'वयं प्रत्यभिज्ञाताः' इति । अथवा वक्तव्यम्—येषामेतदुपकरणं ते भैक्षस्यानयनाय गताः, वयं तु 'अन्यभाण्डकम्' अन्येषामुपकरणं न स्पृशामः । ततो यदि न तिष्ठन्ति ततो भूयो भणति—शृणुत, अस्माभिर्वारिता यूयं न तिष्ठथ ततो यदत्र नश्यति तद् युष्माकमुपरि; एवमुक्ते ते तिष्ठन्ति ॥ ५६८ ॥

**कारणे सपाहुडि ठिया, वासे वि करेंति एगमायोगं ।**
**सन्नाविय दिट्ठा वा, भणाइ जा सारवेमुवहिं ॥ ५६९ ॥**

कारणे सप्राभृतिकायां वसतौ स्थिता वर्षास्वपि समस्तस्यापि भाण्डकस्यैकमायोगं कुर्वन्ति ततो न किञ्चित् पलायते । तत्र ये कैतवेन बलिकारकाः समागच्छन्ति तेषु यतनाविधिरुक्तः । सम्प्रति स्वाभाविकेष्वाह—"सन्नाविय" इत्यादि । ये शय्यातरेणान्येन वा बलिकाराः संज्ञापिता दृष्टा वा स्वयमन्यदाऽपि बलिं कुर्वाणास्तान् प्रति भणति वसतिपालः—तावत् प्रतीक्षध्वं यावदुपधिं सारयामि; एवमुक्ते ते प्रतीक्षन्ते ॥ ५६९ ॥

**उँव्वरए कोणे वा, काऊण भणाति मा हु लेवाडे ।**
**बहु पेल्लणऽसारविए, तहेव जं नासती तुज्झं ॥ ५७० ॥**

ततो वसतिपालो यदि कश्चिदस्त्यपवरकस्तत्र तदुपकरणं प्रक्षिपति, अथ नास्त्यपवरकस्तत एकस्मिन् कोणे सर्वमुपकरणं स्थलीकरोति भणति च—शनैर्बलिविधानं कुरुत, मा उपकरणं कूरसिक्थैः खरण्टयत । अथ ते बहवोऽगारा उन्मत्तकाः सहसैव प्रेर्य प्रविष्टा नैव सार्यमाणमुपधिं प्रतीक्षन्ते ततस्तथैव वक्तव्यं यथोक्तं प्राक्, यथा—यदत्र नश्यति तद् युष्माकमुपरीति ॥ ५७० ॥ धर्मकथाद्वारे यतनामाह—

**नत्थि कहालद्धी मे, पुव्वं दिट्ठे व बेति गेलण्णं ।**
**दाणादि असंकाण व, आउज्जंतो परिकहेइ ॥ ५७१ ॥**

यदि ते कैतवेन स्वभावेन वा समागत्य धर्मकथामापृच्छन्ति तदा वक्तव्यम्—नास्ति मे कथालब्धिः । अथ धर्मं कथयन् स पूर्वं दृष्टः ततो वदति—'ग्लानत्वं' शिरो मे दुःखयति गलको वेति । अथ ते धर्मकथाप्रष्टारो दानश्राद्धा आदिशब्दादभिगमसम्यक्त्ववादयश्च सम्यग्ज्ञाता वर्त्तन्ते ततस्तेषां दानादिश्रावकाणाम् 'अशङ्कानां' शङ्काया अविषयाणां द्वारमूले स्थित्वा

१ °हुडियाए वासा वि ता० विना ॥ २ साभाविय ता० ॥ ३ भणंति जा ता० ॥
४ ओवरए ता० ॥

'आयोजयन्' भाण्डकविषयमुपयोगं ददानः परिकथयति, मा कथाप्रमत्ते मयि कोऽपि हरेदिति हेतोः ॥ ५७१ ॥ सम्प्रति क्रीडाद्वारे यतनामाह—

**दट्ठुं पि णे न लब्भामो, मा किड्ड मा हरिज्जिहं को वि ।**
**संमज्जणाऽऽवरिसणे, पाहुडिया चेव बलिसरिसा ॥ ५७२ ॥**

यदि केचित् तत्र कैतवेन स्वभावेन वाऽऽगत्य क्रीडन्ति तदा तान् प्रति वक्तव्यम्—वयमाचार्यादिपार्श्वतो द्रष्टुमपि क्रीडतो न लभामहे तस्मादत्र मा क्रीडत, एतच्चैवमुच्यते 'मा कश्चिद् हरेत्' इति कृत्वा । प्रमार्जने आवर्षणे प्राभृतिकायां च यथा बलिद्वारे तथा यतना कर्त्तव्या ॥ ५७२ ॥

**खमणं निमंतिते ऊ, खंधारे कइयवे इमं भणति ।**
**किं णे निरागसाणं, गुत्तिकरो काहिई राया ॥ ५७३ ॥**

भिक्षां यदि कोऽपि निमन्त्रयति तदा वक्तव्यम्—ममाद्य क्षपणमिति । कैतवे च स्कन्धावारे इदं भणति—किं "णे" अस्माकं 'निरागसां' निरपराधानां 'गुत्तिकरः' रक्षाकरो राजा करिष्यति ? ॥ ५७३ ॥ यत्र तु स्वाभाविकः स्कन्धावारः समागच्छति तत्रेयं[1] यतना—

**पभु अणुपभु[णो व] निवेयणं तु पेल्लंति जाव नीणेमि ।**[2]
**तह वि य अठायमाणे, पासे जं वा तरति नेउं ॥ ५७४ ॥**

प्रभुः नाम राजा, अनुप्रभुः सेनाधिपतिप्रभृतिकः, तं गत्वा धर्मलाभयति—विविक्तमस्माकमुपाश्रयं कुरुत । ततः स मनुष्यान् ददाति, ते प्रेरयन्ति समस्तानपि लोकानुपाश्रयप्रविष्टानिति । अथ स्कन्धावारो न व्रजति किन्तु तथैव स्थितवान्, तत्र यदि कोऽपि वसतिं स्थाननिमित्तं प्रेरयेद् अत्रापि प्रभोरनुप्रभोर्वा निवेदनं कर्त्तव्यं येन स वारयति । अथ प्रभुरनुप्रभुर्वा न वारयति अस्वाधीना वा ते पुरुषास्ततो ब्रूते—यावदुपकरणं नयामि तावत् प्रतीक्षस्व(क्षध्वम्) । ततः कल्पं विस्तार्य सर्वमुपकरणं तत्र प्रक्षिप्योपरि बद्ध्वा निष्काशयति । अथ प्रभूतमुपकरणं न शक्नोति सर्वमेकवारं नेतुं तदा त्रिषु चतुर्षु वा कल्पेषु बद्ध्वा **कोल्लुकपरम्परकेण महाराष्ट्रप्रसिद्धकोल्लुकचक्रपरम्परन्यायेन** निष्काशयति । अथ ते हरन्त्युपकरणं ततो यत् पार्श्वे सारभाण्डमक्षादि यद्वा नेतुं शक्नोति तद् नयति ॥ ५७४ ॥

सम्प्रति स्वाभाविकाग्नौ यतनामाह—

**कोल्लुपरंपर संकलि, आगासं नेइ वायपडिलोमं ।**
**अच्छुल्लूढा जलणे, अक्खाई सारभंडं तु ॥ ५७५ ॥**

ज्वलने प्रवर्द्धमाने सर्वमुपकरणमेकवारमशक्नुवन् कल्पेषु चतुर्षु पञ्चसु वा बध्नाति, बद्ध्वा च **कोल्लुकचक्रन्यायेन** परम्परया "संकलि"त्ति तान् पोट्टलकान् दवरकेण सङ्कलय्य यत्र न तृणादिसम्भवस्तत आकाशं तदपि वातप्रतिलोमं तत्र नयति । अथ ज्वलनेनातिप्रसरता ते 'अच्छुल्लूढाः' स्वस्थानं त्याजितास्ततो यत् सारं भाण्डमक्षादि तद् निष्काशयन्ति ॥ ५७५ ॥

---

१ तत्रेयं भावना भा० मो० विना ॥ २ °भुणो आवेदणं तु ता० ॥

मालव-स्तेनेषु यतनामाह—

**असरीरतेणभंगे, पचलाए जणे उ जं तरति नेउं ।**
**न वि धूमो न वि बोलो, न द्दवति जणो कइयवेसुं ॥ ५७६ ॥**

'अशरीरस्तेनभङ्गे' ये शरीरं नापहरन्ति तैः स्तेनैर्भङ्गे–प्रपलायमाने जने यद् नेतुं शक्नोति तद् नयति । यदि पुनः कैतवेन केचन ब्रुवते 'अग्निः समुच्छलितः स्तेना वा द्विविधाः समापतिताः' तदा ते वक्तव्याः–न वै धूमो दृश्यते "न वि बोलो"त्ति नापि जनस्य प्रपलायमानस्य बोलः तस्मान्न द्रवति जनो विदग्धः कैतवेष्विति ॥ ५७६ ॥ स्वज्ञातिद्वारे यतनामाह—

**अन्नकुल-गोत्तकहणं, पत्तेसु वि भीयपरिस पेल्लेइ ।**
**पुव्वं अभीयपरिसे, भणाति लज्जाएँ न भणामि ॥ ५७७ ॥**
**जा ताव ठवेमि वए, पत्ते कुड्डादिछेय संगारो ।**
**मा सिं हीरे उवहिं, अच्छह जा सिं निवेएमि ॥ ५७८ ॥**

यदि केचन स्वज्ञातय आगता वर्त्तन्ते न च ते तं प्रत्यभिजानते तदा 'अन्यकुल-गोत्रकथनं' कर्त्तव्यम् अन्यत् कुलमन्यच्च गोत्रमात्मनः कथयति । अथ ते सम्यग् ज्ञातारः समागतास्तत्र यदि ते भीतपर्षदस्तदा तान् प्रेरयति–ईदृशास्तादृशा यूयम्, बन्धयामि युष्मान् राजकुलेनेति । अथैवमुक्तास्ते न बिभ्यति तर्हि तान् अभीतपर्षदो वक्ति–ममाप्येतदभिप्रेतमुन्निष्क्रमणं परं लज्जया न भणामि युष्मान्, यथा–अहमुन्निष्क्रमामीति, न वा शक्नोमि लज्जया युष्माकं समीपमागन्तुम्, तद् भव्यं कृतं यद् यूयमागताः किन्तु तिष्ठत क्षणमात्रं यावदागच्छन्ति साधवः, ततस्तेषां समीपे व्रतानि निक्षिपामि; मा वा तेषां भट्टारकाणामुपकरणं शून्ये उपाश्रये केनापि ह्रियेत, यावच्च तेषां निवेदयामि यथा–'अहं गमिष्यामि' इति तावत् तिष्ठत । एतावतोपायेन तावत् तिष्ठति यावत् साधवः प्राप्ता भवन्ति, तत उपाश्रयकुड्यस्य च्छिद्रं पातयित्वा नश्यति सङ्केतं च करोति–अमुकस्थाने मां गवेषयत, आगत्य वा मम मिलितव्यमिति ॥ ५७७ ॥ ५७८ ॥

**खंधारादी नाउं, इयरे वि तहिं दुयं समभिएंति ।**
**अप्पाहेई तेसिं, अमुगं कज्जं दुयं एह ॥ ५७९ ॥**

'इतरेऽपि' भिक्षार्थमटन्तः साधवः स्कन्धावारमग्नि-मालव-स्तेनपतनं वा ज्ञात्वा 'द्रुतं' सत्वरं 'समभियन्ति' समागच्छन्ति । स वा वसतिपालो भिक्षार्थं गतानां सन्देशं कथयति, यथा—अमुकं कार्यमापतितमिति द्रुतमागच्छत ॥ ५७९ ॥

गतं रक्षणद्वारम् । इदानीं ग्रहणकल्पिकमाह—

**दुविहकरणोवघाया, संसत्ता पच्चवाय सिअविही ।**
**जो जाणति परिहरिउं, सो गहणे कप्पितो होति ॥ ५८० ॥**

वसतेर्द्विविधं करणम्–मूलकरणमुत्तरकरणं च, तेन द्विविधेन करणेनोपघातो यस्याः सा द्विविधकरणोपघाता, मूलकरणोपहता उत्तरकरणोपहता चेत्यर्थः । तथा पृथिव्युदक-तेजो-हरित-त्रसप्राण-सागारिकसंयुक्ता संसक्ता । ब्रह्मव्रतादिविराधनाकारिणी प्रत्यवाया । तथा विधिर्विधानं

भेदः प्रकार इत्यनर्थान्तरम्, शय्याया विधिर्वक्ष्यमाणा (गा० ५९३) नव शय्याया भेदाः । एतैर्मूलकरणादिदोषैर्यः सम्यक् परिहर्त्तुं जानाति स शय्याग्रहणे कल्पिको भवति ॥ ५८० ॥

अथ कतिविधं मूलकरणमुत्तरकरणं वा शोधनीयम्? अत आह—

**सत्तेव य मूलगुणे, सोही सत्तेव उत्तरगुणेसु ।**
**संसत्तम्मि य छक्कं, लहु-गुरु-लहुगा चरम जाव ॥ ५८१ ॥**

'सप्तैव' सप्तप्रकारैव शोधिर्मूलगुणेषु, गाथायामेकवचनमार्षत्वात्, 'सप्तैव' सप्तप्रकारैवोत्तरगुणेषु शोधिः । किमुक्तं भवति?—मूलकरणं सप्तभेदं शोधनीयं वसतेः साधुभिः, उत्तरकरणमपि सप्तविधमिति । तथा संसक्ते उपाश्रये 'षट्कं' पृथिव्यप्तेजो-वनस्पति-त्रसकाय-सागारिकलक्षणं शोधनीयम् । किमुक्तं भवति?—यथोक्तरूपेण षट्केन संसक्तायामपि न स्थातव्यम् । यदि तिष्ठति ततो लघु-गुरु-लघुका यावत् 'चरमं' पाराञ्चितं तावत् प्रायश्चित्तम् । तद्यथा—पृथिव्यादिभिः कायैः संसक्तायां तिष्ठन्ति (तिष्ठति) चत्वारो लघुकाः, हरितैरनन्तैश्चत्वारो गुरुकाः, प्रत्येकबीजैः पञ्च रात्रिन्दिवानि लघुकानि, अनन्तबीजैस्तान्येव गुरुकाणि, मिश्रैः पृथिव्यादिभिर्मासलघु, मिश्रैरनन्तैर्मासगुरु, बीजैः प्रत्येकैरनन्तैश्च मिश्रैः सचित्तैरिव, त्रसैः संसक्तायां चतुर्गुरु, एवं तिष्ठतः प्रायश्चित्तम् । अथ तिष्ठन् पृथिवीकायादिसङ्घट्टनादि करोति तदा लघुक-गुरुकादि प्रायश्चित्तम् "छकाय चउसु लहुगा" इत्यादि(४६१)गाथया प्रागुक्तप्रकारेणाभिहितं तावदवसेयं यावच्चरमं पाराञ्चितमिति ॥ ५८१ ॥

"सप्तविधं मूलकरणं शोधनीयम्" इत्युक्तम् अतः सप्त मूलभेदानाह—

**पट्ठीवंसो दो धारणाउ चत्तारि मूलवेलीतो ।**
**मूलगुणेहिँ उवहया, जा सा आहाकडा वसही ॥ ५८२ ॥**

उपरितनस्तिर्यक्पाती पृष्ठवंशः, द्वौ मूलधारणौ ययोरुपरि पृष्ठवंशस्तिर्यग् निपात्यते, चतस्रश्च मूलवेलय उभयोर्धारणयोरुभयतो द्विद्विवेलिसम्भवात् । एते वसतेः सप्त मूलभेदाः । एतैर्मूलगुणैः सप्तभिरुपहता या वसतिः सा आधाकृता भवति । साधून् आधाय—सम्प्रधार्य कृता आधाकृता, पृषोदरादित्वादिष्टरूपनिष्पत्तिः ॥ ५८२ ॥ उत्तरकरणं पुनरिदं सप्तविधम्—

**वंसग कडणोकंचण, छावण लेवण दुवार भूमी य ।**
**सप्परिकम्मा वसही, एसा मूलोत्तरगुणेसु ॥ ५८३ ॥**

वंशका ये वेलीनामुपरि स्थाप्यन्ते, पृष्ठवंशस्योपरि तिर्यक् 'कटनं' कटादिभिः समन्ततः पार्श्वानामाच्छादनम्, 'उत्कञ्चनम्' उपरि कम्बिकानां बन्धनम्, 'छादनं' दर्भादिभिराच्छादनम्, 'लेपनं' कुड्यानां कर्दमेन गोमयेन च लेपप्रदानम्, "दुवार" त्ति संयतनिमित्तमन्यतो वसतेर्द्वारकरणम्, "भूमि" त्ति समभूमिकरणम् । एतत् सप्तविधमुत्तरकरणम् । एषा सपरिकर्मा वसतिर्मूलगुणैरुत्तरगुणैश्च । एषा नियमेनाविशोधिकोटिः । अन्येऽपि चोत्तरगुणा वसतेर्विद्यन्ते तैः कृता विशोधिकोटिः ॥ ५८३ ॥ के तेऽन्ये उत्तरगुणाः? इत्यत आह—

**दूमिय धूविय वासिय, उज्जोविय बलिकडा अवत्ता य ।**
**सित्ता सम्मट्ठा वि य, विसोहिकोडी कया वसही ॥ ५८४ ॥**

'दूमिता' नाम सुकुमारलेपेन सुकुमारीकृतकुड्या सेटिकया धवलीकृतकुड्या च, धूपिता अगुरुप्रभृतिभिः, वासिता पटवास-कुसुमादिभिः, 'उद्द्योतिता' अन्धकारेऽग्निकायेन कृतोद्द्योता, 'बलिकृता' यत्र संयतनिमित्तं बलिविधानं कृतम्, 'अवात्ता' नाम यत्र भूमिरुपलिप्ता, सिक्ता आवर्षणकरणतः, सम्मृष्टा सम्मार्जन्या संयतनिमित्तम् । एवमुत्तरगुणैः कृता वसतिर्विशोधिकोटिर्भवति ॥ ५८४ ॥ अत्रैव प्रायश्चित्तविधिमाह—

**अप्फासुएण देसे, सव्वे वा दूमियादि चउलहुगा ।**
**अप्फासु धूमजोती, देसम्मि वि चउलहू होंति ॥ ५८५ ॥**
**सेसेसु फासुएणं, देसे लहु सव्वहिं भवे लहुगा ।**
**सम्मज्जण साह-कुसादि छिन्नमेत्तं तु सच्चित्तं ॥ ५८६ ॥**

यत्र देशतः सर्वतो वा अप्रासुकेन दूमितादि आदिशब्दात् समस्तान्यपि पदानि गृहीतानि तत्र तिष्ठतः प्रत्येकं प्रायश्चित्तं चत्वारो लघुकाः । यत्र पुनरगुरुप्रभृतिभिर्धूपनमन्धकारेऽग्निकायेनोद्द्योतनं तत्र नियमादप्रासुकः—सचित्तोऽग्निकाय इति देशेऽपि चत्वारो लघुकाः किमुत सर्वतः ? ॥ ५८५ ॥

'शेषेषु' धूपितमुद्द्योतितं च मुक्त्वा अन्येषु दूमित-वासित-बलिकृता-ऽवात्त-सिक्त-सम्मृष्टरूपेषु भेदेषु प्रासुकेन देशतः करणे मासलघु, सर्वतश्चत्वारो लघवः । तथा यद् मार्ज्यते तत्र सचित्तं शाखा-कुशादि च्छिन्नमात्रं तद् यदि देशतः सर्वतो वा सम्मार्ज्यते तदा चतुर्लघु ॥ ५८६ ॥

**मूलुत्तरचउभंगो, पढमे बीए य गुरुग सविसेसा ।**
**तइयम्मि होइ भयणा, अत्तट्ठकडो चरम सुद्धो ॥ ५८७ ॥**

मूलगुणाः पृष्ठवंशादयः उत्तरगुणा वंशकादयः तेषु मूलोत्तरगुणेषु चतुर्भङ्गी । गाथायां पुंस्त्वं प्राकृतत्वात् । मूलगुणा अपि पृष्ठवंशादयः संयतनिमित्तमुत्तरगुणा अप्यविशोधिकोटिगता वंशकादयः संयतनिमित्तमिति प्रथमो भङ्गः, अत्र प्रायश्चित्तं चत्वारो गुरुका द्वाभ्यां गुरवः, तद्यथा—तपसा कालेन च । मूलगुणाः संयतार्थमुत्तरगुणा अविशोधिकोटिगताः स्वार्थमिति द्वितीयः, अत्र चत्वारो गुरुकास्तपोगुरवः काललघुकाः । "तइयम्मि होति भयण"त्ति मूलगुणाः स्वार्थमुत्तरगुणाः संयतार्थमिति तृतीयो भङ्गस्तस्मिन् भजना । सा चेयम्—येऽत्रोत्तरगुणास्ते यद्यविशोधिकोटिगतास्तदा चतुर्गुरवस्तपोलघवः कालगुरवः, अथ विशोधिकोटिगतास्ते ततोऽप्रासुकेन देशे सर्वस्मिन् वा परिकर्मणि चत्वारो लघवः, प्रासुकेन देशतो मासलघु, सर्वतश्चत्वारो लघुकाः । आत्मार्थं मूलगुणा आत्मार्थमेव चोत्तरगुणा इत्येवमात्मार्थकृतश्चरमभङ्गः शुद्धः ॥ ५८७ ॥

तदेवं द्विविधकरणोपघातेति द्वारं व्याख्यातम् । अधुना संसक्तद्वारमाह—

**पुढवि दग अगणि हरियग, तसपाण सागारियादि संसत्ता ।**
**बंभवयआदि-दंसणविराहिगा पच्चवाया उ ॥ ५८८ ॥**

पृथिव्या उदकेनाग्निना हरितकेन त्रसपाणैः 'सागारिकादिभिश्च' सागारिकः—शय्यातरः

आदिशब्दादन्यस्त्री-पुरुषगृहस्थैः 'संसक्ता' सम्मिश्रा । तथा प्रत्यपाययति-प्रत्यपाये पातयतीति प्रत्यपाया ब्रह्मव्रतादीनां दर्शनस्य-सम्यक्त्वस्य विराधिका, यत्र ब्रह्मव्रतादीनां विराधनोपजायते सा सप्रत्यवाया शय्या इत्यर्थः ॥ ५८८ ॥ अत्रोभयत्रापि प्रायश्चित्तविधिमाह—

**काएसु उ संसत्ते, सचित्त-मीसेसु होइ सट्ठाणं ।**
**सागारियसंसत्ते, लहुगा गुरुगा य जे जत्थ ॥ ५८९ ॥**

'कायैः' पृथिवीकायादिभिः सचित्तैर्मिश्रैश्च संसक्ते उपाश्रये तिष्ठतः प्रायश्चित्तं 'स्वस्थानं' स्वस्थाननिष्पन्नं भवति । तद्यथा—सचित्तैः पृथिवीकायादिभिः संसक्ते चतुर्लघु, हरितैरनन्तैश्चतुर्गुरु, प्रत्येकबीजै रात्रिन्दिवपञ्चकं लघु, अनन्तबीजैर्गुरुकम्, मिश्रैः पृथिव्यादिभिर्मासलघु, हरितैरनन्तैर्मिश्रैर्मासगुरु, बीजैः प्रत्येकैरनन्तैश्च मिश्रैः सचित्तैरिव, त्रसकायैश्चत्वारो गुरुकाः । "सागारिय" इत्यादि पश्चिमार्द्धम् । निर्ग्रन्थानां पुरुषसंसक्ते उपाश्रये तिष्ठतां चत्वारो लघुकाः, स्त्रीसंसक्ते चत्वारो गुरुकाः । निर्ग्रन्थीनां स्त्रीभिः संसक्ते चतुर्लघु, पुरुषसंसक्ते चतुर्गुरु । ये च यत्राऽऽज्ञाभङ्गादयो दोषास्ते च तत्र सप्रायश्चित्ता वक्तव्याः ॥ ५८९ ॥

**गुरुगा बंभावाए, आयाए चेव दंसणे लहुगा ।**
**आणादिणो विराहण, भवंति एक्केकगपयाओ ॥ ५९० ॥**

'ब्रह्मापाये' ब्रह्मप्रत्यवाये 'आत्मनि चैव' आत्मप्रत्यपाये 'गुरुकाः' चत्वारो गुरवः । 'दर्शने' दर्शनप्रत्यपाये चत्वारो लघवः । 'आज्ञादयश्च' आज्ञाभङ्गादयो विराधना एकैकपदाद् भवन्ति ज्ञातव्याः, द्विविधकरणोपघातादिषु सर्वेष्वपि पदेषु यथायोगमाज्ञाभङ्गादयो विराधनाः सप्रायश्चित्ता योजनीया इत्यर्थः ॥ ५९० ॥

अथ के ब्रह्मप्रत्यवाया आत्मप्रत्यवाया दर्शनप्रत्यवाया वा ? तत आह—

**तिरिय-मणुइत्थियातो, बंभावातो उ तिविह पडिमातो ।**
**अहिबिल-चलंतकुड्डादि एवमादी उ आयाए ॥ ५९१ ॥**
**आगाढमिच्छदिट्ठी, सव्वातिहि मरुग बहुजणट्ठाणा ।**
**पासंडा य बहुविहा, एसा खलु दंसणावाया ॥ ५९२ ॥**

यत्र तिर्यक्स्त्रियो मनुष्यस्त्रियो वा यदि वा यत्र 'त्रिविधाः प्रतिमाः' तिर्यक्स्त्रीप्रतिमा मनुष्यस्त्रीप्रतिमा देवस्त्रीप्रतिमा वा सा 'ब्रह्मापाया' ब्रह्मप्रत्यपाया, तस्यां स्थितानां ब्रह्मव्रतविनाशसम्भवात् । यत्र पुनरहिबिलानि चलन्ति—चलानि कुड्यानि आदिशब्दाद् जलवेलीधारणादिपरिग्रहः, एवमादिका 'आत्मनि' आत्मप्रत्यवाया ॥ ५९१ ॥

तथा यत्राऽऽगाढमिथ्यादृष्टिः, यत्र च सर्वेऽतिथयः समागच्छन्ति सत्रमित्यर्थः, यत्र 'मरुकाः' बटुकास्तिष्ठन्ति चट्टशाला इति भावः, यत्र बहूनामागन्तुकानां जनानां स्थानं देशिककुटीत्यर्थः, यत्र च बहुविधाः पाषण्डाः, एषा एवंरूपा वसतिः खलु 'दर्शनापाया' दर्शनप्रत्यपाया ॥ ५९२ ॥ सम्प्रति शय्याविधिद्वारमाह—

**कालातिकंतोवट्ठाण अभिकंत अणभिकंता य ।**

---

१ लघवः भा० ॥

**वज्जा य महावज्जा, सावज्ज महऽप्पकिरिया य ॥ ५९३ ॥**

शय्या नवप्रकारा भवन्ति, तद्यथा—कालातिक्रान्ता १ उपस्थापना २ अभिक्रान्ता ३ अनभिक्रान्ता ४ वर्ज्या ५ महावर्ज्या ६ सावद्या ७ महासावद्या ८ अल्पक्रिया ९ च ॥ ५९३ ॥

तत्र कालातिक्रान्तादिषु प्रायश्चित्तविधिमाह—

**कालातीते लहुगो, चउरो लहुगा य चउसु ठाणेसु ।**
**गुरुगा तिसु जमलपया, अप्पकिरियाए सुद्धो उ ॥ ५९४ ॥**

ऋतुबद्धे काले कालातिक्रान्तं तिष्ठति मासलघु, वर्षाकाले चत्वारो लघवः । 'चतुर्षु स्थानेषु' उपस्थापनायामभिक्रान्तायामनभिक्रान्तायां वर्ज्यायां चेत्यर्थः तिष्ठतः प्रत्येकं चत्वारो लघुकाः । तथा 'त्रिषु' स्थानेषु महावर्ज्यायां सावद्यायां महासावद्यायां चेत्यर्थः प्रत्येकं चत्वारो गुरवः, परं तपः-कालविशेषिताः । तद्यथा—महावर्ज्यायां चत्वारो गुरुकाः अतपोगुरवः, सावद्यायां तपोगुरवः, महासावद्यायां तपसा कालेन च गुरवः । "जमलपया" इति तपः-कालयोः संज्ञा, ततोऽयमर्थः—त्रिषु स्थानेषु गुरुकाः 'यमलपदाः' यमलपदवन्तस्तपः-कालविशेषिता द्रष्टव्याः । अल्पक्रियायां तु तिष्ठन् शुद्धः ॥ ५९४ ॥

साम्प्रतमेतासामेव कालातिक्रान्तादीनां व्याख्यानमभिधित्सुराह—

**उउ-वासा समतीता, कालातीया उ सा भवे सेज्जा ।**
**स चेव उवट्ठाणा, दुगुणा दुगुणं अवज्जेत्ता ॥ ५९५ ॥**

ऋतुबद्धे काले वर्षाकाले च यत्र स्थितास्तस्यामृतुबद्धे काले मासे पूर्णे वर्षाकाले चतुर्मासे पूर्णे यत् तिष्ठति सा कालातिक्रान्ता वसतिः । "सच्चेव" इत्यादि । या कालमर्यादाऽनन्तरमुक्ता 'ऋतुबद्धे मासो वर्षासु चत्वारो मासाः' इति तामेव द्विगुणां द्विगुणामवर्जयित्वा यत्र भूयः समागत्य तिष्ठन्ति सा उपस्थाना । किमुक्तं भवति ?—ऋतुबद्धे काले द्वौ मासौ वर्षास्वष्टमासान् अपरिहृत्य यदि पुनरागच्छति तस्यां वसतौ ततः सा उपस्थाना भवति, उप—सामीप्येन स्थानम्—अवस्थानं यस्यां सा उपस्थानेति व्युत्पत्तेः । अन्ये पुनरिदमाचक्षते—यस्यां वसतौ वर्षावासं स्थितास्तस्यां द्वौ वर्षारात्रावन्यत्र कृत्वा यदि समागच्छन्ति ततः सा उपस्थाना न भवति अर्वाक् तिष्ठतां पुनरुपस्थापना ॥ ५९५ ॥

**जावंतिया उ सेज्जा, अन्नेहिँ निसेविया अभिकंता ।**
**अन्नेहि अपरिभुत्ता, अनभिकंता उ पविसंते ॥ ५९६ ॥**

या शय्या आचण्डालेभ्यो यावन्तिकी सा यदाऽन्यैश्चरकादिभिः पाषण्डस्थैर्गृहस्थैर्वा निषेविता पश्चात् संयतास्तिष्ठन्ति सा अभिक्रान्ता । सैव यावन्तिकी अन्यैः पाषण्डस्थैर्गृहस्थैर्वा अपरिभुक्ता तस्यां यदि संयताः प्रविशन्ति ततः साऽनभिक्रान्ता ॥ ५९६ ॥

**अत्तट्ठकडं दाउं, जतीण अन्नं करेंति वज्जा उ ।**
**जम्हा तं पुव्वकयं, वज्जंति ततो भवे वज्जा ॥ ५९७ ॥**

आत्मार्थकृतां वसतिं यतिभ्यो दत्त्वा पुनरन्यामात्मार्थं कुर्वन्ति यदि ततः सा यतिदत्ता वर्ज्या भवति । कया व्युत्पत्त्या ? इत्यत आह—यस्मात् तां पूर्वकृतां वसतिं गृहस्था वर्जयन्ति,

यतिभ्यः किल दत्तत्वात् । ततो वर्ज्यत इति वर्ज्या भवति सा पूर्वकृतेति ॥ ५९७ ॥

**पासंडकारणा खलु, आरंभो अभिणवो महावज्जा ।**
**समणट्ठा सावज्जा, महसावज्जा उ साहूणं ॥ ५९८ ॥**

यत्र बहूनां श्रमण-ब्राह्मणप्रभृतीनां पाषण्डानां कारणात्–कारणेन खल्वारम्भोऽभिनवः क्रियते सा महावर्ज्या । 'श्रमणार्थी' पञ्चानां श्रमणानामर्थाय कृता सावद्या । या पुनरमीषामेव साधूनामर्थाय कृता सा महासावद्या ॥ ५९८ ॥

**जा खलु जहुत्तदोसेहिँ वज्जिया कारिया सअट्ठाए ।**
**परिकम्मविप्पमुक्का, सा वसही अप्पकिरिया उ ॥ ५९९ ॥**

या पुनः 'यथोक्तदोषैः' कालातिक्रान्तादिलक्षणैर्वर्जिता केवलं स्वस्य–आत्मनोऽर्थाय कारिता परिकर्मणा च विप्रमुक्ता सर्वस्यापि परिकर्मणः स्वत एवाग्रे प्रवर्त्तितत्वात् सा वसतिरल्पक्रिया वेदितव्या ॥ ५९९ ॥ सम्प्रति यतनां दर्शयितुकाम इदमाह—

**हिट्ठिल्ला उवरिल्लाहि बाहिया न उ लभंति पाहन्नं ।**
**पुव्वाणुन्नाऽभिणवं, च चउसु भय पच्छिमाऽभिणवा ॥ ६०० ॥**

अधस्तन्य उपरितनीभिर्बाध्यन्ते, बाधिताश्च सत्यः 'न तु' नैव लभन्ते प्राधान्यम् । इयमत्र भावना—नवापि वसतयः क्रमेण स्थाप्यन्ते, तत्राप्यल्पक्रिया निर्दोषेति प्रथमम् । तद्यथा– अल्पक्रिया कालातिक्रान्ता उपस्थाना अभिक्रान्ता अनभिक्रान्ता वर्ज्या महावर्ज्या सावद्या महासावद्या च । अत्राधस्तनी अल्पक्रिया, अस्यां यद्यतिरिक्तं कालं तिष्ठति ततः सा कालातिक्रान्तया बाध्यते, सा कालातिक्रान्ता भवतीति भावः । कालातिक्रान्तामपि यदि प्रागभिहितस्वरूपां कालमर्यादां द्विगुणां द्विगुणामपरिहृत्योपागच्छन्ति ततः सा उपस्थानया बाध्यते, उपस्थाना सा भवतीति भावः । एवं यथासम्भवमुपयुज्य वक्तव्यम् । "पुव्वाणुन्न"त्ति आसां च नवानां शय्यानां मध्ये पूर्वस्याः पूर्वस्याः अनुज्ञा वेदितव्या । किमुक्तं भवति ?—नवानां शय्यानां मध्ये या पूर्वा अल्पक्रिया सा तावत् प्रथममनुज्ञाता, लेशतोऽपि सावद्याभावात्; तस्या अभावे शेषाणां मध्ये कालातिक्रान्ता पूर्वा सा अनुज्ञाता, अल्पक्रियाया अलाभे सा आश्रयणीया इति भावः; तस्या अप्यलाभे शेषाणां पूर्वा उपस्थाना सा अनुज्ञाता; एवं या या पूर्वा सा सा अनुज्ञाता तावद् वक्तव्या यावत् सावद्या महासावद्यायाः पूर्वा सा अनुज्ञाता । एवं पूर्वस्याः पूर्वस्याः अलाभे उत्तरस्या उत्तरस्या अनुज्ञा वेदितव्या । "अभिणवं च चउसु भय"त्ति चतसृषु वसतिषु अभिनवेति दोषः सम्बध्यते अभिनवं दोषं 'भज' विकल्पय, कदाचिद् भवति कदाचिन्न भवतीति जानीहीत्यर्थः । अत्रापीयं भावना—अनभिक्रान्तायामपरिभुक्तेति कृत्वा चिरकृतायामप्यभिनवदोषो भवति, वर्ज्यादिषु पुनर्याः परिभुक्तास्तासु नाभिनवदोषः, एषा भजना । "पच्छिमाऽभिनव"त्ति पश्चिमो नाम महासावद्योपाश्रयः तस्मिन्नभिनवकृते वा चिरकृते वा परिभुक्ते वा अपरिभुक्ते वा अभिनवदोषा भवन्ति, एकपक्षनिर्धारणात् । एतैर्मूलगुणादि(ग्रन्थाग्रम्—४५००)दोषैर्यः परिहर्तुं जानाति स ग्रहणे कल्पिकः ॥ ६०० ॥

कथं पुनर्जानाति परिहर्तुम्? इति चेद् अत आह—

**उग्गम-उप्पायण-एसणाहिँ सुद्धं गवेसए वसहिं ।**
**तिविहं तीहिँ विसुद्धं, परिहर नवगेण भेदेणं ॥ ६०१ ॥**

उद्गमेनोत्पादनया एषणया शुद्धां वसतिं गवेषयति । तत्र त्रयाणां पदानामष्टौ भङ्गाः । तेषु च उपरितनेषु सप्तसु भङ्गेष्वशुद्धां परिहर्तुं यो जानाति स ग्रहणे कल्पिकः । कथम्भूतां वसतिमुद्गमादिशुद्धां गवेषयति? इत्यत आह—'त्रिविधां' खातादिभेदतस्त्रिप्रकारां तथा 'त्रिभिः' मनसा वाचा कायेन च विशुद्धां गवेषयति । तथा खातादीस्त्रिस्रोऽपि वसतीरुद्गमाद्यशुद्धा नवकेन भेदेन परिहरति । तद्यथा—मनसा न गृह्णाति नापि ग्राहयति नापि गृह्णन्तमनुजानीते, एवं वाचा कायेन च वक्तव्यमिति ॥ ६०१ ॥

**पढिय सुय गुणियमगुणिय, धारमधार उवउत्तो परिहरति ।**
**आलोयणमायरिए, आयरिओ विसोहिकारो से ॥ ६०२ ॥**

अस्या व्याख्या प्राग्वत् (गाथा ५३०) ॥ ६०२ ॥

उक्तः शय्याकल्पिकः । सम्प्रति वस्त्रकल्पिकमभिधित्सुराह—

**नामं ठवणा वत्थं, दव्वे भावे य होइ नायव्वं ।**
**एसो खलु वत्थस्स उ, निक्खेवो चउविहो होइ ॥ ६०३ ॥**

वस्त्रं खलु चतुर्विधम् । तद्यथा—नामवस्त्रं स्थापनावस्त्रं द्रव्यवस्त्रं भाववस्त्रं च । एष खलु वस्त्रस्य निक्षेपश्चतुर्विधो भवति ॥ ६०३ ॥ तत्र नाम-स्थापने प्रतीते, द्रव्यवस्त्रमाह—

**दव्वे तिविहं एगिंदि-विगल-पंचेंदिएहिँ निप्फन्नं ।**
**सीलंगाइँ भावे, दव्वे पगयं तदट्ठाए ॥ ६०४ ॥**

द्रव्यवस्त्रं त्रिविधम् । तद्यथा—एकेन्द्रियनिष्पन्नं विकलेन्द्रियनिष्पन्नं पञ्चेन्द्रियनिष्पन्नं च । तत्रैकेन्द्रियनिष्पन्नं कार्पासिकादि, विकलेन्द्रियनिष्पन्नं कौशेयकादि, पञ्चेन्द्रियनिष्पन्नमौर्णिककौट्टिकादि । 'भावे' भाववस्त्रमष्टादश शीलाङ्गसहस्राणि ।

अथ कान्यष्टादश शीलाङ्गसहस्राणि? इति चेद् उच्यते—

**अष्टादश शीलाङ्ग-सहस्राणि**

करणे जोगे सण्णा, इंदिय भोमादि समणधम्मे य ।
सीलंगसहस्साणं, एताउ भवे समुप्पत्ती ॥

अस्या अक्षरगमनिका—करणं त्रिविधम्, तद्यथा—करणं कारापणमनुमोदनं च । त्रिविधो योगः—मनोयोगो वाग्योगः काययोगश्च । संज्ञाश्चतस्रः, तद्यथा—आहारसंज्ञा भयसंज्ञा मैथुनसंज्ञा परिग्रहसंज्ञा च । इन्द्रियाणि पञ्च, तद्यथा—श्रोत्रेन्द्रियं चक्षुरिन्द्रियं घ्राणेन्द्रियं जिह्वेन्द्रियं स्पर्शनेन्द्रियं च । 'भोमादि'त्ति भौमः पृथिवीकायविषयः समारम्भः, आदिशब्दादप्कायसमारम्भस्तेजःकायसमारम्भो वायुकायसमारम्भो वनस्पतिकायसमारम्भो द्वीन्द्रियसमारम्भस्त्रीन्द्रियसमारम्भश्चतुरिन्द्रियसमारम्भः पञ्चेन्द्रियसमारम्भोऽजीवकायसमारम्भश्च । श्रम-

---

१ वत्थस्सा नि° ता० ॥ २ दुविध पगतं ता० ॥

णधर्मोऽपि दशधा—क्षान्तिर्मार्दवमार्जवमलोभता तपः सत्यं संयमस्त्यागोऽकिञ्चनता ब्रह्मचर्यं च । एतैः स्थानैरष्टादशानां शीलाङ्गसहस्राणामुत्पत्तिः ॥ तद्यथा—

न करेइ सयं साहूँ, मणसा आहारसन्नउवउत्तो ।
सोइंदियसंवरणो, पुढविजिए खंतिसंपन्नो ॥
न करेइ सयं साहू, मणसा आहारसन्नउवउत्तो ।
सोइंदियसंवरणो, पुढविजिए मद्दवपवन्नो ॥

एवं तावद् वक्तव्यं यावद्दशम्यां गाथायां "बंभचेरगए" इति । एते दश भङ्गाः पृथिवीकायसमारम्भपरिहारेण लब्धाः, एवमप्कायादिपरिहारेणापि प्रत्येकं दश दश लभ्यन्ते इति सर्वसङ्कलनया जातं शतम् । एतच्च श्रोत्रेन्द्रियेण लब्धम्, एवं शेषैरपीन्द्रियैः प्रत्येकं शतं शतं लभ्यते इति जातानि पञ्च शतानि । एतानि चाहारसंज्ञोपयुक्तेन लब्धानि, एवं शेषाभिरपि संज्ञाभिः प्रत्येकं पञ्च शतानीति सर्वसङ्ख्यया जाते द्वे सहस्रे । एते च 'न करोति' इत्यनेन पदेन लब्धे, एवं "न कारवेइ" इत्यनेन "नो अणुमन्नइ" इत्यनेन च प्रत्येकं लभ्य(भ्ये)ते इति सर्वमीलने जातानि षट् सहस्राणि । [ए]तानि लब्धानि मनोयोगेन, एवं वाग्योगेन काययोगेनापीति सर्वसङ्ख्यया जातान्यष्टादश सहस्राणि ॥

एतैरष्टादशभिः शीलाङ्गसहस्रैर्नित्यप्रावृता साधवोऽवतिष्ठन्ते तत एतानि भाववस्त्रम् । "दव्वे पगय"मित्यादि । अत्र द्रव्यवस्त्रेणाधिकारः, यतस्तद् द्रव्यवस्त्रं 'तदर्थाय' भाववस्त्राय भवति, भाववस्त्रस्योपग्रहं करोतीत्यर्थः । ततः प्रकृतमत्र द्रव्यवस्त्रेण ॥ ६०४ ॥

**पुणरवि दव्वे तिविहं, जहण्णगं मज्झिमं च उक्कोसं ।**
**एक्केक्कं तत्थ तिहा, अहाकड-ऽप्पं-सपरिकम्मं ॥ ६०५ ॥**

यद् द्रव्यवस्त्रमेकेन्द्रियादिनिष्पन्नतया त्रिविधमुक्तं तत् पुनरपि प्रत्येकं त्रिधा, तद्यथा—जघन्यं मध्यममुत्कृष्टं च । तत्र कार्पासिकं जघन्यं मुखपोतिकादि, मध्यमं पटलकादि, उत्कृष्टं कल्पादि । एवं शेषे अपि कौशेयकादिके यथायोगं भावनीये । एतेषामेकैकं 'त्रिधा' त्रिप्रकारम्, तद्यथा—यथाकृतमल्पपरिकर्म सपरिकर्म च ॥ ६०५ ॥

एषामुत्पादने यथोक्तविध्यकरणे प्रायश्चित्तमाह—

**चाउम्मासुक्कोसे, मासिय मज्झे य पंच य जहन्ने ।**
**वोच्चत्थगहण-करणे, तत्थ वि सट्ठाणपच्छित्तं ॥ ६०६ ॥**

'उत्कृष्टे' उत्कृष्टवस्त्रविषये विपर्यस्तग्रहणे—विपर्यासेन ग्रहणे प्रायश्चित्तं चतुर्मासम्, मध्यमे मासिकम्, जघन्ये पञ्च रात्रिन्दिवानि । इयमत्र भावना—उत्कृष्टस्य यथाकृतस्य वस्त्रस्योत्पादनाय निर्गतस्तस्य विषये योगमकृत्वा यदल्पपरिकर्मोत्कृष्टं गृह्णाति तदा तस्य प्रायश्चित्तं चतुर्लघु, यदा किल यथाकृतं योगे कृतेऽपि न लभ्यते तदाऽल्पपरिकर्म ग्रहीतव्यम् नान्यदा, अत्र तु विपर्यय इत्युक्तरूपं प्रायश्चित्तम् । अथोत्कृष्टमेव सपरिकर्म गृह्णाति तदाऽपि चतुर्लघु । अथ यथाकृतमुत्कृष्टं वस्त्रं कृतेऽपि योगे न लब्धं तत उत्कृष्टस्याल्पपरिकर्मणो मार्गणं कर्त्त-

न्यमेव । तत्करणाय निर्गतस्तस्य योगमकृत्वा सपरिकर्मोत्कृष्टं वस्त्रमाददानस्य चतुर्लघु । एवमुत्कृष्टविषये त्रीणि चतुर्लघुकानि । तथा मध्यमस्य यथाकृतस्य वस्त्रस्योत्पादनाय निर्गतस्तस्य योगमकृत्वाऽल्पपरिकर्म मध्यमं गृह्णाति मासलघु । अथ सपरिकर्म मध्यमं गृह्णाति तदाऽपि मासलघु । "यदा यथाकृतं न लभ्यते तदाऽल्पपरिकर्म मध्यमं याचनीयम्" इति वचनतो यथाकृतस्य योगे कृतेऽप्यलाभेऽल्पपरिकर्मण उत्पादनाय निर्गतस्तस्य विषये योगमकृत्वा यदि सपरिकर्म मध्यमं गृह्णाति तदाऽपि मासलघु । एवं मध्यमविषये त्रीणि मासिकानि । तथा जघन्यस्य यथाकृतस्योत्पादनाय निर्गतस्तस्य योगमकृत्वाऽल्पपरिकर्म जघन्यं गृह्णाति तदा रात्रिन्दिवपञ्चकम् । अथ सपरिकर्म जघन्यमाददाति तदाऽपि पञ्चकम् । यदा तु योगे कृतेऽपि यथाकृतं न लभ्यते तदाऽल्पपरिकर्म मार्गयितव्यमिति तस्योत्पादनाय निर्गतस्तद्विषये योगमकृत्वा सपरिकर्म गृह्णानस्य पञ्चकम् । एवं जघन्यविषये त्रीणि पञ्चकानि । एतच्च प्रायश्चित्तमविकृतविषये योगाकरणे । योगे तु कृते लाभाभावतस्तथाग्रहणेऽपि दोषाभावः । तथाहि—यथाकृतस्य निर्गतः तच्च योगे कृतेऽपि न लब्धं ततोऽल्पपरिकर्मापि गृह्णानः शुद्धः । अल्पपरिकर्मणो वा निर्गतस्तद्योगे कृतेऽप्यलभमानः सपरिकर्म गृह्णन् शुद्धः । न केवलमेतद् विपर्यस्तग्रहणे प्रायश्चित्तं किन्तूत्कृष्टादिविपर्यस्तग्रहणे स्वस्थानमपि । तद्यथा—उत्कृष्टस्योत्पादनाय निर्गतो मध्यमं गृह्णाति मासिकम्, जघन्यं गृह्णाति रात्रिन्दिवपञ्चकम्; मध्यमस्य निर्गत उत्कृष्टं गृह्णाति चतुर्लघु, जघन्यं गृह्णाति पञ्चकम्; जघन्यस्य निर्गत उत्कृष्टं गृह्णाति चतुर्लघु, मध्यमं गृह्णाति मासलघु; सर्वत्र चाऽऽज्ञादयो दोषाः । तदेवं ग्रहणे प्रायश्चित्तस्वस्थानमुक्तम् । एवं 'करणेऽपि' उत्कृष्टादिकरणेऽपि स्वस्थानप्रायश्चित्तमवसातव्यम् । तद्यथा—उत्कृष्टं वस्त्रं छित्त्वा सीवित्वा च मध्यमकं करोति मासलघु, जघन्यं करोति रात्रिन्दिवपञ्चकम्; मध्यमं छित्त्वा सीवित्वा वा उत्कृष्टं करोति चतुर्लघु, जघन्यं करोति रात्रिन्दिवपञ्चकम्; जघन्यं छित्त्वा सीवित्वा वा उत्कृष्टं करोति चतुर्लघु, मध्यमं करोति मासिकम् । यत एवं स्वस्थानप्रायश्चित्तं ततो विपर्यस्तग्रहण-करणे न विधेये ॥ ६०६ ॥ ग्रन्थाग्रम्—४६०० ॥

**[ ॥ एतदन्तं पीठिकावृत्तिः श्रीमलयगिरिचरणैः सूत्रितेति भद्रम् ॥ ]**

॥ अर्हम् ॥

# आचार्यश्रीक्षेमकीर्त्तिसूरिभिरनुसन्धिता

# पीठिकावृत्तिः ।

॥ [1]ॐनमः सर्वज्ञाय ॥

नतमघवमौलिमण्डलमणिमुकुटमयूखधौतपदकमलम् ।
सर्वज्ञममृतवाचं, श्रीवीरं नौमि जिनराजम् ॥ १ ॥
चरमचतुर्दशपूर्वी, कृतपूर्वी कल्पनामकाध्ययनम् ।
सुविहितहितैकरसिको, जयति श्रीभद्रबाहुगुरुः ॥ २ ॥
कल्पेऽनल्पमनर्घं, प्रतिपदमर्पयति योऽर्थनिकुरुम्बम् ।
श्रीसङ्घदासगणये, चिन्तामणये नमस्तस्मै ॥ ३ ॥
शिवपदपुरपथकल्पं, कल्पं विषममपि दुःषमारात्रौ ।
सुगमीकरोति यच्चूर्णिदीपिका स जयति यतीन्द्रः ॥ ४ ॥
आगमदुर्गमपदसंशयादितापो विलीयते विदुषाम् ।
यद्वचनचन्दनरसैर्मलयगिरिः स जयति यथार्थः ॥ ५ ॥
श्रुतलोचनमुपनीय, व्यपनीय ममापि जडिमजन्मान्ध्यम् ।
यैरदर्शि शिवमार्गः, स्वगुरूनपि तानहं वन्दे ॥ ६ ॥
ऋजुपदपद्धतिरचनां, बालशिरःशेखरोऽप्यहं कुर्वे ।
यस्याः प्रसादवशतः, श्रुतदेवी साऽस्तु मे वरदा ॥ ७ ॥
श्रीमलयगिरिप्रभवो, यां कर्तुमुपाक्रमन्त मतिमन्तः ।
सा कल्पशास्त्रटीका, मयाऽनुसन्धीयतेऽल्पधिया ॥ ८ ॥

इह श्रीमद्आवश्यकादिसिद्धान्तप्रतिबद्धनिर्युक्तिशास्त्रसंसूत्रणसूत्रधारः परोपकारकरणैकदीक्षादीक्षितः सुगृहीतनामधेयः श्रीभद्रबाहुस्वामी सकर्णकर्णपुटपीयमानपीयूषायमान(२)ललितपदकलितपेशलालापकं साधु-साध्वीगतकल्प्या-ऽकल्प्यपदार्थसार्थविधि-प्रतिषेधप्ररूपकं यथायोगमुत्सर्गा-ऽपवादपदपदवीसूत्रकवचनरचनागर्भं[3] परस्परमनुस्यूताभिसम्बन्धबन्धुरपूर्वापरसूत्रसन्दर्भं प्रत्याख्यानाख्यनवमपूर्वान्तर्गताऽऽचारनामकतृतीयवस्तुरहस्यनिष्पन्नकल्पं कल्पनामधेयमध्ययनं निर्युक्तियुक्तं निर्यूढवान् । अस्य च स्वल्पग्रन्थमहार्थतया प्रतिसमयमपसर्पदवसर्पिणीपरिणतिपरिहीयमानमति-मेधा-धारणादिगुणग्रामाणामैदंयुगीनसाधूनां दुरवबोधतया च सकलत्रिलोकीसुभगङ्करणक्षमाश्रमणनामधेयाभिधेयैः श्रीसङ्घदासगणिपूज्यैः प्रतिपदप्रकटितसर्वज्ञाज्ञाविराधनासमुद्भूतप्रभूतप्रत्यपायजालं निपुणचरण-करणपरिपालनोपायगोचरविचार-

१ नमः श्रीसर्वज्ञाय डे० ले० त०। ॐनमः श्रीसर्वज्ञाय कां० ॥ २ °पीयूषोपमान° के० ॥
३ °सूचकवचन° भा० ॥

वाचाकं सर्वथादूषणकरणेनाप्यदूष्यं भाष्यं विरचयाञ्चक्रे। इदमप्यतिगम्भीरतया मन्दमेधसां दुरवगममवगम्य यद्यप्यनुपकृतपरोपकृतिकृता चूर्णिकृता चूर्णिरासूत्रिता तथापि सा निबिडजडिमजम्बालजालजटालानामस्मादृशां जन्तूनां न तथाविधमवबोधनिबन्धनमुपजायत इति परिभाव्य शब्दानुशासनादिविश्वविद्यामयज्योतिःपुञ्जपरमाणुघटितमूर्त्तिभिः श्रीमलयगिरि[1]मुनीन्द्रर्षिपादैर्विवरणकरणमुपचक्रमे । तदपि कुतोऽपि हेतोरिदानीं परिपूर्णं नावलोक्यत इति परिभाव्य मन्दमतिमौलिमणिनाऽपि मया गुरूपदेशं निश्रीकृत्य श्रीमलयगिरिविरचितविवरणादूर्द्धं विवरीतुमारभ्यते । कृतं विस्तरेण, प्रकृतं प्रस्तूयते—

इहायं कल्प-व्यवहारयोरनुयोगः प्रक्रान्तः । स च कतिभिर्द्वारैः प्ररूपणीयः ? इति स्वरूपनिरूपणायामनुयोगवक्तव्यताप्रतिबद्धद्वारकलापसूचिका तावदियं[2] मूलगाथा—

निक्खेवेगट्ठ निरुत्ति विहि पवत्ती य केण वा कस्स ।
तद्दार भेय लक्खण, तयरिह परिसा य सुत्तत्थो ॥ (गाथा १४९)

अस्याश्च निक्षेपादीनि तदर्हपर्यन्तान्येकादश द्वाराणि व्याख्यातानि । सम्प्रति पर्षदिति द्वारमनुवर्त्तते । तत्र[3] चेदं द्वारश्लोकयुगलम्—

बहुस्सुए चिरपव्वइए, कप्पिए अ अचंचले ।
अवट्ठिए अ मेहावी, अपरिस्साई अ जे विऊ ॥ (गाथा ४००)
पत्ते य अणुन्नाए, भावओ परिणामगे ।
एयारिसे महाभागे, अणुओगं सोउमरिहइ ॥ (गाथा ४०१)

अत्र च बहुश्रुत-चिरप्रव्रजिते द्वारे व्याख्याते, कल्पिकद्वारं व्याख्यायमानमस्ति । सोऽपि कल्पिको द्वादशविधः, तद्यथा—

सुत्ते अत्थे तदुभय, उवट्ठ वीयार लेव पिंडे य ।
सिज्जा वत्थे पत्ते, उग्गहण विहारकप्पे य ॥ (गाथा ४०५)

तत्र सूत्रकल्पिकादयः शय्याकल्पिकान्ता भाविताः । साम्प्रतं वस्त्रकल्पिको भाव्यते । तत्रापि गाथाचतुष्टयं श्रीमलयगिरिणैव व्याख्यातम्, इतः प्रभृति विव्रियते । तत्र यदुक्तमनन्तरगाथायां "वोच्चत्थगहण-करणे, तत्थ वि सट्ठाणपच्छित्तं"ति तदेतद्[4] भावयति—

**जोगमकाउमहागडे, जो गिण्हइ दोन्नि तेसु वा चरिमं ।**
**लहुगा उ तिन्नि मज्झम्मि मासिआ अंतिमे पंच ॥ ६०७ ॥**

'योगं' व्यापारमुद्यममकृत्वा 'यथाकृते' यथाकृतवस्त्रविषयं यः साधुः[6] 'द्वे' अल्पपरिकर्मसपरिकर्मणी गृह्णाति । तद्यथा—यथाकृतस्यार्थाय निर्गतस्तस्य योगमकृत्वा प्रथममेवाल्पपरिकर्म सपरिकर्म वा गृह्णाति । यथाकृतालाभे वा अल्पपरिकर्मणो योगमकृत्वा प्रथमत एव 'तयोः' अल्पपरिकर्म-सपरिकर्मणोर्मध्ये 'चरमम्' अन्त्यं सपरिकर्म गृह्णाति । तस्यैतेषु त्रिषु स्थानेषूत्कृष्ट-मध्यम-जघन्यान्यधिकृत्य यथाक्रमं प्रायश्चित्तम् । तद्यथा—उत्कृष्टे त्रिषु स्थानकेषु

१ °मुनीन्द्रपादैः मो० त० कां० ॥ २ °बद्धा तावदियं भा० छे० कां० ॥ ३ अत्र डे० त० ॥ ४ तदेव भाव° डे० त० ॥ ५ °गडे जो ता० ॥ ६ साधुः "दुन्नि" त्ति द्वे भा० ॥

त्रयश्चतुर्लघवः, मध्यमे त्रीणि मासिकानि, 'अन्तिमे' जघन्ये त्रीणि पञ्चरात्रिन्दिवानि । अत्र च भावना पूर्वगाथायां कृतेति न भूयो भाव्यते ॥ ६०७ ॥ उक्तं यथाकृतादिविपर्यासग्रहणे प्रायश्चित्तम् । सम्प्रत्युत्कृष्टादिविषये विपर्यासेन ग्रहणे करणे च तदाह—

**एगयरनिग्गओ वा, अन्नं गिण्हिज्ज तत्थ सट्ठाणं ।**
**छित्तूण सिव्विऊण व, जं कुणइ तगं न जं छिंदे ॥ ६०८ ॥**

जघन्यादीनामेकतरस्यार्थाय निर्गतो वाशब्दो वैपरीत्यस्य प्रकारान्तरद्योतने 'अन्यत्' येन न प्रयोजनं तद् गृह्णीयात् तत्र स्वस्थानप्रायश्चित्तम् । तद्यथा—उत्कृष्टस्य निर्गतो मध्यमं गृह्णाति मासिकम्, जघन्यं गृह्णाति पञ्चकम्; मध्यमस्य निर्गत उत्कृष्टं गृह्णाति चतुर्लघु, जघन्यं गृह्णाति पञ्चकम्; जघन्यस्य निर्गत उत्कृष्टं गृह्णाति चतुर्लघु, मध्यमं गृह्णाति मासलघु; तथाऽऽज्ञाभङ्गादयश्च दोषाः । यत् तेन विवक्षितवस्त्रेण कार्यं तस्यान्येनाप्रतिपूरणम् । जघन्येन प्रयोजने समापतिते मध्यमोत्कृष्टयोर्गृह्यमाणयोरतिरिक्तोपकरणदोषः । तथोत्कृष्टादिकं छित्त्वा सीवित्वा वा यद् मध्यमादिकं करोति "तगं"ति तन्निष्पन्नं प्रायश्चित्तम्, न पुनर्यच्छिनत्ति तन्निष्पन्नम् । तथाहि—उत्कृष्टं छित्त्वा मध्यमं करोति मासलघु, जघन्यं करोति पञ्चकम्; मध्यमं छित्त्वा सीवित्वा चोत्कृष्टं करोति चतुर्लघु, जघन्यं करोति पञ्चकम्; जघन्यं सीवित्वा उत्कृष्टं करोति चतुर्लघु, मध्यमं करोति मासलघु इति । एवं यत् करोति तन्निष्पन्नमेव प्रायश्चित्तमापद्यते, न पुनश्छिद्यमान-सीव्यमानवस्त्रनिष्पन्नम् । अत्राप्याज्ञाभङ्गादयो दोषा द्रष्टव्याः । नवरं विराधना द्विधा—संयमविराधना आत्मविराधना च । संयमविराधना वस्त्रे छिद्यमाने सीव्यमाने वा तद्गताः षट्पदिकादयो विनाशमापद्यन्ते । आत्मविराधना हस्तोपघातादिका । तथा यावद् वस्त्रं छिद्यते सीव्यते वा तावत् सूत्रा-ऽर्थपरिमन्थ इत्यादयो दोषा अभ्यूह्य वक्तव्याः । यत एवं दोषजालमुपढौकते ततः कारणाभावे छेदन-सीवनादि न कर्त्तव्यम् । कारणे तु यतनया कुर्वाणः शुद्धः ॥ ६०८ ॥ अथ वस्त्रस्य गवेषणे कति प्रतिमा गच्छवासिनाम्? कति गच्छनिर्गतानाम्? इत्यत आह—

**उद्दिसिय पेह अंतर, उज्झियधम्मे चउत्थए होइ ।**
**चउपडिमा गच्छ जिणे, दोण्हऽग्गहऽभिग्गहऽन्नयरा ॥ ६०९ ॥**

इह यद् वस्त्रं गुरुसमक्षम् 'उद्दिष्टं' प्रतिज्ञातं यथा 'अमुकं जघन्यं मध्यममुत्कृष्टं वा आनेष्ये' तदेव गृहिभ्यो याचमानस्योद्दिष्टवस्त्रमिति प्रथमा प्रतिमा । तथा "पेह"त्ति प्रेक्षा—अवलोकनं तत्पुरस्सरं यद् वस्त्रं याच्यते तत् प्रेक्षावस्त्रम् । तथाऽभिनवं वस्त्रयुगलं परिधाय

---

१ °यानि । भावना तु पूर्वगाथायां कृतैवेति न भा० ॥ २ मध्यमानि छित्त्वा भा० विना ॥ ३ जघन्यानि सीवित्वा भा० विना ॥ ४ इत्येतदभिधित्सुराह भा० ॥ ५ "उद्दिसिय"त्ति उद्दिष्टवस्त्रम् । इयमत्र भावना—यद् वस्त्रमदृष्ट्वैव याच्यमानं 'प्रयोजनमस्माकममुकेन सौत्रिकेणौर्णिकेनापरेण वा' इत्याद्युल्लेखेन साधुभिर्गृहस्थस्य पुरत उद्दिश्यते-अभिधीयते तदुद्दिष्टम् । तथा "पेह"त्ति प्रेक्षणं प्रेक्षा विलोकनं निरीक्षितमिति पर्यायाः, प्रेक्षापुरस्सरं यद् वस्त्रं याच्यते भा० ॥

प्रावृत्य च पुराणं स्थापयितुकामो न तावदद्यापि स्थापयति इत्यत्र अन्तरा—अपान्तराले यद् याच्यते तदन्तरावस्त्रम् । तथा उज्झनम्—उज्झितं परित्याग इत्यर्थः, धर्मशब्दश्च यद्यपि

"धर्मो यमोपमा-पुण्य-स्वभावा-ऽऽचार-धन्वसु ॥ (हैमाने० द्विस० ३२५)
सत्सङ्गेऽर्हत्यहिंसादौ, न्यायोपनिषदोरपि ।" (हैमाने० द्विस० ३२६)

इति वचनादनेकेष्वर्थेषु रूढः तथाऽपीह प्रक्रमात् स्वभावार्थो द्रष्टव्यः, तत उज्झितमेव धर्मः—स्वभावो यस्य तदुज्झितधर्मं परित्यागार्हमित्यर्थः । एतच्च वस्त्रैषणासूत्रकमप्रामाण्यात् चतुर्थमेव चतुर्थकं भवति । एताश्चतस्रः 'प्रतिमाः' प्रतिपत्तयो वस्त्रस्य ग्रहणप्रकारा इत्यर्थः, "गच्छ"त्ति सूचकत्वात् सूत्रस्य गच्छवासिनामेताश्चतस्रोऽपि भवन्ति । "जिणे"त्ति जिनकल्पिकानां चावग्रहीतं द्वयोरुपरितनयोः आङ्—मर्यादया ग्रहः—स्वीकार आग्रहः, द्वयोरेवोपरितनयोर्ग्रहणं नाधस्तनयोर्द्वयोरित्यर्थः । तत्राप्यन्यतरस्यामभिग्रहः, किमुक्तं भवति ?—यदा तृतीयस्यां ग्रहणं न तदा चतुर्थ्याम्, यदा चतुर्थ्यां न तदा तृतीयायामिति निर्युक्तिगाथासमासार्थः ॥ ६०९ ॥ अथैनामेव विवृणोति—

उद्दिट्ठ तिगेगयरं, पेहा पुण दट्ठु एरिसं भणइ ।
अन्न नियत्थऽत्थुरिए, इतरऽवणिंतो उ तइयाए ॥ ६१० ॥

'उद्दिष्टं' गुरुसमक्षं प्रतिज्ञातं यद् जघन्य-मध्यमोत्कृष्टलक्षणस्य त्रिकस्य एकेन्द्रिय-विकलेन्द्रिय-पञ्चेन्द्रियनिष्पन्नवस्त्रत्रिकस्य वा एकतरम्[3] तदेवाहष्टं सद् याच्यमानमुद्दिष्टमिति भाविता प्रथमा प्रतिमा । अथ द्वितीया भाव्यते—"पेहा पुण"त्ति प्रेक्षावस्त्रं पुनरिदम्, यथा—कोऽपि साधुः कस्याप्यगारिणः सत्कं वस्त्रं दृष्ट्वा भणति—'यादृशमेतद् वस्त्रं दृश्यते तादृशमिदमेव वा मे प्रयच्छ' इति भणन् तदेव वस्त्रं हस्तप्रान्तेन दर्शयति तत् प्रेक्षावस्त्रमिति द्वितीया प्रतिमा । सम्प्रति तृतीया भाव्यते—तस्याश्चान्तरीयोत्तरीयवस्त्रयुगलद्वारेण प्ररूपणा कर्त्तव्या । तथा च श्रीमदाचाराङ्गे द्वितीये श्रुतस्कन्धे प्रथमेऽध्ययने प्रथमोद्देशके सूत्रमिदम्—

अहावरा तच्चा पडिमा—से भिक्खू वा भिक्खुणी वा से जं पुण वत्थं जाणेज्जा, तंजहा—अंतरिज्जगं वा उत्तरिज्जगं वा ।

अथ किमिदमन्तरीयम् ? किं वा उत्तरीयम् ? उच्यते—अन्तरीयं नाम निवसनं परिधानमित्यर्थः, उत्तरीयं नाम प्रावरणं प्रच्छदपटीत्यर्थः; अथवाऽन्तरीयं यत् शय्यायामधस्तनं वस्त्रमास्तीर्यते, उत्तरीयं पुनर्यत् तदुपरि प्रस्तीर्यते । तस्मिन्नन्तरीयोत्तरीयवस्त्रयुगले 'अन्यस्मिन्' अभिनवे "नियत्थ"त्ति निवसिते परिहिते प्रावृते वेत्यर्थः । द्वितीयव्याख्यानापेक्षया शय्याया उपरि "अत्थुरिइ"त्ति आस्तीर्णे 'इतरत्' पुराणमन्तरीयोत्तरीययुगलम् 'अपनयन्' स्थापयितुमना इत्यत्रान्तरा यद् मार्ग्यते तदन्तरावस्त्रमिति तृतीया प्रतिमा ॥ ६१० ॥

---

१ इत्येव अन्त° मो० ॥ २ 'उद्दिष्टं' प्राग्निरूपितशब्दार्थम्, जघन्य° भा० ॥ ३ एकतरम-दृष्टमेव याच्य° भा० ॥ ४ दृश्यते ईदृशेनैव ममापि प्रयोजनम्, यद्यस्ति भवतामेतदीयं तत ईदृशं प्रयच्छ भा० ॥ ५ °त्रम् । भाविता द्विती° भा० ॥ ६ प्रच्छादकपटी° मो० ॥ ७ °त्रम् । व्याख्याता तृती° भा० ॥

सम्प्रति चतुर्थीं व्याख्यानयति—

**दव्वाइ उज्झियं दव्वओ उ थूलं मए न घेत्तव्वं ।**
**दोहि वि भावनिसिट्ठं, तमुज्झिओमट्ठऽणोमट्ठं ॥ ६११ ॥**

इह चतुर्थी प्रतिमा—उज्झितधर्म वस्त्रं गवेषणीयम्, तच्च चतुर्द्धा—द्रव्योज्झितं आदिशब्दात् क्षेत्र-काल-भावोज्झितपरिग्रहः । तत्र द्रव्योज्झितं यथा—केनचिदगारिणा प्रतिज्ञातं 'मया स्थूलं वस्त्रं न ग्रहीतव्यम्' अन्यदा तस्य तदेव केनापि वयस्यादिनोपढौकितम्, स च ब्रूते—'पर्याप्तं ममैतेन, नाहं गृह्णामि' इतरोऽपि ब्रूते—'ममाप्यलमेतेन, नाहमात्मना दत्तं पुनः स्वीकरोमि' इत्येवं द्वाभ्यामपि दायक-ग्राहकाभ्यां भावतः-परमार्थतो निसृष्टं-परित्यक्तम्, अमुष्मिन् देश-काले यदि जिनकल्पिकादिः साधुरवभाषितमनवभाषितं वा लभेत तद् द्रव्योज्झितं ज्ञातव्यम् । इह चावभाषितं याचितमनवभाषितं याच्ञां विना स्वयमेव ताभ्यां प्रदत्तम् ॥ ६११ ॥

अथ क्षेत्रोज्झितमाह—

**अमुगिच्चगं न भुंजे, उवणीयं तं च केणई तस्स ।**
**जं वुज्झे कप्पडिया, सदेस बहुवत्थ देसे वा ॥ ६१२ ॥**

"अमुकिच्चगं" अमुकदेशोद्भवं वस्त्रं 'न भुञ्जे' न परिधान-प्रावरणोपभोगमानयामि, यथा—'लाटविषयोद्भवं वस्त्रं मया न परिभोक्तव्यम्' इति केनचित् प्रतिज्ञा कृता भवेत्, अथ कदाचित् तस्य "तं च"त्ति चशब्दस्यावधारणार्थत्वात् तदेव 'उपनीतम्' उपढौकितं केनचित्, ततः पूर्वोक्तनीत्या ताभ्यामुभाभ्यामपि परित्यक्तं क्षेत्रप्राधान्यविवक्षया क्षेत्रोज्झितं ज्ञातव्यम् । "जं वुज्झे कप्पडिय"त्ति वाशब्दः प्रकारान्तरोपदर्शने, प्रकारान्तरेण क्षेत्रोज्झितं प्ररूप्यते इत्यर्थः । यद् वस्त्रजातम् 'उज्झेयुः' परित्यजेयुः कार्पटिकाः स्वदेशं प्रति व्यावृत्याऽऽगच्छन्तः स्वदेशाद्वा देशान्तरं प्रस्थिता अपान्तराले बह्वपायामरण्यानीं मत्वा 'किं तस्कराणां हेतोर्निरर्थकं वस्त्रभारं वहामः ?' इति कृत्वा यदुज्झन्ति यद्वा 'बहुवस्त्रे' वस्त्रप्रचुरे देशेऽन्यत् सुन्दरतरं वस्त्रं लब्ध्वा पुरातनं परिहरेयुः एतत् सर्वमपि क्षेत्रोज्झितम् ॥ ६१२ ॥ कालोज्झितमाह—

**कासाइमाइ जं पुव्वकालजोग्गं तदन्नहिं उज्झे ।**
**होहिइ व एस्सकाले, अजोग्गयमणागयं उज्झे ॥ ६१३ ॥**

कषायेण रक्ता काषायी—गन्धकाषायिकेत्यर्थः, सा हि स्वभावत एवातिशीतला ग्रीष्मर्तुभरेऽपि सकलसन्तापनिर्वापिणी शास्त्रेषु पठ्यते; यत उक्तम्—*

सरसो चंदणपंको, अग्घइ सरसा य गंधकासाई ।
पाडल सिरीस मल्लिय, पियाइँ काले निदाहम्मि ॥

आदिग्रहणेन शीतकालोचितवस्त्रपरिग्रहः । ततश्च काषाय्यादिकं यद् वस्त्रं पूर्वस्मिन्-ग्रीष्मादौ काले योग्यम्-उपयोगि तद् 'अन्यस्मिन्' वर्षाकालादौ 'उज्झेत्' परित्यजेत् । इयमत्र भावना—गन्धकाषायिकादिकं शीतवीर्यवस्त्रं यत् केनापि श्रीमता ग्रीष्मे परिभुज्यते तदेव वर्षास्वनुपयोगित्वात् परिह्रियते, तत् तथापरिह्रियमाणं कालोज्झितम्, एवमुष्णवीर्यादि-

१ न भोत्तव्वं ता० ॥

प्यपि भावना कार्या । अथ प्रकारान्तरेणैतदेवाह—"होहिइ व" इत्यादि । भविष्यति वा गन्धकाषायिकादिकमेव एष्यति–आगामिनि काले–वर्षादावयोग्यमित्यभिसन्धाय 'अनागतं' वर्षाकालादर्वागेव यदुज्झेत् तदपि कालोज्झितम् ॥ ६१३ ॥ अथ भावोज्झितमाह—

**लद्धूण अन्न वत्थे, पोराणे सो उ देइ अन्नस्स ।**
**सो वि अ निच्छइ ताइं, भावुज्झियमेवमाईयं ॥ ६१४ ॥**

कोऽपि कस्यापि पार्श्वे 'लब्ध्वा' प्राप्य 'अन्यानि' अभिनवानि वस्त्राणि ततः स पुराणानि 'अन्यस्य' कस्यचिद् ददाति, सोऽपि च 'तानि' दीयमानानि जीर्णानीति कृत्वा नेच्छति तदेतद् भावं–जीर्णतापर्यायमाश्रित्योज्झितं भावोज्झितमेवमादिकं ज्ञातव्यम् । तदेवं समर्थिता तुरीयाऽपि प्रतिमा ॥६१४॥ "गच्छवासिनश्चतसृभिः प्रतिमाभिर्वस्त्रं गवेषयन्ति" (गा० ६०९) इत्युक्तम्, तत्र परः प्रश्नयति—कया सामाचार्या ते गवेषयन्ति ? इत्युच्यते—

**जं जस्स नत्थि वत्थं, सो उ निवेएइ तं पवत्तिस्स ।**
**सो वि गुरूणं साहइ, निवेई वावारए वा वि ॥ ६१५ ॥**

'यद्' वर्षाकल्पा-ऽन्तरकल्पादिकं 'यस्य' साधोः 'नास्ति' न विद्यते वस्त्रं सः 'तद्' विवक्षितवस्त्राभावस्वरूपं निवेदयति 'प्रवर्त्तिनः' प्रवर्त्तकाभिधानस्य तृतीयपदस्थगीतार्थस्य । स हि सकलस्यापि गच्छस्य चिन्तानियुक्तः, सर्वेऽपि साधवः स्वं स्वं प्रयोजनं तस्याग्रे निवेदयन्ति । ततः 'सोऽपि' प्रवर्त्तकः 'गुरूणाम्' आचार्याणां "साहइ" त्ति कथयति विज्ञपयतीत्यर्थः, यथा—भट्टारकाः ! नास्त्यमुकस्य साधोरमुकं वस्त्रमिति । गच्छे चेयं सामाचारी—यदुताऽऽभिग्रहिका भवन्ति, आभिग्रहिका नाम 'अस्माभिः सकलस्यापि गच्छस्य वस्त्राणि वा पात्राणि वा पूरणीयानि अपरेण वा येन प्रयोजनम्' इति प्रतिपन्नाभिग्रहाः, तेषामाचार्यो निवेदयति, यथा—आर्याः ! नास्त्यमुकस्यामुकं वस्त्रम् । तेऽपि 'अनुग्रहोऽयमस्माकम्' इत्यभिधाय स्वाभिग्रहपरिपालनाय स्वयमेवोत्पादयन्ति । अथ न सन्त्याभिग्रहिकाः ततः स यदि वस्त्रार्थी साधुः स्वयमसमर्थ उत्पादयितुं ततोऽन्यं वस्त्रोत्पादनसमर्थं गुरवो व्यापारयेयुः, यथा—वस्त्राणि गवेषय । वाशब्दः पक्षान्तरद्योतने । 'अपिः' सम्भावनायाम् ॥ ६१५ ॥

तत्राभिग्रहिकेण व्यापारितेन वा केन विधिना वस्त्रमुत्पादयितव्यम् ? उच्यते—

**भिक्खं चिय हिंडंता, उप्पायंतऽसइ बिइअ पढमासु ।**
**एवं पि अलब्भंते, संघाडेकेक वावारे ॥ ६१६ ॥**

सूत्रपौरुषीमर्थपौरुषीं च कृत्वा भिक्षामेव हिण्डमाना वस्त्रमुत्पादयन्ति । अथ भिक्षामटन्तो न लभेरन् ततः 'असति' इत्यलाभे द्वितीयस्यां पौरुष्यामर्थग्रहणं हापयित्वा, तस्यामप्यलाभे 'प्रथमायां' सूत्रपौरुष्यामुत्पादयन्ति । अथैकः सङ्घाटकः पर्यटन् न लभेत बहूनां वा साधूना-

१ °राणे ते तु देति ता० ॥ २ °य एव° ता० ॥ ३ °वेद वा° ता० ॥ ४ वस्त्रम् । ततः स आचार्यो यदि सन्ति गच्छमध्ये 'आभिग्रहिकाः' 'अस्माभिः स° भा० ॥ ५ °त्पाय अस° ता० ॥ ६ °मानौ एकसङ्घाटकसाधू वस्त्रमुत्पादयतः । अथ भिक्षामटन्तौ न लभेयातां ततः 'असति' भा० ॥ ७ °यतः भा० ॥

मुत्पादनीयानि ततः को विधिः ? इत्याह—'एवमपि' सूत्रपौरुषीहापनेऽप्येकसङ्घाटकेनालभ्यमाने बहूनां चोत्पादयितव्ये सङ्घाटकमेकैकं व्यापारयेत् । तेऽपि तथैव याचन्ते "भिक्खं चिअ हिंडंता" इत्यादि । अथ तथापि न प्राप्नुयुस्ततः "वृन्दसाध्यानि कार्याणि" इति वचनाद् वृन्देन पर्यटन्ति ॥ ६१६ ॥ आह च—

**एवं पि अलब्भंते, मुत्तूण गणिं तु सेसगा हिंडे ।**
**गुरुगमणे गुरुग ओहामऽभियोगो सेहहीला य ॥ ६१७ ॥**

'एवमपि' बहुभिः सङ्घाटकैरप्यलभ्यमाने 'गणिनम्' आचार्यमेकं मुक्त्वा शेषाः सर्वेऽपि वृन्देन हिण्डन्ते । यदि गुरवः स्वयमेव पर्यटन्ति तदा तेषां गुरूणां गमने चत्वारो गुरुकाः । "ओहामि"त्ति 'यद्यमी आचार्या अपि सन्त एवमितरभिक्षुवत् पर्यटन्ति नूनमेतेषामाचार्यत्वमपीदृशमेव' इति महती गुरूणामपभ्राजना भवेत् । तथा काचिदविरतिका सर्वाङ्गीणलावण्यश्रियाऽलङ्कृतमाचार्यमवलोक्य मदनपरवशा सती "अभियोग"त्ति कार्मणं कुर्यात् । अन्यतीर्थिका वा आचार्याणां प्रतापमसहमाना विषप्रयोगं प्रयुञ्जीरन् । अवभाषितेषु वा वस्त्रेष्वलब्धेषु शैक्षाणामाचार्यविषया हीला स्यात्—दृष्टा आचार्याणां लब्धिः, स्वयमपि याचमानाश्चीवराण्यपि न लभन्ते । यस्मादेते दोषास्तस्मादाचार्यैर्न पर्यटनीयं शेषाः सर्वेऽपि पर्यटन्ति ॥६१७॥

**सव्वे वा गीयत्था, मीसा व जहन्न एक्कु गीयत्थो ।**
**इक्कस्स वि असईए, करिंति तो कप्पियं एक्कं ॥ ६१८ ॥**

ते च वृन्देन पर्यटन्तः सर्वेऽपि गीतार्था भवेयुः मिश्रा वा । मिश्रा नाम केचन गीतार्थाः केचनागीतार्थाः । तत्र यदि बहवो गीतार्था न प्राप्यन्ते तदा जघन्यत एको गीतार्थः सर्वेषामगीतार्थानामग्रणीभूय पर्यटति । अथ नास्त्याचार्यं मुक्त्वाऽपरः कोऽपि गीतार्थः तत एकस्यापि गीतार्थस्य 'असति' अभावे यः प्रगल्भः सलब्धिकश्च तमेकं वस्त्रैषणामुत्सर्गापवादसहितां कथयित्वा कल्पिकं कुर्वन्ति गुरव इति ॥ ६१८ ॥

अथ तैः केन विधिना गन्तव्यम् ? उच्यते—

**आवाससोहि अखलंत समग उस्सग्ग दंडग न भूमी ।**
**पुच्छा देवय लंभे, न किंपमाणं धुवं दाहि ॥ ६१९ ॥**

इह समयपरिभाषया कायिकी-संज्ञाव्युत्सर्जनमवश्यं क्रियत इति व्युत्पत्तेरावश्यकमभिधीयते, तस्य शोधिः—शोधनं कार्यम्, वस्त्राणामुत्पादनाय गतानां भविष्यति न वेति प्रथममेवाऽऽवश्यकं शोधनीयमित्यर्थः । "अखलंत"त्ति उत्तिष्ठतां पादयोः शिरसि वा स्खलनं यथा न भवति तथोत्थातव्यम्; यद्वा गुरुवचनमस्खलद्भिः—अविकुट्टयद्भिरुत्थातव्यम् । "समग"त्ति सर्वैरपि समकमुत्थानं कर्तव्यम्, न पुनरेके उत्थिताः प्रतीक्षन्ते अन्येऽद्याप्युपविष्टाः; अथवा समकं सर्वैरुपयोगसम्बन्धी कायोत्सर्गः कर्तव्यः । दण्डकाः कायोत्सर्गादारभ्य यावन्नाद्यापि प्रथमलाभस्तावन्न भूमौ स्थापयितव्याः । अपरे पुनर्यावद् व्यावृत्त्य न प्रतिश्रयमागताः तावदिति ब्रुवते । "पुच्छ"त्ति शिष्यः पृच्छति—किंनिमित्तं कायोत्सर्गः क्रियते ? किं देवताऽऽराधनार्थं यदसावाराधिता सती वस्त्राण्युत्पादयति ? आहोश्वित् कायोत्सर्गप्रभावादेव वस्त्राणां

भूयान् लाभो भूयादिति लाभनिमित्तम्? । अत्र सूरिः प्रत्युत्तरयति—"न"त्ति न भवति देवताऽऽराधननिमित्तं न वा लाभनिमित्तं किन्तूपयोगनिमित्तम्, उपयोजनमुपयोगः चिन्ता विमर्श इत्यनर्थान्तरम्, स च गणनाप्रमाणेन प्रमाणप्रमाणेन वा किंप्रमाणं वस्त्रं ग्रहीतव्यम्? को वा याचितः सन् 'ध्रुवम्' अवश्यं दास्यति? । यो ज्ञायते निश्चितमेष दास्यति स एव प्रथमं याच्यते ॥ ६१९ ॥ अथ प्रथमं कायोत्सर्गः केनोत्सारणीयः? इत्युच्यते—

रायणिओ[1] उस्सारे, तस्सऽसतोमो वि गीतो[2] लद्धीओ ।
अग्गीतो वि सलद्धी, मग्गइ इअरे परिच्छंति ॥ ६२० ॥

यः 'रात्निकः' रत्नाधिकः सोऽपि यदि सलब्धिकस्तदा स एव प्रथमं कायोत्सर्गम् 'उत्सारयति' पारयति । 'तस्य' रत्नाधिकस्य सलब्धिकस्य 'असति' अभावे 'अवमोऽपि' पर्यायलघुरपि गीतार्थो यः सलब्धिकः स प्रथमं पारयति । अथ नास्ति गीतार्थः सलब्धिकस्तत आह—अगीतार्थोऽपि यः सलब्धिकः स प्रथमं पारयति, स एव चाग्रणीत्वं कुर्वन् वस्त्राणि मार्गयति । 'इतरे' गीतार्थाः 'परीक्षन्ते' 'किं कल्पते? न वा?' इत्येवं पृष्ठतो लग्ना वस्त्रैषणाविधिं विचारयन्तीत्यर्थः ॥ ६२० ॥ अनन्तरोदितसामाचारीवैतथ्यकरणे प्रायश्चित्तमाह—

उस्सग्गाई वितहं, खलंत अण्णोण्णओ अ लहुओ उ ।
उग्गम विप्परिणामो, ओभाषण सावगं न तओ ॥ ६२१ ॥
दाउं व उड्डुरुस्से, फासुव्वरियं तु सो सयं देइ ।
भावियकुलओभासण, नीणिइ कस्सेअ किं आसी ॥ ६२२ ॥

उत्सर्गः—कायोत्सर्गस्तमादिं कृत्वा सर्वेषु पदेषु सामाचारीं वितथां कुर्वाणस्य लघुमासः प्रायश्चित्तम् । तद्यथा—कायोत्सर्गं[3] न कुर्वन्ति, आवश्यकं न शोधयन्ति, यमकसमकं कायोत्सर्गं न कुर्वन्ति, दण्डकं भूमौ लगयन्ति, पृथक् पृथग् गुरूणामादेशं मार्गयन्ति, 'इच्छाकारेण संदिसह'त्ति न भणन्ति, आचार्याः 'लाभो'त्ति न भणन्ति, साधवः 'किह् गिण्हामो'त्ति न भणन्ति, आचार्याः 'जह गहियं पुव्वसाहूहिं'ति न भणन्ति, साधवः 'जस्स य जोगं'ति न भणन्ति, एतेषु सर्वेषु असामाचारीनिष्पन्नं मासलघु । आवश्यकीं न कुर्वन्ति लघु रात्रिन्दिवपञ्चकम् । "खलंत"त्ति स्खलन्त उत्तिष्ठन्ति गुरुवचनं वा स्खलयन्ति मासलघु । "अन्नन्नउ"त्ति अन्यतश्चान्यतश्च व्रजन्ति न परस्परमेकया ऋजुश्रेण्या तत्रापि लघुको मासः । इत्थं सामाचारीं सम्पूर्णां कृत्वा यदि निर्गताः श्रावकमवभाषन्ते मासलघु, यतस्तस्मिन्नवभाष्यमाणे बहवो दोषाः । तानेवाह—"उग्गम" इत्यादि । कोऽपि श्रावकः साधुभिर्वस्त्रं याचितः स चिन्त-

---

१ रातिणिओ ता० ॥ २ गीत ल° ता० ॥ ३ "काउस्सग्गं ण करेंति०, आवासयं ण सोधिंति०, खलंति समयं वा ण करेंति०, दंडए भूमि छिवावेंति पादं वा०, अण्णण्णओ जंति ण वि पिंडएणं काउस्सग्गं काउं संदिसावेंति अण्णो विजुयओ संदिसावेति अन्नो विजुयओ च्चेव०, संदिसध त्ति ण भणंति०, आयरिया लाभो त्ति ण भणंति०, किध गिण्हामो त्ति ण भणंति०, आवस्सिया जधासंदिट्ठेल्लय त्ति ण भणंति०, आवस्सियं ण करेंति ५, जस्स य जोगं ण भणंति०, एवं करेत्ता णिग्गता जति सावयं ओभासंति०।" इति चूर्णिः ॥ ४ °न्ति रात्रि° भा० ले० कां० ॥

यति—'अहो ! अमी महात्मानस्तावद् यतस्ततः कारणं विना न वस्त्राणि याचन्ते न वा गृह्णन्ति, मद्भाग्यसम्भारप्रेरिता एव सन्तोषपोषितवपुषोऽपि मामित्थं याचन्ते, तत् प्रयच्छामि यथेच्छममीषां वस्त्राणि, मम पुनरन्यान्यपि भविष्यन्ति' इति परिभाव्य सर्वाण्यपि हर्षप्रकर्षारूढः प्रदद्यात्, ततोऽभिनववस्त्रनिर्मापण-क्रयणादिनोद्गमदोषा भवेयुः । विपरिणामो वा नवधर्मणः कस्यचिदुपासकस्य स्यात्, यथा—हुं ज्ञातममीषां श्रमणानां रहस्यम्, य एतेषामुपासको भवति तमेवमेव याच्ञाभिरुद्वेजयन्तीति, ततश्च धर्मं प्रति विप्रतिपद्येत । यद्वा "ओहावण"त्ति अपभ्राजना भवेत् । इयमत्र भावना—तस्य श्रावकस्य कदाचिद् वस्त्राणि न भवेयुः ततो मिथ्यादृष्टयो ब्रवीरन्—अहो ! अमीषां प्रतिबोधप्रसादः, यद् एतद्योग्यान्येतदीयोपासकानां वस्त्राणि न सम्पद्यन्ते; लोको वा ब्रूयात्—यद्येतेषां स्वकीया अपि श्रावका न प्रयच्छन्ति तदाऽन्यः को नाम दास्यति ? इति । ततः श्रावकं नावभाषेत ॥ ६२१ ॥

स श्रावको लोकलज्जया तदानीं दत्त्वा वा "उड्डुरुस्से" त्ति प्रद्वेषं यायात्—किमेतैरेतदपि न ज्ञातं श्रावकस्य यद् वस्त्रादि स्वाधीनं तदयाचितमेव ददाति ? किं तेन याचितेन ? अतः परं न गच्छाम्यमीषां सकाशमिति । यत एते दोषास्ततः श्रावकं नावभाषेतेति पूर्वगाथाया अन्त्यपदेन सम्बन्धः । यस्मादुपासकस्यैषा सामाचारी—यत् 'प्राशुकम्' एषणीयम् 'उद्धरितम्' अधिकं वस्त्रं तत् 'स्वयमेव' अयाचितोऽपि निमन्त्र्य ददाति । तेन तं मुक्त्वा यान्यन्यानि भावितानि साधुसंसर्गवासितानि सम्यक्त्वाद्यव्युत्पन्नमतीनि यथाभद्रकाणि कुलानि तेष्वेवावभाषणं कर्त्तव्यम् । कथम् ? इति चेद् उच्यते—तत्र यः प्रमाणभूतः पुरुषस्तं धर्मलाभयित्वा ब्रुवते—श्रावक ! साधवस्तव सकाशमागताः सन्ति, प्रयोजनमस्माकमीदृशैर्वस्त्रैरिति । यदि पुनः 'धन्यस्त्वम्, श्लाघ्यं ते जन्म जीवितम्, अनर्घ्यं सुपात्राय वस्त्रपात्रादिदानम्' इति तद्गुणविकत्थन-वस्त्रदानफलोत्कीर्त्तनादि करोति तदा मासलघु । ततः स याच्यमान एवं ब्रूयात्—'अहो ! मे धन्यता यस्य गृहाङ्गणं जङ्गमा इव कल्पपादपा अमी भगवन्तः स्वपादपल्लवैः पवित्रितवन्तः' इत्यभिधाय स्वयमन्येन वा गृहमध्याद् वस्त्रमानयेद् आनाययेद्वा । ततस्तस्मिन् 'नीणिइ'त्ति आनीते पृच्छयते—कस्यैतद् वस्त्रम् ? किं वा आसीत् ? उपलक्षणत्वात् किं भविष्यति ? क्व च स्थापितमासीत् ? । यदि 'कस्यैतद् ?' इति न पृच्छन्ति तदा मासिकम् ॥ ६२२ ॥ अथ को दोषो यद्येवं न परिपृच्छयते ? उच्यते—

**कास त्तऽपुच्छियम्मी[1], उग्गम-पक्खेवगाइणो दोसा ।**
**किं आसऽपुच्छियम्मी, पच्छाकम्मं पवहणं व ॥ ६२३ ॥**

'कस्य सम्बन्धि ?' 'इति' एवमपृष्टे उद्गमदोषाः प्रक्षेपकादयश्च दोषा भवेयुः, आदिग्रहणान्निक्षेपकपरिग्रहः । 'किमासीद् ?' इत्यपृष्टे पश्चात्कर्मदोषः प्रवहणदोषो वा सम्भवेत् । एतच्चोत्तरत्र भावयिष्यते ॥ ६२३ ॥

अथ 'कस्य' इति पृच्छायामविधीयमानायां कथमुद्गमदोषा भवेयुः ? उच्यते—

**कीस न नाहिह तुब्भे, तुब्भट्ठ कयं व कीय-धोयाई ।**

---

१ °यम्मि उ° ता० ॥ २ °वमातिणो ता० ॥

**अमुएण व तुब्भट्ठा, ठवियं गेहे न गिण्हह से ॥ ६२४ ॥**

'कस्येदम्?' इति पृष्टः कोऽपि ब्रूयात्—कस्मान्न ज्ञास्यथ यूयम्? ज्ञास्यथेत्र, तथाप्यस्मान् पृच्छथ, पृच्छतां च कथयामः—युष्मदर्थमेव कृतमेतद् वस्त्रम्, वाशब्द उत्तरापेक्षया विकल्पार्थः, युष्मदर्थमेव क्रीतं धौतम्, आदिशब्दाद् धूपित-वासितादिपरिग्रहः। अमुकेन वा युष्मदर्थमस्मद्गृहे स्थापितम्, यतः 'से' तस्यामुकस्य गेहे न गृह्णीथ यूयमिति ॥ ६२४ ॥

अथ यदुक्तं "तुब्भट्ठ कयं" ति तत्र मूलगुणकृतं वा स्यादुत्तरगुणकृतं वा। अथ के मूलगुणाः? के चोत्तरगुणाः? इत्याह—

**तण विणण संजयट्ठा, मूलगुणा उत्तरा उ पज्जणया।**
**गुरुगा गुरुगा लहुगा, विसेसिया चरिमए सुद्धो ॥ ६२५ ॥**

इह संयतार्थं वस्त्रनिष्पत्तिहेतोर्यत् 'तननं' तानपरिकर्म 'वितननं च' वानपरिकर्म क्रियते एतौ मूलगुणौ मन्तव्यौ। 'उत्तरा' उत्तरगुणरूपा 'पायनता' यद् वस्त्रं निष्पन्नं सत् खलिकां पाय्यते, उपलक्षणमिदम्, तेन यद् मोटयित्वा सलेषु प्रक्षिप्यते, तदादयो धावन-धूपनादयश्च वस्त्रस्योत्तरगुणा द्रष्टव्याः। अत्र चतुर्भङ्गी—तनन-वितनने संयतार्थं पायनमपि संयतार्थम् १, तनन-वितनने संयतार्थं पायनं स्वार्थम् २, तनन-वितनने स्वार्थं पायनं संयतार्थम् ३, तनन-वितनने स्वार्थं पायनमपि स्वार्थम् ४। अत्राद्येषु त्रिषु गुरुका गुरुका लघुकाश्च तपः-कालाभ्यां विशेषिताः प्रायश्चित्तम्। तद्यथा—प्रथमे भङ्गे चत्वारो गुरुकास्तपसा कालेन च गुरवः, द्वितीयेऽपि चतुर्गुरुकाः तपसा गुरवः कालेन लघवः, तृतीये चत्वारो लघुकाः कालेन गुरवस्तपसा लघवः। "चरमए सुद्ध"त्ति 'चरमे' चतुर्थे भङ्गे द्वयोरपि मूलोत्तरगुणयोः स्वार्थत्वाच्छुद्धः ॥ ६२५ ॥ अथ प्रक्षेपकादयो दोषाः कथं भवेयुः? इत्यत आह—

**समणे समणी सावग, साविग संबंधि इड्ढि मामाए।**
**राया तेणे पक्खेवए अ निक्खेवगं जाणे ॥ ६२६ ॥**

षष्ठी-सप्तम्योरर्थं प्रत्यभेदात् श्रमणस्य श्रमण्याः श्रावकस्य श्राविकायाः सम्बन्धिन ऋद्धिमतो मामाकसत्काया भार्याया राज्ञः स्तेनस्य च सम्बन्धी प्रक्षेपको भवति। प्रक्षेपणं प्रक्षेपकः "नाम्नि पुंसि च" (सि० ५-३-१२१) इति भावे णकप्रत्ययः, यथा अरोचनं अरोचक इत्यादि। निक्षेपकमप्येतेष्वेव स्थानेषु जानीयादिति सङ्ग्रहगाथासमासार्थः ॥ ६२६ ॥

साम्प्रतमेनामेव व्याख्यानयति—

---

१ °स्मान् पृच्छतां कथ्यते—युष्म° भा० ॥ २ इह यत् तन्तुवायैरुभयपार्श्वयोः कीलकयुगलं निखाय तानकरूपतया तन्तवस्तन्यन्ते तत् तननम्, यत् पुनरधस्तनोपरितनयोस्तानकतन्तुसन्तानयोरन्तराले नलकप्रयोगेण तन्तव उभयतो वितन्यन्ते-व्यूयन्ते तद् वितननम्, तननं च वितननं च तनन-वितनने संयतार्थं यत् क्रियेते एतौ भा० ॥ ३ यद् वस्त्रं कूर्चिकेण खलिकां पाय्यते तत् पायनम्, पायनमेव पायनता, प्राकृतत्वात् स्वार्थे तल्प्रत्ययः, उपलक्षणत्वाद् घृष्ट-मृष्ट-धावन-धूपनादयोऽपि वस्त्र° भा० ॥ ४ भङ्गे द्वाभ्यामपि मूलोत्तरगुणाभ्यां निर्दोषत्वात् शुद्धः भा० ॥ ५ "मामाएण वा रायाएण तेणएण वा पक्खेवय त्ति पक्खित्तं होज्जा" इति चूर्णिः ॥ ६ निर्युक्तिगाथा° मो० ॥

**लिंगत्थेसु अकप्पं, सावग-नीएसु उग्गमासंका ।**
**इड्ढि अपवेस साविग, इड्ढिस्स व उग्गमासंका ॥ ६२७ ॥**
**एमेव मामगस्स वि, सड्ढी भज्जा उ अन्नहिं ठवए ।**
**निव तप्पिंडविवज्जी, मा होज्ज तदाहडं तेणे ॥ ६२८ ॥**

ये श्रमण-श्रमणीजना लिङ्गमात्रधारिणस्ते उद्गमादिभिर्दोषैरशुद्धानि वस्त्राणि गृह्णन्ति स्वयमेव वा तन्तुवायैर्वाययन्ति, लिङ्गतः प्रवचनतोऽपि साधर्मिकाश्च ते इति तेषु लिङ्गस्थेषु 'अकल्प्यम्' अकल्पनीयमिति हेतोः साधवो न गृह्णन्ति, ततस्ते लिङ्गस्थाः संविग्नबहुमानिनः सन्तो वस्त्राण्यन्यत्र यथाभद्रककुलादौ प्रक्षिपेयुः 'यदि साधवो वस्त्राणि गवेषयेयुः तदा प्रदद्ध्वम्' इति कृत्वा । तथा श्रावकेषु उपलक्षणत्वात् श्राविकासु निजकेषु—सम्बन्धिषु भ्रातृ-भगिन्यादिषु उद्गमदोषाशङ्कया साधवो न गृह्णीयुरिति तेऽपि तथैवान्यत्र स्थापयेयुः । 'ऋद्धिमतः' श्रेष्ठि-सार्थवाहादेर्गृहे यतस्ततः प्रवेशो न लभ्यन्ते, तस्य पत्नी श्राविका, सा भक्तिवशादन्यत्र प्रक्षिपेत् ; यद्वा स ऋद्धिमान् पाषण्डिनां श्रमणानां वा पुण्यार्थं वस्त्राणि दद्यात् तेषु साधूनामुद्गमाशङ्का, ततो निमन्त्रिता अपि न स्वीकुर्युः तेन सोऽपि दानश्रद्धालुस्तथैवान्यत्र प्रक्षिपेत् ॥ ६२७॥

'एवमेव' ऋद्धिमत्प्रकारेणैव 'मामाकस्यापि' 'प्रान्तत्वेनेर्षालुत्वेन वा कस्यापि स्वगृहे प्रवेशं न ददाति' इत्येवंलक्षणस्य भार्या श्राद्धिका भक्तिभरप्रेरिता सती तथैवान्यस्मिन् गृहे स्थापयेत् । 'नृपः' राजा सोऽप्यन्यत्र स्वपुरुषैः प्रक्षेपयेत्[1], यतस्तस्य—राज्ञः पिण्डम्—आहार-वस्त्रादिलक्षणं वर्जितुं शीलं येषां ते तत्पिण्डविवर्जिनः साधवः । किमुक्तं भवति ?—कोऽपि राजा स्वभावत एव भद्रकः श्रावको वा, ततः साधवोऽत्यर्थमभ्यर्थिता अपि 'न कल्पते राजपिण्डः' इति हेतोर्यदा न गृह्णन्ति तदा सः 'यथा तथा पुण्यमुपार्जयामि' इति विचिन्त्यान्यत्र वस्त्राणि स्थापयेत् । स्तेनस्यापि वस्त्रं न गृह्णन्ति, मा भूत् 'तदाहृतं' स्तेनाहृतं तदीयं वस्त्रमिति, ततः सोऽपि संयतभद्रकः 'मदीयं न स्वीकुर्वन्ति' इत्यन्यत्र प्रक्षिपेत् ॥ ६२८ ॥ उपसंहारमाह—

**एए उ अघिप्पंते, अन्नहिं सन्निक्खिवंति समणट्ठा ।**
**निक्खेवओ वि एवं, छिन्नमछिन्नो उ कालेण ॥ ६२९ ॥**

'एते' श्रमणादयोऽनन्तरोक्तकारणैः 'अगृह्यमाणे' वस्त्रे 'अन्यस्मिन्' भावितकुलादौ 'श्रमणार्थं' साधूनामर्थाय संनिक्षिपन्ति इत्युक्तः प्रक्षेपकः । सम्प्रति निक्षेपकः प्ररूप्यते—अथ प्रक्षेपक-निक्षेपकयोः कः प्रतिविशेषः ? उच्यते—साधूनामेवार्थाय या वस्त्रस्य स्थापना स प्रक्षेपकः, यत् पुनः प्रथमं स्वार्थं निक्षिप्य पश्चात् साधूनामनुज्ञायते स निक्षेपकः, सोऽपि 'एवं' प्रक्षेपकवद् द्रष्टव्यः । इयमत्र भावना—यथा प्रक्षेपकः श्रमणादिषु स्तेनान्तेषु स्थानेषु भावितः तथा निक्षेपकोऽपि भावनीयः । यस्तु विशेषस्तं दर्शयति—"छिन्न" इत्यादि । स निक्षेपकः कालेन च्छिन्नो वा स्यादच्छिन्नो वा । छिन्नो नाम निर्धारितः, यदि वयं देशान्तरं गताः सन्त एतावतः कालादर्वाग् न प्रत्यागच्छामः ततो युष्माभिरमूनि वस्त्राणि श्रमणेभ्यः

१ °त्, कुतः ? इति चेद् अत आह—"तप्पिंडविवज्जी" तस्य पिण्डम् भा० ॥ २ °त्र इति कृत्वा । किमुक्तं भा० ॥

प्रदातव्यानीति । अच्छिन्नः पुनः प्रतिनियतकालविवक्षारहितः ॥ ६२९ ॥ अत्र विधिमाह—

**अमुगं कालमणागएँ, दिज्जह समणाण कप्पई छिन्ने ।**
**पुण्ण समकाल कप्पइ, ठवियगदोसा अईअम्मि ॥ ६३० ॥**

देशान्तरं जिगमिषुः कोऽपि कस्यापि गृहे किञ्चिद् वस्त्रजातं निक्षेप्तुकामो ब्रूते—'अमुकं' विवक्षितं कालं मय्यनागते यूयं मदीयं वस्त्रं श्रमणेभ्यो दद्यात इत्यभिधाय निक्षेपकं निक्षिप्य गतोऽसौ देशान्तरं नाऽऽयातस्तावतः कालावधेरर्वाक् ततः कल्पते तद् वस्त्रम् । एवं विधिच्छिन्ने निक्षेपके किं सर्वदैव ? न इत्याह—पूर्णस्यावधेः समकालं कल्पते न परतः । कुतः ? इत्याह—स्थापनैव स्थापितकं तस्य दोषा अतीते विवक्षितकालावधौ भवन्ति । अच्छिन्ने तु यदा प्रयच्छन्ति तदा कल्पते ॥ ६३० ॥ अथ साधुनिक्षिप्तवस्त्रविधिमाह—

**असिवाइकारणेहिं, पुण्णाईए मणुन्ननिक्खेवे ।**
**परिभुंजंति ठविंति व, छड्डिंति व ते गए नाउं ॥ ६३१ ॥**

अशिवं—व्यन्तरकृतोपद्रवविशेषः, आदिग्रहणादवमौदर्यादिपरिग्रहः, तैरशिवादिभिः कारणैः पूर्णेऽतीते वा काले मनोज्ञाः—साम्भोगिकास्तेषां निक्षेपके यद् वस्त्रजातं तत् परिभुञ्जते । इयमत्र भावना—साम्भोगिकसाधुभिरशिवादिभिः कारणैर्देशान्तरं व्रजद्भिर्ग्लानादिप्रतिबन्धस्थितानां साधूनां समीपे यद् वस्त्रजातं निक्षिप्तं तत् पूर्णेऽतीते वा काले यद्यात्मनो वस्त्राणामसत्ता ततो वास्तव्यसाधवः परिभुञ्जते न तत्र कश्चित् स्थापनादिदोषः । अथ नास्ति वस्त्राणामसत्ता गृहीतानि वा यैः प्रयोजनं ततस्तथैव स्थापयन्ति । अथ ज्ञायते यथा—ते ततोऽपि दवीयांसमन्यं देशं गतास्ततस्तान् गतान् ज्ञात्वा "छड्डुंति" परिष्ठापयन्तीत्यर्थः ॥ ६३१ ॥

तदेवं कस्येति पृष्टे प्रक्षेपकादयो दोषाः सुनिर्णीता भवन्तीत्यावेदितम् । अथ कस्येति पृष्टे यो यादृशमाशङ्कावचनं ब्रूयात् तदेतदभिधित्सुराह[२]—

**दमए दूभगे भट्ठे, समणच्छन्ने अ तेणए ।**
**न य नाम न वत्तव्वं, पुट्ठे रुट्ठे जहावयणं ॥ ६३२ ॥**

द्रमके' दरिद्रे 'दुर्भगे' अनिष्टे 'भ्रष्टे' राज्य(ज)पदच्युते "समणच्छन्ने"त्ति भावप्रधानत्वात् श्रमणशब्दस्य श्रामण्येन—श्रमणवेषेण च्छन्ने—आच्छादितगार्हस्थ्ये 'स्तेनके' चौरे प्रथमं कस्येति पृष्टे ततः स्वहृदयसमुत्थया[३] शङ्कया 'रुष्टे' कषायिते तस्य समाधानविधानार्थं न न नाम न वक्तव्यम् किन्तु वक्तव्यमेव वचनस्यानतिक्रमेण 'यथावचनं' यथायोगमाशङ्कापनोदकं वाक्यमित्यर्थः । तच्च यथावसरं पुरस्ताद् वक्ष्यते ॥ ६३२ ॥ तत्र प्रथमं द्रमकद्वारं विवृणोति—

**किं दमओ हं भंते !, दमगस्स वि किं मे चीवरा नत्थी ।**
**दमएण वि कायव्वो, धम्मो मा एरिसं पावे ॥ ६३३ ॥**

कस्येति पृष्टः कोऽपि ब्रूयात्—भदन्त ! भवद्भिः किमहं द्रमकः सम्भावितो येनैवं पृच्छ्यते ?; यद्वा यद्यप्यहं द्रमकस्तथाऽपि किं मे चीवराण्यपि न सन्ति ? किन्तु सन्त्येव; किञ्च द्रमकेणापि धर्मः कर्तव्यः, कुतः ? इत्याह—मा ईदृशं दारिद्र्योपद्रवलक्षणं दुःखं भूयः प्राप्नुया-

---

१ °ऊलमुत्पन्नं तत° भा० ॥ २ °राह निर्युक्तिकारः मो० ॥ ३ °स्थशङ्क° मो० ॥

मिति कृत्वा । तस्य पुरतः साधुभिरभिधातव्यम्—भद्र ! न वयं भवन्तं द्रमकं भणित्वा कस्येति पृच्छामः किन्तु सार्वज्ञोऽस्माकमयमुपदेशः, यतः—कदाचित् तव स्वजन-परिजन-मित्रादीनां सत्कमिदं भवेत्[1], ते चापरस्य तथाविधस्याभावेऽप्रीतिकं कुर्युः अभिनवं वा वस्त्रं सम्मूर्च्छयेयुः क्रीणीयुर्वा, अस्माकं[2] च तृतीयव्रतातिचारः स्यात्; यद्वा श्रमणादिभिः स्तेन-पर्यन्तैरिदमस्मदर्थं स्थापितं भवेदित्यादयो दोषाः कस्येत्यपृच्छायां न परिहर्तुं शक्यन्ते इत्युक्ते यदि स ब्रूयात्—"ममैवैतद् नान्यस्य' इति तदा निर्दोषं मत्वा प्रतिगृह्यते । एवं दुर्भगादिष्वपि पदेषु यथायोगमुपयुज्य भावना कार्या ॥ ६३३ ॥ दुर्भगद्वारमाह—

**जइ रन्नो भज्जाए, व दूभगो दूभगा व जइ पइणो ।**
**किं दूभगो मि तुब्भ वि, वत्था वि व दूभगा किं मे ॥ ६३४ ॥**

दुर्भगो ब्रूयात्—यद्यहं राज्ञो भार्याया वा 'दुर्भगः' द्वेष्यस्तत् किं युष्माकमपि दुर्भगः ? । यदि वा काचिदविरतिका दात्री तदा ब्रूयात्—यद्यहं पत्युर्दुर्भगा तत् किं युष्माकमपि दुर्भगा ? वस्त्राण्यपि वा किममूनि मे दुर्भगाणि यदेवं दीयमानान्यपि 'कस्य सत्कानि ?' इति पृच्छयन्ते ? ॥ ६३४ ॥ अथ भ्रष्ट-श्रमणच्छन्नद्वारद्वयमाह—

**जइ रज्जाओ भट्ठो, किं चीरेहिं पि पिच्छहेयाणि ।**
**अत्थि महं साभरगा, मा हीरेज त्ति पव्वइओ ॥ ६३५ ॥**

राजपदच्युतः प्राह—यद्यहं राज्याद् भ्रष्टः तत् किं चीवरेभ्योऽपि ? नैवेत्यर्थः, 'पश्यत' अवलोकयत एतानि मद्गृहे भूयांसि वासांसीति ब्रुवन् हस्तसंज्ञया दर्शयति । श्रमणच्छन्नः प्राह—सन्ति मम पार्श्वे बहवः "साभरग"त्ति देशीवचनाद् रूपकाः, ते च मा[3] राजकुलादिना ह्रियेरन्नित्यहं 'प्रव्रजितः' शाक्य-तापस-परिव्राजका-ऽऽजीवकाख्यानां श्रमणानामन्यतमः संवृत्त इत्यर्थः ॥ ६३५ ॥ अथ स्तेनको यद् ब्रूयात् तदाह—

**अत्थि मे घरे वि वत्था, नाहं वत्थाइँ साहु ! चोरेमि ।**
**सुट्ठु मुणिअं च तुब्भे, किं पुच्छह किं व हं तेणो ॥ ६३६ ॥**

सन्ति 'मे' मम गृहे वस्त्राणि अत एव हे साधो ! नाहं वस्त्राणि चोरयामि; यद्वा 'सुष्ठु' शोभनं 'मुणितं' परिज्ञातं युष्माभिर्यथाऽहं स्तेनः, को नाम साधून् मुक्त्वाऽपरो ज्ञास्यति ? तदहं सत्यं स्तेन एव, न पुनः साधूनामर्थाय चोरयामि; अथवा किं यूयं पृच्छत ? यस्य वा तस्य वा भवतु यूयं गृह्णीत; यद्वा किमहं स्तेनो येन यूयं 'कस्य' इति पृच्छथ ? । अत्रापि समाधानविधानं प्राग्वत् ॥ ६३६ ॥

अथ कस्येति पृच्छाप्रतिबद्धामेव द्वारान्तरप्रतिपादिकामिमां[5] गाथामाह—

**इत्थी पुरिस नपुंसग, धाई सुण्हा य होइ बोधव्वा ।**
**बाले अ वुड्ढजुगले, तालायर सेवए तेणे ॥ ६३७ ॥**

---

१ भा० ले० कां० विनाऽन्यत्र—°त्, तथाऽपरस्य तथा° त० मो० । °त्, यथा यस्य तथा° डे० ॥ २ °कं तु तृ° डे० ॥ ३ राज्यप° डे० ले० विना ॥ ४ मा केनचित् चौरादिना ह्रि° भा० ॥ ५ °मां निर्युक्तिगाथा° मो० ॥

स्त्री-पुरुष-नपुंसका धात्री स्नुषा च भवति बोद्धव्या, ततो बालयुगलं वृद्धयुगलं तालाभिश्चरन्तीति 'तालाचराः' नटाः, सेवकः स्तेनश्च प्रतीत इति द्वारगाथासमासार्थः ॥ ६३७ ॥

व्यासार्थं प्रतिद्वारं बिभणिषुराह—

**तिविहित्थि तत्थ थेरिं, भणंति मा होज्ज तुज्झ जायाणं ।**
**मज्झिम मा पइ-देवर, कण्णं मा थेर-भाईणं ॥ ६३८ ॥**

त्रिविधा स्त्री, तद्यथा—स्थविरा मध्यमा कन्या च । तत्र स्थविरां दात्रीं भणन्ति—मा भूत् तव 'जातानां' पुत्राणां सत्कमिदं वस्त्रं तेन वयं कस्य इति पृच्छाम इति योजना सर्वत्र कर्त्तव्या । मध्यमा भण्यते—मा भूत् तव पति-देवरयोः सत्कम् । 'कन्यां' कुमारीं भणन्ति—मा भूत् तव स्थविर-भ्रात्रोः सम्बन्धि । स्थविरः–पिता, भ्राता प्रतीतः ॥ ६३८ ॥

**एमेव य पुरिसाण वि, पंडगऽपडिसेवि मा निआणं ते ।**
**सामियकुलस्स धाई, सुण्हं जह मज्झिमा इत्थी ॥ ६३९ ॥**

'एवमेव' यथा स्त्रीणां तथा पुरुषाणामपि स्थविर-मध्यम-तरुणभेदैस्त्रैविध्यं द्रष्टव्यम् । स्थविरः पुरुषो भण्यते—मा तव पुत्राणां कलत्रस्य वा सत्कं भवेत् । मध्यमोऽभिधीयते—मा भूत् तव भ्रातॄणां पत्न्या वा सम्बन्धि । तरुण उच्यते—मा तव पितुर्मातुर्भ्रातॄणां वा स्वाधीनं भवेत् । 'पण्डकः' नपुंसकः "पडिसेवि"त्ति अकारप्रश्लेषाद् 'अप्रतिसेवी' तृतीयवेदोदयरहितोऽसङ्क्लिष्ट इत्यर्थः तस्य ग्रहीतुं कल्पते, स चाभिधीयते—मा ते 'निजानां' सम्बन्धिनामिदं वस्त्रं भवेत् । यः पुनस्तृतीयवेदोदययुक्तस्तस्य हस्ताद् गृह्णतां चत्वारो लघुकाः, आज्ञाभङ्गादय आत्म-परोभयसमुत्थाश्च दोषाः । या धात्री साऽभिधीयते—मा ते 'स्वामिकुलस्य' स्वामिनो गृहस्य सत्कं भवेत् । 'स्नुषां' वधूं भणन्ति यथा मध्यमा स्त्री भणिता—मा ते पत्युर्देवरस्य वा सम्बन्धि भवेत् ॥ ६३९ ॥

**दोण्हं पि अ जुयलाणं, जहारिहं पुच्छिऊण जइ पहुणो ।**
**गिण्हंति तओ तेसिं, पुच्छासुद्धे अणुन्नायं ॥ ६४० ॥**

इह द्वे युगले नाम बालयुगलं वृद्धयुगलं च । बालयुगलं बालो बालिका, वृद्धयुगलं वृद्धो वृद्धा च, तयोर्द्वयोरपि युगलयोः 'यथार्हं' यथायोग्यं स्वरूपं पृष्ट्वा प्रत्ययिकपुरुषमुखेन च निश्चित्य यदि प्रभवस्ते बालादयस्ततो गृह्णन्ति तेषां हस्तात्, अथ न प्रभवस्तदा यः पितृपुत्रादिः प्रभुस्तस्य वा पृच्छा–किं गृह्यतां न वा ? इति तया शुद्धे–गृह्यतां निर्विकल्पमित्यनुमत्या निःसन्दिग्धे कृते ग्रहणमनुज्ञातम् ॥ ६४० ॥

**तूरपइ दिंति मा ते, कुसीलवे तेसु तूरिए मा ते ।**
**एमेव भोगि सेवग, तेणो उ चउव्विहो इणमो ॥ ६४१ ॥**

'तूर्यपतिः' नटमहत्तरस्तस्मिन् ददति भण्यते—मा ते 'कुशीलवानां' नटानां सत्कं भविष्यति । 'तेषु' कुशीलवेषु ददत्सु मा युष्माकं 'तूर्यिकस्य' तूर्यपतेर्भवेत् । 'एवमेव' तूर्यपति-कुशीलवोक्तप्रकारेणैव भोगिक-सेवकयोरपि वाच्यम् । यदि सेवको ददाति तदा वक्तव्यम्—मा ते भोगिकस्य–स्वामिनः स्वाधीनं भवेत् । भोगिके दातरि वाच्यम्—मा युष्माकं सेवकस्य

सम्बन्धि भवतु । स्तेनस्वरूपमाह—स्तेनः पुनश्चतुर्विधः 'अयं' वक्ष्यमाणलक्षणः ॥ ६४१ ॥

चातुर्विध्यमेवाह—

**सग्गाम परग्गामे, सदेस परदेसे होइ उड्डाहो ।**
**मूलं छेओ छम्मासमेव गुरुगा य चत्तारि ॥ ६४२ ॥**

यस्मिन् ग्रामे साधवः स्थिताः सन्ति स स्वग्रामस्तस्मिन् यः स्तैन्यं करोति स स्वग्रामस्तेनः । तदपेक्षयाऽपरस्मिन् ग्रामे स्तैन्यं कुर्वन् परग्रामस्तेनः । 'स्वदेशे' विवक्षितसाधुविहारविषयभूते विषये चौर्यं कुर्वाणः स्वदेशस्तेनः । तदपेक्षयाऽपरत्र देशे चौरिकां विदधानः परदेशस्तेनः । एतेषु गृह्णताम् 'उड्डाहः' प्रवचनलाघवं भवति—अहो ! अमी लुब्धशिरोमणयः तपस्विनः, यदेवं स्तेनाहृतानि वस्त्राणि गृह्णाना राजविरुद्धमपि नापेक्षन्त इति । तेषु प्रायश्चित्तमाह— "मूलमि"त्यादि । स्वग्रामस्तेने गृह्णतां मूलम्, परग्रामस्तेने छेदः, स्वदेशस्तेने षण्मासा गुरुकाः, परदेशस्तेने चत्वारो गुरुकाः, यथाक्रमं दूर-दूरतर-दूरतमस्तैन्यदोषत्वादिति भावः ॥ ६४२ ॥

तदेवं व्याख्याता "इत्थी पुरिस" इत्यादिद्वारगाथा (६३७) । तद्व्याख्याने च समर्थितं 'कस्य' इति पृच्छाद्वारम् । अथ 'किमासीत् ?' इति पृच्छाद्वारमाह—

**एवं पुच्छासुद्धे, किं आसि इमं तु जं तु परिभुत्तं ।**
**किं होहिइ त्ति अहतं, कत्थाऽऽसि अपुच्छणे लहुगा ॥ ६४३ ॥**

'एवम्' अमुना प्रकारेण कस्येति पृच्छया[1] शुद्धे—निर्दोषे निर्णीते सति यत् 'परिभुक्तं' भुक्तपूर्वं तत् पृच्छ्यते—'किमिदं वस्त्रमासीत् ?' युष्माकं कीदृशमुपयोगमागतवदित्यर्थः । यत् पुनः 'अहतम्' अपरिभुक्तं तत् पृच्छ्यते—किमेतद् भविष्यति ? इति । "कत्थासि"त्ति क पेडायां मञ्जूषायामपरस्मिन् वा स्थाने इदमासीत् ? । तत्र यदि पेडायां तदा किं पृथिव्यादिषु कायेषु सा पेडा प्रतिष्ठिता ? अप्रतिष्ठिता वा ? इत्याद्युपयुज्य वाच्यम् । कस्येदम् ? किमासीत् ? कुत्रासीत् ? किं भविष्यति ? इति 'अप्रच्छने' चतसृणामपि पृच्छानामकरणे प्रत्येकं चत्वारो लघुकाः ॥ ६४३ ॥ तत्र किमासीद् ? इति पृष्टे ते गृहस्था अभिदध्युः—

**निच्चनियंसण मज्जण, छणूसवे रायदारिए चेव ।**
**सुत्तत्थजाणएणं, चउपरियट्टे तओ गहणं ॥ ६४४ ॥**

'नित्यनिवसनं'[2] नित्योपभोग्यमेतदासीत् । 'मज्जनिकं' नाम स्नानानन्तरं यत् परिधीयते धौतवस्त्रमित्यर्थः तदासीत्[3] । तथा क्षणः—प्रतिनियतः कौमुदी-शक्रमहादिकः, उत्सवः—पुनरनियतो नामकरण-चूडाकरण-पाणिग्रहणादिकः[4]; अथवा यत्र पक्वान्नविशेषः क्रियते स क्षणः, यत्र तु पक्वान्नं विनाऽपरो भक्तविशेषः स उत्सवः; क्षणे उत्सवे च परिभुज्यते यत् तत् क्षणोत्सविकं[5] तद्वाऽऽसीत् । तथा राजा-ऽमात्य-महत्तमादिभवनेषु[6] गच्छद्भिर्यत् परिभुज्यते तद्

१ पृच्छायां शुद्धे भा० ॥ २ 'नित्यनिवसनमेतदासीत्' नित्यं-प्रत्यहं निवसितं यस्य तद्, नित्योपभोग्यमित्यर्थः । 'मज्ज° भा० ॥ ३ °त् । 'क्षणोत्सविकं वाऽऽसीत्' क्षणः भा० ॥ ४ °कः प्रकरणविशेषः, अथ° भा० ॥ ५ °कम् । यद्वा 'राजद्वारिकमिदमासीत्' राजा° भा० ॥ ६ °षु जिगमिषुभिर्यत् भा० ॥

राजद्वारिकं[1] तद्वाऽऽसीत् । तत्रैवमुक्ते 'सूत्रार्थज्ञायकेन' गीतार्थेन[2] चतुर्णां—नित्यनिवसनीयादीनां परिवर्त्तानां—वस्त्रयुगलानां समाहारश्चतुःपरिवर्त्तम्[3], तत्र यादृशं परिवर्त्तमेकतरं वा वस्त्रं ददाति तादृशेऽस्मिन् व्याप्रियमाणे सति ततो ग्रहणं कर्त्तव्यम् ॥ ६४४ ॥ एतदेव भावयति—

**निच्चनियंसणियं ति य, अन्नासइ पच्छकम्म-वहणाई ।**
**अत्थि वहंते घिप्पइ, इयरय फुस-धोय-पगयाई ॥ ६४५ ॥**

यदि गृहस्थो ब्रूयात्—नित्यनिवसनीयमिदमासीत्, ततो यदि तस्यापरं नित्यनिवसनीयमस्ति ततः कल्पते[4], यतोऽन्यस्य नित्यनिवसनीयस्य असति—अभावे पश्चात्कर्म-वहनादयो दोषा भवन्ति । पश्चाद्—विवक्षितवस्त्रग्रहणानन्तरं कर्म—अभिनववस्त्रस्य कारापणं पश्चात्कर्म, वहनं[5] नाम अव्याप्रियमाणं वस्त्रं यद् वहमानकं क्रियते, आदिग्रहणात् क्रीत-कृत-प्रामित्यादयो दोषाः, अतो यद्यपरं नित्यनिवसनीयमस्ति तदपि यदि वहमानं—व्याप्रियमाणं तदा गृह्यते । कुतः ? इत्याह—'इतरस्मिन्' अवहमाने स्पर्शन-धौत-प्रकृतादयो दोषाः । इयमत्र भावना—यदवहमानं तस्योपभोगार्थमप्कायेनोत्स्पर्शनं कुर्यात्, धावनं वा विदध्यात्, तस्य परिभोगप्रारम्भमुद्दिश्य प्रकरणं वा कुर्वीत[6], आदिग्रहणाद् धूपन-वासनादीनि वा विदधीत । यत एवं ततोऽन्यस्मिन् वहमाने ग्रहीतव्यम्[7] ॥ ६४५ ॥

अपरिभुक्तमधिकृत्य किमेतद् भविष्यति ? इति पृष्टः सन्नेवं ब्रूयात्—

**होहिइ व नियंसणियं, अण्णासइ गहण पच्छकम्माई ।**
**अत्थि नवे वि उ गिण्हइ, तहिँ तुल्ल पवाहणादोसा ॥ ६४६ ॥**

वाशब्दः परिभुक्तादपरिभुक्तस्य पक्षान्तरद्योतकः । 'भविष्यति नित्यनिवसनीयमेतत्' इत्यभिहिते यद्यपरं तादृशं नास्ति ततोऽन्यस्य तादृशस्यासति ग्रहणे त एव पश्चात्कर्मादयो दोषाः । अथास्त्यन्यत् तादृशं ततः कल्पते । तच्च यद्यपि नवमवहमानकं तथापि गृह्णाति, कुतः ? इत्याह—तुल्यास्तत्र प्रवाहनादोषाः । किमुक्तं भवति ?—यदि साधवो गृह्णन्ति न गृह्णन्ति वा तथापि स गृही[8] तयोरपरिभुक्तवस्त्रयोरेकतरमात्मप्रयोगेणैव प्रवाहयिष्यति, ततः साधूनां गृह्णतामपि न कश्चिद् दोष इति ॥ ६४६ ॥

**एमेव मज्जणाई[9], पुच्छासुद्धं तु सव्वओ पेहे ।**
**मणिमाई दाइंति व, असिट्ठे मा सेहुवादाणं ॥ ६४७ ॥**

'एवमेव' यथा नित्यनिवसनीयमभिहितं तथा मज्जनिक-क्षणोत्सविक-राजद्वारिकाण्यभिधातव्यानि । यदा पृच्छया शुद्धमिति निर्धारितं तदा 'सर्वतः' समन्तात् 'प्रेक्षेत' निभालयेत ।

---

१ °द्वारमर्हतीति राजद्वारिकं भा० ॥ २ °त्रार्थज्ञेन भा० विना ॥ ३ °वर्त्तम् तस्मिन् अन्यस्मिन् तथाविधे तादृशे परिवर्त्ते व्याप्रि° भा० ॥ ४ कल्पते, अथ नास्ति ततो न कल्पते । कुतः ? इति चेद् अत आह—अन्यस्य भा० । कल्पते, अथ नास्ति ततो न कल्पते । यतो मो० ॥ ५ वहनम् अन्तर्भूतण्यर्थत्वादव्याप्रियमाणस्य वस्त्रस्य वाहनं-व्यापारणम्, आदिग्रहणात् भा० ॥ ६ कुर्वते, आदि° भा० विना ॥ ७ °व्यम्, नावहमाने ॥ मो० ॥ ८ गृहस्थस्तयोरन्यतरद् वस्त्रमात्म° भा० ॥ ९ °णाइसु पु° ता० ॥

प्रेक्ष्यमाणे च यदि 'मण्यादिकं' मणि-हिरण्य-सुवर्णादिकं किञ्चिदर्थजातमुपनिबद्धमुपलभ्यते तदा भण्यन्ते गृहस्थाः, यथा—निरीक्षध्वं समन्तादपि वस्त्रमिदम्, यदि निरीक्ष्यमाणैस्तैः स्वयमेव दृष्टं तदा लष्टम्, नो चेत् ततः साधवः "दाइंति"त्ति दर्शयन्ति—इदं यौष्माकीणं किमप्युपनिबद्धमस्ति । आह एवमभिधीयमाने कथमधिकरणदोषो न भवति ? इति उच्यते—अल्पीयानेवायं दोषः, 'अशिष्टे' अकथिते पुनः शैक्षस्यावधावितुकामस्य तद् द्रव्यमुपादानं भवेत्, तद् गृहीत्वो[1]त्प्रव्रजेदित्यर्थः; अगारिणो वा महान्तमुड्डाहं कुर्युः, यथा—वस्त्रेण सार्द्धं स्तेनितमस्मद्द्रव्यमेभिः श्रमणैः । अत एवं प्रभूततरो दोषो मा भूदिति कथ्यते ॥६४७॥

उपसंहरन्नाह—

> एवं तु गवि[2]ट्ठेसुं, आयरिया दिंति जस्स जं नत्थि ।
> समभागेसु कएसु व, जहराइणिया भवे बी[3]ओ ॥ ६४८ ॥

'एवम्' उक्तप्रकारेणैव वस्त्रेषु गवेषितेषु यथासम्भवं लब्धेषु च गुरूणां समीपमागम्य यथावदालोच्य च वस्त्राणि विधिवद् दर्शयति, तत आचार्या यस्य साधोर्यद् जघन्यं मध्यममुत्कृष्टं वा वस्त्रं नास्ति तस्मै तद् ददतीति प्रथमः प्रकारः । पश्चार्धेन द्वितीयमाह—समेषु—तुल्येषु भागेषु कृतेषु, साधूनां सङ्ख्यामनुमाय समांशतया वस्त्रेषु विभक्तेष्विति भावः । वाशब्दः प्रकारान्तरद्योतने । 'यथारत्नाधिकं' यो यो रत्नाधिकस्तस्मै तस्मै प्रथमं दीयते इत्ययं भवेद् द्वितीयो दानप्रकार इति ॥ ६४८ ॥

उक्तो वस्त्रकल्पिकः । सम्प्रति[4] पात्रमिति पात्रकल्पिकद्वारम्, अत्रापि—

> अप्पत्ते अकहित्ता, अणहिगयऽपरिच्छणे य चउगुरुगा ।
> दोहि गुरू तवगुरुगा, कालगुरू दोहि वी लहुगा ॥ ६४९ ॥

१८ पात्र-निरूपणा

इयं गाथा तथैव (गाथा ४७१) द्रष्टव्या । नवरमिह सूत्रमाचारान्तर्गतं पात्रैषणाध्ययनम्, तत्राप्राप्ते यदि पात्रानयनाय प्रेषयति तदा प्रायश्चित्तं चत्वारो गुरुकाः[5] 'द्वाभ्यामपि गुरवः' तपसा कालेन च । अथ सूत्रं प्राप्तः परं नाद्यापि तस्यार्थः कथितस्तदा चत्वारो लघुकास्तपसा गुरवः । अथ कथितोऽर्थः परं नाद्या[6]पि सम्यगधिगतः तदाऽपि चत्वारो लघुकाः कालेन गुरवः । अथाधिगतोऽर्थः श्रद्धानविषयीकृतश्च परं नाद्यापि परीक्षितः तदाऽपि चतुर्लघवः तपसा कालेन च लघुकाः । अतः सूत्रं पाठयित्वा तस्यार्थं कथयित्वा सम्यगधिगते श्रद्धिते चार्थे पात्राय परीक्ष्य प्रेषणीय इति ॥ ६४९ ॥ तच्च पात्रं चतुर्विधम्, तद्यथा—

> नामं ठवणा दविए, भावम्मि चउव्विहं भवे पायं ।
> एसो खलु पायस्सा, निक्खेवो चउव्विहो होइ ॥ ६५० ॥

---

१ गृहीत्वा प्रव्र° भा० विना । "सो तं घेत्तुं उप्पव्वएज्जा" चूर्णौ ॥ २ °ट्ठेसू आ° ता० ॥ ३ बितिओ ता० ॥ ४ °ति पात्रकल्पि° भा० त० विना ॥ ५ गुरुकाः तप° भा० ॥ ६ °द्याप्यधिगतः अधिगतो वा न सम्यक् श्रद्धानविषयीकृतस्तदाऽपि चत्वारो लघुकाः कालेन गुरवः । अथ सम्यक् श्रद्धत्ते परमद्याप्यपरीक्षितस्तदाऽपि चतुर्लघुकाः द्वाभ्यामपि लघवः [ तपसा कालेन च ] । ततः सूत्रं पाठयित्वा भा० ॥

नामपात्रं स्थापनापात्रं द्रव्यपात्रं भावपात्रमिति चतुर्विधं पात्रम् । एष खलु पात्रस्य निक्षेपश्चतुर्विधो भवति ॥ ६५० ॥ तत्र नाम-स्थापने सुगमत्वादनादृत्य द्रव्य-भावपात्रे प्रतिपादयति—

**दव्वे तिविहं एगिंदि-विगल-पंचिंदिएहिँ निप्फन्नं ।**
**भावे आया पत्तं, जो सीलंगाण आहारो ॥ ६५१ ॥**

द्रव्यविषयं त्रिविधं पात्रम्, तद्यथा—एकेन्द्रियनिष्पन्नं विकलेन्द्रियनिष्पन्नं पञ्चेन्द्रियनिष्पन्नं च । एकेन्द्रियनिष्पन्नमलाबुकादि, विकलेन्द्रियनिष्पन्नं शुक्ति-शङ्खादि, पञ्चेन्द्रियनिष्पन्नं कुतुप-दन्त-शृङ्गपात्रादि । 'भावे' भावविषयं पात्रमात्मा । किं सर्व एव? न इत्याह—यः पूर्वोक्तानाम् (गा० ६०४) अष्टादशसहस्रसङ्ख्यानां शीलाङ्गानाम् 'आधारः' आश्रयः स आत्मा साधूनां सम्बन्धी भावपात्रमुच्यते, "पात्रं भाजनमाधारः" इति पर्यायवचनत्वात् । अत्र पुनर्भावपात्रोपयोगिना द्रव्यपात्रेणाधिकारः ॥ ६५१ ॥ तदपि त्रिविधम्—

**लाउय दारुय मट्टिय, तिविहं उक्कोस मज्झिम जहन्नं ।**
**एक्केक्कं पुण तिविहं, अहागडऽप्पं-सपरिकम्मं ॥ ६५२ ॥**

अलाबुमयं दारुमयं मृत्तिकामयम् । पुनरेकैकं त्रिविधम्—उत्कृष्टं मध्यमं जघन्यं च । उत्कृष्टं प्रतिग्रहः, मध्यमं मात्रकम्, जघन्यं टोप्परिकादि[1] । एकैकं पुनस्त्रिधा—यथाकृतमल्पपरिकर्म सपरिकर्म च ॥ ६५२ ॥ अत्र वैपरीत्यकरणे प्रायश्चित्तमाह—

**वोच्चत्थे चउलहुआ, आणाइ विराहणा य दुविहा उ ।**
**छेयण-भेयणकरणे, जा जहिँ आरोवणा भणिया ॥ ६५३ ॥**

विपर्यस्तेन ग्रहणे करणे वा चतुर्लघुकाः, उपलक्षणत्वाद् लघुमास-रात्रिन्दिवपञ्चके अपि । इदमुक्तं भवति—उत्कृष्टस्य यथाकृतस्य पात्रस्योत्पादनाय निर्गतस्तस्य योगमकृत्वाऽल्पपरिकर्मोत्कृष्टमेव गृह्णाति चतुर्लघु, सपरिकर्म वा प्रथमत एव गृह्णाति चतुर्लघु; यदा यथाकृत योगे कृतेऽपि न लभ्यते तदाऽल्पपरिकर्म गवेषणीयम्, तस्योत्पादनाय निर्गतः प्रथमत एव सपरिकर्म गृह्णाति चतुर्लघु, इति त्रीणि चतुर्लघुकानि; एवं मध्यमस्यापि त्रिषु स्थानेषु त्रीणि मासिकानि; जघन्यस्य स्थानकत्रयेऽपि त्रीणि रात्रिन्दिवपञ्चकानि । यथा यथाकृतादिविपर्यस्तग्रहणे प्रायश्चित्तमुक्तं तथोत्कृष्टादीनामपि परस्परं विपर्यस्तग्रहणे प्रायश्चित्तमवसातव्यम् । तद्यथा—उत्कृष्टस्य प्रतिग्रहस्यार्थाय निर्गतो मध्यमं मात्रकं गृह्णाति मासिकम्, जघन्यं टोप्परिकादि गृह्णाति पञ्चकम्; मध्यमस्य निर्गत उत्कृष्टं गृह्णाति चतुर्लघु, जघन्यं गृह्णाति पञ्चकम्; जघन्यस्य निर्गत उत्कृष्टं गृह्णाति चतुर्लघु, मध्यमं गृह्णाति मासिकम् । तदेवं विपर्यस्तग्रहणे प्रायश्चित्तमुक्तम्, सम्प्रति विपर्यस्तकरणेऽभिधीयते—उत्कृष्टं भङ्क्त्वा मध्यमं करोति मासिकम्, जघन्यं करोति पञ्चकम्; मध्यमे संयोज्योत्कृष्टं करोति चतुर्लघु, तदेव भङ्क्त्वा जघन्यं करोति पञ्चकम्; जघन्ये संयोज्योत्कृष्टं करोति चतुर्लघु, मध्यमं करोति मासिकम्; आज्ञादयश्च दोषाः । विराधना च द्विविधा—संयमे आत्मनि च । तथा चाह—पात्रस्य च्छेदनं भेदनं वा कुर्वत आत्मविराधना परिताप-महादुःखादिका, संयमविराधना तु तद्गता

१ "जहण्णं उल्लुंकगादि" चूर्णौ ॥ २ °त्ये धारणे भा० ॥

घुणादयो विनाशमश्नुवते । ततो या 'यस्यां' संयमविराधनायामात्मविराधनायां वा आरोपणा भणिता सा तस्यामभिधातव्या । तत्रात्मविराधनायां सामान्यतश्चतुर्गुरु, संयमविराधनायां "छक्काय चउसु लहुगा" (गा० ४६१) इत्यादिका कायनिष्पन्ना । यत एवं ततो न विधेयं विपर्यस्तकरणम् ॥ ६५३ ॥ अथ कतिभिः प्रतिमाभिः पात्रं गवेषणीयम्? उच्यते—

**उद्दिसिय पेह संगय, उज्झियधम्मे चउत्थए होइ ।**
**सव्वे जहन्न एक्को, उस्सग्गाई जयं पुच्छे ॥ ६५४ ॥**

उद्दिष्टपात्रं प्रेक्षापात्रं सङ्गतिकपात्रमुज्झितधर्मकं च चतुर्थम् इति चतस्रः पात्रगवेषणायां प्रतिमाः । गच्छवासिनः प्रतिमाचतुष्टयेनापि पात्रं गृह्णन्ति, जिनकल्पिकानामधस्तनाभ्यां द्वाभ्यामग्रहणमुपरितनयोर्द्वयोरेकतरस्यामभिग्रहः । अथ ग्रन्थगौरवभयादतिदिशन्नाह—"सव्वे जहण्ण एक्को"त्ति "यद् यस्य नास्ति वस्त्रं इत्यारभ्य (गा० ६१५) सर्वे वा गीतार्था मिश्रा वा जघन्यत एको गीतार्थः" इतिपर्यन्तं (गा० ६१८) यथा वस्त्रविषये भावितं तथा पात्रेऽपि सर्वं तदवस्थमेव भावनीयम्, नवरं पात्राभिलापः कर्त्तव्यः । "उस्सग्गाइ" त्ति कायोत्सर्गादिकं "आवाससोहि अखलंत समग उस्सग्ग०" (गा० ६१९) इत्यादिगाथोक्तं सप्रायश्चित्तं तथैव वक्तव्यम् । "जयं पुच्छे"ति यतमानः पूर्वोक्तां यतनां कुर्वन् पृच्छेत् । किमुक्तं भवति?— श्रावकेषु नावभाषितव्यम्, किं तर्हि? भावितकुलेषु, तत्रापि पात्रे दर्शिते 'कस्येदम्? किमागात्? क चाऽऽसीत्? किं भविष्यति?' इति पृच्छाचतुष्टयं तथैव कर्त्तव्यम् । किं बहुना? य एव वस्त्रस्य विधिः

"एवं तु गविट्ठेसुं, आयरिया दिंति जस्स जं नत्थि ।
समभागेसु कएसु व, जहरायणिया भवे बिइओ ॥" (गा० ६४८)

इति पर्यन्तः प्रायः स एव पात्रस्यापि द्रष्टव्यः । यस्तु विशेषः स उपरिष्टाद् दर्शयिष्यते ॥ ६५४ ॥ सम्प्रति प्रतिमाचतुष्कं विभावयिषुराह—

**उद्दिट्ठ तिगेगयरं, पेहा पुण द॒ु एरिसं भणइ ।**
**दोण्हेगयरं संगइ, वाहयई वारएणं तु ॥ ६५५ ॥**

त्रिकस्य—जघन्यादित्रयस्यैकतरं यद् गुरुसमक्षं प्रतिज्ञातं तदेव याच्यमानमुद्दिष्टपात्रमिति प्रथमा । प्रेक्षापात्रं पुनः 'दृष्ट्वा' अवलोक्य यद् 'ईदृशं मम प्रयच्छ' इति भणति तत् प्रेक्षापूर्वकं याच्यमानत्वात् प्रेक्षापात्रमिति द्वितीया । अथ तृतीया—तस्याश्च स्वरूपमाचाराङ्गे द्वितीयश्रुतस्कन्धे षष्ठाध्ययने प्रथमोद्देशके इत्थमभिहितम् (ग्रन्थाग्रम्–५००)—

अहावरा तच्चा पडिमा—से भिक्खू वा भिक्खुणी वा से जं पुण पायं जाणेज्जा, तं जहा—संगइयं वा वेजयंतियं वा (पत्र ३९९-२)।

अथ किमिदं सङ्गतिकम्? किं वा वैजयन्तिकम्? इत्याह—"दोण्हेगयरमि"त्यादि । इह कस्यचिदगारिणो द्वे पात्रे, स च तयोरेकतरं दिने दिने वारकेण वाहयति, तत्र यस्मिन् दिवसे यद् वाह्यते तत् सङ्गतिकमभिधीयते, इतरद् वैजयन्तिकम् । तयोरेकतरं यदभिग्रहविशेषेण गवेष्यते सा तृतीया प्रतिमा ॥ ६५५ ॥ चतुर्थी प्रतिपादयति—

१ तयोः सङ्गतिक-वैजयन्तिकयोरेकतरं भा० ॥

**दव्वाइ दव्व हीणाहियं तु अमुगं च मे न घेत्तव्वं ।**
**दोहि वि भावनिसिट्ठं, तमुज्झिओमइऽणोमट्ठं ॥ ६५६ ॥**

उज्झितं चतुर्धा, द्रव्य-क्षेत्र-काल-भावोज्झितभेदात् । तत्र द्रव्योज्झितं यथा—केनचिदगारिणा प्रतिज्ञातम् 'इयत्प्रमाणाद्धीनाधिकं पात्रममुकं वा कमढक-प्रतिग्रहादिकं मया न ग्रहीतव्यम्' तदेव केनचिदुपनीतम्, ततः प्रागुक्तयुक्त्या द्वाभ्यामपि भावतो निसृष्टं तद् अवभाषितमनवभाषितं वा दीयमानं द्रव्योज्झितम् ॥ ६५६ ॥ क्षेत्रोज्झितमाह—

**अमुइच्चगं न धारे, उवणीयं तं च केणई तस्स ।**
**जं वुज्झे भरहाई, सदेस बहुपायदेसे वा ॥ ६५७ ॥**

अमुकदेशोद्भवं पात्रं न धारयामि, तदेव च केनचिदुपनीतम्, तद् उभाभ्यामपि पूर्वोक्तहेतोः परित्यक्तं क्षेत्रोज्झितम् । यद्वा पात्रमुज्झेयुः 'भरतादयः' भरतः–नटः, आदिशब्दात् चारणादिपरिग्रहः, स्वदेशं गताः सन्तो बहुपात्रदेशे वा तदपि क्षेत्रोज्झितम् ॥ ६५७ ॥

कालोज्झितमाह—

**दगदोद्धिगाइ जं पुव्वकाल जुग्गं तदन्नहिं उज्झे ।**
**होहिइ व एस्सकाले, अजोग्गयमणागयं उज्झे ॥ ६५८ ॥**

दोद्धिगं–तुम्बकम्, दकस्य–जलस्य यद् भ्रियते तुम्बकं तद् दकतुम्बकम्, आदिशब्दात् तक्रतुम्बकादि च यत् पूर्वस्मिन्–ग्रीष्मादौ काले योग्यं तद् 'अन्यस्मिन्' वर्षाकालादावुज्झेत्, भविष्यति वा एष्यति कालेऽयोग्यम् अतोऽनागतमेव यदुज्झेत्, तदेतदुभयथाऽपि कालोज्झितं ज्ञातव्यम् ॥ ६५८ ॥ भावोज्झितमाह—

**लद्धूण अन्नपाए, पोराणे सो[3] उ देइ अन्नस्स ।**
**सो वि अ निच्छइ ताइं, भावुज्झिय एवमाईयं ॥ ६५९ ॥**

लब्ध्वा अन्यानि–अभिनवानि पात्राणि पुराणानि स गृही अन्यस्य कस्यचिद् ददाति सोऽपि च 'तानि' दीयमानान्यपि यदा नेच्छति तदा एवमादिकं भावोज्झितं द्रष्टव्यम् ॥ ६५९ ॥

उक्ताश्चतस्रोऽपि प्रतिमाः । अथ पात्रस्यैव विशेषविधिं बिभणिषुराह—

**ओभासणा य पुच्छा, दिट्ठे रिक्के मुहे वहंते य ।**
**संसट्ठे उक्खित्ते, सुक्के अपगासे दट्ठूणं ॥ ६६० ॥**

पात्रस्योत्पादनायामवभाषणं कर्त्तव्यम् । तत्र "पुच्छ" त्ति शिष्यः पृच्छति—किं दृष्टं पात्रं प्रशस्यम्? उताऽदृष्टम्?; एवं रिक्तमरिक्तं वा कृतमुखमकृतमुखं वा वहमानकमवहमानकं वा संसृष्टमसंसृष्टं वा उत्क्षिप्तं निक्षिप्तं वा शुष्कमार्द्रं वा प्रकाशमुखमप्रकाशमुखं वा इत्यष्टौ पृच्छाः । आसां निर्वचनं स्वयमेव सूरिरभिधास्यति । तथा "दट्ठूणं" ति 'दृष्ट्वा' चक्षुषा निरीक्ष्य पात्रं यदि निर्दोषं तदा गृह्णाति ॥ ६६० ॥

---

१ °हादिकं पात्रं मया डे० ॥ २ °कादिकं च यत् डे० । °कादिपरिग्रहः, ततश्च दकतुम्बकादिकं च यत् भा० ॥ ३ सो ददाति अ° ता० ॥ ४ °चनं पुरस्तादेवाभिधास्यति, तथा "दट्ठू° भा० ॥

अथैनामेव गाथां विवरीषुः प्रथमद्वितीयपृच्छयोरेकगाथया परिहारमाह—

**दिट्ठमदिट्ठे दिट्ठं, खमतरमियरे न दिस्सए काया ।**
**दहिमाईहि अरिक्कं, वरं तु इयरे सिया पाणा ॥ ६६१ ॥**

दृष्टा-ऽदृष्टयोः पात्रयोर्मध्ये दृष्टं क्षमतरम्, क्षमशब्द इह युक्तार्थः, ततश्च क्षमतरम्—अदृष्टादतिशयेन ग्रहीतुं युक्तम् । कुतः ? इत्याह—'इतरस्मिन्' अदृष्टे "न दीसए"त्ति प्राकृतत्वादेकवचनम् न दृश्यन्ते 'कायाः' पृथिव्यादयः । तथा दध्यादिभिरिति आदिग्रहणाद् मोदकादिपरिग्रहः[1] तैः 'अरिक्तं' पूर्णं वरम्, 'इतरस्मिन्' रिक्ते 'स्युः' भवेयुः कदाचित् 'प्राणाः'[2] कुन्थुप्रभृतयो जीवाः । यदि पुनर्न तत्र प्राणसम्भवस्तदा तदपि सम्यगुपयुज्य गृह्णतां न दोषः ॥ ६६१ ॥ अथ कृतमुखा-ऽकृतमुखयोः किं कृतमुखं ग्राह्यम् ? उताकृतमुखम् ? उच्यते—

**अकयमुहे दुप्पस्सा, बीयाई छेयणाइ दोसा वा ।**
**कुंथूमादवहंते, फासुवहंतं अओ धन्नं ॥ ६६२ ॥**

अकृतमुखे भाजने 'दुर्दर्शाः' दुःप्रत्युपेक्षा बीजादयो जीवाः, तत्र बीजानि तदुद्भवानि, आदिशब्दात् त्रसादिपरिग्रहः, छेदन-भेदनादयो वा दोषास्तत्र भवेयुः, यत एवं ततो अकृतमुखं परिहर्त्तव्यम् । अथ वहमानका-ऽवहमानकयोः कतरत् श्रेष्ठम् ? इत्याह—कुन्थ्वादयः सत्त्वा अवहमानके प्रायः सम्भवन्ति । अथ प्राशुकेन वल्लादिना वहमानकं—व्याप्रियमाणं यत् तत् पात्रं धनाय हितमिति 'धन्यं' संयमधनोपकारकमित्यर्थः ॥ ६६२ ॥

अथ संसृष्टादि पृच्छात्रयं प्रतिविधत्ते—

**एमेव य संसट्ठं, फासुअ अप्फासुएण पडिकुट्ठं ।**
**उक्खित्तं च खमतरं, जं चोल्लं फासुदव्वेणं ॥ ६६३ ॥**

'एवमेव' यथा वहमानकं तथा संसृष्टमपि । यत् प्राशुकेन भक्तादिना संसृष्टं—खरण्टितं तत् प्रशस्यम्, अप्राशुकेन पुनः संसृष्टं 'प्रतिकुष्टं' निषिद्धम् । उत्क्षिप्त-निक्षिप्तयोर्मध्ये यद् आत्मप्रयोगेणैव गृहिणा पात्रमुत्क्षिप्तं तद् निक्षिप्तात् 'क्षमतरं' युक्ततरम् । यच्चार्द्रं प्राशुकद्रव्येण तक्रादिना तत्[3] पात्रं श्रेयः, अर्थादापन्नम्—अप्राशुकेनार्द्रं परिहार्यम्[4] ॥ ६६३ ॥

अथ किं प्रकाशमुखं गृह्यताम् ? अप्रकाशमुखं वा ? उच्यते—

**जं होइ पगासमुहं, जोग्गयरं तं तु अप्पगासाओ ।**

यद् भवति प्रकाशमुखं तत् तु 'योग्यतरं' संयमा-ऽऽत्मविराधनाया अभावाद् विशेषेण योग्यम् 'अप्रकाशाद्' अप्रकाशमुखभाजनात् ॥ इत्थं पात्रस्य प्रशस्या-ऽप्रशस्यरूपतामुपवर्ण्य तस्यैव विधिशेषमभिधातुमुपक्रमते—

**तस-बीयाइ अदट्ठुं, इमं तु जयणं पुणो कुणइ ॥ ६६४ ॥**

"तस-बीयाइ"इत्यादि पश्चार्धम् । तत् पात्रं चक्षुषा प्रत्युपेक्ष्य यदि त्रस-बीजादिकं जन्तु-

---

१ °हः तैर्दध्यादिभिः 'अ° भा० ॥ २ °णाः' द्वीन्द्रियादय आगन्तुकजीवाः भा० ॥ ३ तदपि पात्रं भा० ॥ ४ °हार्यम्, यत् पुनः शुष्ककुन्थ्वादित्रसरहितं तद् निर्विवादं ग्राह्यम् ॥ ६६३ ॥ अथ भा० ॥

जातं किञ्चिद् न पश्यति तदा तद् अदृष्ट्वा 'इमां' वक्ष्यमाणां यतनां पुनः करोति ॥ ६६४ ॥

तामेवाह—

**ओमंथ पाणमाई, पुच्छा मूलगुण उत्तरगुणे य ।**
**तिट्ठाणे तिक्खुत्तो, सुद्धो ससिणिद्धमाईसु ॥ ६६५ ॥**

"ओमंथ" त्ति तत् पात्रमवाङ्मुखं कृत्वा त्रीणि स्थानानि समाहृतानि त्रिस्थानं—मणिबन्ध-हस्ततल-भूमिकालक्षणम् तत्र 'त्रिकृत्वः' त्रीन् वारान् प्रत्येकं प्रस्फोटयेत् । ततः प्राणाः—त्रसाः तान् आदिशब्दाद् जीवादीनि वा दृष्ट्वा न गृह्णाति । "पुच्छा मूलगुण उत्तरगुणे य" त्ति शिष्यः पृच्छति—के मूलगुणाः ? के वा उत्तरगुणाः ? । अत्र निर्वचनमग्रे (गा० ६६८) वक्ष्यते । "सुद्धो ससिणिद्धमाईसु" त्ति यत्राप्कायः प्रक्षिप्यमाण आसीत् तदधुनाऽपनीताप्कायतया कदाचित् सस्निग्धं भवेत्, तच्च यदि त्रिकृत्वः प्रस्फोटनादिविधिं कुर्वता न परिभावितं तथापि श्रुतज्ञानप्रामाण्यबलेन शुद्धः, आदिशब्दाद् बीजकायपरिग्रहः ॥ ६६५ ॥

एतदेव भावयति—

**दाहिणकरेण कोणं, घेत्तुत्ताणेण वाममणिबंधे ।**
**खोडेइ तिन्नि वारे, तिन्नि तले तिन्नि भूमीए ॥ ६६६ ॥**

दक्षिणेन करेणो[1]त्तानेन पात्रस्य 'कोणं' कर्णं गृहीत्वा पात्रमवाङ्मुखं कृत्वा वामहस्तस्य मणिबन्धे त्रीन् वारान् प्रस्फोटयति, ततस्त्रीन् वारान् हस्ततले, त्रीन्[2] भूमिकायामिति ॥ ६६६ ॥

**तस-बीयाइ व दिट्ठे, न गिण्हई गिण्हई उ अदिट्ठे ।**
**गहणम्मि उ परिसुद्धे, कप्पइ दिट्ठेहिँ वि बहूहिं ॥ ६६७ ॥**

नवकृत्वः प्रस्फोटिते सति त्रस-बीजादिजन्तुजातं यदि दृष्टं तदा न गृह्णाति, [3]अथादृष्टं ततो गृह्णाति । अथ महताऽपि प्रयत्नेन प्रत्युपेक्ष्यमाणानि तदा बीजादीनि सन्त्यपि शुषिरत्वान्न दृष्टानि, ततः परिशुद्धं—निर्दोषमिति मत्वा पात्रस्य ग्रहणं कृतम्, तत उपाश्रयमागतैस्तानि दृष्टानि ततः को विधिः ? इत्याह—कल्पते बहुभिरपि बीजादिभिः पश्चाद्दृष्टैरिति । किमुक्तं भवति ?—तत् पात्रमप्राशुकमिति मत्वा न भूयोऽगारिणः प्रत्यर्प्यते, न वा परिष्ठाप्यते, श्रुतप्रामाण्येन गृहीतत्वात्; किन्त्वेकान्ते बहुप्राशुके प्रदेशे तानि बीजानि यतनया परिष्ठापयेत् ॥ ६६७ ॥

अथ "पुच्छा मूलगुण उत्तरगुणे" (गा० ६६५) त्ति अस्य निर्वचनमाह—

**[4]मुहकरणं मूलगुणा, पाए निक्कोरणं च इअरे उ ।**
**गुरुगा गुरुगा लहुगा, विसेसिया चरिमँए सुद्धो ॥ ६६८ ॥**

पात्रस्य यद् मुखकरणं तद् मूलगुणाः । यत् पुनर्मुखकरणानन्तरं तदभ्यन्तरवर्तिनो गिरस्योत्किरणं तद् निक्कोरणमित्यभिधीयते तद् 'इतरे' उत्तरगुणाः । अत्र चतुर्भङ्गी—संयतार्थं कृतमुखं संयतार्थमेव चोत्कीर्णमिति प्रथमो भङ्गः, संयतार्थं कृतमुखं स्वार्थमुत्कीर्णमिति

---

१ करेण-पाणिना पात्रस्य 'कोणं' कर्णं गृहीत्वा तेनैवोत्तानेन पात्रमवाङ्मुखं भा० ॥
२ °न् वारान् भू° मो० ॥ ३ °थ न दृष्टं डे० त० कां० ॥ ४ °मओ मु° ता० ॥

द्वितीयः, स्वार्थं कृतमुखं संयतार्थमुत्कीर्णमिति तृतीयः, स्वार्थं कृतमुखं स्वार्थमेवोत्कीर्णमिति चतुर्थः । अत्र त्रिषु भङ्गेषु प्रायश्चित्तम्, तद्यथा—प्रथमे भङ्गे चत्वारो गुरुकास्तपसा कालेन च गुरवः, द्वितीयेऽपि चतुर्गुरुकास्तपसा गुरवः कालेन लघवः, तृतीये चतुर्लघुकाः कालेन गुरवः तपसा लघवः । 'चरमे' चतुर्थे भङ्गे शुद्धः, उभयस्यापि स्वार्थत्वादिति ॥ ६६८ ॥

व्याख्यातः पात्रकल्पिकः, अथावग्रहकल्पिकः प्ररूप्यते । तत्रापि "अप्पत्ते अकहित्ता" (गा० ४७१) इत्यादिगाथा तथैव द्रष्टव्या[5] । नवरं सूत्रमत्र आचारद्वितीयश्रुतस्कन्धस्य सप्तमम् अवग्रहप्रतिमानामकमध्ययनम् । अथ कतिविधोऽयमवग्रहः ? उच्यते—

अवग्रह-कल्पिकः

**देविंद-राय-गहवइउग्गहो सागारिए अ साहम्मी ।**
**पंचविहम्मि परूविएँ, नायव्वो जो जहिं कमइ ॥ ६६९ ॥**

देवेन्द्रः—शक्र ईशानो वा, स यावतः क्षेत्रस्य प्रभवति तावान् देवेन्द्रावग्रहः । राजा—चक्रवर्तिप्रभृतिको महर्द्धिकः पृथ्वीपतिः, स यावतः षट्खण्डभरतादेः क्षेत्रस्य प्रभुत्वमनुभवति तावान् राजावग्रहः । गृहपतिः—सामान्यमण्डलाधिपतिः, तस्याप्याधिपत्यविषयभूतं यद् भूमिखण्डं स गृहपत्यवग्रहः । सागारिकः—शय्यातरः, तस्य सर्वायां[1] यद् गृह-पाटकादिकं स सागारिकावग्रहः । साधर्मिकाः—समानधर्माणः साधवः, तेषां[2] सम्बन्धि सक्रोशयोजनादिकं[3] यद् आभाव्यं क्षेत्रं स साधर्मिकावग्रहः[4] । एष च पञ्चविधोऽवग्रहः । एतस्मिन् पञ्चविधेऽवग्रहे वक्ष्यमाणभेदैः प्ररूपिते सति ज्ञातव्यो विधिरित्युपस्कारः । यः 'यत्र' देवेन्द्रादौ 'क्रमते' अवतरति स तत्रावतारणीय इति सङ्ग्रहगाथासमासार्थः ॥ ६६९ ॥ साम्प्रतमेनामेव विवरीषुरमीषां पञ्चानां मध्ये कः कस्माद् बलीयान् ? इति जिज्ञासायां तावदिदमाह—

**हेट्ठिल्ला उवरिल्लेहिँ बाहिया न उ लहंति पाहन्नं ।**
**पुव्वाणुन्नाऽभिनवं, च चउसु भय पच्छिमेऽभिनवा ॥ ६७० ॥**

'अधस्तनाः' देवेन्द्रावग्रहादयः 'उपरितनैः' राजावग्रहादिभिर्यथाक्रमं बाधिताः, अत एव 'न तु' नैव लभन्ते 'प्राधान्यम्' उत्तमत्वम् । किमुक्तं भवति ?—राजावग्रहे राजैव प्रभवति न देवेन्द्रः, ततो देवेन्द्रेणानुज्ञातेऽप्यवग्रहे यदि राजा नानुजानीते तदा न कल्पते तदवग्रहे स्थातुम्; अथानुज्ञातो राज्ञा स्वविषयावग्रहः परं न गृहपतिना, ततस्तदवग्रहेऽपि न युज्यतेऽवस्थातुम्; अथानुमतं गृहपतिना स्वभूमिखण्डेऽवस्थानं परं न सागारिकेण स्वावग्रहे, ततोऽपि न कल्पते वस्तुम्; अथानुज्ञातः सागारिकेण स्वावग्रहः परं न साधर्मिकैः, तथापि न कल्पते इति; एवमुपरितनैरधस्तना बाध्यन्ते । तथा पूर्वामनुज्ञामभिनवां च चतुर्ष्ववग्रहेषु 'भज' विकल्पय, केषाञ्चित् साधूनां पूर्वानुज्ञा तदपरेषामभिनवेति भजना कार्येत्यर्थः । अथ केयं पूर्वानुज्ञा ? का वाऽभिनवानुज्ञा ? इति, उच्यते—इह योऽवग्रहः पुरातनसाधुभिरनुज्ञापितः स यत् पाश्चात्यै-

१ °त्रा यावद् गृह-वगडादिकं भा० ॥ २ डे० त० विनाऽन्यत्र—°षां सर्वतः सक्रो° भा० । °षां सक्रो° मो० ले० कां० ॥ ३ °जनं यद् भा० ॥ ४ °ग्रहः । एतस्मिन् 'पञ्चविधे' पञ्चप्रकारेऽवग्रहे प्ररूपिते सति ज्ञातव्यः, प्रक्रमादवग्रह एव । यो यत्र भा० ॥ ५ °ता द्रष्टव्याः, अत डे० त० ॥

तेनैव परिभुज्यते न भूयोऽनुज्ञाप्यते सा पूर्वानुज्ञा, [1]यथा—चिरन्तनसाधुभिर्देवेन्द्रो यदवग्रहमनुज्ञापितः सैव पूर्वानुज्ञा साम्प्रतकालीनसाधूनामप्यनुवर्त्तते न पुनर्भूयोऽप्यनुज्ञाप्यते। अभिनवानुज्ञा नाम यदा किला[2]न्यो देवेन्द्रः समुत्पद्यते तदा तत्कालवर्त्तिभिः साधुभिर्यदसा[3]वभिनवोत्पन्नतयाऽव[4]ग्रहमनुज्ञाप्यते सा तेषां साधूनामभिनवानुज्ञा तदन्येषां तु पूर्वानुज्ञैव। राजावग्रहेऽपि यो यदा चक्रवर्ती समुत्पद्यते स तत्कालवर्तिभिः साधुभिर्यदनुज्ञाप्यते सा तेषामभिनवानुज्ञा, तदपरेषां पूर्वानुज्ञा। एवं शेषनृपति-गृहपतीनामपि पूर्वा-ऽभिनवानुज्ञे भावनीये। सागारिकोऽपि प्रथमत उपागतैः साधुभिर्यदुपाश्रयमनुज्ञाप्यते सा तेषामभिनवानुज्ञा। तेषु साधुषु तत्र स्थितेषु यदन्ये साधवः समागत्य तदनुज्ञापितमवग्रहं परिभुञ्जते सा पूर्वानुज्ञा। तदेवं चतुर्ष्ववग्रहेषु पूर्वा-ऽभिनवानुज्ञयोर्भजना भाविता। तथा पश्चिमे साधर्मिकावग्रहे[5]ऽभिनवानुज्ञैव भवति न पूर्वानुज्ञा। तथाहि—यो [6]यदाऽवग्रहार्थं साधर्मिकमुपसम्पद्यते स सर्वोऽपि तदानीं तमनुज्ञाप्यैवावतिष्ठते नान्यथेत्यभिनवानुज्ञैवैका ॥ ६७० ॥

अथामीषां पञ्चानामपि भेदानाह—

**दव्वाई एक्केक्को, चउहा खित्तं तु तत्थ पाहन्ने ।**
**तत्थेव य जे दव्वा, कालो भावो अ सामित्ते ॥ ६७१ ॥**

एकैकोऽवग्रहश्चतुर्द्धा—द्रव्यतः क्षेत्रतः कालतो भावतश्च। तत्र प्रथमतः क्षेत्रावग्रहः प्ररूप्यते। कुतो हेतोः? इति चेद् उच्यते—'क्षेत्रं तु' क्षेत्रं पुनः 'तत्र' तेषु द्रव्यादिषु मध्ये प्राधान्ये वर्त्तते, इहावग्रहस्य प्ररूप्यमाणत्वात् तस्य च तत्त्वतः शक्रादिक्षेत्ररूपतयाऽभिधीयमानत्वादिति भावः। यतश्च 'तत्रैव च' क्षेत्रे यानि द्रव्याणि यश्च कालो भावश्च एतेषां त्रयाणामपि क्षेत्रमाधारभूतं स्वामित्वे वर्त्तते, क्षेत्रस्यैव सम्बन्धित्वात् तेषा[7]म्। तस्मिंश्च प्रथमं प्ररूपिते द्रव्यादयस्तदन्तर्गताः प्ररूपिता एव भवन्तीति ॥ ६७१ ॥ प्रथमत[8]ः क्षेत्रावग्र[9]हं प्ररूपयति—

**पुव्वावरायया खलु, सेढी लोगस्स मज्झयारम्मि ।**
**जा कुणइ दुहा लोगं, दाहिण तह उत्तरद्धं च ॥ ६७२ ॥**

इह सर्वस्यापि लोकस्य 'मध्यकारे' मध्यभागे मन्दरस्य पर्वतस्योपरि 'श्रेणिः' आकाशप्रदेशपङ्क्तिरेकप्रादेशिकी पूर्वापरयोर्दिशोरायता—प्रदीर्घा समस्ति, 'या' श्रेणिर्लोकमेकरूपमपि द्विधा करोति। तद्यथा—दक्षिणलोकार्द्धमुत्तरलोकार्द्धं च। तत्र दक्षिणलोकार्द्धस्य शक्रः प्रभुत्वमनुभवति, उत्तरलोकार्द्धस्य पुनरीशानकल्पनायकः। तथा दक्षिणलोकार्द्धे यान्यावलिकाप्रविष्टानि पुष्पावकीर्णानि वा विमानानि तानि शक्रस्यैवाऽऽभाव्यानि, यानि पुनरुत्तरार्द्धे तानि सर्वाण्यपि द्वितीयकल्पाधिपतेः ॥ ६७२ ॥

---

१ कां० मो० ले० विनाऽन्यत्र—**यथा—चिरन्तनकालवर्तिभिः साधु°** डे० त०। **यथा—पुरातनसाधु°** भा० ॥ २ **°योऽनु°** भा० ॥ ३ **°लाभिनवो देवे°** भा० ॥ ४ **°सावग्र°** मो० ले० कां० ॥ ५ **°ग्रहेऽनु°** भा० ॥ ६ **यो यदा यमवग्रहार्थं साधर्मिकः साधर्मिकमु°** भा०। "जो जं जाधे उवसंपज्जति साधम्मिओ साधम्मियं सो तं ताधे चेव अणुजाणावेति" इति **चूर्णौ** ॥ ७ **°षाम् इत्यतोऽपि क्षेत्रस्यैव प्राधान्यं नेतरेषाम्। तस्मिं°** भा० ॥ ८ **°त एव क्षेत्रा°** मो० ॥ ९ **°ग्रह एव प्ररूप्यते** भा० ॥

अथ यानि मध्यमश्रेण्यां तानि कस्याऽऽभवन्ति ? इत्याह—

**साधारण आवलिया, मज्झम्मि अवड्ढचंदकप्पाणं ।**
**अद्धं च परक्खित्ते, तेसिं अद्धं च सक्खित्ते ॥ ६७३ ॥**

'अपार्द्धचन्द्रकल्पयोः' अर्द्धचन्द्राकारयोः सौधर्मेशानकल्पयोः पूर्वा-ऽपरायतायां मध्यमश्रेण्यां या विमानानामावलिका सा साधारणा शक्रेशानयोः । किमुक्तं भवति ?—तस्यां मध्यमश्रेण्यां पूर्वस्यामपरस्यां च दिशि त्रयोदशस्वपि प्रस्तटेषु यानि विमानानि तानि कानिचित् शक्रस्य कानिचिदीशानस्याऽऽभाव्यानि । तत्र यानि वृत्ताकाराणि तानि सर्वाण्यपि शक्रस्यैव, यानि पुनस्त्र्यस्राणि चतुरस्राणि वा तान्येकं शक्रस्यैकमीशानस्येत्येवमुभयोरपि साधारणानि । तथा चोक्तम्—

जे दक्खिणेण इंदा, दाहिणओ आवली भवे तेसिं ।
जे पुण उत्तरइंदा, उत्तरओ आवली तेसिं ॥ ( देवेन्द्र० गा० २११ )
पुव्वेण पच्छिमेण य, जे वट्टा ते वि दाहिणल्लस्स ।
तंस चउरंसगा पुण, सामन्ना हुंति दोण्हं पि ॥ ( देवेन्द्र० गा० २१२ )

तेषां च मध्यमश्रेणिगतानां विमानानामर्द्धं 'स्वक्षेत्रे' स्वस्वकल्पसीमनि प्रतिष्ठितम्, तदपरमर्द्धं 'परक्षेत्रे' अपरकल्पसीमनीति ॥ ६७३ ॥ अथ शक्रमुद्दिश्य क्षेत्रावग्रहप्रमाणमाह—

देवेन्द्र-क्षेत्रावग्रहः

**सेढीइ दाहिणेणं, जा लोगो उड्ढ मो सकविमाणा ।**
**हेट्ठा वि य लोगंतो, खित्तं सोहम्मरायस्स ॥ ६७४ ॥**

'सौधर्मराजस्य' सौधर्मकल्पाधिपतेस्तावत् क्षेत्रमाधिपत्यविषयभूतम्—तिर्यग्दिशमधिकृत्य 'श्रेण्याः' पूर्वोक्तायाः 'दक्षिणेन' दक्षिणस्यां दिशि 'यावद् लोकः' इति तिर्यग्लोकपर्यन्तः, ऊर्ध्वदिशमाश्रित्य 'मो' पादपूरणे यावत् स्वविमानानि स्तूप-ध्वजकलितानि, अधोदिशमुद्दिश्य यावदधस्तनो लोकान्त इति ॥ ६७४ ॥

भावितो देवेन्द्रक्षेत्रावग्रहः । सम्प्रति चक्रिणः क्षेत्रावग्रहमाह—

चक्रवर्ति-क्षेत्रावग्रहः

**सरगोयरो अ तिरियं, बावत्तरिजोयणाइँ उड्ढं तु ।**
**अहलोगगाम-अधमाइ हेट्ठओ चक्किणो खित्तं ॥ ६७५ ॥**

यावत् शरस्य—बाणस्य गोचरः—विषयस्तावत् चक्रिणस्तिर्यक् क्षेत्रम् । इदमुक्तं भवति—चक्रवर्ती दिग्विजययात्रां कुर्वन् मागधादिषु तीर्थेषु यं नामाङ्कितं बाणं निसृजति स पूर्व-दक्षिणा-ऽपरसमुद्रेषु द्वादशयोजनान्तं यावद् गच्छति, एतावदन्तश्चक्रिणस्तिर्यगवग्रहः । स एव बाणः क्षुद्रहिमवत्कुमारदेवसाधनार्थं चक्रिणैव निसृष्ट ऊर्द्ध्वं द्वासप्ततियोजनानि यावद् गच्छति तावानूर्ध्वमवग्रहः । अधः पुनरधोलोकग्रामाः, तथा अधा—गर्त्ता, आदिशब्दाद् वापी-कूप-भूमिगृहादिपरिग्रहः । इयमत्र भावना—जम्बूद्वीपापरविदेहवर्त्तिनलिनावती-वप्राभिधानविजययुगलसमुद्भवा योजनसहस्रोद्वेधाः समयप्रसिद्धा येऽधोलोकग्रामास्तेषु ये चक्रवर्त्तिनः समुत्पद्यन्ते तेषां त एवाधः क्षेत्रावग्रहः, तदपरेषां तु गर्त्ता-कूप-भूमिगृहादिकमिति ॥ ६७५ ॥

---

१ थान्यावलिकाप्रविष्टानि विमा° भा० ॥ २ °स्य प्रस्तुतक्षेत्रा° भा० ॥ ३ "उड्ढं जाव खुल्लहिमवंतकुमारस्स मेराए बावत्तरि जोयणाणि, सुत्तादेसेण वा बावत्तरिं" इति चूर्णिकृतः ॥ ४ पद्योत्कृष्टोऽधः क्षेत्रावग्रहो द्रष्टव्यः, तद° भा० ॥ ५ °कमेवोत्कृष्टमधः क्षेत्रम् ॥ भा० ॥

प्ररूपितो राज्ञः क्षेत्रावग्रहः । अथ गृहपति-सागारिकयोस्तमाह—

गृहपति-सागारिकक्षेत्रावग्रहः

**गहवइणो आहारो, चउद्दिसिं सारियस्स घरवगडा ।**
**हेट्ठा अघा-ऽगडाई, उड्ढं गिरि-गेहधय-रुक्खा ॥ ६७६ ॥**

'गृहपतेः' मण्डलेश्वरस्य यावान् 'आधारः' विषयः प्रभुत्वविषयभूतश्चतसृषु दिक्षु तावानस्योत्कृष्टस्तिर्यगवग्रहः । 'सागारिकस्य' शय्यातरस्य 'गृहवगडा' गृहवृतिपरिक्षेप उत्कृष्टस्तिर्यगवग्रहः । द्वयोरपि चाधस्ताद् 'अघा-ऽगडादयः' अघा—गर्त्ता ह्रदो वा, अगडः—कूपः, आदिशब्दाद् वाप्यादयः; ऊर्द्ध्वं 'गिरि-गेहध्वज-वृक्षाः' गिरयः—पर्वताः, गृहध्वजाः—गृहोपरि वर्त्तिन्यः पताकाः, वृक्षाः—सहकारादयः । साधर्मिकाणां तु क्षेत्रावग्रह उत्कृष्टः कुतोऽपि हेतोरत्र नोक्तः, परं बृहद्भाष्ये इत्थमभिहितः—

साधर्मिकक्षेत्रावग्रहः

खित्तोग्गहो सकोसं, जोयण साहम्मियाण बोधव्वं ।
छद्दिसि जा एगदिसिं, उज्जाणं वा मडंबाई ॥

मडम्बादौ उद्यानं यावदुत्कृष्टः क्षेत्रावग्रहः । शेषं सुगमम् ॥ ॥ ६७६ ॥

चक्र्यादीनां जघन्यः क्षेत्रावग्रहः

अथ जघन्यमभिधातुकाम आह—

**अजहन्नमणुक्कोसो, पढमो जो आवि चक्कवट्टीणं ।**
**सेसनिव रोहगाइसु, जहन्नओ गहवईणं च ॥ ६७७ ॥**

'प्रथमः' देवेन्द्रावग्रहः 'अजघन्योत्कृष्टः' न जघन्यो न वा उत्कृष्टः किन्तूभयविवक्षारहितः, सर्वदैवैकरूपत्वात् । यश्चाप्यवग्रहः चक्रवर्तिनां सम्बन्धी सोऽप्यजघन्योत्कृष्टः, सर्वचक्रवर्तिनामाधिपत्यस्यैकरूपत्वात् । 'शेषनृपाणां' चक्रवर्तिव्यतिरिक्तानां नृपतीनां गृहपतीनां च रोधकादिषु जघन्यः क्षेत्रावग्रहो द्रष्टव्यः । रोधनं रोधकः—परचक्रेण नगरादेर्वेष्टनम्, आदिशब्दादन्यस्याप्येवंविधविड्वरस्य परिग्रहः । इयमत्र भावना—कोऽपि बलवान् राजा मण्डलेश्वरो वा कस्याप्यल्पबलस्य नरपतेर्गृहपतेर्वा बाह्यनीवृतमात्मसात्कृत्य यदा तदीयं नगरादिं निरुध्यावतिष्ठते तदा तस्य तावान् नगरादिमात्रको जघन्यः क्षेत्रावग्रहः ॥ ६७७ ॥

**नगराइ निरुद्ध घरे, जा या ऽणुन्ना उ दु चरिम जहन्नो ।**
**उक्कोसो उ अनियओ, अचक्किमाईचउण्हं पि ॥ ६७८ ॥**

'द्वौ चरमौ' सागारिक-साधर्मिकौ तयोरयं जघन्यः क्षेत्रावग्रहो नगरादौ—केनचिद् राज्ञा निरुद्धे बाहिरिकावास्तव्यजनैरभ्यन्तरतः प्रविशद्भिः शय्यातरगृहं साधर्मिकोपाश्रयो वा यदा

---

१ °पतेः' सामान्यमण्डलाधिपतेर्यावा° भा० ॥ २ °सृष्वपि दिक्षु तावानेवास्यो° भा० ॥ ३ "घरस्स वगडा, वगडा णाम पलिहृतं वतिपरिक्खेव इत्यनर्थान्तरम्" इति चूर्णिः ॥ ४ "उड्ढं पव्वया जोयणियादी, घरोवरिं वा चडितव्वयं होज्जा धया वा, जहा—हत्थिज्झयो इत्यादि, रुक्खो वा तम्मि चडितव्वयं होज्जा" इति चूर्णौ ॥ ५ °त्वादिति भावः । य° भा० ॥ ६ °चक्रनृपतिना नग° भा० ॥ ७ °दिकं नि° भा० ॥ ८ तावन्नग° डे० त० विना ॥ ९ °र्मिकावग्रहौ तयो° भा० ॥ १० °रादाविति, आदिशब्दात् खेटादिग्रहः । तत्र केनचिद् राज्ञा 'निरुद्धे' सर्वतो वेष्टिते सति बाहि° भा० ॥ ११ वा अपरापरैः साधर्मिकैरागच्छद्भिर्यदा भा० ॥

प्रेर्यते तदा या काचित्[1] तेषामनुज्ञा, यथा—एतावति प्रदेशे युष्माभिः स्थातव्यम् एतावत्य-स्माभिरिति स जघन्यः[2] क्षेत्रावग्रहः। उत्कृष्टः पुनरवग्रहः अनियतः, कस्याप्यल्पीयान् कस्यापि भूयानिति भावः। केषाम्? इत्याह—अचक्र्यादीनां चतुर्णामपि, यश्चक्री न भवति किन्तु सामान्यपार्थिवः स नञः पर्युदासप्रतिषेधतया तत्सदृशग्राहकत्वादचक्री भण्यते, आदिशब्दाद् गृहपत्यादयो गृह्यन्ते ॥ ६७८ ॥ अथ सागारिकावग्रहस्य विशेषत उपयोगित्वाद् विधिमाह—

सागारिकावग्रहे निवासविधिः

**अणुन्नाए वि सव्वम्मी, उग्गहे घरसामिणा।**
**तहा वि सीमं छिंदंति, साहू तप्पियकारिणो ॥ ६७९ ॥**

'गृहस्वामिना' शय्यातरेण 'भाजनधावन-कायिक्यादिव्युत्सर्जन-स्वाध्याय-ध्यानादिकं यत्र यत्र भवतां रोचते तत्र तत्र कुरुत' इत्येवं यद्यपि सर्वोऽप्यवग्रहोऽनुज्ञातस्तथापि साधवः तस्य—सागारिकस्य प्रियकारिणः—समाधिविधित्सवः 'सीमां' मर्यादां 'छिन्दन्ति' निर्धारयन्ति, व्यवस्थां स्थापयन्तीत्यर्थः ॥ ६७९ ॥ तामेव सीमामभिधत्ते—

**झाणट्ठया भायणधोवणाई, दोण्हऽट्ठया अच्छणहेउगं च।**[3]
**मिउग्गहं चेव अहिट्ठयंते, मा सो व अन्नो व करेज्ज मन्नुं ॥ ६८० ॥**

ध्यानार्थं भाजनधावनाद्यर्थं द्वयोः—उच्चार-प्रश्रवणयोरर्थाय ''अच्छण'' त्ति उपविश्यावस्थानं तद्धेतुकं च—तन्निमित्तकं 'मितावग्रहमेव' परिमितमेवावग्रहमधितिष्ठन्ति। किमुक्तं भवति?—साधवो व्यवस्थां स्थापयन्तः शय्यातरमामन्त्र्य ब्रुवते—श्रावक! वयमियति प्रदेशे ध्यानमध्यासिष्यामहे नेतः परम्, अत्र भाजनानि धाविष्यामो नान्यत्र, यदि नाम ग्लानादे रात्रावुच्चारसम्भवो भवेत् ततोऽत्र परिष्ठापयिष्यते, अत्र पुनः कायिकी व्युत्सृजिष्यते, इह पुनः साधवो भाजनरञ्जनादिकं कुर्वन्तः कियतीमपि वेलामासिष्यन्ते,[4] एवं व्यवस्थाप्य मितमेवावग्रहमधितिष्ठन्ति। कुतः?[5] इत्याह—मा 'स वा' सागारिकः 'अन्यो वा' तदीयो वयस्य-स्वजनादिः सबाल-वृद्धाकुलेन गच्छेनातिप्राचुर्येणाऽऽक्रान्ते कायिक्यादिना वा विनाशितेऽवग्रहे 'मन्युम्' अप्रीतिकं कुर्यात्। अपि च तथा साधुभिरप्रमत्तैस्तत्र स्थातव्यं यथा शय्यातरश्चिन्तयेत्—अहो! निभृतस्वभावा अमी मुनयः, यदेतावन्तोऽपि सन्तः स्वसमयोदितमाचारमाचरन्तोऽपि परस्परं विकथादिकमकुर्वन्तो निर्व्यापारा इव लक्ष्यन्ते, तत् सर्वथा कृतार्थोऽस्म्यहममीषां भगवतां शय्यायाः प्रदानेन, तीर्णप्रायो मयाऽयमपारोऽपि संसारपारावार इति ॥ ६८० ॥

प्ररूपितः क्षेत्रावग्रहः। सम्प्रति द्रव्यावग्रहमाह—

द्रव्यावग्रहः

**चेयणमचित्त मीसग, दव्वा खलु उग्गहेसु एएसु।**
**जो जेण परिग्गहिओ, सो दव्वे उग्गहो होइ ॥ ६८१ ॥**

'एतेषु' देवेन्द्राद्यवग्रहेषु यानि 'चेतनानि' स्त्री-पुरुषादीनि 'अचित्तानि' वस्त्र-पात्रादीनि 'मिश्राणि' सभाण्डोपकरणस्त्री-पुरुषादीनि यानि द्रव्याणि सः 'द्रव्ये' द्रव्यविषयोऽवग्रहः।

१ °त् सागारिकस्य साधर्मिकाणां वा अनुज्ञा भा० ॥ २ °स्माभिरपरैश्च जनैरिति स जघ° भा० ॥ ३ भाणधुवणट्ठतादी, दो° ता० ॥ ४ "एत्थ अच्छीहामो, काए वेलाए? लिहंता वा रंगेत्ता (रंगंता) वा भाणे" इति चूर्णिकारः ॥ ५ कुतो हेतोः? इति चेद् अत आह भा० ॥

कथम्भूतः ? इत्याह—यो येन शक्रादिना परिगृहीतः स तस्य सम्बन्धी द्रव्यावग्रहः । किमुक्तं भवति ?—देवेन्द्रावग्रहक्षेत्रे यानि सचित्त-ऽचित्त-मिश्राणि द्रव्याणि तानि सर्वाण्यपि देवेन्द्र-द्रव्यावग्रहः । एवं राजावग्रहादिष्वपि भावना कार्या ॥ ६८१ ॥

उक्तो द्रव्यावग्रहः, अथ कालावग्रहमाह—

कालाव-ग्रहः

**दो सागरा उ पढमो, चक्की सत्त सय पुव्व चुलसीई ।**
**सेसनिवम्मि मुहुत्तं, अहऽणुक्कोसए भयणा ॥ ६८२ ॥**

'प्रथमः' देवेन्द्रावग्रहः स द्वे सागरोपमे यावद् भवति, शक्रस्य द्विसागरोपमस्थितिकत्वात् । 'चक्की' चक्रवर्त्यवग्रहो जघन्यतः सप्त वर्षशतानि ब्रह्मदत्तवत्, उत्कर्षतः पुनश्चतुरशीतिपूर्वशतसहस्राणि भरतचक्रवर्तिवत् । तथा च चूर्णिः—

चक्कवट्टिउग्गहो जहण्णेणं सत्त वाससया बंभदत्तस्स, उक्कोसेणं चउरासीइपुव्वसयसहस्साइं भरहस्स ॥

अत्र परः प्राह—ननु ब्रह्मदत्तः कुमारतायामष्टाविंशतिं माण्डलिकत्वे षट्पञ्चाशतं दिग्विजये षोडश वर्षाण्यतिवाह्य षड् वर्षशतान्येव चक्रवर्तिपदवीमनुबभूव, भरतोऽपि सप्तसप्ततिपूर्वलक्षाणि कुमारभावमनुभूय वर्षसहस्रं माण्डलिकत्वमनुपाल्य षष्टिवर्षसहस्राणि विजययात्रायां व्यतीत्य ततः किञ्चिद् न्यूनानि षट् पूर्वलक्षाणि सार्वभौमश्रियं बुभुजे, ततः कथमनयोः सप्त वर्षशतानि चतुरशीतिपूर्वलक्षाणि च यथाक्रमं चक्रवर्त्यवग्रहः प्रतिपाद्यमानो न विरुध्यते ? नैष दोषः[3], इह योग्यतामङ्गीकृत्य भरतादयो जन्मत एव चक्रवर्तिनो मन्तव्याः, यत उत्पन्नमात्र एव चक्रवर्तिनि तदीयतथाविधाद्भुतभाग्यसम्भारसमावर्जितास्तदाभाव्यक्षेत्रनिवासिदेवताः 'उत्पन्नोऽयं सकलमहीवलयस्वामी' इति प्रमोदभाजस्तदानुकूल्यवृत्तयस्तज्जयाभिलाषिण्यस्तत्तस्यानीकप्रयुक्तप्रत्यूहापहाराय प्रवर्तन्त इति समीचीनमेव यथोक्तमवग्रहकालमानम्; अन्यथा वा बहुश्रुतैरुपयुज्य निर्वचनीयमिति । "सेसनिवम्मि मुहुत्तं"ति चक्रवर्तिनं मुक्त्वा यः शेषो नृपस्तस्य जघन्यतोऽन्तर्मुहूर्तं कालावग्रहः, कृतराज्याभिषेकस्यान्तर्मुहूर्तादूर्ध्वं मरणाद् राज्यपदपरिभ्रंशाद्वा । "उक्कोसए भयण"त्ति शेषनृपतीनामुत्कृष्टे कालावग्रहे भजना कार्या । किमुक्तं भवति ?—अन्तर्मुहूर्तादारभ्य समयवृद्ध्या वर्द्धमानानि चतुरशीतिपूर्वलक्षाणि यावद् यान्यायुःस्थानानि तेषां मध्ये यद् येन नृपतिनाऽऽयुःस्थानं निर्वर्तितं यो वा यावन्तं कालं राज्यैश्वर्यमनुभवति तस्य स उत्कृष्टः कालावग्रहः ॥ ६८२ ॥

**एवं गहवइ-सागारिए वि चरिमे जहन्नओ मासो ।**
**उक्कोसो चउमासा, दोहि वि भयणा उ कज्जम्मि ॥ ६८३ ॥**

एवं गृहपति-सागारिकयोरपि शेषनृपतिवद् जघन्य उत्कृष्टश्च कालावग्रहो द्रष्टव्यः ।

---

१ °न्यः सप्त डे० त० ॥ २ °रतायामनु° भा० ॥ ३ कां० मो० डे० विनाऽन्यत्र—दोषः, यतो योग्य° डे० त० । दोषः, अवग्रहा-ऽवग्रहवतोः स्वस्वामिभावसम्बन्धानुविद्धतया कथञ्चिद्भेदो विवक्ष्यते; यद्वा योग्य° भा० ॥ ४ °न्मन एव भा० कां० विना ॥ ५ °क्षान्तं याव° भा० ॥ ६ °व्यः, जघन्योऽन्तर्मुहूर्त्तम्, उत्कृष्टः पुनरन्तर्मुहूर्तादूर्ध्वं समयवृद्ध्या यावच्चतुरशीतिपूर्वलक्षाणि । इह भा० ॥

इह च यद्यपि शेषनृपति-गृहपति-सागारिकाणामायूंषि पूर्वकोटिपर्यवसितान्यपि सम्भाव्यन्ते तथापि चूर्णिकृता किमपि बाहुल्यादि[1] कारणमुद्दिश्य चतुरशीतिपूर्वलक्षपर्यन्तान्येवाभिहितानीति अत्रापि तदनुरोधेन तथैव व्याख्यातानि । तथा 'चरमे' साधर्मिकावग्रहे ऋतुबद्धे मासकल्पविहारिणां जघन्यो मासमेकम् उत्कृष्टो वर्षासु चतुरो मासान् कालावग्रहः । "दोसु वि भयणा उ कज्जम्मि" त्ति 'द्वयोरपि' जघन्योत्कृष्टयोः कार्ये समापतिते भजना । किमुक्तं भवति?—ग्लानादिभिः कारणैः कदाचिद् ऋतुबद्धे मासो वर्षासु चत्वारो मासा न प्रतिपूर्येरन् अतिरिक्ता वा भवेयुः ॥ ६८३ ॥

गतः कालावग्रहः । अथ भावावग्रहमाह—

**चउरो ओदइअम्मी, खओवसमियम्मि पच्छिमो होइ ।**
**मणसी करणमणुन्नं, च जाण जं जत्थ ऊ[2] कमइ ॥ ६८४ ॥** भावावग्रहः

'चत्वारः' देवेन्द्र-राज-गृहपति-सागारिकाणामवग्रहा औदयिके भावे वर्तन्ते, 'ममेदं क्षेत्रम्' इत्यादिमूर्च्छायास्तेषु सद्भावात्, तस्याश्च कषायमोहनीयोदयजन्यत्वात् । 'पश्चिमः' साधर्मिकावग्रहः स क्षायोपशमिके भावे वर्त्तते, कषायमोहनीयक्षयोपशमयुक्ततया 'ममेदं क्षेत्रम्, ममायमुपाश्रयः' इत्यादिमूर्च्छायाः साधूनामभावात् । एष भावावग्रहः । तदेवं प्ररूपितः पञ्चविधोऽप्यवग्रहः । अथ यदुक्तं द्वारगाथायाम् "पंचविहम्मि परूविए, नायव्वो जो जहिं कमइ" (गा० ६६९)त्ति तदिदानीं भाव्यते—"मणसी करणमणुन्नं चे"त्यादि । मनसि करणमनुज्ञां च जानीहि, यद् 'यत्र' देवेन्द्रावग्रहादौ 'क्रामति' अवतरति तत्र 'मनसि' चेतसि करणम् 'अनुजानीतां यस्यावग्रहः' इति मनस्येवानुज्ञापनमिति हृदयम् । यत् पुनर्वचसाऽनुज्ञाप्यते साऽनुज्ञा, अन्तर्भूतण्यर्थत्वादनुज्ञापनेति भावः । तत्र देवेन्द्र-राजावग्रहयोर्मनसैवानुज्ञापनं करोति, गृहपत्यवग्रहस्य मनसा वा वचसा वा, सागारिक-साधर्मिकावग्रहयोर्नियमाद् वचसाऽनुज्ञापना, यथा—अनुजानीतास्माकं शय्यां वस्त्र-पात्र-शैक्षादिकं वेत्यादि ॥ ६८४ ॥ अथ भावावग्रहं प्रकारान्तरेणाह—

**भावोग्गहो अहव दुहा, मइ-गहणे अत्थ-वंजणे उ मई ।**
**गहणे जत्थ उ गिण्हे, 'मणसी कर'अकरणे तिविहं ॥ ६८५ ॥**

अथवा भावावग्रहो द्विधा—मतिभावावग्रहो ग्रहणभावावग्रहश्च । तत्र 'मतिः'[4] मतिज्ञानरूपभावावग्रहो[5] भूयोऽपि द्विधा—व्यञ्जनावग्रहोऽर्थावग्रहश्च । गाथायां बन्धानुलोम्येन पूर्वमर्थशब्दस्य निर्देशः । 'ग्रहणे' ग्रहणविषयो भावावग्रहः 'यत्र तु' यस्मिन् पुनर्देवेन्द्रावग्रहादौ यदा[6] साधुः किञ्चिद् वस्तुजातं गृह्णाति सचित्तमचित्तं मिश्रं वा तस्य तदा ग्रहणभावावग्रहः । "मण-

१ "अंतोमुहुत्ताओ परेणं समयाधियातो ठितीतो जाव चउरासीतिपुव्वसतसहस्साइं, एत्थंतरे जेणं रण्णा जं आउयं निव्वत्तितं जो वा जत्तियं कालं रज्जाधिवच्चं करेति तस्स तस्स सो उक्कोसओ कालोग्गहो भवति" इति चूर्णिपाठः ॥ २ °दिकं का° भा० ॥ ३ उक्कमति ता० ॥ ४ 'मतेः' मतिज्ञानस्य भावा° भा० ॥ ५ °ग्रहो द्वि° डे० त० विना ॥ ६ कां० डे० त० विनाऽन्यत्र—°दा स एव ग्रहणरूपं भावमधिकृत्यावग्रहो ग्रहणभावावग्रहः भा० ॥

सी कर" त्ति मनसि करणस्य उपलक्षणत्वाद् अनुज्ञापनायाश्चाकरणे त्रिविधं प्रायश्चित्तम् ॥ ६८५ ॥

एतदेव सविशेषमाह—

**पंचविहम्मि परूविए, स उग्गहो जाणएण घेत्तव्वो ।**
**अन्नाए उग्गहिए, पायच्छित्तं भवे तिविहं ॥ ६८६ ॥**

'पञ्चविधे' अवग्रहे प्ररूपिते सतीदं तात्पर्यमभिधीयते—स एवंविधोऽवग्रहः 'ज्ञायकेन' पञ्चप्रकारावग्रहस्वरूपवेदिना ग्रहीतव्यो नाज्ञायकेन । कुतः ? इत्याह—'अज्ञाते' अनधिगते सति यद्यवग्रहमवगृह्णाति ततस्तस्मिन्नवगृहीते त्रिविधं प्रायश्चित्तं भवति ॥ ६८६ ॥ तदेवाह—

**इक्कड-कढिणे मासो, चाउम्मासो अ पीढ-फलएसु ।**
**कट्ठ-कलिंचे पणगं, छारे तह मल्लगाईसु ॥ ६८७ ॥**

इक्कडं—ढण्ढणी कठिनः—शरस्तम्बः तयोः संस्तारकं मासलघु । काष्ठमयेषु पीठेषु फलकेषु च प्रत्येकं चत्वारो मासलघवः । काष्ठं च—काष्ठशकलं कलिञ्चं च—वंशदलं काष्ठ-कलिञ्चं तत्र तथा 'क्षारे' भस्मनि 'मल्लकादिषु' मल्लकं—शरावम् आदिशब्दात् तृण-डगलादिपरिग्रहः, एतेषु सर्वेष्वपि 'पञ्चकं' पञ्च रात्रिन्दिवानि इति त्रिविधं प्रायश्चित्तमज्ञातावग्रहस्वरूपस्याव-ग्रहणे द्रष्टव्यम् ॥ ६८७ ॥ उक्तोऽवग्रहकल्पिकः । सम्प्रति विहारकल्पिकमाह—

## विहारकल्पिकद्वारम्

गीतार्थ-गीतार्थ-निश्रितौ विहारौ

**गीयत्थो य विहारो, बीओ गीयत्थनिस्सिओ भणिओ ।**
**इत्तो तइयविहारो, नाणुन्नाओ जिणवरेहिं ॥ ६८८ ॥**

गीतः[3]—परिज्ञातोऽर्थो यैस्ते गीतार्थाः—जिनकल्पिकादयः, तेषां स्वातन्त्र्येण यद् विहरणं स गीतार्थो नाम प्रथमो विहारः । तथा गीतार्थस्य—आचार्योपाध्यायलक्षणस्य निश्रिताः—परतन्त्रा यद् गच्छवासिनो विहरन्ति स गीतार्थनिश्रितो नाम द्वितीयो विहारो भणितः । इत ऊर्द्ध्व-मगीतार्थस्य स्वच्छन्दविहारितारूपस्तृतीयो विहारो नानुज्ञातः 'जिनवरैः' भगवद्भिस्तीर्थकरै-रिति ॥ ६८८ ॥ अथैनामेव निर्युक्तिगाथां विवृणोति—

गीतार्थ-पदव्याख्यानम्

**गीयं मुणितेगट्ठं, विदियत्थं खलु वयंति गीयत्थं ।**

---

१ इति यथाक्रमं त्रिविधमपि प्राय° भा० ॥ २ °त्थमिस्सि° ता० ॥ ३ गीतः—परिज्ञा-तोऽर्थो यैस्ते गीतार्थाः, गीतार्था एव केवलाः सन्त्यत्रेति अभ्रादेराकृतिगणत्वाद् अप्रत्यये गीतार्थो नाम मौलो विहारः । किमुक्तं भवति ?—यावन्तो विवक्षितगच्छान्तर्वर्तिनः साधवस्तावन्तः सर्वेऽपि गीतार्था न कश्चित् तन्मध्यादगीतार्थः, यथा श्रीऋषभस्वामि-प्रथमगणधरस्य ऋषभसेनस्य परिवारभूतानि द्वात्रिंशदपि सहस्राणि साधूनां गीतार्थानि इति, एवमन्येषामपि केवलगीतार्थपरिवारोपेतानां यो विहारः स गीतार्थ इत्युच्यते । द्वितीयो गीतार्थं पुरतः कृत्वा तन्निश्रया—तत्पारतन्त्र्येण यो विहारः स गीतार्थनिश्रितः 'भणितः' प्रतिपादितस्तीर्थकर-गणधरैः । क्वचित्तु "गीयत्थमीसओ" त्ति पठ्यते, तत्र *'गीतार्थमिश्रकः' गीतार्थसंवलितागीतार्थसाधुसमुदायरूपः*, शेषं प्राग्वत् । इत ऊर्द्ध्व-मपरस्तृतीयो विहारो नानुज्ञातः 'जिनवरैः' भगवद्भिस्तीर्थकरैरिति ॥ ६८८ ॥ अथैनामेव निर्युक्तिगाथां विवरीषुः प्रथमतो गीतार्थपदं व्याचष्टे इतिरूपा भा० पुस्तके टीका ॥

**गीएण य अत्थेण य, गीयत्थो वा सुयं गीयं ॥ ६८९ ॥**

[1]गीतं मुणितमिति चैकार्थम् । ततश्च विदितः–मुणितः परिज्ञातोऽर्थः छेदसूत्रस्य येन तं विदितार्थं खलु वदन्ति गीतार्थम् । यद्वा गीतेन चार्थेन च यो युक्तः स गीतार्थो भण्यते, गीता-ऽर्थावस्य विद्येते इति अभ्रादित्वाद् अप्रत्ययः । अथ गीतं किमुच्यते ?, अत आह— 'श्रुतं' सूत्रं गीतमित्यभिधीयते ॥ ६८९ ॥ एतदेव भावयति—

**गीएण होइ गीई, अत्थी अत्थेण होइ नायव्वो ।**
**गीएण य अत्थेण य, गीयत्थं तं विजाणाहि ॥ ६९० ॥**

इह सूत्रा-ऽर्थधरत्वे चतुर्भङ्गी, तद्यथा—सूत्रधरो नामैको नार्थधरः १ अर्थधरो नामैको न सूत्रधरः २ एकः सूत्रधरोऽप्यर्थधरोऽपि ३ अपरो न सूत्रधरो नार्थधरः ४ । अयं चतुर्थो भङ्ग उभयशून्यत्वादवस्तुभूतः, शेषं भङ्गत्रयमधिकृत्याह—'गीतेन' सूत्रेण केवलेन सम्यक्पठितेन गीतमस्यास्तीति गीती भवति । अर्थेन केवलेन सम्यगधिगतेनार्थी भवति ज्ञातव्यः, अर्थधर इत्युक्तं भवति । यस्तु गीतेन चार्थेन चोभयेनापि युक्तस्तं गीतार्थं विजानीहि इति । ☞ इदमत्र तात्पर्यम्—तृतीयभङ्गवर्त्येव तत्त्वतो गीतार्थशब्दमविकलमुद्वोढुमर्हति, न प्रथमद्वितीयभङ्गवर्तिनाविति ☜ ॥ ६९० ॥

अथ येषां गीतार्थानां तन्निश्रितानां वा विहारो भवति तान् दर्शयति—

गीतार्थाः गीतार्थ-निश्रिताश्च

**जिणकप्पिओ गीयत्थो, परिहारविसुद्धिओ वि गीयत्थो ।**
**गीयत्थे इड्ढिदुगं, सेसा गीयत्थनीसाए ॥ ६९१ ॥**

जिनकल्पिको नियमाद् गीतार्थः, परिहारविशुद्धिकः अपिशब्दात् प्रतिमाप्रतिपन्नको यथालन्दकल्पिकश्चावश्यंतया गीतार्थः, जघन्यतोऽप्यधीतनवमपूर्वान्तर्गताचारनामकतृतीयवस्तुकत्वादेषामिति । तथा गच्छे गीतार्थविषयमृद्धिमतोः–आचार्योपाध्याययोर्द्विकं द्रष्टव्यम्, सूत्रे मतुलोपः प्राकृतत्वात्, आचार्य उपाध्यायो वा नियमाद् गीतार्थ इत्यर्थः । एषां सर्वेषामपि स्वातन्त्र्येण विहारो विज्ञेयः । 'शेषाः' सर्वेऽपि साधवः 'गीतार्थनिश्रया' आचार्योपाध्यायलक्षणगीतार्थपारतन्त्र्येण विहरन्ति ॥ ६९१ ॥ इदमेव पश्चार्द्धं भावयति—

**आयरिय गणी इड्ढी, सेसा गीता वि होंति तन्नीसा ।**
**गच्छगय निग्गया वा, थाणनिउत्ताऽनिउत्ता वा ॥ ६९२ ॥**

---

१ गीतमिति वा मुणि° भा० ॥ २ °सूत्राभिधेयं येन भा० ॥ ३ °लुः अवधारणे 'वदन्ति' ब्रुवते गीतार्थं भा० ॥ ४ इति व्युत्पत्तेः । अथ भा० ॥ ५ डे० त० विनाऽन्यत्र—इह सूत्रार्थयोश्चतुर्भङ्गी, तद्यथा—सुत्तधरे नामेगे नो अत्थधरे, अत्थधरे नामेगे नो सुत्तधरे, एगे सुत्तधरे वि अत्थधरे वि, एगे नो सुत्तधरे नो अत्थधरे । अत्र चतुर्थो भङ्ग उभयथाऽपि शून्यः, आद्यं भङ्गत्रयं सूचयन्नाह—गीतेन भा० ॥ ६ °व्यः । यस्तु डे० त० विना ॥ ७ हस्तचिह्नान्तर्गतोऽयं पाठः भा० डे० त० पुस्तकेष्वेव वर्त्तते । एवमग्रेऽपि सर्वत्र हस्तचिह्नान्तर्गतः पाठः भा० डे० त० पुस्तकान्तर्गत एव ज्ञेयः ॥ ८ अथ कस्कः साधुरवश्यंतया गीतार्थो भवति ? इति उच्यते इत्यवतरणं भा० ॥ ९ °ति भावः । तथा भा० ॥ १० °था गच्छवासिनां 'गीतार्थे' गीता° भा० ॥ ११ °तार्थो भवति इ° भा० ॥

'आचार्यः' सूरिः 'गणी' उपाध्यायः एतौ यतः 'ऋद्धिमन्तौ' सातिशयज्ञानादिऋद्धिसम्पन्नौ, अतिशायनेऽत्र मत्वर्थीयः, यथा रूपवती कन्येत्यादौ, अतः शेषाः साधवो गीतार्था अपि तन्निश्रया विहरन्ति । अथ के ते शेषाः ? इत्याह—गच्छगता गच्छनिर्गता वा । तत्र गच्छगताः गच्छमध्यवर्त्तिनः, गच्छनिर्गताः "असिवे ओमोअरिए" इत्यादिभिः कारणैरेकाकीभूताः; अथवा 'स्थाननियुक्ताः स्थानानियुक्ता वा' स्थाने—पदे नियुक्ताः—व्यापारिताः 'स्थाननियुक्ताः' प्रवर्त्तक-स्थविर-गणावच्छेदेकाख्याः पदस्थगीतार्था इत्यर्थः, तद्विपरीता स्थानानियुक्ताः, सामान्यसाधव इत्यर्थः । एते सर्वेऽप्याचार्योपाध्यायनिश्रया विहरन्ति ॥ ६९२ ॥ कथम् ? इत्याह—

जघन्य-मध्यम-उत्कृष्टाः गीतार्थाः

**आयारपकप्पधरा, चउदसपुव्वी अ जे अ तम्मज्झा ।**
**तन्नीसाएँ विहारो, सबाल-वुड्डस्स गच्छस्स ॥ ६९३ ॥**

'आचारप्रकल्पधराः' निशीथाध्ययनधारिणो जघन्या गीतार्थाः, चतुर्दशपूर्विणः पुनरुत्कृष्टाः, 'तन्मध्यवर्त्तिनः' कल्प-व्यवहार-दशाश्रुतस्कन्धधरादयो मध्यमाः । तेषां—जघन्य-मध्यमोत्कृष्टानां गीतार्थानां निश्रया सबाल-वृद्धस्यापि गच्छस्य विहारो भवति, न पुनरगीतार्थस्य स्वच्छन्दमेकाकिविहारः कर्तुं युक्तः ॥ ६९३ ॥ कुतः ? इति चेद् उच्यते—

एकाकिविहारे दोषाः

**एगविहारी अ अजायकप्पिओ जो भवे चवणकप्पे ।**
**उवसंपन्नो मंदो, होहिइ वोसट्ठतिट्ठाणो ॥ ६९४ ॥**

एकः सन् विहरतीत्येवंशील एकविहारी, स च 'अजातकल्पिकः' अगीतार्थः, तथा च्यवनं—चारित्रात् प्रतिपतनं तस्य कल्पः—प्रकारश्च्यवनकल्पः, पार्श्वस्थादिविहार इत्यर्थः, तस्मिन् यो भवेत् स एकाकित्वम् 'उपसम्पन्नः' प्रतिपन्नः सन् 'मन्दः' सद्बुद्धिविकलो भविष्यति 'व्युत्सृष्टत्रिस्थानः' व्युत्सृष्टानि—परित्यक्तानि त्रीणि स्थानानि—ज्ञानादिरूपाणि येन स व्युत्सृष्टत्रिस्थानः । एषा निर्युक्तिगाथा ॥ ६९४ ॥ अथैनामेव विवृणोति—

एकाकिविहारिणां प्रायश्चित्तम्

**मोत्तूण गच्छनिग्गतें, गीयस्स वि एक्कगस्स मासो उ ।**
**अविगीए चउगुरुगा, चवणे लहुगा य भंगट्ठा ॥ ६९५ ॥**

---

१ एतौ ऋद्धिमन्तावभिधीयेते, ऋद्धिः—ज्ञान दर्शन-चारित्ररूपाऽतिशायिनी सम्पत् सा विद्यतेऽनयोरित्यतिशायने मतुप्रत्ययः, तत आचार्योपाध्यायौ यतः 'ऋद्धिमन्तौ' महर्द्धिकौ अतः शेषाः साधवो भा० ॥ २ °श्रया आचार्योपाध्यायपरतन्त्रतया विह° डे० ता० ॥ ३ °षाः? उच्यते—गच्छ °भा० ॥ ४ °रणैर्गच्छान्निर्गता एकाकीभूता इति यावत् । अथवा भा० ॥ ५ °युक्ताः, तद्वि° मो० के० कां० ॥ ६ °न्यतो गीता° भा० ॥ ७ के० त० विनाऽन्यत्र—°हारधरादयो मध्यमाः । तेषां जघ° ले० मो० । °हारधारकादयश्चतुर्दशपूर्वाणामर्वाक् सर्वेऽपि मध्यमा गीतार्था अवसातव्याः । यदि नामैवं गीतार्थास्त्रिविधास्ततः किम् ? इत्याह—तन्निश्रया जघन्य-मध्य° भा० ॥ ८ सोऽपि जातकल्पिको वा स्यादजातकल्पिको वा, जातकल्पिको गीतार्थः, अजातकल्पिकः पुनरगीतार्थः, तत्रेहाजातकल्पिको गृह्यते । तथा यो भवेत् 'च्यवनकल्पे' इति च्यवनं भा० । "सो पुण जायकप्पिओ वा होज्जा अजायकप्पिओ वा । जातकप्पिओ णाम गीतत्थो, अजातकप्पिओ अगीतत्थो । चवणकप्पो णाम पासत्थादिविहारो" इति चूर्णौ ॥

मुक्त्वा 'गच्छनिर्गतान्' जिनकल्पिकादीन् गीतार्थस्यापि 'एककस्य' एकाकिविहारं कुर्वतो मासलघु । 'अविगीते' अगीतार्थे एकाकिविहारिणि चत्वारो गुरुकाः । 'च्यवने' पार्श्वस्थादिविहारे यदि मनसाऽपि संकल्पं कुरुते तदा चत्वारो लघुकाः । "भंगट्ठ" त्ति अष्टौ भङ्गा अत्र कर्त्तव्याः, तद्यथा—एकाकी अजातकल्पिकश्च्यवनकल्पिकश्च १ एकाकी अजातकल्पिको न च्यवनकल्पिकः २ एकाकी जातकल्पिकश्च्यवनकल्पिकः ३ एकाकी जातकल्पिको न च्यवनकल्पिकः ४, एवमेकाकिपदेन चत्वारो भङ्गा लब्धाः; अनेकाकिपदेनापि चत्वारो लभ्यन्ते, सर्वसङ्ख्यया अष्टौ भङ्गाः । अत्राष्टमो भङ्गस्त्रिष्वपि पदेषु शुद्धत्वात् प्रायश्चित्तरहितः । शेषेषु तु यथायथमनन्तरोक्तं प्रायश्चित्तम् ॥ ६९५ ॥ एतेषु ☞सप्तस्वपि भङ्गेषु☜ वर्त्तमानस्य दोषमुपदर्शयन्नुपसम्पन्न-मन्दपदे व्याचष्टे—

एकाकिविहारिणां मन्दत्वम्

**एगागित्तमणट्ठा, उवसंपज्जइ चुओ व जो कप्पा ।**
**सो खलु सोचो मंदो, मंदो पुण दव्व-भावेणं ॥ ६९६ ॥**

य एकाकित्वम् 'अनर्थाद्' ज्ञानादिप्रयोजनाभावाद् 'उपसम्पद्यते' अङ्गीकरोति, यो वा 'च्युतः' प्रतिपतितः 'कल्पात्' संविग्नविहारात् स खलु वराको ☞द्रव्यजीवितेन जीवन्नपि☜ 'शोच्यः' शोचनीयः संयमजीवितोभावात्, मन्दश्चासौ । अथ मन्द इति कोऽर्थः ? इत्याह—मन्दः पुनः 'द्रव्य-भावेन' द्रव्यतो भावतश्च मन्दो भवतीत्यर्थः ॥ ६९६ ॥

**एक्केक्को पुण उवचय, अवचय भावे उ अवचए पगयं ।**
**तलिना बुद्धी सेट्ठा, उभयमओ केइ इच्छन्ति ॥ ६९७ ॥**

द्रव्यमन्दो भावमन्दश्चैकैकः पुनर्द्विधा—उपचयेऽपचये च । तत्रोपचयद्रव्यमन्दो नाम यः परिस्थूरतरशरीरतया गमनादिव्यापारं कर्तुं न शक्नोति । अपचयद्रव्यमन्दस्तु यः कृशशरीरतया कमपि प्रयासं न कर्त्तुमीष्टे । उपचयभावमन्दः पुनर्यो बुद्धेरुपचयेन यतस्ततः कार्यं कर्त्तुं नोत्सहते । अपचयभावमन्दस्तु यो निजसहजबुद्धेरभावेनान्यदीयाया बुद्धेरनुपजीवनेन हिता-ऽहितप्रवृत्ति-निवृत्ती न कर्त्तुमीशः स बुद्धेरपचयेन भावतो मन्दत्वादपचयभावमन्दः । अत्र

---

१ °स्यापि पुष्टालम्बनमन्तरेण 'एककस्य' भा० ॥ २ °काः, चशब्दाद् यच्चात्म-संयमविराधनादिकमापद्यते तन्निष्पन्नमपि प्रायश्चित्तमवसातव्यम् । "भंगट्ठ" भा० । "चशब्दाद् यच्चापद्यते । भंगट्ठ" इति चूर्णिकारः ॥ ३ °यथं द्विकत्रिकसंयोगनिष्पन्नं पूर्वोक्तं प्राय° भा० ॥ ४ °त्वम् "अणट्ठ" त्ति अर्थः-प्रयोजनम्, तदभावोऽनर्थः, पुष्टालम्बनं विनाऽपीति भावः, 'उप° भा० ॥ ५ °वितव्यपगमादिति भावः, मन्द° भा० ॥ ६ °भावाभ्याम्, द्रव्य° भा० ॥ ७ 'उपचयेऽपचये च' उपचयद्रव्यमन्दोऽपचयद्रव्यमन्दश्च उपचयभावमन्दोऽपचयभावमन्दश्चेत्यर्थः । तत्रोप° भा० ॥ ८ °या कमपि व्यापा° भा० ॥ ९ डे० त० विनाऽन्यत्र—°या प्रयासं न मो० ले० । °या स्वल्पमपि प्रयासं न भा० ॥ १० डे० त० विनाऽन्यत्र—°हते । अपचयभावमन्दस्तु यो बुद्धेरभावेन हिता-ऽहितप्रवृत्ति-निवृत्ती न कर्त्तुमीशः । अत्र चानेनैव मो० ले० कां० । °हते । यः पुनः सद्बुद्धेरभावेन हिता-ऽहितप्रवृत्ति-निवृत्ती न कर्त्तुमीशः स बुद्धेरपचयेन भावतो मन्दत्वादपचयभावमन्दोऽभिधीयते । अत्र चानेनैव भा० ॥

चान्येनैव भावतोऽपचयमन्देन प्रकृतम्, शेषास्तु शिष्यमतिविकाशनार्थं प्ररूपिताः । अथवा 'तल्लिना' सूक्ष्मा कुशाग्रीया बुद्धिः श्रेष्ठा, ततः सा सूक्ष्मतन्तुव्यूतपटीवद् ☞ अन्तःसारवत्त्वेन ☜ उपचितेति कृत्वा यः कुशाग्रीयमतिः स उपचयभावमन्दः । यस्तु परिस्थूरमतिः स बुद्धेः ☞ स्थूलसूत्रतया ☜ स्थूलशाटिकाया इव अन्तर्निःसारतालक्षणमपचयमधिकृत्यापचयभावमन्द इति । अतः केचिदाचार्या उभयमप्यपचयमन्दमिच्छन्ति, प्रथमव्याख्यानापेक्षया निर्बुद्धिकं द्वितीयव्याख्यानपक्षे तु परिस्थूरबुद्धिकमपचयभावमन्दमत्र प्रस्तावे गृह्णन्तीति भावः ॥ ६९७ ॥ अथ यदुक्तं निर्युक्तिगाथायाम् "होहिइ वोसट्ठतिट्ठाणो" (गा० ६९४) त्ति तत्र कानि पुनस्तानि त्रीणि स्थानानि यानि तेन परित्यक्तानि ? उच्यते—

एकाकिविहारिणां ज्ञानादिभ्यो भ्रंशः

**नाणाई तिट्ठाणा, अहवण चरणऽप्पओ पवयणं च ।**
**सुत्त-ऽत्थ-तदुभयाणि व, उग्गम उप्पायणाओ वा ॥ ६९८ ॥**

एकाकी 'ज्ञानादीनि' ज्ञान-दर्शन-चारित्राणि त्रीणि स्थानानि वक्ष्यमाणनीत्या परित्यजतीति । "अहवण" त्ति अखण्डमव्ययमथवार्थे, चरणमात्मा प्रवचनं चेति वा त्रीणि स्थानानि, तत्रागीतार्थतयाऽसौ षट्कायविराधनया चरणम्, अतिप्रचुराहारभक्षणादिना ग्लानत्वाद्यापत्त्याऽऽत्मानम्, अयतनया संज्ञाव्युत्सर्गादिना प्रवचनं च परित्यजति । अथवा सूत्रा-ऽर्थ-तदुभयानि त्रीणि स्थानानि, तत्रासावेकाकितया कदाचित् सूत्रं विस्मारयति कदाचिदर्थं कदाचित् तदुभयम् । यद्वा उद्गमो(म उ)त्पादना वाशब्दादेषणा चेति त्रीणि स्थानानि, तानि च निरङ्कुशत्वादेकाकी परित्यजतीति प्रकटमेव ॥ ६९८ ॥

अथ यथाऽसौ ज्ञान-दर्शन-चारित्राणि परिहरति तथाऽभिधित्सुराह—

**अपुव्वस्स अगहणं, न य संकिय पुच्छणा न सारणया ।**
**गुणयंते अ अदट्ठुं, सीदइ एगस्स उच्छाहो ॥६९९॥**

अपूर्वस्य श्रुतस्याग्रहणम्, एकाकितया पाठयितुरभावात् । न च शङ्किते सूत्रेऽर्थे वा कस्यापि पार्श्वे प्रच्छनम् । न वा सूत्रमर्थं वा विकुट्टयतः 'सारणा' शिक्षणा 'मैवं पाठीः' इत्यादिका भवति । तथाऽपरान् साधून् 'गुणयतः' परावर्त्तयतोऽदृष्ट्वा 'सीदति' परिहीयते 'एकस्य' एकाकिनः 'उत्साहः' सूत्रा-ऽर्थपरावर्त्तनायामभियोग इति ॥ ६९९ ॥

उक्तो ज्ञानपरिहारः । सम्प्रति दर्शन-चरणयोः परिहारमाह—

**चरगाई वुग्गाहण, न य वच्छल्लाइ दंसणे संका ।**
**थी सोहि अणुज्जमया, निप्पग्गहया य चरणम्मि ॥ ७०० ॥**

'चरकादिभिः' कणाद-सौगत-साङ्ख्यप्रभृतिभिः पाषण्डिभिः कुयुक्तियुक्ताभिरुक्तिभिर्व्युद्ग्राहणमगीतार्थतया तस्य भवेत्, न चासावेकाकितया साधर्मिकाणां वात्सल्यम् आदिशब्दा-

१ °नार्थमुच्चारितसदृशा इति कृत्वा प्ररूपिताः । अथ प्रकारान्तरेण भावत एवोपचया-ऽपचयमन्दद्वयमाह—"तलिना बुद्धी" इत्यादि । 'तलिना' भा० ॥ २ डे० त० विनाऽन्यत्र—यदुक्तं "होहिइ मो० ले० कां० । यदुक्तं सङ्ग्रहगाथायाम् "होहिइ भा० ॥ ३ °नानि प्रहत्यानि । "अह° भा० ॥ ४ तस्यैकाकिनः 'चरकादिभिः' चरक-चीरिका-सौगत° भा० ॥ ५ °भिः 'व्युद्ग्राहणं' विपरिणामनमगीतार्थतया भवेत् भा० ॥

दुपबृंहणं स्थिरीकरणं तीर्थप्रभावनां वा कुर्यात्, शङ्कादयो वा दोषा देशतः सर्वतो वा तस्य भवेयुरिति, एवं दर्शनमसौ परिहरति । तथा "थी" इति एकाकिनः स्त्रियो सम्भाषणादिनाऽऽत्म-परोभयसमुत्था दोषा भवेयुः । "सोहि" त्ति 'शोधिः' प्रायश्चित्तम्, तद् अपराधमापन्नस्य तस्य को नाम ददातु ? । अनुद्यमता च तस्य सारणादीनामभावाद् भवति । ◁ "निप्पग्गहया य" त्ति इह प्रग्रहशब्दो यद्यपि

"तुलासूत्रेऽश्वादिरश्मौ, सुवर्णे हलिपादपे ।
बन्धने किरणे बन्द्यां, भुजे च प्रग्रहं विदुः ॥"

इति वचनादनेकार्थः तथाप्यत्राश्वादिरश्मिवाचको द्रष्टव्यः, ततो यथा तया रश्म्या वल्गापरपर्याययोन्मार्गप्रस्थितस्तुरङ्गमो मार्गेऽवतार्यते तथा गुरूणामप्याज्ञावल्गया साधुः प्रमादत उत्पथप्रतिपन्नोऽपि सन्मार्गेऽवतार्यते इति प्रग्रहशब्देन गुर्वाज्ञाऽभिधीयते, ▷ प्रग्रहो नियन्त्रणा गुर्वाज्ञेति यावत्, निर्गतः प्रग्रहादिति निष्प्रग्रहः, तस्य भावो निष्प्रग्रहता, गुर्वाज्ञाया अभावात् पाणि-पाद-मुखधावनादि निःशङ्कं करोतीत्यर्थः । एवं चरणविषयः परित्याग इति ॥ ७०० ॥ किञ्च—

सामन्नजोगाणं, बज्झो गिहिसन्नसंथुओ होइ ।
दंसण-नाण-चरित्ताण मइलणं पावई एक्को ॥ ७०१ ॥

स एकाकी "सामन्न" त्ति श्रामण्य-भाविनां विनय-वैयावृत्त्यप्रभृतीनां योगानां 'बाह्यः' अनाभागी भवति । गृहिणाम्—अगारिणां संज्ञा—समाचारस्तस्यां संस्तुतः—परिचयवान् भवति । दर्शन-ज्ञान-चारित्राणां च मालिन्यमेकः सन् प्राप्नोति, तत्र बौद्धादिभिर्विपरिणामितमतेः 'अहो ! अमीषामपि दर्शनं निपुणोपपत्ति-दृष्टान्तसंवर्मितं समीचीनमिव प्रतिभासते' इत्यादिना चित्तविप्लवेनोन्मार्गप्ररूपणया वा दर्शनमालिन्यम्, विज्ञाखिल-वात्स्यायनादिपापश्रुतान्यभ्यस्यतस्तेषु बहुमानबुद्धिं कुर्वतो ज्ञानमालिन्यम्, चारित्रमालिन्यं पुनरेकाकिनः सुप्रतीतमेव ॥ ७०१ ॥ अथ गृहिसंज्ञासंस्तुतः कथं भवति ? इति उच्यते—

कयमकए गिहिकज्जे, संतप्पइ पुच्छई तहिं वसइ ।
संथव-सिणेहदोसा, भासा हिय नट्ठ सोगो अ ॥ ७०२ ॥

---

१ °त् । तदकरणे च सम्यग्दर्शनस्योज्ज्वालना कृता न भवति । शङ्का च देशतः सर्वतो वा तस्य स्यादिति, एवं भा० ॥ २ डे० त० विनाऽन्यत्र—°याः सङ्गं भाषणा° मो० ले० कां० । °याः संदर्शन-सम्भाषणादिना भुक्ता-ऽभुक्तसमुत्था भा० ॥ ३ ◁ ▷ एतच्चिह्नान्तर्गतः पाठः डे० मो० ले० प्रतिषु नास्ति ॥ ४ पूर्वार्धमिदं हैमानेकार्थसङ्ग्रहे त्रिस्वरकाण्डे १२६७ श्लोकस्योत्तरार्धरूपेण विद्यते ॥ ५ त० विनाऽन्यत्र—वल्गया उन्मार्गप्रस्थितस्तुरङ्गमो मार्गेऽवतार्यते तथेह गुरूणामप्याज्ञावल्गया साधुः प्रमादत उत्पथप्रतिपन्नोऽपि पुनरपि सन्मार्गेऽवतार्यत इति कृत्वा प्रग्रहोऽत्र गुर्वाज्ञाऽभिधीयते । निर्गतः प्रग्रहादिति निष्प्रग्रहः, तस्य भावो निष्प्रग्रहता, गुर्वाज्ञामन्तरेण स्वेच्छयैव यद् रोचते हस्त-पाद-मुखधावनादिकं तद् निःशङ्कं करोतीत्यर्थः । एवं चरणपरित्याग इति भा० ॥ ६ °यन-निमित्तशास्त्रादिपाप° भा० ॥

'गृहिकार्ये'[1] क्रय-विक्रयादावनभिमते कृतेऽभिमते वा अकृते स एकाकी विवक्षिते गृहस्थे ममत्वातिरेकतः 'संतप्यते' सन्तापमनुभवति, यथा—आः! शोभनं न समजनि यदेतेनागारिणाऽमुकं वस्तु व्यवहृतं अमुकं न व्यवहृतमित्यादि । तथा "पुच्छइ" त्ति सुख-दुःख-लाभा-ऽलाभादिकां वार्त्तां तस्य पार्श्वे पृच्छति । "तहिं वसइ" त्ति 'तत्र' तेषां गृहस्थानां मध्य एवासौ वसति । तत्र च वसतो निरन्तरं यस्तैः सह संस्तवस्तेनात्यन्तिकः स्नेहस्तेषु समुल्लसति, तद्वशात् तदीयापत्यानां यत् क्रीडापनं यच्चाक्षर-गणितादिशिक्षापणं यच्च तदुपरोधतः कुण्टलविण्टलादिकरणं तदेवमादयो दोषा द्रष्टव्याः । तथा भाषां[3] सावद्यामसावद्यगीतार्थतया ब्रूयात्, यथा—हे श्रावक! गम्यताम् आगम्यताम् उपविश्यतामित्यादि[4] । गृहिसत्के च वस्तुजाते केनचित् चौरादिना हृते स्वयं वा नष्टे तस्य स्नेहातिरेकतः 'शोकः' परिदेवनादिरूपः स्यादिति । यत एवंविधदोषोपनिपातस्तत एकाकिविहारविरहेण गच्छवासमध्यासीनेन साधुना यावज्जीवं विहरणीयम् ॥ ७०२ ॥ तस्य च गच्छस्याधिपतिराचार्यो भवति ततः शिष्यः प्रश्नयति—कीदृशस्य गच्छो दीयते ? अयोग्यस्य वा गच्छं प्रयच्छन् अयोग्यो वा गच्छं[5] धारयन् कीदृशं प्रायश्चित्तं प्राप्नोति ? उच्यते—

अयोग्यस्य गच्छं दातुः धारयितुश्च प्रायश्चित्तम्

**अबहुस्सुए अगीयत्थे निसिरए वा वि धारए व गणं ।**
**तद्देवसियं तस्सा,[6] मासा चत्तारि भारिया[7] ॥ ७०३ ॥**

अबहुश्रुतो नाम येनाऽऽचारप्रकल्पाध्ययनं नाधीतं अधीतं वा परं विस्मारितम्, अगीतार्थः येन च्छेदश्रुतार्थो न गृहीतो गृहीतो वा परं विस्मारितः, तस्मिन् अबहुश्रुतेऽगीतार्थे यः 'गणं' गच्छं 'निसृजति' निक्षिपति तस्य चत्वारो भारिका मासाः । यो वा अबहुश्रुतो अगीतार्थो वा गणं निसृष्टं धारयति तस्यापि चत्वारो मासा गुरुकाः[8] । एतच्च 'तद्दैवसिकं' तद्दिवसनिष्पन्नं प्रायश्चित्तम्, द्वितीयादिषु तु दिवसेषु यत् प्रायश्चित्तमापद्यते तदुपरिष्टाद् वक्ष्यते ॥ ७०३ ॥ अथैनामेव[9] निर्युक्तिगाथां भावयति—

**अबहुस्सुअस्स देइ व, जो वा अबहुस्सुओ गणं धरए ।**
**भंगतिगम्मि वि गुरुगा, चरिमे भंगे अणुन्नाओ ॥ ७०४ ॥**

◁[10] इहं चत्वारो भङ्गाः, तद्यथा—अबहुश्रुतो नामैकोऽगीतार्थश्च १ अबहुश्रुतो गीतार्थः २

---

१ गृहिणां कार्यं 'गृहिकार्यं' क्रयाणकक्रय-विक्रयादिकं तस्मिन्ननभि° भा० ॥ २ वसतः संस्तवः-परिचयस्तेन सार्धमालापादिना समुल्लसति, ततः क्रमशस्तस्योपरि स्नेहः-निरन्तरः प्रेमाबन्ध उपजायते, ततोऽपि स्नेहविह्वलस्य तत्प्रार्थनाभङ्गभीरुतया यदाधाकर्मादिभिर्दोषैरुपहतस्य पिण्डादेर्ग्रहणं यच्च तदुपरोधतः भा० ॥ ३ डे० त० विनाऽन्यत्र—भाषां सावद्यामगीतार्थ° मो० ले० कां० । भाषा सावद्या तां वा असावद्यगीतार्थ° भा० ॥ ४ °दि । गृहस्थस्य कस्मिंश्चिद् वस्तुजाते भा० ॥ ५ °च्छं वर्त्तापयन् भा० ॥ ६ तस्स उ मा° ता० ॥ ७ भारियया ता० ॥ ८ °काः । कियतो दिवसान्? इत्याह—'तद्दैवसिकं' तद्दिवसनिष्पन्नं तावदिदं प्रायश्चित्तम्, तत ऊर्ध्वं द्विती° भा० ॥ ९ अथैतदेव भावयति डे० त० विना ॥ १० ◁ ▷ एतच्चिह्नान्तर्गतः पाठः त० कां० विना नास्ति ॥

बहुश्रुतोऽगीतार्थः ३ बहुश्रुतो गीतार्थश्चेति ४ । तत्र ▷ अबहुश्रुतस्यागीतार्थस्य गणं ददाति चत्वारो गुरवः । अबहुश्रुतस्य गीतार्थस्य ददाति चतुर्गुरवः; अस्य च प्रमादादिना सूत्रं विस्मृतम् अर्थं पुनः स्मरतीत्यबहुश्रुतस्य गीतार्थत्वम्, यद्वा आज्ञा-धारणादिमात्रव्यवहारेणाबहुश्रुतस्यापि गीतार्थत्वमिति । बहुश्रुतस्यागीतार्थस्य ददाति चत्वारो गुरवः, अनेन चाऽऽचारप्रकल्पाध्ययनं सूत्रतोऽधीतं न पुनरर्थतः श्रुत्वा सम्यगधिगतमिति बहुश्रुतस्यागीतार्थत्वम् । बहुश्रुतस्य गीतार्थस्य ददातीत्यत्र चतुर्थे भङ्गे शुद्धः । यो वा अबहुश्रुतो गणं धारयतीत्यत्रापि चतुर्भङ्गी । तत्राबहुश्रुतोऽगीतार्थश्च सन् निसृष्टं गणं धारयति १ अबहुश्रुतो गीतार्थो धारयति २ बहुश्रुतोऽगीतार्थो धारयति ३ त्रिष्वपि चतुर्गुरुकाः । बहुश्रुतो गीतार्थो धारयतीत्यत्र शुद्धः । अत एवाह[1]—'भङ्गत्रिकेऽपि' त्रिष्वप्याद्यभङ्गेषु गणदायक-धारकयोरुभयोरपि 'गुरुकाः' चतुर्गुरवः । 'चरमे' चतुर्थे भङ्गे शुद्धत्वाद् दायको धारको वा अनुज्ञातः, न तत्र कश्चिद्दोषः ॥ ७०४ ॥ अत्र परः प्राह—यदेतत् प्रायश्चित्तं भणितं किमेतावता पर्यवसितम्? किं वा न? इति उच्यते—नेति । तथा चाह **निर्युक्तिकारः**—

**सत्तरत्तं तवो होइ, तओ छेओ पहावई ।**
**छेएणऽच्छिन्नपरियाए, तओ मूलं तओ दुगं ॥ ७०५ ॥**

सप्तरात्रमिति जातावेकवचनम्, ततोऽयमर्थः—त्रीणि सप्तरात्राणि यावत् चतुर्गुर्वादिकं तपो भवति । त्रिष्वपि सप्तरात्रेषु गतेषु यद्यनुपरतौ 'ततः' सप्तरात्रत्रयानन्तरं [2]छेदस्तयोराचार्ययोरभिमुखं प्रकर्षेण धावति प्रधावति । छेदेनापि यस्य प्रभूतत्वात् पर्यायो न च्छिद्यते तस्मिन्नाचार्ये छेदेनाच्छिन्नपर्याये एकेनैव दिवसेन मूलम् । ततो 'द्विकम्' अनवस्थाप्य-पाराञ्चिकयुगम् ॥ ७०५ ॥ अथैनं श्लोकं विवरीषुराह—

**एक्केक्कं सत्त दिणे, दाऊण अइच्छियम्मि उ तवम्मि ।**
**पंचाइ होइ छेदो, केसिंचि जहा[3] कडो तत्तो ॥ ७०६ ॥**

'एकैकं' तपश्चतुर्गुरुकादि सप्त सप्त दिनानि दत्त्वा ततस्तपःप्रायश्चित्तेऽतिक्रान्ते पञ्चकादिकश्छेदो भवति । केषाञ्चिदाचार्याणामयमादेशः—'यथा' यत एवं स्थानात् तपः 'कृतं' प्रारब्धं तत आरभ्य च्छेदोऽपि दीयते, चतुर्गुरुकादित्यर्थः । इयमत्र भावना—तयो[6]राचार्ययोः प्रथमतः सप्तरात्रं यावद् दिवसे दिवसे चतुर्गुरुकम्; यद्येतावति गते केनाप्यपरेण गीतार्थेन '[7]आचार्याः ! न कल्पते अबहुश्रुतस्यागीतार्थस्य वा गणं दातुं धारयितुं वा, [8]ततः प्रतिपद्यध्वं सम्प्रत्यपि प्रायश्चित्तम्' इति प्रज्ञापितौ स्वयं वा यद्युपरतौ ततः प्रायश्चित्तमप्युपरतम्; अथ

---

१ °वाह—"भंगतिगम्मि" इत्यादि । गणदायक-धारकयोरुभयोरप्याद्येषु त्रिषु भङ्गेषु 'गुरुकाः' भा० ॥ २ 'छेदः' सप्तमप्रायश्चित्तं तयोरभिमुखं प्रकर्षेण धावति-प्रसर्पति प्राप्नोतीत्यर्थः । छेदेनाऽपि यस्य भूयिष्ठत्वात् पर्यायो न च्छिद्यते तस्मिन् अकारप्रश्लेषादच्छिन्नपर्याये भा० ॥ ३ जहिं क° ता० ॥ ४ °पः प्रायश्चित्तं सप्त भा० ॥ ५ °व प्रायश्चित्तस्थाना° भा० ॥ ६ °योरुभयोरप्याचा° भा० ॥ ७ आर्याः ! भा० मो० छे० ॥ ८ ततो नाद्यापि किमपि विनष्टम्, प्रतिपद्यन्तां भवन्तः प्रायश्चित्तम्' इति प्रज्ञापितौ सन्तौ स्वयं भा० ॥

नोपरमेते ततो द्वितीयं सप्तरात्रं दिने दिने षड्लघवः; यदि द्वितीये सप्तरात्रेऽपि गते न प्रतिनिवृत्तौ तदा तृतीयं सप्तरात्रं प्रत्यहं षड्गुरवः। यद्येतावता स्थितौ ततः सुन्दरमेव, नो चेत् ततश्छेदः प्रधार्वति। तत्रैके आचार्याः पञ्चरात्रिन्दिवादारभ्य च्छेदं प्रस्थापयन्ति, अपरे पुनश्चतुर्गुरुकादिति। पञ्चरात्रिन्दिवप्रस्थापनायां भूयोऽप्यादेशयुगम्, तद्यथा—केचिदाचार्या लघुभ्यः केचित्तु गुरुभ्यः पञ्चरात्रिन्दिवेभ्यः छेदं प्रारभन्ते। तत्र लघुपञ्चरात्रिन्दिवप्रस्थापना प्रथमतो भाव्यते—सप्तरात्रत्रयानन्तरं तुरीयं सप्तरात्रं लघुपञ्चकच्छेदः, पञ्चमं गुरुपञ्चकः, षष्ठं लघुदशरात्रिन्दिवः, सप्तमं गुरुदशरात्रिन्दिवः, अष्टमं लघुपञ्चदशकः, नवमं गुरुपञ्चदशकः, दशमं लघुविंशतिरात्रिन्दिवः, एकादशं गुरुविंशतिरात्रिन्दिवः, द्वादशं लघुपञ्चविंशतिकः, त्रयोदशं गुरुपञ्चविंशतिकः, चतुर्दशं लघुमासिकः, पञ्चदशं गुरुमासिकः, षोडशं चतुर्लघुमासिकः, सप्तदशं चतुर्गुरुमासिकः, अष्टादशं लघुषाण्मासिकः, एकोनविंशं सप्तरात्रं गुरुषाण्मासिकच्छेद इति सर्वसङ्ख्यया त्रयस्त्रिंशं शतमहोरात्राणां भवति। गुरुपञ्चकप्रस्थापनायां तु सप्तरात्रत्रयानन्तरं सप्ताहोरात्राणि प्रथमत एव गुरुपञ्चकश्छेदः, ततः सप्ताहं लघुदशकः, एवं पूर्वोक्तविधिना गुरुदशकादयोऽपि षड्गुरुकान्तारछेदाः सप्ताहं सप्ताहं प्रत्येकं द्रष्टव्या इति; अत्र चाष्टादशभिः सप्तरात्रैः षड्विंशं शतं रात्रिन्दिवानां भवति। यदा तु यतः प्रभृति तपःप्रायश्चित्तमुपक्रान्तं तत आरभ्य च्छेदविवक्षा क्रियते तदा चतुर्थे सप्तरात्रे प्रथमत एव चतुर्गुरुकच्छेदः, पञ्चमे षड्लघुकः, षष्ठे षड्गुरुकः, एवं षड्भिः सप्तरात्रैर्द्वाचत्वारिंशद् दिनानि भवन्ति। इत्थं त्रयाणामादेशानामन्यतमेनादेशेन च्छिद्यमानोऽपि भूयस्त्वाद् यदा पर्यायो न च्छिद्यते ततो यद्यपि देशोनपूर्वकोटीप्रमाणः पर्यायोऽवशिष्यते तथापि स सर्वोऽपि युगपदेकदिनेनैव च्छिद्यते इति सर्वच्छेदलक्षणं ततो मूलम्, ततो द्वितीये दिवसेऽनवस्थाप्यम्, तृतीये पाराञ्चितम् ॥ ७०६ ॥ अथ सामान्यतस्तपःस्थानानि च्छेदस्थानानि च परस्परं किं तुल्यानि ? किं वा हीना-ऽधिकानि ? उच्यते—तुल्यानि। यत आह—

**तुल्ला चेव उ ठाणा, तव-च्छेयाणं हवंति दोण्हं पि।**
**पणगाइ पणगवुड्ढी, दोण्ह वि छम्मास निट्ठवणा ॥ ७०७ ॥**

तपश्छेदयोर्द्वयोरपि स्थानानि तुल्यान्येव भवन्ति, न हीनानि नाप्यधिकानीति एवशब्दार्थः। कुतः ? इत्याह—“पणगा” इत्यादि। यतः ‘द्वयोरपि’ तपश्छेदयोः पञ्चकं—पञ्च रात्रिन्दिवान्यादौ कृत्वा पञ्चकवृद्ध्या वर्द्धमानानां स्थानानां षण्मासेषु ‘निष्ठापना’ समापनाँ

---

१ °वति। अत्र च्छेदविषयौ द्वावादेशौ—एके आचार्या ब्रुवते—पञ्चरात्रिन्दिवादारभ्य च्छेदो दीयते, अपरे तु ‘यतः प्रभृति तपःप्रायश्चित्तं प्रक्रान्तं तत आरभ्य च्छेदोऽपि दीयते’ इति प्ररूपयन्ति। यथा च च्छेदस्य पञ्चरात्रिन्दिवप्रस्थापना-चतुर्गुरुप्रस्थापनाभ्यां द्वावादेशौ तथा लघु-गुरुप्रस्थापनाभ्यामप्यादेशयुगम्। तद्यथा भा० ॥ २ °कच्छेद भा० ॥ ३ तु तपःप्रायश्चित्तानन्तरं भा० ॥ ४ °कच्छेदः डे० त० ॥ ५ °न प्रकारेण छिद्य° भा० ॥ ६ °कानि ? इति उ° भा० ॥ ७ डे० त० विनाऽन्यत्र—°ना भवति, लघु° मो० डे०। °ना कर्त्तव्या। इय° भा० ॥

भवति । इयमत्र भावना—लघुपञ्चकादीनि गुरुषाण्मासिकपर्यन्तानि यान्येव तपःस्थानानि तान्येव च्छेदस्यापीति तुल्यान्येवानयोः स्थानानि । एतेन च लघुपञ्चकादर्वाग् गुरुभ्यः षण्मासेभ्य ऊर्ध्वं छेदो न भवतीत्यावेदितं द्रष्टव्यम् ॥ ७०७ ॥

अथ कीदृशस्य गणधरपदाध्यारोपणा विधीयते ? उच्यते—

आचार्य-पदयोग्यः

**पढिय सुय गुणिय धारिय, करणे उवउत्तो छहिँ वि ठाणेहिँ ।**
**छट्ठाणसंपउत्तो, गणपरियट्टी अणुण्णाओ ॥ ७०८ ॥**

[3]निशीथाध्ययने 'पठिते' सूत्रतः सम्पूर्णेऽप्यधीते, ततः 'श्रुते' अर्थतः सद्गुरुमुखादाकर्णिते, 'गुणिते' परावर्त्तना-ऽनुप्रेक्षाभ्यामत्यन्तमभ्यस्तीकृते, 'धारिते' चेतसि सम्यगवस्थापिते, ततः 'क[4]रणे' तदुक्ताया विधि-प्रतिषेधरूपाया आज्ञाया विधाने, 'उपयुक्तः' प्रमादरहितः, केषु ? इत्याह—'ष[5]ट्सु स्थानेषु' पञ्चसु महाव्रतेषु रात्रिभोजनविरमणषष्ठेष्वित्यर्थः, गाथायां प्राकृतत्वात् तृतीयार्थे सप्तमी । ( ग्रन्थाग्रम्—१००० ) । एतैः षड्भिः स्थानैः—पठित-श्रुत-गुणित-धारित-यथोक्तकरण-व्रतषट्कोपयोगलक्षणैः सम् इति–समुदितैः प्रकर्षेण युक्तः सम्प्रयुक्तः 'गणपरिवर्त्ती' गच्छवर्त्तापकोऽनुज्ञातस्तीर्थकर-गणधरैः ॥ ७०८ ॥ अथवा—

**सत्तऽट्ठ नवग दसगं, परिहरई जो विहारकप्पी सो ।**
**तिविहं तीहिँ विसुद्धं, परिहर नवएण भेएण ॥ ७०९ ॥**

य आचार्यादिः सप्तविधमष्टविधं नवविधं दशविधं प्रायश्चित्तं परिहरति, कथम्भूतं तत् ? इत्याह—'त्रिविधं' दान-तपः-कालप्रायश्चित्तभेदादेकैकमपि त्रिभेदं परिहारविषयेण नवकेन भेदेन परिहरति । तद्यथा—मनसा वचसा कायेन स्वयं परिहरति अन्यैः स्वपरिवारसाधुभिः परिहारयति अन्यान् परिहरतोऽनुमन्यते । याभिः प्रतिसेवनाभिः प्रतिसेविताभिः सप्तविधादिकं प्रायश्चित्तं भवति ताः करणत्रय-योगत्रयविशुद्धं परिहरतीति भावः ॥ ७०९ ॥

अथ कथं सप्तविधं प्रायश्चित्तं भवति ? इति उच्यते—आलोचनार्हं प्रतिक्रमणार्हं तदु[6]भयार्हं विवेकार्हं व्युत्सर्गार्हं तपोऽर्हं छेदार्हमिति । अथ मूला-ऽनवस्थाप्य-पाराञ्चिकानि कान्तर्भवन्ति ? उच्यते—

**दुविहो अ होइ छेदो, देसच्छेदो अ सव्वछेदो अ ।**
**मूला-ऽणवट्ठ-चरिमा, सव्वच्छेओ अतो सत्त ॥ ७१० ॥**

इह च्छेदो द्विविधो भवति—देशच्छेदश्च सर्वच्छेदश्च । पञ्चकादिकः षण्मासपर्यन्तो देशच्छेदः । मूला-ऽनवस्थाप्य-पाराञ्चिकानि पुनर्देशोनपूर्वकोटिप्रमाणस्यापि पर्यायस्य युगपत् छेदकत्वात् सर्वच्छेदः । एष द्विविधोऽपि सामान्यतश्छेदशब्देन गृह्यत इति विवक्षया सप्तविधं प्रायश्चित्तम् ॥ ७१० ॥ अथाष्टविधं कथं भवति ? इति उच्यते—

१ °स्यापीति भावः ॥ ७०७ ॥ अथ भा० त० विना ॥ २ अत्र टीकाकृदभिप्रायेण "छसु वि ठाणेसु" इति पाठो ज्ञेयः ॥ ३ आचारप्रकल्पाध्ययने 'पठि° भा० ॥ ४ °रणे' सूत्रतोऽर्थतो वाऽऽचारप्रकल्पाध्ययनोक्ताया विधि° भा० ॥ ५ °सु' प्राणातिपातविरमणादिषु पञ्चसु भा० ॥ ६ °दुभयार्ह° डे० त० ॥

**छिज्जंते वि न पावेज्ज कोइ मूलं अओ भवे अट्ठ ।**
**चिरघाई वा छेओ, मूलं पुण सज्जघाई उ ॥ ७११ ॥**

छिद्यमानेऽपि पर्याये कश्चित् चिरप्रव्रजितत्वेन मूलं यदा न प्राप्नुयात् तदा तस्य षण्मासच्छेदादूर्द्ध्वं यद् मूलं दीयते तत् प्राग्दत्तच्छेदविलक्षणत्वादष्टमं भवतीत्यष्टौ प्रायश्चित्तभेदा भवेयुः । यद्वा छेद-मूलयोस्तात्पर्यार्थोऽयमभिधीयते—चिरघाती छेदः, चिरेण पर्यायस्य च्छेदकत्वात् । सद्योघाति मूलम्, झगित्येव निःशेषपर्यायत्रोटकत्वादित्यष्टविधं प्रायश्चित्तम् ॥ ७११ ॥

अथ नवविध-दशविधे प्रतिपादयति—

**वूढे पायच्छित्ते, ठविज्जई जेण तेण नव होंति ।**
**जं वसइ खित्तबाहिं, चरिमं तम्हा दस हवंति ॥ ७१२ ॥**

येन कारणेन द्वादशवार्षिकादिके परिहारतपःप्रायश्चित्ते व्यूढे सत्यनवस्थाप्यो व्रतेषु स्थाप्यते नान्यथा, तेन मूलादनवस्थाप्यं विलक्षणमिति कृत्वाऽनवस्थाप्यप्रक्षेपाद् नव भेदा भवन्ति । यत् पुनस्तदेव परिहारतपःप्रायश्चित्तं वहमानः सन्नेकाकी सक्रोशयोजनप्रमाणक्षेत्राद् बहिर्वसति तदेतावतांशेनानवस्थाप्यात् 'चरमं' पाराञ्चितं विभिन्नमिति तस्माद् दश प्रायश्चित्तभेदा भवन्तीति ॥ ७१२ ॥ उक्तो विहारकल्पिकः । तदुक्तौ च व्याख्याता "सुत्ते अत्थे तदुभय" इत्यादिका प्रतिद्वारगाथा ( गा० ४०५ ) । अथ कल्पिकद्वारमुपसंहरन्नाह—

**एयं दुवालसविहं, जिणोवइट्ठं जहोवएसेणं ।**
**जो जाणिऊण कप्पं, सद्दहणाऽऽयरणयं कुणइ ॥ ७१३ ॥**
**सो भविय सुलभबोही, परित्तसंसारिओ पयणुकम्मो ।**
**अचिरेण उ कालेणं, गच्छइ सिद्धिं धुयकिलेसो ॥ ७१४ ॥**

'एनम्' अनन्तरोदितं 'द्वादशविधं' सूत्रा-ऽर्थादिभिर्द्वारैर्द्वादशप्रकारं 'कल्पं' साधुसमाचारं 'जिनोपदिष्टं' सर्वज्ञैरुक्तमिति, अनेन स्वमनीषिकाव्युदासमाह, 'यथोपदेशेन' उपदेशाऽवैपरीत्येन 'ज्ञात्वा' अवबुध्य[3] यः श्रद्धानमाचरणं च करोति । 'श्रद्धानं' नाम य एष कल्पः प्ररूपितः स निशङ्कमेवमेव नान्यथा, जिनोपदिष्टत्वात्; न खलु जिनोपदेशः कदाचिदपि विसंवादपदवीमासादयति । यत उक्तम्—

रागाद्वा द्वेषाद्वा, मोहाद्वा वाक्यमुच्यते ह्यनृतम् ।
यस्य तु नैते दोषास्तस्यानृतकारणं किं स्यात् ? ॥

तथा 'आचरणं' नाम यथावसरं द्वादशविधस्यापि कल्पस्यानुपालनम् । एते श्रद्धाना-ऽऽचरणे यः करोति स सिद्धिं गच्छतीति सण्टङ्कः ॥ ७१३ ॥

कथम्भूतः ? इत्याह—'भव्यः' सिद्धिगमनयोग्यः, न खल्वभव्यस्यैवंविधकल्पविषयाणि

१ °चारं जिनैः-सर्वज्ञैरुपदिष्टमिति, अनेन भा० ॥ २ °पदेशम्' उप° भा० ॥ ३ °ध्य 'श्रद्धानं' 'य एष कल्पः प्ररूपितः स निशङ्कमेवमेव नान्यथा, जिनोपदिष्टत्वात्' इति लक्षणम्, 'आचरणं च' यथावसरं द्वादशविधस्यापि कल्पस्यानुपालनम्, यः करोति स सिद्धिं गच्छतीति सण्टङ्कः ॥ ७१३ ॥ भा० त० विना ॥

सम्यग्ज्ञान-श्रद्धाना-ऽऽचरणानि समुपजायन्ते । भव्योऽपि कदाचिद् दुर्लभबोधिकः स्यादित्याह—सुलभा—सुप्रापा बोधिः—अर्हद्धर्मप्राप्तिर्यस्यासौ सुलभबोधिकः । असावपि दीर्घसंसारी स्यादित्याह—परीत्तः—परिमितः संसारो यस्यासौ परीत्तसंसारिकः । अयमपि गुरुकर्मा भवेदित्याह—प्रकर्षेण तनु—प्रकृति-स्थिति-प्रदेशा-ऽनुभावैरल्पीयः कर्म यस्यासौ 'प्रतनुकर्मा' लघुकर्मेत्यर्थः । एवंविधोऽसौ 'अचिरेणैव कालेन' जघन्यतस्तेनैव भवग्रहणेनोत्कर्षतः सप्ताष्टभवग्रहणैः[1] 'सिद्धिं' मोक्षं गच्छति धुतक्लेशः सन् । क्लिश्यन्ते—बाध्यन्ते शारीर-मानसैर्दुःखैः संसारिणः सत्त्वा एभिरिति क्लेशाः—कर्माणि, धुताः—अपनीताः क्लेशा येनासौ 'धुतक्लेशः' क्षीणाष्टकर्मेति भावः ॥ ७१४ ॥ तदेवं व्याख्यातं कल्पिकद्वारम् । अथाऽऽनुषङ्गिकमुत्सारकल्पिकद्वारमभिधित्सुः प्रस्तावनामाह—

## उत्सारकल्पिकद्वारम्

उत्सार-कल्पकर्तुः कारयितुश्च प्रायश्चित्तं दोषाश्च

**चोयग पुच्छा उस्सारकप्पिओ नत्थि तस्स किह नामं ।**
**उस्सारे चउगुरुगा, तत्थ वि आणाइणो दोसा ॥ ७१५ ॥**

कल्पिकद्वारे व्याख्याते सति लब्धावकाशो नोदकः पृच्छां करोति—भगवन्! अमीषां कल्पिकानां मध्ये किमित्युत्सारकल्पिको नोपन्यस्तः?[2] । सूरिराह—नास्त्युत्सारकल्पिक इति । भूयोऽपि परः प्राह—यद्युत्सारकल्पिको नास्ति ततः कथं तस्य नाम श्रूयते? । गुरुराह—यद्यप्युत्सारकल्पो नाम्ना व्यवह्रियते तथापि न कल्पते उत्सारयितुम्, यद्युत्सारयति तदा चत्वारो गुरुकाः । तत्राप्याज्ञादयो दोषा द्रष्टव्याः ॥ ७१५ ॥ तानेवाह—

**आणाऽणवत्थ मिच्छा, विराहणा संजमे य जोगे य ।**
**अप्पा परो पवयणं, जीवनिकाया परिच्चत्ता ॥ ७१६ ॥**

आज्ञा भगवतां तीर्थकृतामुत्सारकल्पकृता न कृता भवति । तमाचार्यमुत्सारयन्तं दृष्ट्वा अन्येऽप्याचार्या उत्सारयिष्यन्ति, तदीया अन्यदीया वा शिष्या विवक्षितशिष्यस्पर्धानुबन्धादुत्सारापयिष्यन्ति चेत्यनवस्था । मिथ्यात्वं वा प्रतिपन्नाभिनवधर्माणः सत्त्वा व्रजेयुः । विराधना 'संयमे च' संयमविषया 'योगे च' योगविषया भवति । तथा तेनोत्सारकेण 'आत्मा' स्वजीवः 'परः' उत्सारकल्पविषयः शिष्यः 'प्रवचनं'[3] तीर्थं 'जीवनिकायाः' पृथिव्यादय एतानि परित्यक्तानि भवन्तीति द्वारगाथासमासार्थः ॥ ७१६ ॥ साम्प्रतमेनामेव विवरीषुराज्ञा-ऽनवस्थे क्षुण्णत्वादनादृत्य मिथ्यात्वं दर्शयितुं दृष्टान्तमाह—

उत्सार-वाचको-दाहरणम्

**पुव्विं मलिया उस्सारवायए आगए पडिमिलंति ।**
**पडिलेह पुग्गलिंदिय, बहुजण ओभावणा तित्थे ॥ ७१७ ॥**

तत्र तावत् प्रथमं कथानकमुच्यते—इह पुरा केचिदाचार्याः पूर्वान्तर्गतसूत्रा-ऽर्थधारकतया

१ °हणैरिति भावः, 'सिद्धिं' भा० ॥ २ °न्यस्तः? विस्मृतिपथमवतारितः? आहोश्विदपरं किमपि कारणान्तरम्?। अत्राऽऽचार्यः प्रत्युत्तरयति—वत्स! नास्माभिर्विस्मृतिपथमवतारितः किन्तु नास्त्यसावुत्सारकल्पिक इति हेतोरत्र नोपात्तः। पुनरपि शिष्यः प्रश्नयति—यद्युत्सारकल्पिको नास्ति ततः भा० ॥ ३ °चनं प्रतीतं 'जीव° भा० ॥

लब्धवाचकनामधेयाः सर्वज्ञशासनसरसीरुहविकाशनैकसहस्ररश्मयः प्रावृषेण्यपयोमुच इव सरसदेशनाधाराधोरणीनिपातेन महीमण्डलमेकार्णवधर्मकमादधाना गन्धहस्तिन इव कलभयूथेन सातिशयगुणवता निजशिष्यवर्गेण परिकरिता एकं कञ्चिद् ग्राममुपागमन् । तत्र चाधिगत-जीवा-जीवादिविशेषणविशिष्टा बहवः श्रमणोपासकाः परिवसन्ति । ते च गुरूणामागमनमाकर्ण्य[1] प्रमोदमेदुरमानसाः स्वस्वपरिवारपरिवृताः सर्वेऽप्यागम्य तदीयं पादारविन्दमभिवन्द्य योजितकरकुड्मला यथावत् तत्पुरत आसाञ्चक्रिरे । ततः सूरिभिरपि रचिता यथोचिता धर्म-देशना । तदाकर्णनेन सञ्जातः संवेगसुधासिन्धुधौतान्तरमलः सकलोऽपि श्रावकलोको गतः परमपरितोषपरवशः सूरीणां गुणग्रामोपवर्णनं कुर्वन् स्वं स्वं स्थानम् । तैश्च वाचकनभोमणिभिस्तत्रायातैः प्रतिहतः खद्योतपोतकल्पानामन्ययूथिकानां प्रभाप्रसरः । ततः न शक्नुवन्ति तेऽन्ययूथिका आचार्याणां व्याख्यानादिभिर्गुणैर्जायमानं निरुपमानं महिमानं द्रष्टुम् इति सम्भूय सर्वेऽपि 'अमुमाचार्यं वादे पराजित्य तृणादपि लघु करिष्यामः' इत्येकवाक्यतया चेतसि व्यवस्थाप्य समाजग्मुः सूरीणामन्तिकम् । सूरिभिरपि निष्प्रतिमप्रतिभाप्राग्भारप्रभववाद-लब्धिसम्पन्नैर्निपुणहेतु-दृष्टान्तोपन्यासपुरस्सरं मध्येविद्वज्जनसभं कृतास्ते निष्पृष्टप्रश्न-व्याकरणाः । ततः समुच्छलितः पारमेश्वरप्रवचनगोचरः कीर्त्तिकोलाहलः, प्रादुर्भूतः परतीर्थिकानामपि परमः पराभवः, निमग्नः प्रमोदपीयूषपयोनिधावस्तोकः श्रमणोपासकलोकः, सम्पादिता सपदि विशेष-तस्तेन महती तीर्थस्य प्रभावना । ततस्ते वाचकाः कियन्तमपि कालमलङ्कृत्य तं ग्रामं प्रबोध्य मिथ्यात्वनिद्राविद्राणचैतन्यं भव्यजन्तुजातमन्यत्र कुत्रापि व्यहार्षुः । तेषु च दिनकरवदन्यत्र प्रतापलक्ष्मीमुद्वहमानेषु परतीर्थिका उलूका इवाऽऽप्तप्रसरतया घोरघूत्कारकल्पं प्रवचनावर्णवादं कर्त्तुमारब्धाः । वदन्ति च श्रावकान् प्रति—भोः श्वेताम्बरोपासकाः! यद्यस्ति भवतां कोऽपि कण्डूलमुखो वादी स प्रयच्छतु साम्प्रतमस्माकं वादमिति । श्रावकैरुक्तम्—अये! विस्मृत-मधुनैव भवतां भवान्तरानुभूतमिव तत् तादृशमद्यश्वीनमपि लाघवम् यदेवमनात्मज्ञा असमञ्जसं प्रलपत? भवत्वेवम्, तथाप्यायान्तु तावत् केचिद् वाचका वा गणिनो वा, पश्चाद् यद् भणिष्यन्ति भवन्तस्तत् करिष्याम इति ।

अथैकदा कदाचिद् निजपाण्डित्याभिमानेन त्रिभुवनमपि तृणवद्[2] मन्यमानस्तुण्डताण्डवाडम्बरेण वाचस्पतिमपि मूकमाकलयन् समागतः कतिपयशिष्यकलित उत्सारकल्पिकवाचकः । ततः प्रमुदिताः श्रावकाः गता अन्ययूथिकानामभ्यर्णे । निवेदितं तत्पुरतः—युष्माभिस्तदानीमस्माकं समीपे वादः प्रार्थित आसीत्, अस्माभिश्च भणितमभूत्—यदा वाचका अत्राऽऽगमिष्यन्ति तदा सर्वमपि युष्मदभिप्रेतं विधास्याम इति, तदिदानीमागताः सन्ति वाचकाः, कुरुत तैः सह वादगोष्ठीम्, पूरयत स्वप्रतिज्ञाम्—इत्यभिधाय गताः श्रावकाः स्वस्थानम् । तैश्चान्ययूथिकैः प्राचीनपराभव[3]प्रभवभयभ्रान्तैरेकः प्रच्छन्नवेषधारी प्रत्युपेक्षकः 'किं सहृदयः शास्त्रपरिकर्मितमतिर्वाग्मी वाचकः? किं वा न?' इति ज्ञापनाय प्रेषितः । स चाऽऽगम्योत्सारकल्पिक-

१ °र्ण्य कन्दलितामन्दानन्दातिरेकाः स्वस्वपरि° भा० ॥ २ तृणाय मन्य° भा० ॥ ३ °रा-भवभय° त० मो० ले० ॥

वाचकं प्रश्नयति—परमाणुपुद्गलस्य कतीन्द्रियाणि भवन्ति? इति । ततः स एवंपृष्टः सन् किञ्चिन्मात्रपल्लवत्वरितग्राहितया यथोक्ताव्यभिचारिविचारबहिर्मुखत्वाच्चिन्तयति—यः परमाणुपुद्गल एकस्माल्लोकचरमान्तादपरं लोकचरमान्तमेकेनैव समयेन गच्छति स निश्चितं पञ्चेन्द्रियः, कुतोऽनीदृशस्यैवंविधा गमनवीर्यलब्धिः?—इत्यभिसन्धाय प्रतिवचनमभिधत्ते—भद्र! परमाणुपुद्गलस्य पञ्चापीन्द्रियाणि भवन्तीति । तत एवंविधं निर्वचनमवधार्य स पुरुषः प्रत्यावृत्त्य गतोऽन्ययूथिकानां सन्निधौ, कथितं सर्वमपि स्वरूपं तदग्रतः । ततश्चिन्तितं स्वचेतसि तैः—नूनमयं शारदवारिद इव बहिरेव केवलं गर्जति, अन्तस्तु तुच्छ एव—इति विमृश्य समागताः सम्भूय भूयांसं लोकमीलं कृत्वा वाचकान्तिकम् । क्षुभितोऽसौ स्वतुच्छतया तावन्तं समुदायमवलोक्य, सञ्जातस्वेदबिन्दुस्तबकितशरीर आक्षिप्तः साटोपमन्यतीर्थिकैः, ग्राहितो यथाऽभिमतं पक्षविशेषम्, न शक्नोति निर्वोढुं प्रश्नितो दुस्तराणि प्रश्नोत्तराणि, न जानीते लेशतोऽपि प्रतिवक्तुम् । ततः कृतो मिथ्यादृष्टिभिः 'जितं जितमस्माभिः' इत्युत्कृष्टिकलकलः, प्रादुर्भूतं प्रवचनमालिन्यम्, मुकुलितानि श्रमणोपासकवदनकमलानि, विप्रतिपन्ना यथाभद्रकादय इति ॥

अथ गाथाक्षरार्थः—पूर्वं कैश्चिद् वाचकैरन्ययूथिकाः "मलिय" त्ति मानमर्दनेन मर्दिताः । तत उत्सारवाचके आगते सति 'प्रतिमर्दयन्ति' प्रत्यावृत्त्या मानमर्दनं कुर्वन्ति । कथम्? इत्याह—"पडिलेह" इत्यादि । तैरन्यतीर्थिकैः प्रत्युपेक्षकः पुरुषः प्रेषितः । ततः स आगत्य पृष्टवान्—'पुद्गलस्य' परमाणोः कतीन्द्रियाणि? । तेन च प्रत्युक्तम्—पञ्चेति । ततस्तैर्बहुजनमध्ये स वाचको वादे निरुत्तरीकृतः । एवम् 'अपभ्राजना' लाघवं तीर्थस्य भवति । तत्र चाभिनवधर्मणां चेतसि विकल्प उपजायते—यदि नाम वाचकोऽप्ययं न शक्नोति निर्वचनमर्पयितुं तद् नूनमेतेषां तीर्थकरेणैव न सम्यग् वस्तुतत्त्वं परिज्ञातम्, अन्यथा कथमेष एवंविधेऽर्थे व्यामुह्येत?—इति विपरिणामतो मिथ्यात्वगमनं भवेत् ॥ ७१७ ॥

भावितं मिथ्यात्वद्वारम् । अथ संयमविराधनां भावयति—

**जीवा-ऽजीवे न मुणइ, अलियभया साहए दग-मिताई ।**
**करणे अ विवज्जासं, करेइ आगाढऽणागाढे ॥ ७१८ ॥**

जीवाश्चाजीवाश्च जीवा-ऽजीवाः, तानसौ वाचनामात्ररूपेणोत्सारकल्पेनानुयोगमवगाह्यमानो वैचित्त्येन 'न मुणति' न जानीते, तदपरिज्ञानाच्च कुतः संयमसद्भावः? ।

तदुक्तं **परमर्षिभिः—**

जो जीवे वि न याणेइ, अजीवे वि न याणई ।
जीवा-ऽजीवे अयाणंतो, कह सो नाहिइ संजमं? ॥

(दशवै० अ० ४ गा० १२)

तथा अलीकम्—असत्यं तद्भयाद् दक-मृगादीन् कथयति । किमुक्तं भवति?—स उत्सारकल्पिकः पल्लवमात्रग्राहितया 'सत्यमेव भाषितव्यम्, नासत्यम्' इति कृत्वा उदकार्थिनां 'नदी-तडागादौ पानीयमस्ति? नास्ति वा?' इति पृच्छताम् 'अलीकं मा भूत्' इति कृत्वा 'विद्यते नद्यादौ जलम्' इति कथयति, मृगयाप्रस्थितानां च व्याधानां 'दृष्टं मृगवृन्दम्? न

वा ?' इति पृच्छतामलीकभयादेव 'दृष्टम्' इति कथयति, आदिशब्दात् शूकरादिपरिग्रहः; न पुनर्जानीते यथा—"सच्चा वि सा न वत्तवा, जओ पावस्स आगमो" ( दशवै० अ० ७ गा० ११ ) त्ति; ततश्च जलगतसूक्ष्मजन्तुजातस्य मृगादीनां वा यद् व्यपरोपणं ते करिष्यन्ति तत् सर्वमुत्सारकल्पकारकः प्राप्नोति । तथा 'करणे' चारित्रे उत्सर्गा-ऽपवादविधिमजानन् यद् विपर्यासं करोति, तद्यथा—'आगाढे' ग्लानादिकार्ये 'अनागाढं' त्रिकृत्वः परिभ्रमणादिलक्षणम्, अनागाढे वा 'आगाढं' सद्यःप्रतिसेवनात्मकं करोति । एषा सर्वाऽपि संयमविराधना ॥ ७१८ ॥ अथ योगविराधनामाह—

**तुरियं नाहिज्जंते, नेव चिरं जोगजंतिता होंति ।**
**लद्धो महंतसद्दो, त्ति केइ पासाइँ गेण्हंति ॥ ७१९ ॥**
**कमजोगं न वि जाणइ, विगईओ का य कत्थ जोगम्मि ।**
**अण्णस्स वि दिंति तहा, परंपरा घंटदिट्ठंतो ॥ ७२० ॥**

'अनुज्ञातोऽस्माकं गुरुभिः सकलोऽपि श्रुतस्कन्धः, ततः किमनेन पठितेन कार्यम् ?' इति कृत्वा ते शिष्याः 'त्वरितं' शीघ्रं नाधीयते, नैव च ते चिरं योगैः—श्रुताध्ययननिबन्धनतपोविशेषैः यन्त्रिताः—नियमिता भवन्ति, एकदिनेनापि प्रभूतसूत्रार्थवाचनानुज्ञाप्रदानात् । तथा 'लब्धोऽस्माभिः 'गणिरयम्, वाचकोऽयम्' इति महान् शब्दः, ततः कुतो हेतोर्वयमत्राऽऽचार्यसन्निधौ निष्फलं तिष्ठामः ?' इति परिभाव्य 'केचिद्' गुरुचरणपर्युपासनापरिभग्नाः पार्श्वानि गृह्णन्ति, पार्श्वतो ग्रामेषु यथास्वेच्छं विहरन्तीति भावः ॥ ७१९ ॥

"कमजोगं" इति प्राकृतत्वाद् व्यत्यासेन पूर्वापरनिपातः, ततो योगक्रमं 'नापि' नैव जानाति, यथा—अस्मिन् योगे एतावन्त्याचाम्लानि इयन्ति निर्विकृतिकानि इत्थं वा उद्देशादयः क्रियन्ते । तथा विकृतयः काः कुत्र योगे कल्पन्ते ? न वा ? इत्येवमपि न जानाति, यथा—कल्पिकाकल्पिक-निशीथादियोगेषु न विसृज्यन्ते काश्चनापि विकृतयः, व्याख्याप्रज्ञप्तियोगेषु पुनरवगाहिमविकृतिर्विसृज्यते, दृष्टिवादयोगेषु तु मोदकः ।

तथा चाऽऽह्वाऽस्यैव कल्पाध्ययनस्य चूर्णिकृत्—

जहा कप्पियाकप्पिय-निसीहाईणं विगईओ न विसज्जिज्जंति, पन्नत्तीए ओगाहिमगविगई विसज्जिज्जइ, दिट्ठीवाए मोदगो त्ति ।

**निशीथचूर्णिकृत्** पुनराह—

जोगो दुविहो—आगाढो अणागाढो वा । आगाढतरा जम्मि जोगे जयणा सो आगाढो, यथा—भगवतीत्यादि । इतरो अणागाढो, यथा—उत्तराध्ययनादि । आगाढे ओगाहिमगवज्जाओ नव विगईओ वज्जिज्जंति, दसमाए भयणा । महाकप्पसुए एक्का परं मोदगविगई कप्पइ । सेसा आगाढेसु सव्वविगईओ न कप्पंति । अणागाढे पुण दस वि विगईओ

१ ते उत्सारकल्पविषयभूताः शिष्याः 'अधिरूढा वयं वाचकपदवीम्, किमस्माकं पठितेन ?' इति कृत्वा न 'त्वरितं' शीघ्रमधीयते, नैव भा० ॥ २ °गं" इति योगक्रमं त० कां० विना ॥ ३ °चामाम्ला° भा० ॥ ४ उद्देशः समुद्देशोऽनुज्ञा वा क्रियते । तथा" भा० ॥

भइयाओ, जओ गुरुअणुण्णाए कप्पंति अणणुण्णाए पुण न कप्पंति त्ति ।

एवंविधां योगव्यवस्थामजानन् यदसौ विराधयति सा योगविराधना । तथा[1] "अन्नस्स वि दिंति तह"त्ति ते उत्सारकल्पिकाः 'अन्यस्यापि' स्वशिष्यादेः 'तथैव' उत्सारकल्पेनैव वाचनां प्रयच्छन्ति, सोऽप्यपरेषां तथैव इत्येवम् ☞ उत्सारकल्पे प्रवाहतः क्रियमाणे ☜ परम्परया सूत्रार्थव्यवच्छेदः प्राप्नोति । घण्टादृष्टान्तश्चात्र वक्तव्यः ॥ ७२० ॥

तमेवोपनययुक्तं गाथात्रयेणाह—

सोपनयं घण्टाशृगालोदाहरणम्

> उच्छुकरणोव कोट्टुगपडणं घंटा सियालनासणया ।
> विगमाई पुच्छ परंपराएँ नासंति जा सीहो ॥ ७२१ ॥
> पडियरिउं सीहेणं, स हओ आसासिया मिगगणा य ।
> इय कइवयाइँ जाणइ, पयाणि पढमिल्लुगुस्सारी ॥ ७२२ ॥
> किं पि त्ति अपुट्ठो, पच्चंतु[3]स्सारणे अवोच्छित्ती ।
> गीताऽऽगमण खरंटण, पच्छित्तं किरिया चेव ॥ ७२३ ॥

अत्र कथानकम्—एगस्स गाहावइस्स उच्छुवाडो बहुसइओ निप्फन्नो, तं सियाला पइसरित्ता खाइंति । ताहे सो उच्छुसामी सियालगहणनिमित्तं तस्स उच्छुवाडस्स परिपेरंतेसु चउद्दिसिं खाइयं खणावेइ । तत्थ एगो सियालो पडिओ । सो वराओ गिण्हित्ता कण्णे पुच्छं च कप्पित्ता दीवियचम्मेण वेढित्ता घंटं आबंधित्ता[4] विसज्जिओ । सो नासंतो सियालेहिं दिट्ठो दूरओ । ते सियाला 'अन्नारिसो' त्ति काउं भएण पलाया । ते विरूएहिं दिट्ठा, पुच्छिया—किं नासह ? त्ति । तेहिं कहियं—अपुव्वं सरं करेमाणं किं पि अपुव्वं भूयं एति । ते वि भएण पलायंता वरक्खूहिं दिट्ठा, पुच्छिया । तेहिं कहियं—किं पि किर एति, सिग्घं नासह । ते पलायंता चित्तएहिं दिट्ठा, पुच्छिया । कहियं—किं पि किर एति, तुरियं पलायह । ते वि पलायंता सीहेण पुच्छिया । कहियं तेहिं । सीहो चिंतेइ—मा पाणियसद्देण उवाहणाओ मुयामि, गवेसामि ताव । तेण सणियं पडियरियत्ता 'सियालो' त्ति हओ घंटासियालो 'कीस आउलीकया मो ?' त्ति रोसेणं । ते अ सियालादयो मिया आसासिया—मा भायह, हओ सो वराओ मए दीवियचम्मोणद्धो घंटासियालो । केण वि अवराहे घेत्तुं तहाकओ । एस दिट्ठंतो ॥

अयमत्थोवणओ—जस्स तं उस्सारिज्जति सो जावतिएहिं दिवसेहिं जोगो समप्पइ तावति दिवसे कतिवयाणं आलावगाणं किंचि सुत्तफासियं सिक्खित्ता पच्चंतं गंतूण गच्छपागड्डित्तणं करेति, अन्नेसिं च उस्सारेति । ते वि उस्सारावेत्ता पत्तेयं पत्तेयं गच्छपागड्डित्तणेणं ठाएत्ता सिस्साणं पडिच्छयाण य उस्सारकप्पं करेंति—अम्हे किर सुत्तत्थाणं अबो-

१ तदेवं° भा० ॥ २ तथा यथा तेषामुत्सारकल्पिकानामाचार्यैरुत्सार्य सूत्रार्थवाचना प्रदत्ता, तेऽप्यन्येषां स्वशिष्य-प्रतीच्छकानां तथैव वाचनां ददति, तेऽप्यपरेषां तथैव इत्ये° भा० ॥ ३ °स्सारणम्मि वो° भा० ता० ॥ ४ आविंधित्ता भा० मो० ले० कां० चूर्णौ च ॥

च्छित्तिं करेमो। तत्थ जो सो पढमिल्लुगउस्सारी सो जहा ते सियाला तस्स घंटासियालस्स आकितिं घंटासद्दं च जाणंति, न उण 'को एस? किं वा एयस्स गलए? कस्स वा एस सद्दो?' एवं सो पढमिल्लुगुस्सारी किंचि जाणइ न सब्बं सब्भावं। जो एयस्स पासे उस्सारकप्पं करेति सो कइ वि आलावए जाणेति न पुण अत्थं। सो सिस्सेणं पुच्छिओ भणति—किं पि केरिसो वि अत्थि एयस्स अत्थो। सेसा कतिवए वि आलावए न कड्ढंति, ते सिस्सेहिं पुच्छिज्जंता भणंति—न याणामो, अत्थि पुण किं पि एयं तस्स तुब्भे जोगं वहह। एवं ते अप्पाणं च परं च नासिता विहरंति। अह अन्नया गीयत्था आयरिया आगया, तेहिं ते उवालद्धा, गच्छा य अच्छिन्ना, गच्छेसु य पवेसिया सव्वे। जम्हा एते दोसा तम्हा न उस्सारेयव्वं। केत्तिया ते भविस्संति जे एवं निहोडिहिंति? ॥

गाथात्रयस्याप्यक्षरगमनिका—इक्षवः क्रियन्ते यत्र तत् 'इक्षुकरणम्' इक्षुवाटस्तस्य रक्षणार्थम् 'उवकः' गर्त्ता खातिकेत्यर्थः सा खानिता। तत्र च क्रोष्टुः–शृगालस्य पतनम्। ततो गृहपतिना गलके घण्टां बद्धा मुक्तस्य तस्य दर्शनम्। शृगालानां नाशनम्। ततो वृकादीनां पृच्छा। ततः सर्वेऽपि परम्परया नश्यन्ति, यावत् सिंहः समागतः। तेन सिंहेन 'प्रतिजागर्य' निरूप्य 'सः' घण्टाशृगालो हतः। शेषाः 'मृगगणाः' शृगाल-वृकादयः आश्वासिताः ॥

अयं दृष्टान्तः, अथ दार्ष्टान्तिकयोजनामाह—"इय कइवयाइं" इत्यादि। 'इति' अमुनैव प्रकारेण प्रथमिल्लुकोत्सारी शिष्यः 'कतिपयानि पदानि' सूत्रालापकरूपाणि किञ्चिन्मात्रसूत्रस्पर्शकनिर्युक्तिमिश्रितानि जानीते। अस्य च समीपे योऽन्योऽधीते स कतिपयान् सूत्रालापकान् जानीते न पुनरर्थम्। तस्यापि पार्श्वे यः पठति स सूत्रालापकानपि नाऽऽकर्षति, अन्येन पृष्टः प्रतिभणति—अस्ति किमप्येतदङ्गोपाङ्गादिकं श्रुतम्, तद् यूयमेतस्य योगमुद्वहतेति। एते च दुरधीतविद्यत्वात् प्रायः प्रत्यन्तग्राम एवार्घं लभन्ते, यत उक्तम्—

पाएण खीणदव्वा, धणियऽपरद्धा कयावराहा य।
पच्चंतं सेवंती, पुरिसा दुरहीयविज्जा या ॥

अतः प्रत्यन्तं गत्वा सूत्रार्थयोरुत्सारणं कुर्वन्ति, वदन्ति च—वयं सूत्रार्थयोरव्यवच्छित्तिं कुर्म इति। अन्यदा च तत्र प्रत्यन्तग्रामे गीतार्थानामागमनम्। तैरुत्सारकल्पिकानां खरण्टनम्, यथा—आः! किमेवं सूत्रार्थयोः परिपाटिवाचनां परित्यज्य सकलश्रुतधर्मधूमकेतुकल्पमुत्सारकल्पमाचरन्त आत्मानं च परं च नाशयत इत्यादि। ततश्च गच्छानाच्छिद्य तेषामपुनःकरणेन प्रतिक्रान्तानां प्रायश्चित्तं दत्तम्। "कित्तिय" त्ति कियन्त एतादृशा गीतार्था भविष्यन्ति य एवं शिक्षयिष्यन्ति?। तस्मात् प्रथमत एव नोत्सारणीयम् ॥ ७२१ ॥

---

१ उण निच्छएण जाणंति 'को एस भा० चूर्णौ च ॥ २ मुक्त इति। घण्टोपलक्षितः शृगालो घण्टाशृगाल इति तस्य नाम जातम्। तं तथाभूतमपूर्वभूतकल्पं दृष्ट्वा शृगालानां नाशनम्। ततो वृकादीनां पृच्छा। ततः सर्वेऽपि पलायनकारणं विज्ञाय नश्यन्ति, यावत् भा० ॥ ३ 'खरण्टनम्' उपालम्भनम्, यथा भा० ॥ ४ °द्य तेषां सर्वेषामपु° भा० ॥

७२२ ॥ ७२३ ॥ भाविता सप्रपञ्चं योगविराधना । अथाऽऽत्मा परश्च परित्यक्त इति पदद्वयं भावयति[1]—

**अप्पत्ताण उ दिंतेण अप्पओ इह परत्थ वि य चत्तो ।**
**सो वि अ हु तेण चत्तो, जं न पढइ तेण गव्वेणं ॥ ७२४ ॥**

'अपात्राणाम्' अयोग्यानां यद्वा 'अप्राप्तानां' विवक्षितानुयोगभूमिमनुपागतानां श्रुतं ददता उत्सारकल्पकुला आत्मा इह परत्रापि च त्यक्तः, तत्रेह तद्वाचनादानसमुद्भूतोपयशः-प्रवादादिना[2] परत्र तु बोधिदुर्लभत्वादिना । तथा सोऽपि शिष्यः 'हु' निश्चितं 'तेन' आचार्येण परित्यक्तः, यत् तेन गणि-वाचकत्वादिगर्वेणाधिष्ठितः सन् न पठति, पठनाभावे हि कुतो यथावत् चरण-करणप्रतिपालनम्? ◁ इति[3] भावः । प्रवचनमपि तेन परित्यक्तम्, कथम्? इति चेद् उच्यते—तस्य वाचकत्वप्रवादं श्रुत्वा केचित् सहृदया वाग्मिनो बहुविधग्रन्थ-इध्मानस्तत्परीक्षां कर्तुंकामा[4] यदा कमपि सिद्धान्तार्थं प्रश्नयेयुरिति तदाऽसावप्रबुद्धत्वाद् न किमपि तात्त्विकं निर्वचनमभिधातुमीशः । ततस्ते चिन्तयन्ति—अहो! परिफल्गु प्रवचनम-मीषाम्, यत्रेदृशा अपि वाचकपदमध्यारोप्यन्ते । ततः केचिद् देशविरतिं केचित् सर्वविरतिं प्रतिपित्सवो यदि विपरिणमन्ते ततः प्रवचनं परित्यक्तमवसातव्यम्[5] ॥ ७२४ ॥ ▷ किञ्च—

**अज्जस्स हीलणा लज्जणा य गारविअकारणमणज्जे ।**
**आयरिए परिवाओ, वोच्छेदो सुतस्स तित्थस्स ॥ ७२५ ॥**

[6]आर्यः–सुजनः सुमानुषमित्येकोऽर्थः, तस्य यथावदागमार्थावबोधविकलस्य वाचकनाम्ना हीलना भवति—अहो! हीलेयं मम यदहं 'वाचक[7]! वाचक!' इत्यभिधीये । तथा "लज्जण"त्ति 'वाचकमिश्राः! कथयत ☞ कथमयमालापकः सिद्धान्ते विद्यते? ☜ को[8] वाऽस्याऽऽला-पकस्यार्थः?' इति केनापि पृष्टस्य व्याकरणं दातुमशक्नुवतो भृशं लज्जा भवति; ☞ ततश्च[9] श्यामवदनः कुब्जीकृतकन्धरश्चिन्तया विमनायमानोऽवतिष्ठते । ☜ 'अनार्ये' अनार्यस्य

---

१ °श्च यथा परित्यक्तो भवति तथाऽभिधातुकाम आह भा० ॥ २ °तापकीर्तिप्रवादेन पर° भा० ॥ ३ ◁ ▷ एतच्चिह्नान्तर्गतोऽयं चूर्णिग्रन्थानुसारी पाठः भा० त० कां० प्रतिष्वेव वर्तते । तथा चात्र चूर्णिग्रन्थः—"अप्पा परो य कधं चत्तो भवति? उच्यते—अप्पत्ताण० गाधा ॥ कंठा । अपात्राणामित्यर्थः । "पवयणं कधं परिच्चत्तं? सो भण्णति वायओ ताधे केयि पडुणो पुरिसा एंति—पुच्छामो वायगं सिद्धंतं । पुच्छिते ण किंचि जाणति ताधे ते जाणंति—णूणं सव्वं पवयणं णिस्सारं जत्थेरिसो आयरिओ वायओ । तत्थ केयि देसविरतिं सव्वविरतिं वा पडिवज्जितुकामा विपरिणमंति । एवं पवयणं परिच्चत्तं ॥ किं च—अज्जस्स० गाधा ॥" इति ॥ ४ कर्तुमायाताः सन्तो यदा कमपि सिद्धान्तार्थं परिप्रश्नयन्ति तदा भा० ॥ ५ भा० विनाऽन्यत्र—°व्यम् ॥ ७२४ ॥ अथाऽऽत्म-पर-प्रवचनपरित्यागानेव प्रकारान्तरेणाह किञ्च त० कां० ॥ ६ यः खल्वार्यः–सज्जनो भवति तस्य यथावत्सिद्धा-न्तावबोधविकलस्य 'वाचक' इत्याख्ययाऽभिधीयमानस्य हीलना भवति भा० । "यो ह्यार्यो जनो भवत्यसौ हि 'वाचक' इत्यपदिश्यमानो लज्जते" इति चूर्णिः ॥ ७ °चको वाचकः' इ° भा० ॥ ८ कोऽस्या° मो० ले० कां० ॥ ९ तया च विच्छायवदनः भा० ॥

पुनस्तदेव 'गौरव्यकारणं' गर्वनिबन्धनं जायते—अहो ! वयमेव निस्सीमप्रतिष्ठापात्रं जगति वर्त्तामहे यदेवं वाचकपदवीमध्यारोहाम इति । ☞ इत्थं परः परित्यक्तो मन्तव्यः । ☜ आचार्ये च परिवादो भवति, तथाहि—स बहुश्रुताचार्यपार्श्वादुत्सारकल्पं कारयित्वा गतः क्वापि नगरादौ, पृष्टश्च कैश्चिन्निष्णातैः किमप्यर्थपदं यावन्न किञ्चिज्जानीते, ततस्ते ब्रुवते—यैरेष मूर्खमण्डलीमध्यलब्धरेखः आचार्यपदभाजनमकारि तेऽप्याचार्या एवंविधा एव भविष्यन्तीत्यात्मा परित्यक्तः । तथा प्रवचनमपि तेनाऽऽचार्येण परित्यक्तम् । कथम् ? इत्याह—श्रुतस्योत्सारकल्पवशादनधीयमानस्य व्यवच्छेदः प्राप्नोति, श्रुते च व्यवच्छिद्यमाने ज्ञानाभावे च दर्शन-चारित्रयोरप्यभावात् तीर्थस्यापि व्यवच्छेदः प्राप्नोति ॥ ७२५ ॥

यदि नाम तीर्थं व्यवच्छिद्यते ततः को दोषः ? इत्याह—

पवयणवोच्छेए वट्टमाणो जिणवयणबाहिरमईओ ।
बंधइ कम्मरय-मलं, जर-मरणमणंतयं घोरं ॥ ७२६ ॥

प्रवचनं—तीर्थं तस्य व्यवच्छेदे हेतुरूपतया वर्त्तमानः, कथम्भूतोऽसौ ? इत्याह—'जिनवचनबाह्यमतिकः' सर्वज्ञशासनबहिर्मुखशेमुषीकः, न खल्वनीदृशस्य प्रवचनव्यवच्छेदं कर्तुं मतिरुत्सहते, स एवम्भूतो बध्नाति 'कर्मरजो-मलं' रजःशब्देन बद्धावस्थं मलशब्देन निकाचितावस्थं कर्म परिगृह्यते, ☞ रजश्च मलश्चेति रजो-मलम् , कर्मैव रजोमलं कर्मरजो-मलम् , निकाचिता-ऽनिकाचितावस्थं कर्म यथाध्यवसायस्थानमनुबध्नातीत्यर्थः । ☜ कथम्भूतम् ? अनन्तानि जरा-मरणानि यस्मात् तद् अनन्तजरा-मरणम् , गाथायां प्राकृतत्वादनन्तशब्दस्य परनिपातः, 'घोरं' रौद्रं शारीर-मानसदुःखोपनिपातनिबन्धनत्वादिति । तथा षड्जीवनिकायानप्यगीतार्थतयाऽसौ विराधयतीति जीवनिकाया अपि तेनोत्सारकेण परित्यक्ता अवसातव्याः । यत एते दोषास्ततो नोत्सारणीयम् ॥ ७२६ ॥ अथ क्रमेणैवाधीयमाने सूत्रे के गुणाः ? उच्यते—

आणा विकोवणा बुज्झणा य उवओग निज्जरा गहणं ।
गुरुवास जोग सुस्सूसणा य कमसो अहिज्जंते ॥ ७२७ ॥

'क्रमशः' क्रमेणाधीयमानेऽध्याप्यमाने च सूत्रे एते गुणाः । तद्यथा—आज्ञा तीर्थकृतां

१ °रवकारणं भवति—अहो ! निःप्रतिमप्रतिष्ठापात्रं वयमेव जगति भा० ॥ २ अहो ! वयं वाचकपदवी° मो० ले० ॥ ३ वाचकप्रसिद्धिमध्यारोहामः । तथा आचार्ये 'परिवादः' अवर्णवादः । तथाहि भा० ॥ ४ °त्वा क्वापि नगरादौ गतः केनाऽपि साधुना पृष्टः किमप्यालापकमर्थपदं वा यावन्न किञ्चिज्जानीते, ततो भवति परिस्फुट एवाचार्याणामवर्णवादः, यथा—यैरेष मूर्ख° भा० ॥ ५ डे० त० विनाऽन्यत्र—°ष्यन्ति । तथा उत्सारकल्पे परम्परया क्रियमाणेऽनधीयमानसूत्रस्य व्यवच्छेदः प्राप्नोति । सूत्रे च व्यवच्छि° भा० । °ष्यन्ति । तथा प्रवचन° कां० मो० ले० ॥ ६ °तम् ? 'अनन्तजरा-मरणम्' जरा-वयोहानिः मरणं-प्राणपरित्यागः, अनन्तानि भा० ॥ ७ °कृतां कृता भवति । 'विकोपना' व्युत्पन्नीभवनं सा च भवति । इयमत्र भावना—स शिष्यः क्रमेणाधीयमानो योगोद्वहनविधौ गच्छसामाचार्यां च व्युत्पन्नमतिरुपजायते, ततश्च आत्मना सामाचारीवैतथ्यं भा० ॥

शिष्येणाऽऽचार्येण चाऽऽराधिता भवति। “विकोवण”त्ति योगोद्वहनविधौ गच्छसामाचार्यां च ‘विकोपना’ व्युत्पादना शिष्यस्य कृता भवति; ☞ ततश्च स्वयं सामाचारीवैतथ्यं न करोति, अपरान् कुर्वतो निवारयति। ☜ तथा गच्छमध्ये द्वितीयपौरुष्यामनुयोगः प्रवर्त्तते तदाकर्ण-नाद् मन्दबुद्धेरपि ‘बोधनं’ जीवा-ऽजीवादितत्त्वेषु प्रबुद्धता सम्पद्यते। बुध्यमानस्य च श्रुते निरन्तरमुपयोगो जायते। निरन्तरोपयुक्तस्य च महती निर्जरा, प्रतिसमयमसङ्ख्येयभवोपात्तकर्म-परमाणुपटलापगमात्। उक्तञ्च—

कम्ममसंखेज्जभवं, खवेइ अणुसमयमेव आउत्तो।
अन्नयरम्मि वि जोगे, सज्झायम्मी विसेसेणं॥

( जीत० भा० गा० ४५४। व्यव० उ० १० भा० गा० १२१ पत्र ५१० )

नित्योपयुक्तस्य च शीघ्रं सूत्रार्थयोर्ग्रहणं भवति। ☞ तथा गुरुवासेन—गुरुकुलवासेन सार्द्धं योगः—सम्बन्धो भवति, अन्यथा क्रमेण सूत्रार्थाध्ययनायोगात्। यद्वा पदद्वयमिदं पार्थक्येन व्याख्यायते[3]— ☜ गुरूणामन्तिके वासो गुरुवासः स सेवितो भवति, योगाश्च विधिवदारा-धिता भवन्ति। आचार्यादीनां शुश्रूषा विनय-वैयावृत्त्यादिर्नो कृता भवति। ☞ यत एते गुणास्ततः क्रमेणैवाध्येतव्यम् ☜॥ ७२७॥ उपसंहरन्नाह—

**इय दोस-गुणे नाउं, उक्कम-कमओ अहिज्जमाणाणं।**
**उभयविसेसविहिन्नू, को वंचणमब्भुवेज्जाहि॥ ७२८॥**

इतिशब्द एवमर्थे। एवमुत्क्रमतः क्रमतश्चाधीयानानाम् उपलक्षणत्वादध्यापयतां च यथाक्रमं दोषान् गुणाँश्च ज्ञात्वा ‘उभयविशेषविधिज्ञः’ क्रमा-ऽक्रमाध्ययनगुण-दोषविभागवेदी[6] आचार्यः शिष्यो वा को नामोत्सारकल्पस्य करणेन कारापणेन वा आत्मनो वञ्चनम् ‘अभ्युपेयाद्’ अङ्गी-कुर्यात्? न कश्चिदित्यर्थः। यतश्चैवमतोऽनुपयोगित्वाद् नास्त्युत्सारकल्पिक इति॥ ७२८॥

अत्र पुनरपि परः प्राह—

**जइ नत्थि कओ नामं, असइ हु अत्थे न होइ अभिहाणं।**
**तम्हा तस्स पसिद्धी, अभिहाणपसिद्धिओ सिद्धा॥ ७२९॥**

यदि नास्त्युत्सारकल्पिकः ततः कुतोऽस्य ‘नाम’ अभिधानमिदमायातम्? ( न[7] कुतश्चिदि-त्यर्थः )। अनेन प्रतिज्ञार्थः सूचितः। कुतः ☞? इत्याह— ☜ ‘असति’ अविद्यमाने ‘अर्थे’

१ °वति। योगो° डे० विना॥ २ °द्यते। अधीयमानस्य च श्रुतार्थे ‘उपयोगः’ एकाग्र-मनोनिवेशनरूपो जायते। ततश्च महती निर्जरा भा०॥ ३ °यते—गुरुभिः सार्धं वासो गुरुवासः स सम्यगुपासितो भवति, योगा° भा०॥ ४ °दिका कृता भा०॥ ५ °त्क्रमेण क्रमेण चाधी° भा०॥ ६ °विभागविधिज्ञः को नाम सकर्णः सन्नात्मनो वञ्चनम् ‘अभ्यु-पेयाद्’ अभ्युपगच्छेत्? अङ्गीकुर्यादित्यर्थः। किमुक्तं भवति?—इत्थं क्रमा-क्रमाभ्याम-ध्ययना-ऽध्यापनयोर्गुण-दोषजालमवगम्यापि क इव आचार्यः शिष्यो वा उत्सारकल्पं कृत्वा कारयित्वा वा स्वार्थपरिभ्रंशादिह परत्र चानर्थसार्थोपनिपातादात्मानमेव केवलं वञ्चयति? इति। यतश्चैवमतोऽनुपयोगित्वाद् नास्त्युत्सारकल्पिक इति स्थितम्॥७२८॥ अत्र पुनरपि परः स्वपक्षं समर्थयन्नाह भा०॥ ७ कोष्ठकान्तर्गतमिदं प्रामादिकं निरुपयोगि च॥

अभिधेये हुशब्दस्य हेत्वर्थवाचकत्वाद् यस्मान्न भवत्यभिधानं ☞ किन्तु सत्येवेति ☜। अनेन च हेत्वर्थ उपात्तः। यतश्चैवं तस्मात् 'तस्य' अर्थस्य प्रसिद्धिरत्राभिधानप्रसिद्धित एव 'सिद्धा' प्रतिष्ठितेति निगमनार्थः। दृष्टान्तोपनयौ स्वयमेवाभ्यूह्य वाच्यौ। अत्र प्रयोगः—अस्त्युत्सारकल्पिकः, अभिधानवत्त्वात्, घटादिवत्, यद् यद् अभिधानवत् तत् तद् अस्ति, यथा घट-पटादि, अभिधानवच्चेदम्, तस्मादस्तीति ॥ ७२९ ॥ इत्थं परेण स्वपक्षे समर्थिते सति प्रतिविधीयते—भो भद्र मुग्धप्रामाणिक! अनैकान्तिकोऽयं भवता हेतुरुपन्यस्तः। तथा चाह—

**जइ सव्वं वि य नामं, सअत्थगं होज्ज तो भवे दोसो।**
**जम्हा सअत्थगत्ते, भजियं तम्हा अणेगंतो ॥ ७३० ॥**

यदि सर्वमपि नाम सार्थकं भवेत् ततो भवेदस्माकं 'दोषः' उत्सारकल्पिकस्यास्तित्वापत्तिलक्षणः। यस्मात् पुनः सार्थकत्वे नाम 'भक्तं' विकल्पितम्, स्यात् सार्थकं स्यान्निरर्थकमिति भावः। तत्र सार्थकं जीवा-ऽजीवादिकम्, निरर्थकं खरविषाणा-ऽऽकाशकुसुम-कूर्मरोम-वन्ध्यापुत्रादिकम्। यत एवं तस्मादनेकान्तोऽयम्—यदसद्भूतेऽर्थे न भवत्यभिधानम्। इदमत्र तात्पर्यम्—अभिधानस्य भावा-ऽभावयोरुभयोरपि सद्भावादभिधानवत्त्वलक्षणो हेतुर्यथा उत्सारकल्पिकस्यास्तित्वं साधयति तथा नास्तित्वमपि साधयति, ☞ उभयत्रापि साधारणत्वात्; ☜ अतः साधारणरूपानैकान्तिकदोषदुष्टोऽयं हेतुरिति ॥ ७३० ॥

इत्थं व्यभिचरितपक्षतया विलक्षीभूतः परः परित्यज्य यदृच्छाजल्पमाचार्यवचनमेव प्रमाणीकुर्वन्नित्थमाह—भगवन्! अभ्युपगतं मयाऽनन्तरोक्तयुक्तितोऽभिधानस्य सार्थकत्वमनर्थकं चेति, परमिदमुत्सारकल्पिकाभिधानं किं सार्थकम्? आहोस्विद् निरर्थकम्? इति विवर्तते संशयावर्त्तगर्त्तायामस्माकं चेतः, तदिदानीमुद्ध्रियतां निजवाग्वरत्रयेति उच्यते—

**निक्कारणम्मि नामं, पि निच्छिमो इच्छिमो अ कज्जम्मि।**
**उस्सारकप्पियस्स उ, चोयग! सुण कारणं तं तु ॥ ७३१ ॥**

वत्स! 'निष्कारणे' कारणाभावे नामापि नेच्छामो वयम् किं पुनरर्थम्?। 'कार्ये' प्रयोजने तु प्राप्ते इच्छाम उत्सारकल्पिकस्य नामाप्यर्थमपि। 'तत्तु' कारणं हे नोदक! 'शृणु' निशमय ॥ ७३१ ॥ तत्र तिष्ठतु तावत् कारणम्, कर्तुरधीनाः सर्वा अपि क्रिया इति ज्ञापनार्थं प्रथमत उत्सारकारकमाह—

उत्सार-कल्पकारकः

**आयार-दिट्ठिवायत्थजाणए पुरिस-कारणविहिण्णू।**
**संविग्गमपरितंते, अरिहइ उस्सारणं काउं ॥ ७३२ ॥**

आचारः—प्रथममङ्गं दृष्टिवादः—चरमं तयोरर्थं जानातीत्याचार-दृष्टिवादार्थज्ञः। इहाऽऽचार-

---

१ °स्तः। कथम्? इति चेद् उच्यते भा० ॥ २ वयमुत्सारकल्पिकस्य किं पुन° भा० ॥ ३ °त्सारकमाह डे० कां० चूर्णौ च ॥ ४ °दार्थज्ञायकः। 'पुरुष-कारणविधिज्ञः' पुरुषः-परिणामकादिरूपः कारणं-वस्त्रोत्पादनादिकं तयोर्विधि-विधानं प्रकारं जानातीति पुरुष-कारणविधिज्ञः, किमयमुत्सारकल्पमर्हति? न वा? इति केन वा कारणेनोत्सार्यते? न वा? इत्येवं सम्यग् जानातीति भावः। तथा 'संविग्नः' भा० ॥

दृष्टिवादग्रहणं वक्ष्यमाणकारणैरनयोरेवोत्सारणीयत्वादित्येवमर्थम् । "पुरिस-कारणविहिन्नू" इति पुरुष-कारणविधिज्ञो नाम 'किमयं पुरुष उत्सारकल्पमर्हति ? न वा ? येन च कारणेनोत्सार्यते तदस्ति ? न वा ?' इत्येवंविधविधिवेदी तथा 'संविग्नः' मोक्षाभिलाषी 'अपरितान्तः' सूत्रार्थग्राहणायामहोरात्रमप्यपरिश्रान्त एवंविध उत्सारणं कर्तुमर्हति, एवंगुणोपेत एवोत्सारकल्पं करोतीत्यर्थः ॥ ७३२ ॥ अथ यस्योत्सारकल्पः क्रियते तस्य गुणानाह[1]—

उत्सार-कल्पार्हस्य गुणाः

**अभिगए पडिबद्धे, संविग्गे अ सलद्धिए ।**
**अवट्ठिए अ मेहावी, पडिबुज्झी जोअकारए ॥ ७३३ ॥**

अभिगतः प्रतिबद्धः संविग्नश्च सलब्धिकः अवस्थितश्च मेधावी प्रतिबोधी योगकारकः[2], ईदृग्गुणोपेत उत्सारकल्पयोग्य इति निर्युक्तिश्लोकसमासार्थः ॥७३३॥ अथैनमेव विवृणोति—

**सम्मत्तम्मि अभिगओ, विजाणओ वा वि अब्भुवगओ वा ।**
**सज्झाए पडिबद्धो, गुरूसु नीएल्लएसुं वा ॥ ७३४ ॥**

सम्यक्त्वे य आभिमुख्येन[3] गतः—प्रविष्टः सोऽभिगत उच्यते, यो वा जीवादिपदार्थानां 'विज्ञायकः' विशेषेण ज्ञाता सोऽभिगतः, यद्वा यः 'अभ्युपगतः' 'यावज्जीवं मया गुरुपादमूलं न मोक्तव्यम्' इति कृताभ्युपगमः सोऽभिगतः[4] । यः पुनः 'स्वाध्याये' परावर्त्तना-ऽनुप्रेक्षादौ सततमायुक्तः, गुरुषु वा स्थिरममत्वानुबन्धः, 'निजकेषु' भ्रातृ-भ्रातृव्यादिषु वा सम्बन्धिषु प्रव्रज्याप्रतिपन्नेषु सञ्जातप्रेमस्थेमा, एष त्रिविधोऽपि प्रतिबद्ध उच्यते ॥ ७३४ ॥

**संविग्गो दव्व मिओ, भावे मूलुत्तरेसु उ जयंतो ।**
**लद्धी आहाराइसु, अणुओगे धम्मकहणे य ॥ ७३५ ॥**

संविग्नो द्विधा—द्रव्यतो भावतश्च । 'द्रव्ये' द्रव्यसंविग्नो मृगः, सदैव सर्वतोऽपि चकितत्वात् । 'भावे' भावसंविग्नः 'मूलोत्तरेषु तु' मूलगुणोत्तरगुणेषु पुनः 'यतमानः[5]' उद्यमं विदधानः साधुर्मन्तव्यः, सदैव संसारापायचकितत्वात् । तथा लब्धिराहारादिषूत्पादयितव्येषु अनुयोगे दातव्ये धर्मकथने च विधेये यस्य स सलब्धिक इति ॥ ७३५ ॥

**लिंग विहारेऽवट्ठिओ, मेरामेहावि गहणओ मइओ ।**
**पडिबुज्झइ जं कत्थइ, कुणइ अ जोगं तदट्ठस्स ॥ ७३६ ॥**

अवस्थितो द्विधा—लिङ्गे विहारे च । लिङ्गावस्थितः स्वलिङ्गं न परित्यजति, विहारावस्थितः संविग्नविहारं[6] विहाय न पार्श्वस्थादिविहारमाद्रियते । मेधावी द्विधा—ग्रहणमेधावी मर्यादामेधावी च । उभावपि वक्ष्यमाणस्वरूपौ । तत्र मर्यादामेधाविन उत्सारकल्पः क्रियते ।

---

१ °स्य कियन्तो गुणा मृग्यन्ते ? इति, अत्रोच्यते भा० ॥ २ °रक इति सङ्ग्रहगाथासमासार्थः ॥ ७३३ ॥ अथैनामेव विवरीषुराह भा० ॥ ३ °न-आत्यन्तिकस्थैर्यलक्षणेन गतः-प्रविष्टः, तादात्म्येन परिणत इति यावत् सोऽभि° भा० ॥ ४ °गतोऽभिधीयते । यः पुनः भा० ॥ ५ °मानः' यथाशक्ति यतनां कुर्वाणः सदैव संसारापायचकितत्वात्, न खलु मूलोत्तरगुणविकलस्तत्त्वतः सांसारिकापायाद् बिभेतीति वक्तुं शक्यम् । तथा लब्धि° भा० ॥ ६ °हारं परित्यज्य न पा° भा० ॥

स पुनर्ग्रहणे मेधावी वा स्यादमेधावी वा, द्विविधस्यापि कारणविशेषे उत्सार्यत इति ग्रहणतो मेधावी 'भक्तः' विकल्पितः। तथा यत् 'कथ्यते' अभिधीयते तत् सर्वं यः प्रतिबुध्यते स प्रतिबोद्धुं शीलमस्येति प्रतिबोधी। यत् तस्य सूत्रमुत्सार्यते तदर्थस्य ग्रहणे 'योगं' व्यापारं यः करोति न कदाचित् प्रमाद्यति स योगकारक इति ॥ ७३६ ॥ ☞ तदेवं व्याख्याता "अभिगए" इत्यादि ( ७३३ ) गाथा। ☜ अथोत्सारकल्पिकस्यैवापराचार्यपरिपाट्या गुणानाह—

अपरा-ऽऽचार्य-परिपाट्या उत्सार-कल्पा-ऽर्हस्य गुणाः

**अभिगय थिर संविग्गे, गुरुअमुई जोगकारए चेव।**
**दुम्मेहसलद्धीए, पडिबुज्झी परिणय विणीए ॥ ७३७ ॥**
**आयरियवण्णवाई, अणुकूले धम्मसड्ढिए चेव।**
**एतारिसे महाभागे, उस्सारं काउमरिहइ ॥ ७३८ ॥**

'अभिगतः' प्रबुद्धः। 'स्थिरः' सम्यग्दर्शनादक्षोभ्यः। 'संविग्नः' प्रागुक्तः। 'गुर्वमोची' निष्ठुरं निर्भर्त्सितोऽपि गुरूणाममोचनशीलः। 'योगकारकः' पूर्ववत्। दुर्मेधा अपि यः सलब्धिकः। 'परिणतः' परिपक्कवयाः परिणामको वा। 'विनीतः' अभ्युत्थानादिविनयोद्यतः॥७३७॥

'आचार्यवर्णवादी' गुरूणां गुणोत्कीर्त्तनकारी। 'अनुकूलः' आचार्याणामन्येषां वा पूज्यानां वैयावृत्त्यादिना हितकारी। धर्मे—तपः-संयमात्मके चारित्रधर्मे श्रद्धिकः—श्रद्धावान् ☞ अत्यन्ताभिलाषुकः। चः समुच्चये। एवः पादपूरणे। ☜ 'एतादृशः' एवंविधगुणोपेतः 'महाभागः' शिष्य उत्सारं कर्त्तुमर्हति, उत्सारकल्पस्य योग्यो भवतीत्यर्थः ॥ ७३८ ॥

अनीदृशानुत्सारयितुः प्रायश्चित्तमाह—

**अणभिगयमाइआणं, उस्सारिंतस्स चउगुरू होंति।**
**उग्गहणम्मि वि गुरुगाऽकालमसज्झायऽवक्खेवे ॥ ७३९ ॥**

आदेशद्वयेनापि ये गुणाः पूर्वमुक्तास्तद्विपरीता येऽनभिगतादयः, तद्यथा—अनभिगतः अप्रतिबद्धः असंविग्नः अलब्धिकः अनवस्थितः अमर्यादामेधावी अप्रतिबोधी अयोगकारकः अपरिणतः अविनीतः आचार्यावर्णवादी अननुकूलः अधर्मश्रद्धालुः। एतेषाम् 'उत्सारयतः' उत्सारकल्पं कुर्वत आचार्यस्य प्रत्येकं चतुर्गुरवः प्रायश्चित्तम्। "उग्गहणम्मि वि गुरुग"त्ति ☞ सूत्रमर्थं वा झगित्येवावगृह्णातीत्यवग्रहणः, "नन्द्यादिभ्योऽनः" ( सि० ५-१-५२ ) इति

---

१ 'अनभिगमादीनाम् 'उत्सारयतः' उत्सारकल्पं कुर्वतश्चत्वारो गुरुकाः। इयमत्र भावना—अनभिगतस्य अप्रतिबद्धस्य असंविग्नस्य अलब्धिकस्य अनवस्थितस्य अमर्यादामेधाविनः अप्रतिबोधिनः अयोगकारकस्य अपरिण तस्य अविनीतस्य आचार्यावर्णवादिनः अननुकूलस्य अधर्मश्रद्धालोरुत्सारकल्पं य आचार्यः करोति तस्यैतेषु स्थानेषु प्रत्येकं चतुर्गुरवः भा० ॥

२ चूर्णिग्रन्थानुसारिणीयं हस्तचिह्नान्तर्गता टीका, तथा चात्र चूर्णिः—

"उग्गहणम्मि य गुरुअ'त्ति जति उग्गहणसमत्थस्स वि मेधाविस्स णिक्कारणओ उस्सारेति तो वि ⁘। किं कारणं ? सो मेधावी आणुपुव्वीए चेव पढिहिति। अहवा 'उग्गहणम्मि वि गुरुग' त्ति जस्स जोगस्स कारणे उस्सारिज्जति सो जति वि उस्सारकप्पे समयं सुत्तं अत्थं च ओगिण्हति, अपिशब्दात् जति वि पा ओगिण्हति दुम्मेहत्तणेण तो वि अकालो असज्झाइयं वक्खेवो वा ण कातव्वो, जति वि करेति ⁘। काल

कर्त्तरि अनप्रत्ययः, ग्रहणमेधावीत्यर्थः, तस्य यदि निष्कारणमुत्सारयति तदाऽपि चत्वारो गुरुकाः । अथ किमर्थं मेधाविनो नोत्सार्यन्ते ? उच्यते—यतोऽसौ[1] प्रज्ञालत्वादेवाऽऽनुपूर्व्यैव पाठ्यमानो[2] झगित्येव विवक्षितमुत्सारणीयं श्रुतं प्राप्स्यति, ततः को नाम तस्योत्सारकल्पकरणेऽभ्यधिको गुणः ? । अथवा "उग्गहणम्मि वि"त्ति यस्य आचारान्तर्गतवस्त्रैषणाध्ययनस्योपक्रमणनिमित्तमुत्सार्यते तस्य यद्यप्युत्सारकल्पसमकालमेव सर्वमपि सूत्रमर्थं वाऽवगृह्णाति, अपिशब्दाद् मन्दमेधस्तथा यद्यपि नावगृह्णाति, तथाऽप्यवग्रहणेऽनवग्रहणे वाऽकालोऽस्वाध्यायिकं व्याक्षेपश्च न कर्त्तव्यः । यदि करोति तदा चत्वारो गुरुकाः । एतच्चाकालादिकमुपरिष्टाद् भावयिष्यते । अथवा "उग्गहणम्मि वि गुरुग"त्ति[3] अन्यथा व्याख्यायते—☞ योऽवग्रहणे समर्थ उत्तममेधावी, अपिशब्दः सम्भावनायाम्, किं सम्भावयति ? यावन्मात्रं सूत्रं तस्योद्दिश्यते तावदशेषमप्यर्थेन[4] युक्तमवगृह्णाति, यो वा वैरस्वामिवत् पदानुसारिप्रतिभो भूयस्तरमप्यनुसरति तस्योत्सारणीयम् । अथ[5] नोत्सारयति तदा चतुर्गुरुकाः । तत्रापि[6] यावदुत्सारकल्पः क्रियते तावदकालोऽस्वाध्यायिकं व्याक्षेपश्च न कर्त्तव्यः[7] । यदि करोति तदाऽपि चतुर्गुरुकाः ॥७३९॥

अथोत्सारकल्पकरणे यत् प्राक् ( गा० ७३१ ) कारणं सांन्यासिकीकृतं तद् दर्शयति—

उत्सारकल्पकरणे कारणानि

**गच्छो अ अलद्धीओ, ओमाणं चेव अणहियासा य ।**
**गिहिणो अ मंदधम्मा, सुद्धं च गवेसए उवहिं ॥ ७४० ॥**

कस्याप्याचार्यस्य गच्छः सर्वोऽपि वस्त्र-पात्र-शय्योत्पादने अलब्धिकः, तत्र च क्षेत्रे स्वपक्षतः परपक्षतो वाऽवमानं विद्यते, ते च साधवः 'अनधिसहाः' शीतादिपरीषहान् सोढुमसमर्थाः, गृहस्थाश्च 'मन्दधर्माणः' तुच्छधर्मश्रद्धाका अप्रज्ञापिताः सन्तो न वस्त्रादि प्रयच्छन्ति, 'शुद्धं चोपधिं साधवो गवेषयेयुः' इति भगवतामुपदेशः, स च दुर्लभत्वाद् यादृशेन तादृशेन साधुना न लभ्यते, अत ईदृशे कार्ये लब्धिमान् दुर्मेधा अप्युत्सारकल्पं कृत्वा वस्त्रैषणाद्यध्ययनमुद्दिश्य कल्पिकः क्रियते ॥ ७४० ॥

ततश्च कल्पिकीकृतः सन् किं करोतु ? इत्याह—

**हिंडउ गीयसहाओ, सलद्धि अह ते हणंति से लद्धिं ।**
**तो एक्कओ वि हिंडइ, आयारुस्सारियसुअत्थो ॥ ७४१ ॥**

[ असौ 'सलब्धिकः' लब्धिमान् ] 'गीतसहायः' गीतार्थसाधुसहितो वस्त्राद्युत्पादनार्थं

---

असज्झाइयं वक्खेव त्ति तं उवरि भणिहिति । अहवा 'उग्गहणम्मि वि गुरुग' त्ति जो उग्गहणसमत्थो उत्तममेहावी अपिः पदार्थसम्भावने, जावतियं उद्दिसति तं सव्वं सुत्तं सह अत्थेण उट्ठवेति पदाणुसारी य बहुविधमवि अणुसरति तस्स उस्सारितव्वं, जति ण उस्सारेति ⁚⁚ ।" इति ॥

१ यतः स प्र° भा० ॥ २ °मानोऽपि झगित्येवोत्सार° भा० ॥ ३ त्ति एवं व्या° भा० ॥ ४ तावन्मात्रं सुखेनैवार्थेन युक्तमवधारयति । यो वा पदानु° भा० ॥ ५ अथ यदि रागद्वेषादिना नोत्सा° भा० ॥ ६ तथा यावदु° मो० ले० कां० । तत्राप्यकालोऽस्वाध्या° भा० ॥ ७ कर्त्तव्यः ॥ ७३९ ॥ अथ यदुक्तमासीत् "तिष्ठतु तावत् कारणम्" (गा० ७३१) इति तदिदानीमभिधीयते भा० ॥

हिण्डताम् । अथ 'ते' गीतार्थास्तस्य लब्धिमुपघ्नन्ति ततः 'एककोऽपि' असहायोऽपि 'आचारोत्सारितसूत्रार्थः' आचारान्तर्गतवस्त्रैषणादिसूत्रार्थमुत्सारकल्पकरणेन[1] ग्राहितः सन् हिण्डते ॥ ७४१ ॥ ननु च किं कोऽपि कस्यापि लाभान्तरायकर्मक्षयोपशमसमुत्थां लब्धिमुपहन्ति ? येनैवमुच्यते—ते गीतार्थास्तस्य लब्धिमुपघ्नन्ति इति,[2] अत्रोच्यते[3]—◁ भो[4] भद्र ! किं न कर्णकोटरमुपागतं सुप्रतीतमपि भवतो ढण्ढणमहर्षेरलब्धिस्वरूपं येनैवमनभिज्ञ इव भवान् परिभ्रमयति ? । यद्वाऽस्मिन्नेवार्थेऽपरो भवतः प्रत्यायनाय दृष्टान्तः प्रतिपाद्यते— ▷

परपुण्योपघातकरक्तपटभिक्षोरुदाहरणम्

**भिक्खु विह तण्ह वद्दल, अभागधेज्जो जहिं तहिं न पडे ।**
**दुग-तिगमाईभेदे, पडइ तहिं जत्थ सो नत्थि ॥ ७४२ ॥**

कोइ किर पंचसइओ सत्थो अडविं पवन्नो । तत्थ य एगो रत्तपडो निब्भग्गसिरसेहरो पंचण्ह वि सयाणं पुण्णे उवहणइ । सो अ सत्थो तण्हाए पारद्धो । दूरे अ अब्भवद्दलयं वासइ, तेसिं उवरि न पडइ । ते दुहा भिण्णा । इयरो रत्तपडो पुव्विल्लाणं मज्झे मेलिओ । सव्वत्थ पडइ, जत्थ सो तत्थ न पडइ, जाव निवेडिओ एक्कओ जाओ । जत्थ सो तत्थ न पडइ[5] । एवं एयारिसा परस्स[6] पुन्ने उवहणंति ॥

अथ गाथाक्षरार्थः—भिक्षुरेकः सार्थेन सार्द्धं 'विहम्'[7] अध्वानं प्रविष्ट इति शेषः । ततस्तृष्णया सार्थः प्रारब्धः । वार्दलं च वर्षितुमारब्धम् । यत्र येषां मध्ये सोऽभागधेयो भिक्षुस्तत्र न वर्षं पतति । ततः 'द्विक-त्रिकादिना' द्विधा-त्रिधादिना प्रकारेण सार्थस्य भेदः कृतः । तस्मिंश्च कृते यत्र स भिक्षुर्नास्ति तत्र सर्वत्र वर्षं पतति, तस्योपरि न पततीति । अयं दृष्टान्तः । अथार्थोपनयः—यथा स भिक्षुः पञ्चशतिकस्यापि सार्थस्य पुण्यान्युपहतवान् एवमन्येऽप्येवंविधा अपरेषां लब्धिमतामपि स्वस्वकर्मक्षयोपशमसमुत्थां लब्धिमुपघ्नन्तीति[8] ॥ ७४२ ॥

अथासौ कथं वस्त्राण्युत्पादयति ? इत्युच्यते—

**भिक्खं वा वि अडंतो, बिईय पढमाएँ अहव सव्वासु ।**
**सहिओ व असहिओ वा, उप्पाए वा पभावे वा ॥ ७४३ ॥**

भिक्षामटन् वस्त्राण्युत्पादयति । वाशब्दो वक्ष्यमाणपक्षापेक्षया विभाषायाम् । अपिशब्दः सम्भावनायाम्, सम्भाव्यते अयमपि प्रकार[10] इति । अथ न शक्नोति युगपद् भिक्षामप्यटितुं वस्त्राण्यप्युत्पादयितुम्[9], व्यतिक्रामति वा वेला भैक्षस्य वस्त्राण्युत्पादयतः, भिक्षां वा अटद्भिर्न प्राप्यन्ते वस्त्राणीत्यादिना कारणेन द्वितीयायां पौरुष्यामनुयोगग्रहणं हापयित्वा वस्त्राण्युत्पाद-

१ °णा-पात्रैषणाद्यध्ययनस्य सूत्रार्थमुत्सारकल्पकरणेन लेशोद्देशतो ग्राहितः त० ॥ २ इत्यादि अत्रो° भा० ॥ ३ अत आह—भिक्खु विह भा० त० विना ॥ ४ ◁ ▷ एतच्चिह्नान्तर्गतः पाठः भा० त० पुस्तकयोरेव ॥ ५ पडइ, अन्नत्थ सव्वत्थ पडइ । एवं भा० ॥ ६ °स्स भग्गो उव° भा० चूर्णौ च ॥ ७ °ह' त्ति मार्गमटवीं प्रवि° भा० ॥ ८ °घ्नन्तीति । न चैतद् दृष्टान्तेनोच्यते, कर्मक्षय-क्षयोपशमादीनां द्रव्य-क्षेत्र-काल-भाव-भवसव्यपेक्षतया तत्र तत्र प्रदेशे प्रतिपादनात् ॥ ७४२ ॥ त० ॥ ९ °स्त्राण्यप्युत्पा° मो० ॥ १० °कारः कदाचिदपीति । अथ भा० ॥

येत् । अथ तदा न लभेत बह्वी वा हिण्डिः कर्तव्या सा च द्वितीयस्यां पौरुष्यां कर्तुं न पार्यते इत्यतः प्रथमायामप्युत्पादयेत् । अथ बहवो गृहस्था द्रष्टव्या महता च कष्टेन ते श्राद्धां ग्राह्यन्ते ततो ☞ द्वयोरपि पौरुष्योः ☜ सर्वासु वा पौरुषीषु पर्यटति । यद्यपरे गीतार्थास्तस्य लब्धिं नोपघ्नन्ति तदा स तैः सहित एवोत्पादयेद् वा वस्त्राणि, प्रभावयेद् वा दानधर्मं गृहिणां पुरतः । यथा—ईदृशः साधूनां धर्मः, न कल्पते अमीषां भगवतामुद्गमोत्पादनैषणादोषदुष्टं पिण्ड-शय्या-वस्त्र-पात्रचतुष्टयं ग्रहीतुम्, तदमीषां वस्त्रादावुपयोज्यमाने महती कर्मनिर्जरेत्यादि । अथ ते गीतार्थास्तस्य लब्धिमुपहन्युस्ततस्तैः 'असहितोऽपि' एकाकी उत्पादयतु वा प्रभावयतु वा, न कश्चिद्दोषः ॥ ७४३ ॥ इत्थं तावद् वस्त्रादीनां कल्पिको भवत्विति कृत्वा यथा आचार उत्सार्यते तथा प्रतिपादितम् । अथ दृष्टिवादो येन कारणेनोत्सार्यते तत् प्रतिपादयति—

कालियसुआणुओगम्मि गंडियाणं समोयरणहेउं । दृष्टिवादोत्सारकरणानि  
उस्सारिंति सुविहिया, भूयावायं न अन्नेणं ॥ ७४४ ॥

इह यो धर्मकथालब्धिसम्पन्नः परमद्यापि स्वल्पपर्यायत्वाद् दृष्टिवादं पठितुमप्राप्तस्तस्य कालिकश्रुतानुयोगेन धर्मकथां कुर्वाणस्य गण्डिकाः—कुलकर-तीर्थकरगण्डिकादयो दृष्टिवादान्तर्गता उपयुज्यन्त इति तासां गण्डिकानां कालिकश्रुतानुयोगे समवतारणाहेतोरुद्देश-समुद्देशादिविधिं विना न कल्पते तासामध्ययनादिकमिति कृत्वा 'सुविहिताः' शोभनविहितानुष्ठाना आचार्याः 'भूतवादं' दृष्टिवादमुत्सारयन्ति, न 'अन्येन' 'वाचको भूयात्' इत्यादिना कारणेन ॥ ७४४ ॥ ◁ तदेवमाचारो दृष्टिवादश्च यथोत्सार्यते तथाऽभिहितम्, बाहुल्येनानयोरेवोत्सारणीयत्वात्; अत एवोक्तं पूर्वम्—"आयारदिट्ठिवायत्थजाणए" ( गा० ७३२ ) त्ति । ▷ अथ "कालमसज्झायऽवक्खेवे"त्ति ( गा० ७३९ ) यत् प्राक् पदत्रयमुक्तं तत्राऽऽद्यं पदद्वयं तावद् विवृणोति—

सज्झायमसज्झाए, सुद्धासुद्धे व उद्दिसे काले ।  
दो दो अ अणोएसुं, ओएसु उ अंतिमं एक्कं ॥ ७४५ ॥  
एगंतरमायंबिल, विगईए मक्खियं पि वज्जेति ।  
जावइअं च अहिज्जइ, तावइयं उद्दिसे केइ ॥ ७४६ ॥

तस्योत्सारकल्पे क्रियमाणे स्वाध्यायिके अस्वाध्यायिके वा शुद्धे अशुद्धे वा काले विव-

---

१ °व्या ततः प्रथमा° भा० त० विना ॥ २ "अथ बहू परियितव्वया दुक्खं च लभति ताधे दोहिम्वि पोरिसीहिं सव्वाहिं वा भणति" इति चूर्णिः ॥ ३ °त्पादयति वा [ वस्त्राणि ] प्रभावयति वा दानधर्मं सविस्तरं गृहिणां भा० ॥ ४ अन्नेसिं ता० ॥ ५ °श्रुतेन ध° मो० ले० कां० ॥ ६ डे० मो० ले० कां० विनाऽन्यत्र—'वाचको भूयाद्, गणिरयं भूयात्' इत्यादिना अपरेण कारणेन त० । वाचकत्वादिना कारणेन भा० ॥ ७ ◁ ▷ एतच्चिह्नान्तर्गतः पाठः भा० त० पुस्तकयोरेव ॥ ८ यत् पूर्वं सांन्यासिकं कृतमासीत् तदिदानीमवसरप्राप्तमभिधीयते भा० । "इदाणीं जं तं हेट्ठा भणितं "कालमसज्झाय वक्खेवे" एतं उवरिं भणीहामि त्ति तं एताहे भण्णति" इति चूर्णिकृतः ॥ ९ तु ता० ॥

क्षितश्रुतमुद्दिशेत्, ◁[1] "सर्वं वाक्यं सावधारणं भवति" इति न्यायादुद्दिशेदेव, ▷ न व्याघातं कुर्यात्। केन विधिना? इत्यत आह—"दो दो अ अणोएसुं"त्ति ओजःशब्देन विषममुच्यते, तद्वि[2]परीता अनोजसः–समा द्वि-चतुः-षडादय उद्देशका यत्राध्ययने[3] तत्र अनोजस्सु उद्देशकेषु दिने दिने द्वौ द्वावुद्देशकावुद्दिशेत्। कथम्? इति चेद् उच्यते—प्रथमायां पौरुष्यां प्रथममुद्देशकमुद्दिश्य समुद्दिश्य च द्वितीय उद्दिश्यते, द्वितीयस्यामुभयोरप्युद्देशकयोः तस्य अनुयोगो दीयते, ततश्चरमपौरुष्यां प्रथममुद्देशकमनुज्ञाय द्वितीयोद्देशकः समुद्दिश्यते अनुज्ञायते चेति चूर्णिलिखिता सामाचारी। तथा 'ओजंस्सु'[5] त्रि-पञ्च-सप्तादिसङ्ख्याकेषु विषमेषूद्देशकेषु अन्तिममुद्देशकमेवोद्दिशेत्, यथा शस्त्रपरिज्ञाध्ययने। तथाहि—तत्र सप्तोद्देशकाः, तेषु च त्रिभिर्दिवसैः षडुद्देशकानुद्दिश्य चतुर्थे दिवसे एक एव ☞ अवशिष्यमाणः ☜ सप्तम उद्देशक उद्दिश्यते। स च प्रथमपौरुष्यामुद्दिश्य समुद्दिश्य चरमायामनुज्ञायते ॥ ७४५ ॥

तथा 'एकान्तरम्' एकदिवसान्तरितमाचाम्लमसौ करोति, एकस्मिन् दिवसे आचाम्लमपरस्मिन्निर्विकृतिकं करोतीति भावः। तथा विकृत्या 'अक्षितमपि' खरण्टितमप्यसौ वर्जयति। केचित् पुनराचार्या ब्रुवते—'यावत्' यत्परिमाणं श्रुतमसावधीते ताव[6]दुद्दिशेत्, य[7]दि मेधावितया द्वे त्रीणि चत्वारि भूरितराणि वा अध्ययनान्यागमयति त[8]तस्तानि सर्वाण्यप्युद्दिश्यन्ते, न कश्चिद्दोष इति भावः ॥ ७४६ ॥ ☞ व्याख्यातं "कालमसज्झाय"त्ति पदद्वयम्। ☜ अथ "अवक्खेवे"त्ति पदं विवृण्वन्नाह—

**आहारे उवकरणे, पडिलेहण लेव खित्तपडिलेहा।**
**अप्पाहारो परिहार मोअ जह अप्पनिद्दो अ ॥ ७४७ ॥**

तस्योत्सारकल्पे कर्तुमारब्धे आहारग्रहणे उपकरणस्य प्रत्युपेक्षणे लेपग्रहणे क्षेत्रप्रत्युपेक्षायां च व्याक्षेपो न कर्त्तव्यः। अल्पाहारश्च यथा स भवति तथा कार्यम्। 'परिहारः' संज्ञा 'मोकः' कायिकी तयोः स्वल्पताऽल्पाहारतायां भवति। यथा चाऽसावल्पनिद्रो भवति तथा कर्त्तव्यमिति। एषा सङ्ग्रहगाथा ॥ ७४७ ॥ अथैनामेव प्रतिपदं विवृणोति—

**हिंडाविंति न वा णं, अहवा अवड्डया न सो अडइ।**
**पेहिंति व से उवहिं, पेहेइ व सो न अन्नेसिं ॥ ७४८ ॥**

---

१ ◁ ▷ एतच्चिह्नान्तर्गतः पाठः डे० त० पुस्तकयोरेव ॥ २ °परीतमनोजः सममित्यर्थः, ततो अनोजसः भा० त० ॥ ३ °यने तदनोजः, यथेदमेव कल्पाध्ययनं षडुद्देशकात्मकम्, तेषु अनोजस्सु अध्ययनेषु ( उद्देशकेषु ) दिने भा० ॥ ४ "दो दो उ अणोएसु"न्ति। अणोया णाम समा उद्देसया, जधा कप्पस्स, तस्स दिणे दिणे दो दो उद्देसया उद्दिस्संति, पढमपोरिसीए एगो उद्दिट्ठो समुद्दिट्ठो य, ताधे बितियं उद्दिसति, बितियपोरिसीए तेसिं चेव सो अत्थो कधिज्जति, चरिमपोरिसीए तं पढमं अणुयाणित्ता बितियं समुद्दिसति अणुयाणति य" इति चूर्णिः ॥ ५ 'ओजस्सु' विषमोद्देशकनिबद्धेष्वध्ययनेषु 'अन्तिमं' चरममुद्देशकमेकमेवोद्दिशेत्। इयमत्र भावना—यत्राध्ययने त्रि-पञ्च-सप्तादिसङ्ख्याका विषमा उद्देशकास्तद् ओजःसंज्ञितं द्रष्टव्यम्, यथा शस्त्रपरिज्ञाध्ययनं सप्तोद्देशकसङ्ख्याकम्, तत्र च त्रिभिर्दिवसैः भा० ॥ ६ °वत् प्रभूतमप्युद्दिशेत् त० ॥ ७ यद्यपि मेधा° भा० ॥ ८ तथाऽपि तानि भा० ॥

"णं" इति तमुत्सारकल्पिकमाचार्या भिक्षां न हिण्डापयन्ति । वाशब्दस्यानुक्तसमुच्चयार्थत्वात् संस्तरणे सतीति द्रष्टव्यम् । यदि पुनरसंस्तरणं तदा, 'अथवा' इति संस्तरणापेक्षयाऽसंस्तरणस्य प्रकारान्तरताद्योतकः, 'अन्यार्थम्' अन्येषाम्–आचार्य-ग्लान-बाल-वृद्धादीनामर्थाय नासावुत्सारकल्पिकः पर्यटति, यावन्मात्रमाहारमात्मना भुङ्क्ते तावन्मात्रमेवाऽऽनयतीत्यर्थः । तथा 'प्रेक्षन्ते वा' प्रत्युपेक्षन्ते "से" तस्य–उत्सारकल्पिकस्योपधिं शेषसाधवः । 'स वा' उत्सारकल्पिको न 'अन्येषाम्' आचार्य-क्षपकादीनामुपधिं प्रत्युपेक्षते । सर्वत्र 'मा भूदध्ययनव्याघातः' इति योज्यम् ॥ ७४८ ॥

**एमेव लेवगहणं, लिंपइ वा अप्पणो न अन्नस्स ।**
**खेत्तं च न पेहावे, न यावि तेसोवहिं पेहे ॥ ७४९ ॥**

एवमेव लेपग्रहणम् उपलक्षणत्वाद् लेपनमपि पात्रस्य तस्य निमित्तमन्यैः साधुभिः कर्त्तव्यम् । अथ शेषसाधवः कुतोऽपि हेतोः अक्षणिकास्ततः स आत्मन एव पात्राणि लिम्पति नान्यस्य साधोः । क्षेत्रं च तेन 'न प्रेक्षापयेत्' क्षेत्रप्रत्युपेक्षणार्थं तं न प्रहिणुयादित्यर्थः । न चाप्यसावुत्सारकल्पिकः 'तेषां' क्षेत्रप्रत्युपेक्षकाणामुपधिं प्रत्युपेक्षेत ॥ ७४९ ॥

**दिंति पणीयाहारं, न य बहुगं मा हु जग्गतोऽजिण्णं ।**
**मोआइनिसग्गेसु[3] अ, बहुसो मा होज्ज पलिमंथो ॥ ७५० ॥**

'प्रणीतं' स्निग्ध-मधुरमाहारं परमान्न-शर्करादिकं तस्य[4] गुरवः प्रयच्छन्ति, ◁ सुखेनैवाहर्निशमपि दृष्टिवादादिसूत्रार्थानुप्रेक्षानिमित्तमिति भावः । ▷[5] तमपि प्रणीतं 'न च' नैव बहुकं किन्तु स्वल्पम्, ☞ कुतः ? इत्याह— ☜ मा भूत् सूत्रार्थनिमित्तं रजन्यामपि जाग्रतोऽजीर्णमिति । रूक्षाहारभोजिनश्च 'बहुशः' बहून् वारान् 'मोकादिनिसर्गेषु च' प्रश्रवण-संज्ञादिव्युत्सर्गेषु विधीयमानेषु[6] 'परिमन्थः' सूत्रार्थव्याघातो मा भूदिति कृत्वा प्रणीतं दीयते । अल्पा च निद्रा स्वल्पप्रणीताहारभोजिनः[7] प्रायो भवतीत्यल्पनिद्राद्वारमपि व्याख्यातमवसातव्यम् । इत्थमुत्सारकल्पे समापिते सति विवक्षितं वस्त्रोत्पादनादि कार्यं पूर्वोक्तविधिना कार्यते ॥ ७५० ॥

तदेवं व्याख्यातमानुषङ्गिकमुत्सारकल्पिकद्वारम् । अथाचञ्चलद्वारम् । तत्राऽचञ्चलोऽनुयोगं श्रोतुमर्हति न चञ्चल इति चञ्चलस्वरूपं तावदाह—

**गइ-ठाण-भास-भावे, लहुओ मासो उ होइ एक्केक्के ।**
**आणाइणो य दोसा, विराहणा संजमाऽऽयाए ॥ ७५१ ॥** अचञ्चल-द्वारम्

चञ्चलश्चतुर्द्धा । तद्यथा—गतिचञ्चलः स्थानचञ्चलो भाषाचञ्चलो भावचञ्चलश्च । एतेषामेकैकस्मिन् लघुको मासः प्रायश्चित्तम्, आज्ञादयश्च दोषाः, विराधना संयमे आत्मनि च । तत्र च संयमविराधना गतिचञ्चलस्य त्वरितं गच्छतः पृथिव्यादीनां कायानामुपमर्दनम् । आत्मविराधना प्रपतन-प्रस्खलन-देवताच्छलनादिका । ◁ यद्वा तं त्वरितगामिनं दृष्ट्वा द्वितीयः

१ °रणस्य प्रका° डे० मो० ले० ॥ २ च तं 'न प्रे° डे० त० ॥ ३ °निग्गमेसु अ ता० ॥ ४ तस्य आचार्याः 'ददति' प्रय° भा० ॥ ५ ◁ ▷ एतच्चिह्नान्तर्गतः पाठः डे० त० ॥ ६ °षु मा भूत् 'परिमन्थः' सूत्रार्थव्याघातलक्षण इति प्रणीतं भा० ॥ ७ °जिनो भव° भा० विना ॥ ८ ◁ ▷ एतच्चिह्नान्तर्गतः पाठः डे० मो० ले० नास्ति ॥

साधुः प्रतिनोदनां दद्यात्—'किमेवं त्वरितं गच्छसि? न कल्पते साधूनामेवं गन्तुम्' इत्याद्युक्ते प्रकोपनतया असङ्खडकरणेऽस्थिभङ्गादयो दोषाः । ▷ एवं स्थानचञ्चलादिष्वप्युपयुज्य आत्म-संयमविराधने वक्तव्ये ॥ ७५१ ॥ अथ गति-स्थानचञ्चलौ तावदाह—

गति-स्थानचञ्चलौ

**दावद्दविओ गइचंचलो उ ठाणचवलो इमो तिविहो ।**
**कुड्डाद्ऽसइं फुसइ व, भमइ व पाए व विच्छुभइ ॥ ७५२ ॥**

इह द्रवशब्दो द्रुतार्थवाचकः, ततः 'द्रावद्रविकः' नाम द्रुतद्रुतगामी स गतिचञ्चलो भण्यते । स्थानचञ्चलः पुनरयं त्रिविधः, तद्यथा—यो निषण्णः सन् पृष्ठ-बाहु-कर-चरणादिभिः कुड्यम् आदिशब्दात् स्तम्भादिकम् 'असकृद्' अनेकशः स्पृशति १, वाशब्द उत्तरापेक्षया विकल्पार्थः, यो वा निषण्ण एवेतस्ततो भ्राम्यति २, पादौ वा 'विक्षिपति' पुनः पुनः सङ्कोचयति प्रसारयति चेत्यर्थः ३ ॥ ७५२ ॥ भाषाचपलमाह—

भाषा-चपलः

**भासाचपलो चउहा, असं त्ति अलियं असोहणं वा वि ।**
**असभाजोग्गमसब्भं, अणूहिउं तं तु असमिक्खं ॥ ७५३ ॥**

भाषाचपलश्चतुर्धा—असत्प्रलापी असभ्यप्रलापी असमीक्षितप्रलापी अदेशकालप्रलापी च । तत्रासत् प्रलपितुं शीलमस्येत्यसत्प्रलापी । अथासदिति कोऽर्थः? इत्याह—असदिति शब्देनालीकमशोभनं वाऽभिधीयते । तत्रालीकं साधुमसाधुं ब्रवीति, असाधुं साधुमित्यादि । अशोभनं—गर्वादिदूषितं वचनम् । तथा असभायोग्यमसभ्यमभिधीयते, इह सभा—एकत्रोपविष्टशिष्टपुरुषसमुदायः, तथा चोक्तम्—

धम्म-ऽत्थसत्थकुसला, समासया जत्थ सा सभा नाम ।
जा पुण अविहिपलुट्टा, बुहेहिँ सा भन्नए मेली ॥

तस्याः सभाया योग्यं यद् वचनं तत् सभ्यम्, तद्विपरीतमसभ्यम्, तच्च 'दास! चण्डाल!' इत्यादिकं जकार-मकारादिवाक्यरूपं वा, तत् प्रलपितुं शीलमस्येत्यसभ्यप्रलापी । 'अनूहित्वा' अविचार्य 'किमिदं पूर्वापरविरुद्धम्? किं वा इह-परलोकबाधकम्?' इत्यादि अविमृश्य यद् वदति तत्तु वचनमसमीक्षितमुच्यते, तत्प्रलपनशीलोऽसमीक्षितप्रलापी ॥ ७५३ ॥

अथादेशकालप्रलापिनमाह—

**कज्जविवत्तिं दट्ठुं, भणाइ पुव्विं मए उ विण्णायं ।**
**एवमिदं तु भविस्सइ, अदेसकालप्पलावी उ ॥ ७५४ ॥**

---

१ "दावद्दविओ" त्ति अनु[ण]करणशब्दोऽयम्, यो द्रुतं द्रुतं गमनशीलः स गतिचञ्चलो भण्यते । तुशब्दो भिन्नक्रमः, स चाग्रे योक्ष्यते । स्थानचञ्चलः भा० ॥ २ °धः त्रिप्रकारः, तद्य° कां० ॥ ३ एव हस्तादिकं समन्तात् "भमइ"त्ति अन्तर्भूतण्यर्थत्वाद् भ्रामयति, यो वा उपविष्ट एव पादौ वा विक्षि° भा० ॥ ४ °त्यर्थः । एष त्रिविधोऽपि स्थानचञ्चलोऽभिधीयते ॥ ७५२ ॥ भा० ॥ ५ °यते । तत्र सभा भा० ॥ ६ तत्र ग्राम्यवचनं 'दासस्त्वम्, चण्डालस्त्वम्' इत्यादि, तत् प्रल° भा० ॥ ७ °रादि वा तत् मो० ले० । °रादिकं वा तत् कां० ॥ ८ तु ता० ॥

'कार्यविपत्तिं' कार्यस्य विनाशं दृष्ट्वा कश्चिद् भणति, यथा—मया पूर्वमेव विज्ञातम् 'इदं कार्यमेवं भविष्यति' । यथा—केनचित् साधुना पात्रं लेपितम्, ततो रूढं सत् कुतोऽपि प्रमादतो भग्नम्, ततः कश्चिदात्मनो दक्षत्वं ख्यापयन् ब्रवीति—यदैवेदं परिकर्मयितुमारब्धं तदैव मया ज्ञातम्, यथा—'इदं निष्पन्नमपि भङ्क्ष्यते' । [1]एष एवंविधः अदेशकाले—अनवसरे प्रलपनशीलोऽदेशकालप्रलापी ॥ ७५४ ॥

व्याख्यातश्चतुर्विधोऽपि भाषाचपलः । अथ भावचपलमाह—

भाव-चपलः

> जं जं सुयमत्थो वा, उद्दिट्ठं तस्स पारमप्पत्तो ।
> अन्नन्नसुयदुमाणं, पल्लवगाही उ भावचलो ॥ ७५५ ॥

यद् यद् आवश्यक-दशवैकालिकादेर्ग्रन्थस्य 'श्रुतं' सूत्रमर्थो वा 'उद्दिष्टं' प्रारब्धं 'तस्य' इत्यत्रापि वीप्सा गम्यते तस्य तस्य पारमप्राप्तः सन् 'अन्यान्यश्रुतद्रुमाणाम्' आचारादिरूपापरापरशास्त्रतरूणां पल्लवान्—तन्मध्यगतालापक-श्लोक-गाथारूपान् सूत्रार्थलवान् स्वरुच्या ग्रहीतुं शीलमस्येति पल्लवग्राही, 'तु:' पुनरर्थे, य एवंविधः स पुनः 'भावचलः' भावचपलो मन्तव्यः ॥ ७५५ ॥ भवेत् कारणं येन चञ्चलत्वमपि कुर्यात् । किं पुनस्तत् ? इत्याह—

> तेणे सावय ओसह, खित्ताई वाइ सेहवोसिरणे ।
> आयरिय-बालमाई, तदुभयछेए य विइयपयं ॥ ७५६ ॥

[2]स्तेनभयेन श्वापदभयेन वा द्रुतमपि गच्छेद्, न दोषः । ग्लानो वा कश्चिदागाढस्तस्यौषधानयननिमित्तं शीघ्रमपि गच्छेद् न च प्रायश्चित्तमाप्नुयात् । "खित्ताइ"त्ति क्षिप्तचित्त आदिशब्दाद् दृप्तचित्तो यक्षाविष्ट उन्मादप्राप्तश्च एते स्थानचञ्चलत्वमपि ◁[3]कुड्यादिस्पर्शन-हस्तभ्रामणादिकं कुर्युः न च प्रायश्चित्तमाप्नुयुः, अनात्मवशत्वाद् ▷ । "वाइ"त्ति वादिनो बुद्धिं परिभवितुमलीकमपि ब्रूयात्, यथा—रोहगुप्तेन पोट्टशालपरिव्राजकमतिव्यामोहनार्थं जीवा अजीवा नोजीवाश्चेति त्रयो राशयः स्थापिताः ( ग्रन्थाग्रम्—१५०० ) । [4]तथा शैक्षस्य पण्डकादेर्व्युत्सर्जने विधेये तं निर्भर्त्सयन् असभ्यमपि भणेत्, येनोद्वेजितः स्वयमेव गणाद् निष्क्रम्य गच्छेत् । आचार्या वा कुतश्चित् प्रमादस्थानाद् नोपरमन्ते ततोऽदेशकालप्रलापित्वमपि कुर्यात्, यथा—क्षमाश्रमणाः ! अमुकः संयतोऽमुकश्च श्रावको मम पुरत इदं भणति, यथा—त्वदीया गुरवः ◁[5]इत्थम्भूतां प्रमादप्रतिसेवनामासेवमाना अचिरादेव ▷ [6]पार्श्वस्थीभवन्तः सम्भाव्यन्ते; एतच्च मया

---

१ एषोऽदेशकालप्रलापी ॥ डे० त० विना ॥ २ स्तेनाः प्रतीताः, श्वापदाः सिंह-व्याघ्रादयः, तेषां भयेन द्रुतं द्रुतमपि ग° भा० ॥ ३ ◁ ▷ एतच्चिह्नान्तर्गतः पाठः भा० त० ॥ ४ तथा शैक्षः पण्डकादिकः स व्युत्सर्जनीयो भवेत्, ततस्तस्य व्युत्सर्जने खर-परुषैर्निर्भर्त्सयन्नसभ्यमपि भणति, येनो° भा० ॥ ५ ◁ ▷ एतच्चिह्नान्तर्गतः पाठः भा० त० ॥ ६ पार्श्वस्थविहारिणो भविष्यन्ति; अत एव मया पूर्वमेव भवतां विज्ञप्तमभूत्, यथा—युष्माकमेवमाचरतां महानपयशःप्रवादः समुच्छलिष्यति, तत इदानी° भा० । "आयरिया वा दोसेसु न उवरमंति, पच्छा अदेसकालपलावित्तणं पि करेज्जा, जह—अमुओ अमुओ अमुगं भणति तुब्भं, तेणं तो मए तुब्भ कहितं, जहा—अयसो होहिति पच्छा, तो तेण भणंतेण उवरमंति" इति चूर्णौ ॥

पूर्वमपि विज्ञातमासीत्, यथा—क्षमाश्रमणानामेवमाचरतामपवादो भविष्यति, ◁ तत इदानीमप्युपरमध्वं भगवन्तः! एतस्मात् प्रमादस्थानात्; ▷ एवमुक्ते तेऽश्लोकभयेनैवोपरमन्ते । बालो वा केलि-कन्दर्पादिकं कुर्वाणो वार्यमाणोऽपि न निवर्तते ततोऽनुहितमपि यद्यपि तदपि मार्दवेन निवारणीयः, आदिग्रहणात् प्रत्यनीकादयो वा खर-परुषादिभाषणैरुपशममितव्याः । तथा 'तदुभयच्छेदः' इति कस्याप्याचार्यस्यापूर्वं सूत्रमर्थो वा विद्यते तस्योभयस्यापि तत्पार्श्वादनधीयमानस्य व्यवच्छेदो भवति अतः पूर्वारब्धं शास्त्रमर्धपठितमपि मुक्त्वा तत् तदुभयमध्येतव्यमिति यथाक्रमं गति-स्थान-भाषा-भावचपलेषु चतुर्ष्वपि द्वितीयपदमवसातव्यम् । एतद्गाथोक्तकारणाद् ये गतिचपलादयस्तद्विपरीता ये गति-स्थान-भाषा-भावैश्चतुर्भिरप्यचपलास्तेऽस्य कल्पाध्ययनस्यानुयोगमर्हन्तीति ॥ ७५६ ॥

गतमचञ्चलद्वारम् । अथावस्थितद्वारम् । तत्रानवस्थितं तावदाह—

अवस्थित-द्वारम्

**दुविहो लिंग विहारे, एँकेको चेव होइ दुविहो उ ।**
**चउरो य अणुग्घाया, तत्थ वि आणाइणो दोसा ॥ ७५७ ॥**

अनवस्थितो द्विविधः, तद्यथा—लिङ्गानवस्थितो विहारानवस्थितश्च । एकैकः पुनरपि द्विविधो भवति । ☞ तद् उभयमपि द्वैविध्यमनन्तरगाथायां वक्ष्यते । ☜ चत्वारश्च मासाः 'अनुद्घाताः' गुरवः, उपलक्षणत्वाद् लघुमासादिकं चात्र प्रायश्चित्तं भवति । ☞ तच्च यथास्थानमेव भावयिष्यते । ☜ तत्रापि लिङ्गानवस्थित-विहारानवस्थितयोरुभयोरप्याज्ञादयो दोषा द्रष्टव्याः ॥ ७५७ ॥ अथैनामेव गाथां व्याख्यानयति—

लिङ्गान-वस्थित-चरणान-वस्थितौ

**गिहिलिंग अन्नलिंगं, जो उ करेई स लिंगओ दुविहो ।**
**चरणे गणे अ अथिरो, विहारअणवट्ठिओ एस ॥ ७५८ ॥**

'गृहिलिङ्गं' गृहस्थानां वेषम् 'अन्यलिङ्गम्' अन्यतीर्थिकानां नेपथ्यं 'यः' साधुः, तुशब्दो विशेषणे, किं विशिनष्टि? दर्पेण यो लिङ्गद्वयं करोति स एष लिङ्गतो द्विविधोऽनवस्थितः । अस्य च द्विविधस्यापि मूलम् । तथा चोलपट्टकं बध्नतः १ एकत उभयतो वा स्कन्धोपरि कल्पाञ्चलानामारोपणरूपं गरुडपाक्षिकं प्रावृण्वतः २ उत्तरासङ्गरूपमर्द्धांसन्यासं कुर्वतः ३ प्रत्येकं चत्वारो गुरुमासाः । द्वावपि बाहू छादयित्वा संयतीप्रावरणमातन्वानस्य चत्वारो लघवः । कल्पेन शिरःस्थगनरूपां शीर्षद्वारिकां कुर्वतो मासलघु । चतुष्फलं मुत्कलं वा कल्पं स्कन्धोपरि कृत्वा गोपुच्छवदधोलम्बमानं कुर्वतो मासलघु । एतेऽपि लिङ्गानवस्थितेऽन्तर्भवन्ति । तथा 'चरणे' चारित्रे 'अस्थिरः' यः पुनः पुनश्चारित्रात् प्रतिपतति तस्य यदि सूत्रं ददाति

---

१ ◁ ▷ एतच्चिह्नान्तर्गतः पाठः भा० त० ॥ २ °नादित्युक्ते ते भा० ॥ ३ तस्योभयमपि तत्पार्श्वादनधीयमानं व्यवच्छिद्यत इति कृत्वा पूर्वारब्धं भा० ॥ ४ °तदुभय° डे० ॥ ५ °कारणकलापमन्तरेण ये गति° मो० ले० विना ॥ ६ एकेको होइ दुविह दुविहो उ ता० ॥ ७ °था—लिङ्गे विहारे च, लिङ्गेनानवस्थितो विहारा(रेणा)नवस्थितश्चेत्यर्थः । एकै° भा० ॥ ८ °त्वाद् 'उद्घातिकाश्च' लघुमासाश्च प्रायश्चित्तमत्र मन्तव्यम् । तच्च भा० ॥ ९ °तत्तु यथा° डे० ॥ १० अथानन्तरोद्दिष्टं द्वैविध्यं दर्शयति भा० ॥ ११ °न्ति । "चरणे अ" इत्यादि । 'चरणे' भा० ॥

तदा चतुर्लघु, अर्थं ददाति तदा चतुर्गुरु । 'गणे' गच्छे 'अस्थिरः' पुनः पुनर्गणाद् गणं सङ्क्रमति । एष द्विविधोऽपि विहारानवस्थितः । एतद्विपरीतस्य सलिङ्गावस्थितस्य संविग्नविहारावस्थितस्य च दातव्यम् । यदि न ददाति तदा तथैव सूत्रे चतुर्लघु, अर्थे चतुर्गुरु ॥ ७५८ ॥

गतमवस्थितद्वारम् । अथ मेधाविद्वारमाह—

मेधावि-द्वारम्

**उग्गहण धारणाए, मेराए चेव होइ मेधावी ।**

**तिविहम्मि अहीकारो, मेरासंजुत्तो मेहावी ॥ ७५९ ॥**

◁ मेधावी त्रिविधः, तद्यथा—▷ अवग्रहणमेधावी सूत्रार्थग्रहणपटुप्रज्ञावान् १, धारणामेधावी पूर्वाधीतयोः प्रभूतयोरपि सूत्रार्थयोश्चिरमवधारणबुद्धिमान् २, मर्यादामेधावी चरण-करणप्रवणमतिमान् ३ । एभिस्त्रिभिः पदैरष्टौ भङ्गाः, तद्यथा—ग्रहणमेधावी धारणामेधावी मर्यादामेधावी १ ग्रहणमेधावी धारणामेधावी अमर्यादामेधावी २ इत्यादि । इह च यत्र यत्र भङ्गे मर्यादामेधावी न भवति तत्र तत्र न दातव्यम्, यदि ददाति तदा प्रायश्चित्तम् । तत्र यदि पार्श्वस्थादिभ्यः सूत्रमर्थं वा ददाति तदा चत्वारो लघवः, यथाच्छन्देभ्यः प्रददाति चत्वारो गुरुमासाः । "तिविहम्मि अहीगारो" त्ति मर्यादामेधाविनो ग्रहण-धारणामेधाविभ्यां सम्पन्नस्याऽसम्पन्नस्य वा दातव्यम्, मर्यादाविकलयोरितरयोर्न दातव्यमिति त्रिविधेनापि दाना-ऽदानरूपतया यथायोगमत्राधिकार इति । गाथायां तृतीयार्थे सप्तमी । अथ मर्यादामेधाविनो व्युत्पत्तिमाह—"मेरासंजुत्तो मेहावि" त्ति मेरा—मर्यादा तत्संयुक्तो मेधावी मर्यादामेधावी, शाकपार्थिवादिवद् मध्यपदलोपी समासः ॥ ७५९ ॥ गतं मेधाविद्वारम् । अथापरिश्राविद्वारमाह—

अपरिश्रावि-द्वारम्

**परिसाइ अपरिसाई, दव्वे भावे य लोग उत्तरिए ।**

**एक्केको वि य दुविहो, अमच्च वड्डुईएँ दिट्ठंतो ॥ ७६० ॥**

परिश्रवितुं शीलमस्येति परिश्रावी, तद्विपरीतोऽपरिश्रावी । उभावपि द्विविधौ—द्रव्ये भावे च । तत्र द्रव्यतः परिश्रावी घटादिः, अपरिश्रावी तुम्बकादि । भावतः परिश्रावी अपरिश्रावी च । एकैकोऽपि द्विविधः, तद्यथा—"लोग" त्ति लौकिकः "उत्तरिए" त्ति पदैकदेशे पदसमुदायोपचाराद् लोकोत्तरिकः । तत्र लौकिके भावतः परिश्राविणि **अमात्यदृष्टान्तः** । स चायम्—

लौकिकस्य भावपरिश्राविणोऽमात्यस्य दृष्टान्तः

एगो राया । तस्स कन्ना गद्दभस्स जारिसा । सो निच्चं खोलाए अणुकियाए अच्छइ । सो अन्नया अमच्चेणं एगंते पुच्छिओ—किं तुब्भे भट्टारयपादा ! खोलाए आविद्धियाए अच्छह ? न कस्सइ सीसं कन्ना य दरिसेह ? । रन्ना सब्भावो कहिओ, भणियं च—मा रहस्समेयं काहिसि त्ति । तेण अगंभीरयाए तं रहस्सं अणहियासमाणेण अडविं गंतुं रुक्खकोट्टरे मुहं छोढूणं भणियं—गद्दभकन्नो राया, गद्दभकन्नो राया । तं रुक्खं अन्नेण केणइ छेत्तुं वादित्रं कृतं । भवियव्वयावसेण य तं रन्नो पुरओ पढमं वाइयं । तं वज्जंतं भणइ—गद्दभकन्नो राया, गद्दभकन्नो राया । रन्ना अमच्चो पुच्छिओ—तुमे परं एयं रहस्सं नायं, कस्स ते

१ ◁ ▷ एतच्चिह्नान्तर्गतः पाठः डे० त० ॥ २ °त्रार्थावबोधपटुप्रतिभासम्पन्नः १, धार° भा० ॥ ३ °णाशक्तिमान् २ भा० ॥ ४ °रणोद्युक्तः ३, मर्यादा सीमा चारित्रमित्यनर्थान्तरत्वात् । अत्र च त्रिभिः पदैरष्टौ भा० ॥ ५ अत्र च भा० ॥ ६ °स्स सारि° मो० ॥

कहियं ? । अमच्चेण जहावत्तं सिट्ठं । एस लोइओ परिस्सावी ॥

लोउत्तरिओ जो अणहियासमाणो पुच्छिओ वा अपुच्छिओ वा अपरिणयाणं अववायपयाणि ◁ राहस्सियाणि ▷ कहेइ ॥

ईदृशस्य परिश्राविणः सूत्रं ददाति चत्वारो लघवः, अर्थं ददाति चत्वारो गुरवः । यत एवं ततोऽपरिश्राविणो दातव्यम् । सोऽपि द्विधा—लौकिको लोकोत्तरिकश्च । तत्र लौकिकेऽपरिश्राविणि बटुक्या दृष्टान्तः । स चायम्—

भावतो लौकिकापरिश्राविणि बटुक्या दृष्टान्तः

राया सिट्ठी अमच्चो आरक्खिओ मूलदेवो य एक्काए पुरोहियभज्जाए बडुइणीए अईवरूवस्सिणीए अज्झोववन्ना । ताए सव्वेसिं संकेअओ दिन्नो । ते आगया, दुवारे ठिया । ताए भणंति—जइ महिलारहस्सं जाणह तो पविसह । ते भणंति—न याणामो । मूलदेवेण भणियं—अहं जाणामि । तीए भणियं—पविसह त्ति । पविट्ठो । पुच्छिओ—किं महिलारहस्सं ? । तेण भणियं—मारिज्जंतेहि वि अन्नस्स न कहेयव्वं । त्वं विदग्धः कामुकः । तुट्ठाए सव्वरत्तिं रामिओ । पभाए रन्ना पुच्छिओ मूलदेवो—किं महिलारहस्सं ? । मूलदेवो भणइ—अहं एअं उल्लावं पि न याणामि । रन्ना 'अवलवइ' त्ति वज्झो आणत्तो तह वि न कहेइ । ताहे बिज्जाइणीए आगंतुं रन्नो पुरतो कहियं, जहा—एअं चेव महिलारहस्सं जं सरीरचाए वि न कस्सइ सीसइ त्ति । एस लोइओ अपरिस्सावी ॥

लोउत्तरिओ पुण जो छेअसुअस्स राहस्सियाणि अववायपयाणि सुणेत्ता उट्ठिओ, तओ जइ कोइ अपरिणओ पुच्छइ—किं एयं कहिज्जइ ? । भणइ—चरण-करणं साहूणं वन्निज्जइ ॥

ईदृशस्यापरिश्राविणो यदि सूत्रं न ददाति तदा चतुर्लघु, अर्थं न ददाति चतुर्गुरु ॥ ७६० ॥

अथ "यश्च विद्वान्" इति द्वारमाह—

**विदु जाणए विणीए, उववाए जो उ वट्टए गुरूणं ।**
**तव्विवरीयऽविणीए, अदिंत दिंते अ लहु-गुरुगा ॥ ७६१ ॥**

"विदंक् ज्ञाने" इत्यस्य धातोर्वेत्ति–जानातीति व्युत्पत्त्या विद्वान् ज्ञायक उच्यते, स चेहाभ्युत्थाना-ऽऽसनप्रदानादिरूपस्य विनयस्य विज्ञाता भाव्यः, न केवलं ज्ञायकः किन्तु 'विनीतः' यथावसरमभ्युत्थानादिविनयप्रयोक्ता, तथा 'उपपाते' आज्ञानिर्देशे गुरूणां 'यस्तु' यः पुनर्वर्त्तते तस्य सूत्रं न ददाति चतुर्लघु, अर्थं न ददाति चतुर्गुरु । तथा तस्य–विदुषो विपरीतस्तद्विपरीतस्तस्य विनयस्वरूपमजानत इत्यर्थः "विणीए" त्ति अकारप्रश्लेषाद् अविनीतस्य च सूत्रं ददाति चतुर्लघु, अर्थं ददाति चतुर्गुरु ॥ ७६१ ॥

गतं "यश्च विद्वान्" इति द्वारम् । अथ "पत्ते य" त्ति द्वारम्—अत्र च तिस्रो व्याख्याः, तद्यथा—पात्रमेवानुयोगं श्रोतुमर्हति नापात्रमिति प्रथमा, प्राप्त एवानुयोगश्रवणं कारयितव्यो नाप्राप्त इति द्वितीया, व्यक्त एवानुयोगं श्रावणीयो नाव्यक्त इति तृतीया, अस्यां च तृतीयव्याख्यायां "वत्ते य" त्ति पाठो द्रष्टव्यः । अथामूनेव व्याचिख्यासुराह—

**तिंतिणिए चलचित्ते, गाणंगणिए अ दुब्बलचरित्ते ।**

---

१ ◁ ▷ एतदन्तर्गतः पाठः त० पुस्तक एव ॥ २ उ चिट्ठती गु° ता० ॥

**आयरियपारिभासी, वामावट्टे य पिसुणे य ॥ ७६२ ॥**
**आदीअदिट्ठभावे, अकडसमायारि[1] तरुणधम्मे य ।**
**गव्विय पइण्णे[2] निण्हइ, छेअसुए वज्जए अत्थं ॥ ७६३ ॥**

तिन्तिणिकश्चलचित्तो गाणङ्गणिकश्च दुर्बलचारित्रः आचार्यपरिभाषी आचार्यपरिभावी वा वामावर्त्तश्च पिशुनश्च "आदीअदिट्ठभावे" त्ति आदौ—आवश्यकादिशास्त्रेषु वर्त्तमाना अदृष्टा भावा येन स आद्यदृष्टभावः, तथा—अकृतसामाचारीकः तरुणधर्मा च गर्वितः "पइण्ण" त्ति प्रकीर्णप्रश्नः प्रकीर्णविद्यश्च "निण्हइ" त्ति गुरुनिह्नवी एतेषां छेदश्रुतविषयमर्थं वर्जयेत्, न दद्यादित्यर्थ इति द्वारगाथाद्वयसमासार्थः ॥ ७६२ ॥ ७६३ ॥

व्यासार्थं प्रतिद्वारमभिधित्सुः प्रथमतस्तिन्तिणिकद्वारं व्याचष्टे—

तिन्तिणिकः

**डज्झंतं तिंबुरुदारुयं व दिवसं पि जो तिडितिडेइ ।**
**अह दव्वतिंतिणो भावओ उ आहारुवहि-सेज्जा ॥ ७६४ ॥**

'तिम्बुरुकदारुकं' तिम्बुरुकवृक्षकाष्ठमग्नौ प्रक्षिप्तं दह्यमानं सद् यथा त्रटत्रटिति कुर्वदास्ते, एवं यो गुर्वादिभिः खरण्टितः सम्पूर्णमपि दिवसं "तिडितिडेइ" त्ति अनुकरणशब्दत्वात् 'त्रटत्रटायते' मम सम्मुखमिदमिदं च जल्पितमेभिरिति[3] ऋपन्नास्ते इति भावः । अथैष द्रव्यतिन्तिणिकः । भावतस्तु तिन्तिणिकः त्रिविधः, तद्यथा—आहारे उपधौ शय्यायां चेति । पुनरेकैको द्विविधः—अन्तःसंयोजनया बहिःसंयोजनया च ॥ ७६४ ॥

तत्रोभयथाऽप्याहारतिन्तिणिकं तावदाह—

**अंतो-बहिसंजोअण, आहारे बाहि खीर-दधिमाई ।**
**अंतो उ होइ तिविहा, भायण हत्थे मुहे चेव ॥ ७६५ ॥**

आहारविषया संयोजना द्विविधा—अन्तर्बहिश्च । तत्र बहिस्तावद् भण्यते—कश्चित् साधुर्भिक्षामटन् क्षीरं वा दधि वा लब्ध्वा रसगृद्धतया कलमशालिप्रभृतिकमोदनं चिरगोचरचर्याकरणेनाप्युत्पाद्य यत् तेनैव क्षीरादिना सार्धमुपाश्रयाद् बहिः संयोजयति, आदिशब्दात् परमान्नादिकं वा लब्ध्वा घृत-खण्डादिना बहिरेव स्थितः सन् यद् योजयति एषा बहिःसंयोजना । अन्तस्तु प्रतिश्रयाभ्यन्तरे पुनः संयोजना त्रिविधा भवति, तद्यथा—भाजने हस्ते मुखे चैव । तत्र भाजनविषया यत्र भाजने कलमशाल्योदनस्तत्र दुग्ध-दध्यादि[4] प्रक्षिपति । हस्तविषया मण्डक-पूपलिकादिना गुड-शर्करादि[5] हस्तस्थितं वेष्टयित्वा मुखे प्रक्षिपति । मुखविषया पूर्वं मण्डकादि[6] मुखे प्रक्षिप्य ततः शर्करा-खण्डादि[7] प्रक्षिपति । एवंविधां द्विविधामप्याहारसंयोजनां लोभाभिभूततया कुर्वन् यदा यदा संयोजनीयवस्तुयोगं न लभते तदा तदा तिन्तिणिकत्वं करोतीत्याहारतिन्तिणिक उच्यते ॥ ७६५ ॥

[8]गत आहारतिन्तिणिकः । साम्प्रतमुपधि-शय्यातिन्तिणिकावतिदिशति—

---

१ °यारिए तरुणधम्मे । ता० ॥ २ °ण्णपण्हे, छेयसुयं व° ता० ॥ ३ °ति झष° भा० कां० ॥ ४ °ध्यादिकं प्रक्षिप्य तदुभयमपि संयोजयति । हस्त° भा० ॥ ५ °दिकं ह° भा० ॥ ६ °दिकं मु° भा० ॥ ७ °दिकं प्र° भा० ॥ ८ अथोपधि-शय्या° भा० विना ॥

**एमेव उवहि सेज्जा, गुणोवगारी उ जस्स जं होइ ।**
**सो तेण जोयवंतो, तदभावे तिंतिणो होइ ॥ ७६६ ॥**

एवमेवोपधि-शय्ययोरपि संयोजनाया भावना कार्या । सा चेयम्—उपधिसंयोजना द्विविधा—बहिरन्तश्च । तत्र बहिःसंयोजना उत्कृष्टं कल्पं लब्ध्वा चोलपट्टकमपि उत्कृष्टमुत्पादयति, और्णिकं वा कल्पं सुन्दरं लब्ध्वा तदनुरूपमेव सौत्रिकमुत्पादयति, उत्पाद्य च तदुभयमपरिभोगेन संयोजयति । अन्तःसंयोजना पुनर्विभूषार्थं श्वेतकम्बल्यां कृष्णदवरकसीवनिकां ददाति इत्यादि । शय्या—प्रतिश्रयस्तस्य संयोजनाऽपि द्विविधा—बहिरन्तश्च । तत्र बहिःसंयोजना अकपाटमुपाश्रयं लब्ध्वा कपाटाभ्यां संयोजयति । अन्तःसंयोजना शोभार्थं प्रतिश्रयं गोमय-मृदादिना लिम्पति सेटिकया वा धवलयति । अथवा शय्याशब्देन संस्तारक उच्यते, ततश्च सुन्दरतरं संस्तारकं लब्ध्वा यद् उत्तरपट्टमपि तदनुरूपमुत्पाद्य परिभुङ्क्ते सा बहिःसंयोजना । यत् पुनः सुकुमारस्पर्शार्थं विभूषार्थं वा सुन्दरया भङ्ग्या संस्तारकं प्रस्तृणाति सा अन्तःसंयोजना । तदेवं यद् उपध्यादिकं 'यस्य' साधोः 'गुणोपकारि' विभूषादिगुणोपयोगि भवति सः 'तेन' विवक्षितेन वस्तुना सार्द्धं तदेव वस्तु 'योजयन्' मीलयन् 'तदभावे' विवक्षितवस्तुयोगाभावे 'तिन्तिणिको भवति' 'हा ! नास्त्यमुकं वस्तु अत्र स्थण्डिलप्राये सन्निवेशे' इत्यादि जल्पतीत्यर्थः ॥ ७६६ ॥ गतं तिन्तिणिकद्वारम् । अथ चलचित्तद्वारमतिदेशेनैवाह—

चलचित्तः

**चलचित्तो भावचलो, उस्सग्गऽववायतो उ जो पुव्विं ।**
**भणितो सो चेव इहं, गाणंगणियं अतो वोच्छं ॥ ७६७ ॥**

चलचित्त इह 'भावचलः' अपरापरशास्त्रपल्लवग्राही गृह्यते । स च उत्सर्गतोऽपवादतश्च यः पूर्वमचञ्चलद्वारे ( गा० ७५५ ) भणितः स एवेहापि भणितव्यः । गाणङ्गणिकमत ऊर्ध्वं वक्ष्ये ॥ ७६७ ॥ तमेवाह—

गाणङ्गणिकः

**छम्मास अपूरित्ता, गुरुगा बारससमासु चउलहुगा ।**
**तेण परं मासलहू, गाणंगणि कारणे भइतो ॥ ७६८ ॥**

उपसम्पन्नः साधुः कारणाभावे षण्मासान् अपूरयित्वा यद्येकस्माद् गणाद् अपरं गणं सङ्क्रामति तदा तस्य चत्वारो गुरुकाः । षण्मास्याः परतो यावद् द्वादश समाः—वर्षाणि ता अपूरयित्वा गच्छतश्चतुर्लघुकाः । ततः परं—द्वादशभ्यो वर्षेभ्य ऊर्द्ध्वं निष्कारणं गणाद् गणं सङ्क्रामतो मासलघु । "गाणंगणि" त्ति भावप्रधानो निर्देशः, ततो गाणङ्गणिकत्वं 'कारणे' ज्ञान-दर्शन-चारित्राणामन्यतरस्मिन् पुष्टालम्बने समुत्पन्ने 'भाज्यं' सेवनीयम् । किमुक्तं भवति ?—कारणे मध्येऽप्यर्वागपि षण्मासं वा गणाद् गणं सङ्क्रामन्नपि न प्रायश्चित्तभाग् भवतीति ॥ ७६८ ॥

गतं गाणङ्गणिकद्वारम् । सम्प्रति दुर्बलचारित्रद्वारमाह—

दुर्बलचारित्रः

**मूलगुण उत्तरगुणे, पडिसेवइ पणगमाइ जा चरिमं ।**

---

१ यद् आहारोपध्यादिकं यस्य साधोः 'गुणोपकारि' सुस्वादुतादिगुणोपयोगि भा० ॥
२ °त्यादि परिदेवनां करोतीत्यर्थः ॥ ७६६ ॥ व्याख्यातस्त्रिविधोऽपि भावतिन्तिणिकः, ततश्चावसि[तं] तिन्तिणिक° भा० ॥

**धिइ-वीरियपरिहीणो, दुब्बलचरणो अणट्ठाए ॥ ७६९ ॥**

मूलगुणोत्तरगुणविषयानपराधान् यः प्रतिसेवते । कथम् ? इत्याह—'पञ्चकादि यावच्चरमम्' इह पञ्चकशब्देन यत्र प्रतिसेविते रात्रिन्दिवपञ्चकमापद्यते स सर्वजघन्यश्चरणापराधः परिगृह्यते, आदिशब्दाद् दशरात्रिन्दिवादिप्रायश्चित्तस्थानानि यावत् चरमं सर्वोत्कृष्टचरणापराधलक्षणं पाराञ्चिकप्रायश्चित्तस्थानमिति । कथम्भूतः सन् प्रतिसेवते ? इत्याह—'धृति-वीर्यपरिहीणः' मानसिकावष्टम्भबलरहितः ◁ असौ, न खल्वनीदृशश्चरण-करणविषयभूतान्यपराधपदान्यासेवितुमुत्सहते । ▷ सोऽपि यदि पुष्टालम्बनतः प्रतिसेवते ततो न दोषभाग् भवेदित्याह—"अणट्ठाए" त्ति अर्थः—दर्शन-ज्ञानादिकं प्रयोजनं तदभावोऽनर्थं तेन यः प्रतिसेवते स एष दुर्बलचरणः ॥ ७६९ ॥ एवंविधस्य च्छेदश्रुतार्थदाने दोषबाहुल्यख्यापनार्थमिदमाह—

**पंचमहव्वयभेदो, छक्कायवहो अ तेणऽणुन्नाओ ।**
**सुहसील-ऽवियत्ताणं, कहेइ जो पवयणरहस्सं ॥ ७७० ॥**

'तेन' आचार्येण पञ्चमहाव्रतभेदः षट्कायवधश्चानुज्ञातः, यः 'सुखशीला-ऽव्यक्तानां' सुखं—शरीरशुश्रूषादिकं ☞ शीलयन्तीति सुखशीलाः—पार्श्वस्थादयः, अव्यक्ताः श्रुतेन वयसा च, सुखशीलाश्चाव्यक्ताश्चेति द्वन्द्वस्तेषामिति चूर्णिकृतोऽभिप्रायः । निशीथचूर्णिकृतः पुनरयम्—सुखे—शरीरसौख्ये शीलं—स्वभावो व्यक्तः—परिस्पष्टो येषां ते सुखशीलव्यक्तास्तेषाम्, यद्वा सुखं—मोक्षसौख्यं तद्विषयं यत् शीलं—मूलोत्तरगुणानुष्ठानं ततो विगतो यत्नः—उद्यम आत्मा वा येषां ते सुखशीलवियत्नाः सुखशीलव्यात्मानो वा ☜ तेषाम्, उभयत्रापि पार्श्वस्थादीनामित्यर्थः । 'प्रवचनरहस्यं' छेदग्रन्थार्थतत्त्वं कथयति ॥ ७७० ॥

कथं पुनस्तेन पञ्चमहाव्रतभेदः षट्कायवधश्चानुज्ञातो भवति ? इति उच्यते—

**निस्साणपदं पीहइ, अनिस्साणविहारयं न रोएइ ।**
**तं जाण मंदधम्मं, इहलोगगवेसगं समणं ॥ ७७१ ॥**

निश्रीयते—मन्दश्रद्धाकैरासेव्यत इति निश्राणं तच्च तत् पदं च निश्राणपदम्—अपवादपदमित्यर्थः, तदेव यः 'स्पृहयति' रुचिपदमवतारयति, अनिश्राणविहारितां तु न रोचयति, तमेवंविधं श्रमणं जानीहि मन्दधर्माणं 'इहलोकगवेषकं' मनोज्ञभक्त-पानाद्युपभोगेन केवलस्यैवेहलोकस्य चिन्तकं परलोकपराङ्मुखम् । एवंविधस्य च प्रवचनरहस्यप्रदाने विशेषतः पञ्चमहाव्रतभेदः षट्कायवधश्च भवतीति युक्तमुक्तं "तेनानुज्ञातः" इति ॥ ७७१ ॥

गतं दुर्बलचारित्रद्वारम् । अथाऽऽचार्यपरिभाविद्वारमाह—

---

१ ◁ ▷ एतदन्तर्गतः पाठः भा० त० कां० ॥ २ "सुखं शीलं भजतीति सुखशीलं काङ्क्षतीत्यर्थः, न व्यक्तोऽव्यक्तः श्रुतेन वयसा चेत्यर्थः ।" इति चूर्णिपाठः ॥ ३ °कृतो व्याख्यानम् । निशी° भा० °कृतः । निशी° डे० ॥ ४ °मरिदम्—सुखे-सुखविषयं शीलं व्यक्तं-परिस्पष्टं सर्वजनप्रत्यक्षं येषां भा० ॥ ५ त० विनाऽन्यत्र—तद् यः स्पृहयति, तदेवैकं रोचयतीति भावः, अनि° भा० । तदेव यः स्पृहयति अनि° डे० मो० ले० कां० ॥ ६ 'मन्दधर्माणं' तुच्छधर्मश्रद्धाकं 'इह° भा० ॥

आचार्य-परिभावी

**डहरो अकुलीणो त्ति य, दुम्मेहो दमग मंदबुद्धि त्ति ।**
**अवि अप्पलाभलद्धी, सीसो परिभवइ आयरियं ॥ ७७२ ॥**

कश्चित् कुशिष्यः सूचया असूचया वा आचार्यं परिभवति । सूचा नाम स्वव्यपदेशेन परस्वरूपसूचनम्, यथा कोऽपि वयःपरिणतः साधुर्बालकमाचार्यं ब्रवीति—अद्यापि 'डहराः' बालका वयम्, किं नामास्माकमाचार्यपदस्य योग्यत्वम्? इति । असूचा स्फुटमेव परदोषोद्घट्टनम्, यथा—भो आचार्य! त्वं तावदद्यापि "डहरो" मुग्धः क्षीरकण्ठो वर्तसे, अतः कीदृशं भवत आचार्यत्वम्? इति । योऽकुलीन आचार्यस्तमुद्दिश्य भणति—अहो! उत्तमकुलसम्भूता अमी योग्या एवाऽऽचार्यपदस्य, वयं तु हीनकुलोत्पन्नाः, कुतोऽस्माकं सूरिपदयोग्यता? । यद्वा धिक् कष्टं यदकुलीनोऽप्ययमाचार्यपदे निवेशित इति । तथा 'दुर्मेधाः' मन्दप्रज्ञः 'द्रमकः' नाम दरिद्रो भूत्वा यः प्रव्रजितः 'मन्दबुद्धिः' स्वल्पमतिः । अपिः सम्भावनायाम्, सम्भाव्यते कुतोऽपि कारणादेवंविधोऽप्याचार्य इति । अल्पा—तुच्छा वस्त्र-पात्रादिलाभे लब्धिर्यस्य सोऽल्पलाभलब्धिः । एतानप्येवमेव सूचया असूचया च परिभवति ॥ ७७२ ॥

अथ शिष्यपदं व्याचष्टे—

**सो वि य सीसो दुविहो, पव्वावियगो अ सिक्खओ चेव ।**
**सो सिक्खओ अ तिविहो, सुत्ते अत्थे तदुभए य ॥ ७७३ ॥**

यः शिष्यो गुरून् परिभवति सोऽपि च द्विविधः—प्रव्राजितकश्च शिक्षकश्चैव । यस्तेनैव परिभूयमानगुरुणा दीक्षां ग्राहितः स प्रव्राजितकः । शिक्षकस्तु गच्छान्तरादध्ययनार्थमागतः । स च शिक्षकस्त्रिविधः—सूत्रेऽर्थे तदुभये च, सूत्रग्राहकोऽर्थग्राहकस्तदुभयग्राहकश्चेत्यर्थः ॥ ७७३ ॥ गतमाचार्यपरिभाविद्वारम् । सम्प्रति वामावर्त्तद्वारमाह—

वामावर्त्तः

**एहि भणिओ उ वच्चइ, वच्चसु भणिओ दुतं समल्लियइ ।**
**जं जह भणंति तं तह, अकरेंतो वामवट्टो उ ॥ ७७४ ॥**

यः शिष्यः 'एहि' आगच्छेति भणितः सन् व्रजति, व्रजेति भणितः सन् 'द्रुतं' शीघ्रं समालीयते । एवमन्यदपि कार्यं[1] यद् यथा भण्यते तत् तथा अकुर्वाणो वामावर्त्त उच्यते ॥ ७७४ ॥ अथ पिशुनद्वारमाह—

पिशुनः

**पीईसुण्णण पिसुणो, गुरुगाइ चउण्ह जाव लहुओ उ ।**
**अहव असंतासंते, लहुगा लहुगो गिही गुरुगा ॥ ७७५ ॥**

"पीईसुण्णण" त्ति अलीकानीतराणि वा परदूषणानि भाषमाणः प्रीतिं शून्यां करोतीति पिशुनः, नैरुक्ती शब्दनिष्पत्तिः । स च यद्याचार्यस्य पैशून्यं करोति तदा चतुर्गुरु, उपाध्यायस्य करोति चतुर्लघु, भिक्षोः करोति मासगुरु, क्षुल्लकस्य करोति मासलघु इति चूर्ण्यभिप्रायः[2] । निशीथचूर्ण्यभिप्रायेण तु—यद्याचार्यः पैशून्यं करोति तदा चत्वारो गुरवः, उपाध्यायः करोति चत्वारो लघवः, भिक्षुः करोति मासगुरु, क्षुल्लकः करोति मासलघु । अमुमेवार्थं

१ कार्यमध्ययना-ऽध्यापनादिकं यद् भा० ॥ २ "आयरियस्स जति करोति तो ⁘, वसभस्स ⁘, भिक्खुस्स •, खुड्डगस्स• ।" इति चूर्णिपाठः ॥

सञ्जिघृक्षुराह—“गुरुगा” इत्यादि । ‘चतुर्णाम्’ आचार्यो-पाध्याय-भिक्षु-क्षुल्लकरूपाणां पैशून्यकरणे विषयभूतानां कर्तृभूतानां वा यथाक्रमं गुरुकादयो यावद् लघुको मासः प्रायश्चित्तम् । ‘अथवा’ इति प्रकारान्तरोपन्यासे, सामान्यतः संयतः संयतेषु पैशून्यं करोति तत्रासद्दूषणविषये पैशून्ये चत्वारो लघवः, सद्दूषणविषये लघुको मासः । एते एव प्रायश्चित्ते गृहिषु गुरुके अवसातव्ये । तद्यथा—गृहस्थेषु असद्भिर्दोषैः पैशून्यं करोति चत्वारो गुरवः, सद्भिः करोति गुरुमासः ॥ ७७५ ॥ अथादिमादृष्टभावद्वारं विवृणोति—

आद्यदृष्टभावः

**आवासगमाईया, सूयगडा जाव आइमा भावा ।**
**ते उ न दिट्ठा जेणं, अदिट्ठभावो हवइ एसो ॥ ७७६ ॥**

आवश्यकादयः सूत्रकृताङ्गं यावद् ये आगमग्रन्थास्तेषु ये पदार्थाः अभिधेयास्ते आदिमा भावा उच्यन्ते । ‘ते तु’ ते पुनर्भावा येन न दृष्टाः—नावगताः स एषोऽदृष्टभाव इति, उपलक्षणत्वाद् आदिमादृष्टभावो भवतीति ॥ ७७६ ॥

अथाकृतसामाचारीकद्वारं बिभावयिषुः सामाचारीस्वरूपं तावदाह—

अकृतसामाचारीकः

**दुविहा सामायारी, उवसंपद मंडलीएँ बोधव्वा ।**
**अणालोइयम्मि गुरुगा, मंडलिमेरं अतो वोच्छं ॥ ७७७ ॥**

सामाचारी द्विविधा—उपसम्पदि मण्डल्यां च बोद्धव्या । तत्रोपसम्पत् त्रिविधा—ज्ञानोपसम्पद् दर्शनोपसम्पत् चारित्रोपसम्पत् । आसां च सामान्यत इयं सामाचारी—गच्छान्तरादुपसम्पदः प्रतिपत्त्यर्थमायातः साधुः पर्यनुयोक्तव्यः—‘वत्स ! कस्त्वम् ? कुतो वा गच्छादागतोऽसि ? किंनिमित्तमिहायातः ?’ इत्येवं यद्यपर्यनुयुज्य तस्योपसम्पदं प्रतीच्छति तदा ‘अनालोचिते’ अपर्यनुयुक्ते सति चत्वारो गुरुकाः । यद्वा ‘अनालोचिते’ आलोचनामदापयित्वा यदि तं परिभुङ्क्ते वाचयति वा तदा चत्वारो गुरुकाः । अत्र च ज्ञानोपसम्पदाऽधिकारः । “मंडलिमेरं अतो वोच्छं” ति मण्डली—सूत्रार्थमण्डलीरूपा तस्याः सम्बन्धिनीं मर्यादां—सामाचारीं अत ऊर्द्ध्वं वक्ष्ये ॥ ७७७ ॥ प्रतिज्ञातमेवाह—

सूत्रार्थमण्डल्योर्व्यवस्था

**सुत्तम्मि होइ भयणा, पमाणतो यावि होइ भयणा उ ।**
**अत्थम्मि उ जावइया, सुणिंति थेवेसु अन्ने वि ७७८ ॥**

‘सूत्रे’ सूत्रमण्डल्यां निषद्यायां भजना कार्या—यदि तरुणो निरुपहतशरीरश्चाऽऽचार्यो न च निषद्याप्रियस्ततो न क्रियते निषद्या, अथ स्थविर आमयावी वा तरुणो वा निषद्याप्रियः ततः क्रियते । प्रमाणतोऽपि सूत्रमण्डल्यां निषद्याविषये भजना । किमुक्तं भवति ?—कदाचिद् एकस्मिन् कल्पे कदाचिद् द्वयोस्त्रिषु यावन्मात्रेषु वा कल्पेषूपविष्टः सुखेनैव वाचनां ददाति तावद्भिः कल्पैर्निषद्या क्रियते । ‘अर्थे’ अर्थमण्डल्यां पुनर्यावन्तः साधवोऽर्थं शृण्वन्ति तावन्तः सर्वेऽप्यवश्यन्तया स्वं स्वं कल्पं निषद्याकारकस्य प्रयच्छन्ति, स च तैः कल्पैर्निषद्यां रचयति । अथ स्तोका एवानुयोगं ग्रहीतारस्ततः स्तोकेषु सत्सु ‘अन्येऽपि’ अनुयोगमश्रोतारोऽपि यावद्भिर्निषद्या भवति तावतः कल्पानर्पयन्ति ॥ ७७८ ॥ अथार्थमण्डल्या एव विधिमाह—

**मज्जण निसिज्ज अक्खा, किइकम्मुस्सग्ग वंदणग जेट्ठे ।**

**परियाग जाइ सुअ सुणण समत्ते भासई जो उ ॥ ७७९ ॥**

'मार्जनम्' अनुयोगमण्डल्याः प्रमार्जनं तत्प्रथमतः कर्तव्यम् । ततो निषद्याद्वयं रचनीयम्—एका गुरूणामपरा पुनरक्षाणाम् । ततोऽक्षाः प्रमार्ज्य निषद्याया उपरि स्थापनीयाः । ततः 'कृतिकर्म' वन्दनकं गुरूणां दातव्यम् । ततोऽनुयोगप्रस्थापनार्थम् 'उत्सर्गः' कायोत्सर्गः, तत्र चाष्टावुच्छ्वासाश्चिन्तनीयाः । ततः पञ्चमङ्गलमुच्चार्य च्छोभवन्दनकं दत्त्वा "नाणं पंचविहं पण्णत्तं" इत्यादिना नन्द्याकर्षणे कृते ज्येष्ठस्य वन्दनं—प्रणामः कर्तव्य इति । अत्र परः प्राह—किं यः पर्यायेण ज्यायान् स ज्येष्ठः ? किं वा यो जात्या उपलक्षणत्वात् कुलेन वा ? यद्वा येन श्रुतं बह्वधीतम् ? अथ येन बहुभिः परिपाटीभिरर्थस्य श्रवणं कृतम् ? एतेषां मध्ये क इह ज्येष्ठोऽधिक्रियते ? । अत्राचार्यः प्रत्युत्तरयति—एतेषां मध्यादेकोऽपि नात्राधिक्रियते किन्तु 'समासे' समर्थिते व्याख्याने उत्थितानां यो व्याख्यानलब्धिमान् 'अनुभाषते' अग्रणीभूय चिन्तनिकां कारयति स इह ज्येष्ठो भण्यते, तस्य जिनवचनव्याख्यानलक्षणगुणाधिकतयाऽवमरात्निकस्यापि वन्दनं विधेयम् । तथा गुरूणां हेतोः खेल-कायिकीमात्रके प्रथममेव तत्र स्थापयितव्ये, मा भूदनुयोगं शृण्वतां तदानयने श्रवणव्याघातः । एतच्च गाथायामनुक्तमपि प्रक्रमादत्र ज्ञातव्यम्, अन्यत्राऽऽवश्यकादावुक्तत्वात् ॥ ७७९ ॥

अथात्रैव वैपरीत्यकरणे प्रायश्चित्तमाह—

**अवितहकरणे सुद्धो, वितह करेंतस्स मासियं लहुगं ।**
**अक्ख निसिज्जा लहुगा, सेसेसु वि मासियं लहुगं ॥ ७८० ॥**

प्रमार्जनादिषु पदेषु अवितथकरणे 'शुद्धः' न प्रायश्चित्तभाग् । एतेष्वेव सामाचारीं वितथां कुर्वाणस्य लघु मासिकम्, इदं च सामान्यत उक्तम् । अत इदमेव सविशेषं विषयविभागेनाह—"अक्ख" इत्यादि । अक्षाणामप्रमार्जनेऽस्थापने वा निषद्यामन्तरेण वा स्थापनेऽनुयोगं ददतः शृण्वतां वा चत्वारो लघुकाः । गुरूणां निषद्याया अकरणे श्रोतॄणां चत्वारो लघवः । शेषेष्वपि सर्वेषु मासिकं लघुकं प्रायश्चित्तम् । तद्यथा—अनुयोगमण्डलीस्थानं न प्रमार्जयन्ति, वन्दनकं गुरूणां न ददति, अनुयोगप्रारम्भनिमित्तं कायोत्सर्गं न कुर्वन्ति, खेलमात्रकादिकं न ढौकयन्ति, ज्येष्ठस्य प्रणामं न कुर्वन्ति, सर्वत्रापि प्रत्येकं मासलघु । एवंविधामुपसम्पन्मण्डलीविषयां द्विविधामपि सामाचारीं यो न करोति स सोऽकृतसामाचारीक उच्यते ॥ ७८० ॥ गतमकृतसामाचारीकद्वारम् । सम्प्रति तरुणधर्मद्वारमाह—

तरुणधर्मा

**तिण्हाऽऽरेण समाणं, होइ पकप्पम्मि तरुणधम्मो उ ।**
**पंचण्ह दसाकप्पे, जस्स व जो जत्तिओ कालो ॥ ७८१ ॥**

व्रतपर्यायमधिकृत्य तिसृणां 'समानां' वर्षाणां 'आरेण' अर्वाग् वर्तमानः 'प्रकल्पे' निशीथाध्ययने 'तरुणधर्मा' अविपक्वपर्यायो भवति । ◁तुशब्दो विशेषणे । किं विशिनष्टि ? इह

१ इह ज्येष्ठशब्देन व्यपदिश्यते, तस्य भा० ॥ २ मासिकमिति तावदसामाचारीनिष्पन्नं सामान्येन प्रायश्चित्तम् । इदमेव सविशेषं भा० ॥ ३ ◁ ▷ एतदन्तर्गतः पाठः मो० ले० पुस्तकयोरेव वर्तते ॥

यः खल्वसञ्जातपक्षकुर्चीकः स त्रिवर्षपर्यायेऽपि वर्त्तमानो निशीथाध्ययनस्यायोग्यो मन्तव्य इति । ▷ पञ्चानां वर्षाणामर्वाग् वर्त्तमानस्तु "दसाकप्पे" त्ति उपलक्षणत्वाद् दशा-कल्प-व्यवहाराणां तरुणधर्मा ज्ञातव्यः । 'यस्य वा' सूत्रकृताङ्गादेः श्रुतस्य यो यावान् कालो व्यवहाराध्ययने दशमोद्देशके भणितः तस्य तावन्तं कालमसमापयन् तरुणधर्मा भवति । यथा—"कप्पइ चउवासपरियायस्स समणस्स निग्गंथस्स सूअगडं नाम अंगं उद्दिसित्तए" (सूत्र २२) इत्यादि ॥ ७८१ ॥ गतं तरुणधर्मद्वारम् । अथ गर्वितद्वारमाह—

गर्वितः[1]

पुरिसम्मि दुव्विणीए, विणयविहाणं न किंचि आइक्खे ।
न वि दिज्जइ आभरणं, पलियत्तियकण्ण-हत्थस्स ॥ ७८२ ॥

इह यः श्रुतमधीयानः तदवलेपादेव दुर्विनीतो भवन्नुपलभ्यते, तादृशे पुरुषे 'विनयविधानं' कर्मविनयनोपायमाऽऽचारादि श्रुतजातम् 'किञ्चिदपि' स्तोकमात्रमपि 'नाऽऽचक्षीत'[2] ◁ न[3] प्रतिपादयेत् । यद्वा विनयः—द्वादशावर्त्तवन्दनकप्रदानादिप्रतिरूपोपचाररूपो विधीयते यस्मिन्नधीयमाने तद् 'विनयविधानम्' आचारादि श्रुतमेव तद् नाऽऽचक्षीत । कुतो हेतोः ? इति चेद् अत आह—"न वि दिज्जइ" इत्यादि । ▷ 'नापि' नैव दीयते 'आभरणं' कुण्डलकङ्कणादिकं परिकर्त्तितकर्ण-हस्तस्य पुरुषस्य[4], आविध्यमानस्यापि तस्य तदङ्गे शोभाया अलभमानत्वात्; एवं श्रुताभरणमपि विनयविकलाङ्गस्य योज्यमानं न शोभां बिभर्त्ति इति जिनवचनवेदिना तस्य तद् न दातव्यम् ॥ ७८२ ॥

अथाऽस्यैव सविशेषमपात्रताख्यापनार्थमाह—

मद्दवकरणं नाणं, तेणेव उ जे मदं समुवहंति ।
ऊणगभायणसरिसा, अगदो वि विसायते तेसिं ॥ ७८३ ॥

मार्दवं—माननिग्रहस्तत्करणं—तत्कारकं 'ज्ञानं' श्रुतरूपम्, 'तेनैव' ज्ञानेन 'ये' दुर्विदग्धाः 'मदम्' अहङ्कारं समुद्वहन्ति । कथम्भूताः[5] ? 'ऊनकभाजनसदृशाः' असम्पूर्णभृतघटादिभाजनतुल्याः[6], यथा किल तद् झलझलायते तथैतेऽपि दुरधीतविद्यालवतया निजपाण्डित्यगर्वोध्माता[7]

१ गर्वितो नियमादविनीतो भवतीति तद्द्वारेणैवाभिधीयते—दुर्विनीतो नाम-'कथमहमेतस्य समीपे नीचैस्तरासनोपविष्टः सन्नेतदीयमुखादर्थं श्रोष्यामि ?' इति मानम्लानिभीरुः गोष्ठामाहिलवद्, एवंविधे पुरुषे 'विनयविधानं' विनयो विधीयतेऽत्र अनेनेति वा विनयविधानं-श्रुतं 'किञ्चिदपि' स्तोकमात्रमपि 'नाऽऽचक्षीत' न प्रतिपादयेत् । कुतः ? इत्याह—'नापि' भा० पुस्तके । "पुरिसम्मि गाधा । अविणीयत्तणेण दूसिओ (दुमिओ प्र०) विणतो जस्स स भवति दुव्विणीओ । सो गव्वेण णेच्छति अत्थमण्डलीए सोउं 'कधमहं एतस्स णीतयरे उवविसिस्सामि ?' । जो वा सुणेत्ता अविणीतो भविस्सति तस्स वि ण वट्टति कधेतुं 'विणयविधाणं' ति सुतणाणविणयभेदं ।" इति चूर्णिः ॥ २ °त । यतः 'नापि त० डे० ॥ ३ ◁ ▷ एतदन्तर्गतः पाठः मो० ले० पुस्तकयोरेव ॥ ४ भा० ले० मो० विनाऽन्यत्र—°स्य । एवं श्रुताभरणमपि विनयविकलाङ्गस्य जिनवचनवेदिना न दात° डे० त० कां० ॥ ५ °ताः सन्तः ? इत्याह—'ऊन° भा० ॥ ६ डे० त० कां० विनाऽन्यत्र—°ल्याः, असम्पूर्णभृतं हि झलझलायते तथैतेऽपि ले० मो० । ल्याः, असम्पूर्णभृतं हि भाजनमितस्ततो झलज्झलायते एवमेतेऽपि भा० ॥ ७ डे० त० कां० विनाऽन्यत्र—°ता वाचालतया यदपि तदपि लपन्ति । तेषा° भा० । °ता यदपि तदपि लपन्तो झलज्झलायन्ते । एवंविधानां च तेषा° ले० मो० ॥

यदपि तदपि कुर्वन्तस्तिष्ठन्ति । तेषाम् 'अगदोऽपि' विषापहारकमप्यौषधं 'विषायते' विषरूपतया परिणमते श्रुतरूपम् । ◁ तथा चैतदर्थसंवादकमेवेदं सूक्तम्—

ज्ञानं मद-दर्पहरं, माद्यति यस्तेन तस्य को वैद्यः ? ।
अमृतं यस्य विषायति, तस्य चिकित्सा कथं क्रियते ? ॥ ▷ ॥ ७८३ ॥

गतं गर्वितद्वारम् । अथ प्रकीर्णकद्वारमाह—

प्रकीर्णः

**सोउं अणभिगताणं, कहेइ अमुगं कहिज्जई इत्थं ।**
**एस उ पइण्णपण्णो, पइण्णविज्जो उ सव्वं पि ॥ ७८४ ॥**

अर्थमण्डल्यां यो राहसिकग्रन्थार्थं श्रुत्वा उत्थितः सन् 'अनभिगतानाम्' अपरिणतानां लेशोद्देशतः कथयति—यथा 'अमुकं' प्रलम्बग्रहणादिकम् 'अत्र' सूत्रे कल्पनीयतया कथ्यते; एष प्रकीर्णप्रज्ञः । प्रज्ञाशब्देनेह प्रकर्षेण ज्ञायते उत्सर्गा-ऽपवादतत्त्वमनयेति व्युत्पत्त्या छेदसूत्रान्तर्गता रहस्यवचनपद्धतिरुच्यते, सा प्रकीर्णा—विक्षिप्ता येन स प्रकीर्णप्रज्ञः । "प्रकीर्णप्रश्नः" ("पइण्णपण्हो") इति वा पाठः, तत्र चापरिणतैः 'किमेतद् रहस्यभूतमत्राभिधीयते ?' इत्युल्लेखेन पृच्छ्यत इति प्रश्नः—छेदश्रुतान्तःपाती रहस्यार्थ इत्यर्थः, स प्रकीर्णो येन स प्रकीर्णप्रश्न इति । तथा प्रकीर्णविद्यस्तु सर्वमप्यादेरारभ्य पर्यन्तं यावत् छेदश्रुतमुत्सर्गाऽपवादसहितमपरिणतानां कथयति । विद्याशब्देन चात्राऽखण्डं छेदश्रुतमभिधीयते, प्रकीर्णा विद्या येन स प्रकीर्णविद्य इति ॥ ७८४ ॥ अथ द्विविधस्यापि प्रकीर्णव्याकर्तुर्दोषानाह—

**अप्पच्चओ अकित्ती, जिणाण ओहाव मइलणा चेव ।**
**दुल्लहबोहीअत्तं, पावंति पइण्णवागरणा ॥ ७८५ ॥**

अपरिणतादीनां राहसिकेषु पदेषु ज्ञाप्यमानेषु 'अप्रत्ययः' अविश्वासो भवति; पूर्वापरविरुद्धमिदं शास्त्रम्, यतः पूर्वं "न कल्पते तालप्रलम्बं प्रतिग्रहीतुम्" इति प्ररूप्य पश्चात् "कल्पते" इत्यनुज्ञायाः प्रतिपादनात्; यथा चैतदलीकं तथा सर्वमपि जिनवचनमीदृशमेवेति । ते चैवं विपरिणताः सन्तः 'जिनानां' तीर्थकृतामकीर्तिं कुर्युः, कुत एषां सर्वज्ञत्वम् ? यैरीदृशं पूर्वापरव्याहतं भाषितमिति । ततश्च ते "ओहाव"त्ति 'अवधावनम्' उत्प्रव्रजनं कुर्वीरन् । अथ नोत्प्रव्रजेयुस्तथापि "मइलण" त्ति तेषामद्याप्यपरिणतत्वादपवादपदं श्रुत्वाऽपरिणामकत्वेनातिपरिणामकत्वेन वा शङ्कादिदोषतो ज्ञानादीनां 'मलिनता' मालिन्यं स्यादिति । ततश्चैवमप्रत्ययादिकं जनयन्तो दुर्लभबोधिकत्वं प्राप्नुवन्ति, क एते ? इत्याह—'प्रकीर्णव्याक-

---

१ °पन्ते-झलज्झलायन्ते । एवंविधानां च तेषाम् मो० ले० ॥ २ ◁ ▷ एतदन्तर्गतः पाठः डे० त० कां० नास्ति ॥ ३ °नाम्' अनधीतश्रुतानामपरिणतादीनां पृष्टो वाऽपृष्टो वा लेशोद्देशतो रहस्यभूतमर्थं कथयति, यथा—'अमुकं' प्रलम्बग्रहणादिकमत्र कथ्यत इति; एष भा० । "सोउं अण० गाधा । अत्थमंडलीए सुणेत्ता उट्ठितो अणभिगताणं अयोग्यानामित्यर्थः पुच्छितो अपुच्छितो वा कधेति—एवं एत्थ कधेज्जति, जधा—पुढवीकायादी वि छक्काया कप्पंति, पंच य महव्वयाइं वितधं करेज्जा, एस पइण्णपण्हो" इति चूर्णिः ॥ ४ सूत्रे कथ्यते डे० त० विना ॥ ५ °णतादिभिः 'कि° भा० ॥ ६ °स्यार्थः स प्र° भा० डे० त० ॥ ७ °षमाह भा० ॥ ८ °स्ततः "म° भा० ॥

रणाः' प्रविस्तारितच्छेदश्रुतरहस्यार्थनिर्वचनाः, प्रकीर्णप्रश्नाः प्रकीर्णविद्याश्चेत्यर्थः ॥ ७८५ ॥

व्याख्यातं प्रकीर्णद्वारम् । अथ निह्नवद्वारं विवृणोति—

गुरुनिह्नवी

**सुत्त-ऽत्थ-तदुभयाइं, जो घेत्तुं निण्हवे तमायरियं ।**
**लहुया गुरुया अत्थे, गेरुयनायं अबोही य ॥ ७८६ ॥**

यः सूत्रा-ऽर्थ-तदुभयानि कस्यचित् पार्श्वे गृहीत्वा तमाचार्यं 'निह्नुते' अपलपति, अपरं कमपि विख्यातगुणमाचार्यमुद्दिशति, अथवा ब्रूयात्—मया स्वयमेवाभ्यूह्याभ्यूह्य सकलमपि श्रुतं निर्णीतम्, केवलं तैर्वाचनाचार्यैर्मम दिङ्मात्रमेव दत्तमिति । अत्र च यदि सूत्राचार्यं निह्नुते तदा चत्वारो लघुकाः, 'अर्थे' अर्थदायकमाचार्यं निह्नुवानस्य चत्वारो गुरुकाः, तदुभयाचार्यमपलपतः तदुभयं प्रायश्चित्तमिति । गेरुकः–परिव्राजकस्तस्य ज्ञातं–दृष्टान्तः । स चायम्—

गुरुनिह्नोतुः परिव्राजकस्योदाहरणम्

एगस्स ण्हावियस्स छुरघरगं विज्जाए आगासे चिट्ठइ । तं च एगो परिव्वायगो बहूहिं उवासणाहिं आराहेऊण तस्स सगासे विज्जं गिण्हित्ता अन्नत्थ गंतुं तिदंडेणं आगासगएण अच्छइ, तओ सो लोगेणं पूइज्जइ । अन्नया रन्ना पुच्छिओ—भगवं ! किं विज्जाइसओ ? उआहु तवाइसओ ? । भणइ—विज्जाइसओ । कओ आगमिउ ? त्ति । भणइ—हिमवंते पव्वए फलाहारनामस्स महरिसिस्स सगासाउ–त्ति भणिए तं तिदंडं खड त्ति पडियं । एस दिट्ठंतो ।

अयमत्थोवणओ—जहा सो ण्हावियं विज्जायरियं निण्हवेंतो ओहावणं पत्तो, एवं अन्ने वि अप्पगासं पि वायणायरियं निण्हवेंता इहलोए चेव बहूणं समण-सावगाईणं हीलणिज्जा भवंति देवयाहि य छलिज्जंति त्ति ॥

तथा "अबोही य" त्ति[2] परलोके अबोधिफलं कर्म गुरुनिह्नवकोऽर्जयति । एवंविधस्य न दातव्यम् ॥ ७८६ ॥ यत आह—

**उवहयमइ-विन्नाणे, न कहेयव्वं सुयं व अत्थो वा ।**
**न मणी सयसाहस्सो, आविज्झइ कोत्थु भासस्स ॥ ७८७ ॥**

मतिश्च स्वाभाविकी विज्ञानं च गुरूपदेशजं मति-विज्ञाने, ते उपहते–दूषिते यस्य सः 'उपहतमति-विज्ञानः' गुरुनिह्नोता । कथम् ? इति चेद् उच्यते—इह तावद् गृहस्था अपि मिथ्यादृष्टयस्तत्त्वा-ऽतत्त्वव्यतिकरविवेकविकला ऐहिकफलार्थमर्थशास्त्र-धनुर्वेदादि यस्य सकाशे शिक्षितवन्तस्तं यावज्जीवं गुरुं प्रतिपद्यमानाः सर्वस्यापि लोकस्य पुरतः श्लाघन्ते, न पुनः कदापि कस्यापि पुरतो निह्नुवते; स पुनः सर्वज्ञशासनप्रतिपन्नोऽप्यचिन्त्यचिन्तामणिकल्पश्रुतदायकानपि परमगुरून् निह्नुते इत्यतोऽसौ तेभ्योऽप्यधमत्वादुपहतमति-विज्ञानोऽभिधीयते । एवंविधे शिष्ये न कथयितव्यं 'श्रुतं वा' सूत्रम् 'अर्थो वा' तदभिधेयः । अमुमेवार्थं प्रतिवस्तूपमया द्रढयति—"न मणी" इत्यादि । "कोत्थु" त्ति आर्षत्वात् कौस्तुभो नाम मणिः 'शतसहस्रः' लक्षमूल्यः

१ अथ गुरुनिह्नवद्वारं ले० मो० ॥ २ त्ति अबोधिकत्वं परलोके गुरु° भा० ॥ ३ °निह्नव° त० डे० ॥ ४ कुतः ? इति चेद् उच्यते भा० ॥ ५ मतिः स्वाभाविकी, विज्ञानं गुरूपदेशजनितम्, मतिश्च विज्ञानं च मतिविज्ञाने, उपहते–गर्व-गुरुनिह्नवनादिदोषदूषिते मतिविज्ञाने यस्य सः 'उप° भा० ॥

'भासस्य' शकुन्तोऽभ्यस्य पक्षिणो गलके नाऽऽविध्यते, अयोग्यत्वात्; एवमस्यापि गुरुनिह्नोतुरत्यन्तापात्रभूतस्य श्रुतरत्नप्रदानमनुचितमिति न विधेयम् ॥ ७८७ ॥

गतं निह्नवद्वारम्। अत्र च तिन्तिणिक-चलचित्त-गाणङ्गणिक-दुर्बलचारित्रा-ऽऽचार्यपरिभाषि-वामावर्त्त-पिशुना-ऽऽकलसामाचारीक-गर्वित-प्रकीर्ण-निह्नविनः एकादशाऽपात्रभूताः शिष्याः, आदिमाद्दष्टभावोऽप्राप्तः, तरुणधर्मा पुनरव्यक्तः। अथैषां सूत्रार्थप्रदाने प्रायश्चित्तमाह—

तिन्तिणि-कादीनां सूत्रार्थ-प्रदाने प्रायश्चि-त्तम्

अव्वत्ते अ अपत्ते, लहुगा लहुगा य होंति अप्पत्ते।
लहुगा य दव्वतिंतिणि, रसतिंतिणि होंति चतुगुरुगा[4] ॥ ७८८ ॥

अव्यक्तः—तरुणधर्मा तस्य तथा "अपत्ते" त्ति अपात्राणामेकादशसङ्ख्याकानां सूत्रार्थौ यदि ददाति तदा चत्वारो लघुकाः। "लहुगा य होंति अप्पत्ते" त्ति अप्राप्तः—आद्यदृष्टभावस्तस्य ददाति चत्वारो लघुकाः। अत्रैव विशेषमाह—"लहुया य दव" इत्यादि। द्रव्यतिन्तिणिकस्य ददाति चत्वारो लघवः। 'रसतिन्तिणिकस्य' आहारतिन्तिणिकस्य ददाति चत्वारो गुरवः। उपधि-शय्यातिन्तिणिकयोर्ददानस्य चत्वारो लघव इत्यनुक्तमप्यत्रावसातव्यम्, निशीथचूर्णावुक्तत्वात् ॥ ७८८ ॥

अंतो बेहिं च गुरुगा, आयरिय-गिलाण-बाल बिइअपयं।
आयरियपारिभासिस्स होंति चउरो अणुग्घाया ॥ ७८९ ॥

आहारोपधि-शय्याविषयामन्तर्बहिर्वा संयोजनां कुर्वतश्चत्वारो गुरवः। आचार्य-ग्लान-बालादीनामर्थाय द्वितीयपदं भवति, एतदर्थं संयोजनामपि कुर्वन् शुद्ध इत्यर्थः। आचार्यपरिभाषिणः पुनश्चत्वारोऽनुद्घाताः प्रायश्चित्तम् ॥ ७८९ ॥ अथोपसंहरन्नाह—

तम्हा न कहेयव्वं, आयरिएणं तु पवयणरहस्सं[5]।
खेत्तं कालं पुरिसं, नाऊण पगासए गुज्झं ॥ ७९० ॥

यस्मादेवं प्रायश्चित्तमभिहितं तस्मात् तिन्तिणिकादीनामाचार्येण 'प्रवचनरहस्यम्' अपवादपदं 'न कथयितव्यम्' न प्ररूपणीयमिति। कथं पुनः कथयितव्यम्? इत्याह—'क्षेत्रम्' अध्वादिकं प्रवेष्टव्यं ज्ञात्वा प्रथमतोऽध्वकल्पादिकं प्रवचनरहस्यभूतमपरिणतानामपि कथयितव्यम्, अन्यथा तेषां मार्गे गच्छतां संयमा-ऽऽत्मविराधना स्यात्। एवं 'कालमपि' दुर्भिक्षादिकमागमिष्यन्तमागतं वा ज्ञात्वा यथायोगमपरिणतानामपि राहसिकश्रुतार्थं प्रकाशयेत्। 'पुरुषं वा' परिणामकलक्षणम् उपलक्षणत्वाद् भावं वा—ग्लान-बाल-वृद्धा-ऽसहिष्णुप्रभृतीनामुपग्रहकरणादिलक्षणं ज्ञात्वा प्रकाशयेद् 'गुह्यं' छेदश्रुतरहस्यभूतमपवादपदमिति ॥ ७९० ॥

व्याख्यातं "पत्ते अ" त्ति द्वारम्। अथानुज्ञातद्वारमाह—

अनुज्ञात-द्वारम्

चउभंगो अणुण्णाए, अणणुन्नाए अ पढमतो सुद्धो।
सेसाणं मासलहू, अविणयमाई भवे दोसा ॥ ७९१ ॥

अत्रानुज्ञाता-ऽननुज्ञातपदाभ्यां चतुर्भङ्गी कार्या, तद्यथा—अनुज्ञातमनुज्ञातो वाचयतीति

---

१ "भासो भीरुससणओ" इति चूर्णौ ॥ २ °न्तापरपर्यायस्य प° भा० ॥ ३ °ह्नवा ए° भा० ॥ ४ बहि चतुगुरुगा ता० ॥ ५ आयरिएणं तम्हा, ण कहेयव्वं तु पव° ता० ॥

प्रथमः, अस्य भावना—कश्चित् प्रातीच्छिको गच्छान्तरादागम्य सूत्राध्ययनार्थमुपसम्पन्नः, स चाऽऽचार्यैरनुज्ञातः—आर्य ! उपाध्यायस्य सकाशेऽधीष्वेति; ततः स उपाध्यायस्य समीपे गत्वा ब्रूते—भगवन् ! गुरुभिरहमादिष्टो भवतां पादमूले पठनार्थमिति; तत उपाध्यायेनाऽऽगत्याचार्याः प्रष्टव्याः, यथा—क्षमाश्रमणाः ! पाठयाम्यहममुकं साधुम् ? इति; ततो गुरुभिः 'बाढम्' इत्युक्ते स उपाध्यायेन पाठनीयः; एवंकुर्वन् अनुज्ञातमनुज्ञातो वाचयतीति अभिधीयते, एष प्रथमो भङ्गः शुद्धः । अनुज्ञातमननुज्ञात इति द्वितीयः, तद्भावना—स साधुराचार्यैर्भणितः—पठोपाध्यायान्तिके, स चैवमादिष्टः पठितुमुपस्थित उपाध्यायसन्निधौ, स उपाध्यायो यद्याचार्यानपृष्ट्वा तं पाठयति तत उपाध्यायस्य मासलघु । अननुज्ञातमनुज्ञात इति तृतीयः, अत्राचार्यैरुपाध्यायस्तस्य साधोः शृण्वतः सन्दिष्टः—आर्य ! पाठयेरमुं साधुमिति, न पुनरितरः सन्दिष्टः, ततः स उपस्थितः सन्नुपाध्यायेन प्रष्टव्यः—सौम्य ! क्षमाश्रमणैः सन्दिष्टस्त्वम् ? न वा ? इति; स प्रतिब्रूयात्—'मया युष्माकमादेशो दीयमानः श्रुतो न पुनरहं सन्दिष्टः' इत्युक्ते यद्युपाध्यायः पाठयति तदा द्वयोरप्यध्यापका-ऽध्यायकयोर्मासलघु; अथ न पाठयति तत उपाध्यायः शुद्धः । अननुज्ञातमननुज्ञातो वाचयतीति चतुर्थो भङ्गः, अत्र चोपाध्यायोऽप्यननुज्ञातः शिष्योऽप्यननुज्ञात इति कृत्वा द्वयोरपि मासलघु । अत एवाह—[1]'शेषेषु' प्रथमभङ्गव्यतिरिक्तेषु भङ्गेषु मासलघु । गाथायां प्राकृतत्वात् सप्तम्यर्थे षष्ठी । अविनयादयश्च दोषा भवन्ति, आदिशब्दाद् अनवस्था—अन्येषामपि यदृच्छयाऽध्ययना-ऽध्यापनलक्षणा इत्यादयो दोषाः परिगृह्यन्ते ॥ ७९१ ॥

गतमनुज्ञातद्वारम् । अथ भावतः परिणामक इति द्वारं व्याख्यायते—अत्र च भावग्रहणाद् द्रव्य-क्षेत्र-काला अपि गृहीता द्रष्टव्याः, परिणामकप्रक्रमाच्चाऽपरिणामका-ऽतिपरिणामकावपि व्याख्येयाविति चेतसि व्यवस्थाप्य[2] सूरिरिमां निर्युक्तिगाथामाह—

परिणामकद्वारम्

परिणाम अपरिणामे, अइपरिणाम पडिसेह चरिमदुए ।
अंबाईदिट्ठंतो, कहणा य इमेहिँ ठाणेहिँ ॥ ७९२ ॥

परिणामका-ऽपरिणामका-ऽतिपरिणामकानां प्ररूपणा कर्त्तव्या । प्रतिषेधः 'चरमद्विकस्य' अपरिणामका-ऽतिपरिणामकयुगलस्य[3] कर्त्तव्यः, अनयोश्छेदश्रुतं न दातव्यमिति भावः । एषां च त्रयाणामपि परीक्षार्थमाम्रादिदृष्टान्तो वक्तव्यः, आदिशब्दाद् वृक्ष-बीजपरिग्रहः । तया च परीक्षया तेषामभिप्राये गृहीते सति 'कथना' प्रतिवचनम् 'एभिः' वक्ष्यमाणैः 'स्थानैः' प्रकारैराचार्येण कर्त्तव्येति ॥ ७९२ ॥ अथैनामेव गाथां विवृणोति[4]—

परिणामकः

जो दव्व-खेत्तकय-काल-भावओ जं जहा जिणक्खायं ।
तं तह सद्दहमाणं, जाणसु परिणामयं साधुं ॥ ७९३ ॥

१ 'शेषाणां' प्रथमभङ्गव्यतिरिक्तानां त्रयाणां भङ्गानां मासलघु । अविनया° भा० ॥
२ °प्य परिणामिकादित्रयप्रतिबद्धामिमां द्वारगाथामाह भा० ॥ ३ °कस्य यु° त० डे० ॥
४ विवरीषुराह भा० ॥

अत्र "तुलादण्डमध्यग्रहण"न्यायेन कृतशब्दो मध्येऽभिहितोऽपि सर्वत्रापि सम्बध्यते। यः कश्चिद् द्रव्यकृतं क्षेत्रकृतं कालकृतं भावकृतम्, द्रव्यादिभिर्भेदैः सूत्रे विहितमित्यर्थः, यद् वस्तु 'यथा' येनोत्सर्गा-ऽपवादरूपेण प्रकारेण जिनैराख्यातं तत् तथा श्रद्दधाति, तमेवं 'श्रद्दधानं' रोचयन्तं जानीहि परिणामकं साधुम्। इयमत्र भावना—द्रव्यतः सचित्ता-ऽचित्त-मिश्राणि द्रव्याणि यादृशे कार्ये कल्पन्ते न वा, क्षेत्रतोऽध्वनि वा जनपदे वा यद् यथाऽध्व-कल्पादिकमाचरणीयम्, कालतो दुर्भिक्ष-सुभिक्षादौ यो यादृशः कल्पः, भावतो ग्लानादिष्वा-गाढा-ऽनागाढादिको यादृग् विधिः। तदेवं सर्वमपि श्रद्दधानो यथावसरं प्रयुञ्जानश्च परिणामको ज्ञातव्यः ॥ ७९३ ॥ अपरिणामकमाह—

अपरिणामकः

**जो दव्व-खेत्तकय-काल-भावओ जं जहा जिणक्खायं।**
**तं तह असद्दहंतं, जाण अपरिणामयं साहुं ॥ ७९४ ॥**

यो द्रव्य-क्षेत्र-काल-भावकृतं यद् यथा जिनैराख्यातं तन्न श्रद्दधाति, तं तथा अश्रद्दधन्तं जानीहि अपरिणामकं साधुम् ॥ ७९४ ॥ अतिपरिणामकमाह—

अतिपरिणामकः

**जो दव्व-खेत्तकय-काल-भावओ जं जहिं जया काले।**
**तल्लेसुस्सुत्तमई, अइपरिणामं वियाणाहि ॥ ७९५ ॥**

यो द्रव्य-क्षेत्र-काल-भावकृतं 'यद्' वस्तु 'यस्मिन्' विकृष्टाध्वादौ 'यदा काले' आत्यन्तिकदुर्भिक्षादौ भणितम्, "तल्लेसु" त्ति तस्मिन्–द्रव्यादिकृते आपवादिकवस्तुनि लेश्या यस्य स तल्लेश्यः, 'पश्यामि तावदत्र किमपि निश्चापदं ततस्तदेवावलम्बयिष्यामि' इत्यपवादपदैकमतिरित्यर्थः। तथा सूत्राद्–अपवादश्रुताद् उत्–प्राबल्येन मतिरस्येत्युत्सूत्रमतिः, श्रुतोक्तापवादादभ्यधिकापवादबुद्धिरिति भावः। तमेवंविधं साधुमतिपरिणामकं विजानीहीति ॥ ७९५ ॥

अथामीषामेव व्युत्पत्तिनिमित्तं लक्षणमाह—

परिणामकादीनां व्युत्पन्ना-ऽव्युत्पन्नत्वम्

**परिणमइ जहत्थेणं, मई उ परिणामगस्स कज्जेसु।**
**बिइए न उ परिणमई, अहिगं मइ परिणमे तइओ ॥ ७९६ ॥**

परिणामकस्य मतिः कार्येषु 'यथार्थ्येन' यथार्थग्राहकतया परिणमते, अत एवासौ परिणामक उच्यते। 'द्वितीये' द्वितीयस्यापरिणामकस्य मतिः 'न तु' नैव परिणमते, अत एवासावपरिणामक उच्यते। तृतीयः पुनरधिकां मतिं परिणमयतीत्यतिपरिणामकोऽभिधीयते ॥ ७९६ ॥ एतदेव स्पष्टयति—

**दोसु वि परिणमइ मई, उस्सग्गऽववायओ उ पढमस्स।**
**बिइयस्स उ उस्सग्गे, अइअववाए य तइयस्स ॥ ७९७ ॥**

'प्रथमस्य' परिणामकस्य मतिरुत्सर्गा-ऽपवादयोर्द्वयोरपि परिणमति(ते)। किमुक्तं भवति?— यः परिणामको भवति तस्योत्सर्गे प्राप्ते उत्सर्ग एव मतिः परिणमते, अपवादे प्राप्तेऽपवाद एव मतिः परिणमते; यत्रोत्सर्गो बलीयान् तत्रोत्सर्गं समाचरति, यत्रापवादो बलवान् तत्रापवादं

---

१ °वेवंविधं स° भा० ॥ २ °देव सदेवाव° मो० ले० ॥ ३ °मति, अत भा० विना ॥

गृह्णाति । 'द्वितीयस्य' अपरिणामकस्य पुनरुत्सर्ग एव मतिः परिणमते, न पुनरपवादे । तृतीयस्य तु अति–अत्यर्थम् अपवादे मतिः परिणमते; स च द्रव्यादिकारणेषु प्रतिसेवनामनुज्ञातां ज्ञात्वा न किञ्चित् परिहरति, कारणमन्तरेणापि प्रतिसेवते ॥ ७९७ ॥

अथ यदुक्तमासीत् "अंबाईदिट्ठंतो" ( गा० ७९२ ) त्ति तद् इदानीं भाव्यते—एतेषां परिणामकादीनां त्रयाणामपि जिज्ञासया केचिदाचार्याः स्वशिष्यानित्थमभिदध्युः—'आर्याः ! आम्रैरस्माकं प्रयोजनमस्ति' इत्युक्ते यः परिणामकः शिष्यः स ब्रूयात्—

परिणामकादीनामाम्रादिदृष्टान्तैः परीक्षणम्

**चेयणमचेयण भाविय, केद्दह छिन्ने अ किसिया वा वि ।**
**लद्धा पुणो व वोच्छं, वीमंसत्थं व वुत्तो सि ॥ ७९८ ॥**

भगवन् ! यैराम्रैः प्रयोजनं तानि किं चेतनानि ? उताचेतनानि ? किं 'भावितानि' लवणादिभिर्वासितानि ? उताभावितानि ? "केद्दह" त्ति किंप्रमाणानि ? किं महान्ति ? किं वा लघूनि ? "छिन्न" त्ति किं पूर्वच्छिन्नानि ? किं वा इदानीं छित्त्वा ? अथवा "छिन्न" त्ति किं 'छिन्नानि' खण्डीकृतानि ? किं वा सकलानि ? "कित्तिया वा वि" त्ति कियन्ति वा गणनया द्वित्र्यादिसङ्ख्याकान्यानयामि ? अपिशब्दात् किं बद्धास्थिकानि ? अबद्धास्थिकानि वा ? तरुणानि ? जरठानि वा ? इत्याद्यपि द्रष्टव्यम् । इत्थं शिष्येणाभिहिते आचार्येण वक्तव्यम्—सौम्य ! लब्धानि सन्त्यम्रेऽपि, मम पुनः पुरा विस्मृतान्यासन् इदानीं स्मृतिपथमवतीर्णानीति; यद्वा पर्याप्तं तावदिदानीम्, प्रयोजने समापतिते पुनर्भवन्तं 'वक्ष्यामि' भणिष्यामि; अथवा वत्स ! किं ममाऽऽम्रैः कार्यम् ? 'विमर्शार्थं' 'किमयं विनीतः ? न वा ?, परिणामको वा ? न वा ?' इति विन्यासनार्थमुक्तोऽसीति ॥ ७९८ ॥ यः पुनरपरिणामकः स ब्रूयात्—

**किं ते पित्तपलावो, मा बीयं एरिसाई जंपाहि ।**
**मा णं परो वि सोच्छिहि, कहं पि नेच्छामो एयस्स ॥ ७९९ ॥**

भो आचार्य ! किं ते पित्तप्लावः समजनि यदेवमुन्मत्तवदसम्बद्धं प्रलपसि ?, यद्येकवारं ममाग्रे जल्पितं तर्हि जल्पितं नाम, मा पुनर्द्वितीयं वारं ईदृशानि सावद्यानि वचनानि जल्पेति; यतः मा "णं" इति एतत् त्वदीयं वचनं 'परोऽपि' अन्योऽपि श्रोष्यति, वयं पुनः कथामपि नेच्छामः 'एतस्य' अर्थस्य आम्रानयनलक्षणस्य किं पुनः कर्तव्यतामित्यपिशब्दार्थः ॥ ७९९ ॥

यः पुनरतिपरिणामकः स एवमभिदध्यात्—

**कालो सिं अइवत्तइ, अम्ह वि इच्छा न भाणिउं तरिमो ।**
**किं एच्चिरस्स वुत्तं, अन्नाणि वि किं व आणेमि ॥ ८०० ॥**

क्षमाश्रमणाः ! यदि युष्माकमाम्रैः प्रयोजनं तत इदानीमप्यानयामि, यतः "सिं" इति एषामाम्राणां कालः 'अतिवर्त्तते' अतिक्रामति, अद्य तावत् तानि तरुणानि वर्त्तन्ते अत ऊर्द्धं जरठीभविष्यन्तीत्यर्थः । यद्वाऽस्माकमप्याम्राणां ग्रहणे महती इच्छा, परं किं कुर्मः ? न वयं यौष्माकीणमयमीता भणितुं किमपि "तरामु" त्ति शक्नुमः । अथवा यद्याम्राण्यपि ग्रहीतुं

१ °मचेण भा° ता० ॥

कल्पन्ते ततः किमियतश्चिरात् कालादुक्तम्?, वञ्चिताः स्मो वयमियन्तं कालमिति भावः। किं वा अन्यान्यपि मातुलिङ्गादीन्यानयामीति ॥ ८०० ॥

अनयोरपरिणामका-ऽतिपरिणामकयोरेवंजल्पतोराचार्येणेदमुत्तरं दातव्यम्—

**नाभिप्पायं गिण्हसि, असमत्ते चेव भाससी वयणे।**
**सुत्तंबिल-लोणकए, भिन्ने अहवा वि दोच्चंगे ॥ ८०१ ॥**

भो मुग्ध! त्वं मदीयमभिप्रायं न गृह्णासि, किन्तूत्सुकतया मदीये वचनेऽसमाप्त एवेदृशं समयविरुद्धं निष्ठुरं वचनं भाषसे; मया पुनरनेनाभिप्रायेणाभिहितम्—"सुत्तंबिल" इत्यादि, शुक्तं—काञ्जिकं तदेवात्यम्लं शुक्ताम्लं तेन लवणेन वा कृतानि—भावितानि शुक्ताम्ल-लवणकृतानि भिन्नानि च। किमुक्तं भवति?—न मया भवतः पार्श्वादपरिणतान्याम्राण्यानायितानि, किन्तु चतुर्थरसिकभावितानि वा लवणभावितानि वा; यद्वा द्रव्यतो भावतश्च भिन्नानि, परिणतानीति भावः। अथवा "दोच्चंगे" त्ति सामयिकी संज्ञा, ओदनादिमूलाङ्गापेक्षया भोजनस्य द्वितीयाङ्गानि-शाकरूपाणि तानि मया आनायितानीति प्रक्रमः ॥ ८०१ ॥

परिणामकादिपरीक्षाकृते वृक्ष-बीज-दृष्टान्तौ

"अंबाई" इत्यत्राऽऽदिशब्दसूचितौ वृक्ष-बीजदृष्टान्ताविमौ—आचार्या भणन्ति—अज्जो! रुक्खेहिं बीएहिं वा पओअणं ति। अत्रापि परिणामकादिजल्पस्तथैवावसातव्यः। नवरमपरिणामका-ऽतिपरिणामकौ प्रति सूरिणा प्रतिवक्तव्यम्—

**निप्फाव-कोद्दवाईणि बेमि रुक्खाणि न हरिए रुक्खे।**
**अंबिल विद्धत्थाणि अ, भणामि न विरोहणसमत्थे ॥ ८०२ ॥**

निष्पावाः—वल्लाः कोद्रवाः—प्रतीतास्तदादीनि यानि "रुक्खाणि" त्ति रूक्षाणि द्रव्याणि तान्येवाहं ब्रवीमि, न तु 'हरितान्' सचित्तान् वृक्षान्। तथा बीजान्यपि यानि अम्लभावितानि 'विध्वस्तानि वा' व्यवच्छिन्नयोनिकानि तान्यहं भणामि, 'न विरोहणसमर्थानि' न पुनरङ्कुरोद्भवनशक्तिकानीति। एष आम्रादिदृष्टान्तः। कथना चाऽऽचार्येणामीभिः स्थानैः "सुत्तंबिल" ( गाथा ८०१ ) इत्यादिभिः प्रकारैः कृता। एवं परीक्ष्य यः परिणामकस्तस्य दातव्यम् ॥ ८०२ ॥ कथं पुनस्तेन श्रोतव्यम्? इत्याह—

शिष्याणां सूत्रार्थश्रवणविधिः

**निद्दा-विगहापरिवज्जिएण, गुत्तिंदिएण पंजलिणा।**
**भत्ती बहुमाणेण य, उवउत्तेणं सुणेयव्वं ॥ ८०३ ॥**
**अभिकंखंतेण सुभासियाइँ वयणाइँ अत्थमहुराइं।**
**विम्हियमुहेण हरिसागएण हरिसं जणंतेण ॥ ८०४ ॥**

निद्रायमाणः सन् न किञ्चिदप्यवधारयति विकथायां क्रियमाणायां व्याघातो भवतीत्यतो निद्रा-विकथापरिवर्जितेन श्रोतव्यम्। गुप्तानि—स्वस्वविषयप्रवृत्तिनिरोधेन संवृतानीन्द्रियाणि येनासौ गुप्तेन्द्रियस्तेन। तथा 'प्राञ्जलिना' योजितकरयुगलेन। भक्त्या बहुमानेन च श्रोत-

१ °ङ्गा-अपुसीफलादीन्यप्यानया° मो० ले० ॥ २ °वादीणि बीयरुक्खा° ता० ॥

न्यम्, भक्तिर्नाम गुरूणामितिकर्त्तव्यतायां निषद्यारचनादिका या बाह्या प्रवृत्तिः, बहुमानस्तु गुरूणामुपरि आन्तरः प्रतिबन्धः । अत्र चतुर्भङ्गी—भक्तिर्नामैकस्य न बहुमानः, बहुमानो नामैकस्य न भक्तिः, एकस्य भक्तिरपि बहुमानोऽपि, एकस्य न भक्तिर्न वा बहुमान इति । अत्र च भक्ति-बहुमानयोर्विशेषज्ञापकं शिवाख्यवानमन्तरभक्तयोर्मरुक-पुलिन्दयोरुदाहरणम्, तच्च सुप्रसिद्धमिति कृत्वा न लिख्यते । यदि भक्तिं बहुमानं वा न करोति तदा चतुर्लघु । तथा 'उपयुक्तेन' अनन्यमनसा श्रोतव्यम् ॥ ८०३ ॥

"अभिकंखंतेण" इत्यादि । 'वचनानि' श्रुतव्याख्यानरूपाणि 'सुभाषितानि' शोभनभणितिभिर्भणितानि 'अर्थमधुराणि' भावार्थसुस्वादूनि 'अभिकाङ्क्षता' आभिमुख्येन वाञ्छता । तथा 'विस्मितमुखेन' अपूर्वापूर्वार्थश्रवणसमुद्भूतविस्मयस्मेरवदनेन । 'हर्षागतेन' 'अहो ! अमी भगवन्तः स्वगल-तालुशोषमवगणय्यास्मन्निमित्तमेवंविधं सूत्रार्थव्याख्यानं कुर्वन्ति, नानृणीभवेयममीषां परमोपकारिणामहम्' इत्येवंविधं हर्षमागतः—प्राप्तो हर्षागतस्तेन । तथा गुरूणामपि स्ववदनप्रसन्नतया उत्फुल्ललोचनतया च 'हर्षम्' 'अहो ! कथमयं संवेगरङ्गतरङ्गितमानसः परमागमव्याख्यानं शृणोति !' इति लक्षणं प्रमोदं जनयता श्रोतव्यमिति ॥ ८०४ ॥

अथ परिणामकद्वारमुपसंहरन्नाह—

आधारिय सुत्तत्थो, सविसेसो दिज्जए परिणयस्स ।
सुपरिच्छित्ता य सुनिच्छियस्स इच्छागए पच्छा ॥ ८०५ ॥

॥ कप्पपेढिया समत्ता ॥

यः कल्प-व्यवहारादेः सूत्रार्थः 'सविशेषः' सापवादः स्वगुरुसकाशाद् 'आधारितः' आगृहीतः स सर्वोऽपि दीयते 'परिणतस्य' परिणामकस्य शिष्यस्य 'सुपरीक्ष्य' पूर्वोक्ताम्रादिदृष्टान्तैः सुष्ठु—अविसंवादेन परीक्षां कृत्वा 'सुनिश्चितस्य' प्रारब्धसूत्रार्थे ग्रहीतव्ये कृतनिश्चयस्य, यद्वा 'ज्ञान-दर्शन-चारित्राणां यावज्जीवं मया विराधना न कर्त्तव्या' इत्येवं सुष्ठु निश्चितः—निश्चय-

---

१ मरुक-पुलिन्दयोरुदाहरणं चूर्णितोऽत्रोपन्यस्यते । तथाहि—

एगस्स गिरिस्स णिज्झरे वाणमंतरं । तत्थ सिवस्स पडिमा । तं एगो धम्मितो सुस्सूसति भत्तीए, पत्तामोडं गुग्गुलुं च देति, आवरिसणोवलेवणं च । अण्णो य एगो पुलिंदओ, सो जे जम्मि उदुम्मि सुंदरा पुप्फा ते आणित्ता गल्लोदएणं ण्हाणेत्ता अच्चेतुं सुतुट्ठो णच्चति, णच्चित्ता य गच्छति । अण्णता सो वाणमंतरो पुलिंदेण समं बोल्लेति । धम्मितो य आगतो रुट्ठो चिंतेति—अहं सुइएण अच्चणं करेमि, एस असुइणा, तह वि एस जहण्णो एतेण समं बोल्लेति, णूणं एस वि असूइओ चेव । वाणमंतरेण भणितं—सच्चं तुमं ममं सेवसि, जारिसो उण एतस्स ममोवरि बहुमाणो तारिसो तुधं णत्थि । कधं ? । कल्ले पेच्छावि । पभाए रतणीए वाणमंतरेणं एक्कं अप्पणो अच्छि णिद्दारितं । पुलिंदेण दिट्ठं । रुट्ठो 'केणं ?' ति । ताधे चिंतेति—मम सामिस्स एगं अच्छि, मम दोण्णि, ण जुत्तं । अप्पणयं णेण अच्छि णिद्दारित्ता लातियं । वाणमंतरेण धम्मिओ भण्णति—किध ? पेच्छसि एतस्स बहुमाणं ? । ताधे णेण पत्तिलाइयं पुलिंदस्स । धम्मितस्स भत्ती, पुलिंदस्स बहुमाणो । एस भत्ति-बहुमाणाणं विसेसो । दोसु वि [ एत्थ ] अधिकारो ॥

२ च हर्षं जनयता सता श्रोतव्यमिति ॥ ८०४ ॥ भा० ॥

वान् यः स सुनिश्चितस्तस्य दीयते। "इच्छागए पच्छि" त्ति अपरिणामका-ऽतिपरिणामकयोः पुनर्यदा सा आत्मीया यथाक्रमं केवलोत्सर्ग-केवलापवादरुचिलक्षणा इच्छा गता—नष्टा भवति तदा पश्चात् तयोः छेदश्रुतानि दातव्यानीति ॥ ८०५ ॥

उक्तं परिणामकद्वारम् । तदुक्तौ च व्याख्यातं सप्रपञ्चं "बहुस्सुए चिरपव्वइए" इत्यादिकं द्वारश्लोकयुगलम् ( गा० ४००–४०१ ) । तद्व्याख्याने च समर्थितं "निक्खेवेगट्ठ निरुत्ति" इत्यादिमूलद्वारगाथा( १४९ )सूचितं पर्षदिति द्वारम् । अत्र च लक्षण-तदर्ह-पर्षद्वाराणि निक्षेपनामकस्यानुयोगद्वारद्वितीयभेदस्य प्रासङ्गिकतया तदन्तःपातीन्येवावसातव्यानीति । गतं निक्षेपद्वारमिति ॥

चारित्रभूपालनिवासहेतुप्रासादकल्पे किल कल्पशास्त्रे ।
सुवर्णबद्धा सुरसावगाढा, समर्थिता सम्प्रति पीठिकेयम् ॥

॥ इति कल्पपीठिकाटीका[2] परिसमाप्ता ॥
॥ ग्रन्थाग्रम्[3]—१९८७ ॥

जयत्यनेकान्तकण्ठीरवः

१ °त्सर्गा-ऽपवा° भा० त० डे० ॥ २ °ठिका परि° भा० विना ॥ ३ ग्रन्थाग्रम् ( श्लोकसङ्ख्या ) भा० पुस्तकं विनाऽन्यत्र नास्ति ॥

# श्रीआत्मानन्द-जैनग्रन्थरत्नमालायामद्यावधि मुद्रितानां ग्रन्थानां सूची।

| ग्रन्थनाम. | | मूल्यम्. |
|---|---|---|
| × १ समवसरणस्तवः | सावचूरिकः | ०– १–० |
| × २ क्षुल्लकभवावलि-प्रकरणम् | सावचूरिकम् | ०– १–० |
| × ३ लोकनालिद्वात्रिंशिका | सटीका | ०– २–० |
| × ४ योनिस्तवः | सावचूरिकः | ०– १–० |
| × ५ कालसप्ततिका-प्रकरणम् | सावचूरिकम् | ०– १–६ |
| × ६ देहस्थितिस्तवः | सावचूरिकः | ०– १–० |
| × ७ सिद्धदण्डिका | सावचूरिका | ०– १–० |
| × ८ कायस्थितिस्तवः | सटीकः | ०– २–० |
| × ९ भावप्रकरणं | सटीकम् | ०– २–० |
| ×१० नवतत्त्वप्रकरणं | भाष्यटीकोपेतम् | ०–१२–० |
| ×११ विचारपञ्चाशिका | सटीका | ०– २–० |
| ×१२ बन्धषट्त्रिंशिका | सटीका | ०– २–० |
| ×१३ परमाणुखण्डषट्त्रिंशिका पुद्गलषट्त्रिंशिका निगोदषट्त्रिंशिका च | सटीका | ०– ३–० |
| ×१४ श्रावकव्रतभङ्ग-प्रकरणम् | सावचूरिकम् | ०– २–० |
| ×१५ देववन्दनादिभाष्य-त्रयं | सावचूरिकम् | ०– ५–० |
| ×१६ सिद्धपञ्चाशिका | सटीका | ०– २–० |
| १७ अन्नायउंछकुलकं | सावचूरिकम् | ०– २–० |
| १८ विचारसप्ततिका | सावचूरिका | ०– ३–० |
| १९ अल्पबहुत्वगर्भितं महावीरस्तवनं | सावचूरिकम् | ०– २–० |
| २० पञ्चसूत्रं | सटीकम् | ०– ६–० |
| २१ जम्बूस्वामिचरित्रम् | | ०– ४–० |
| २२ रत्नपालनृपकथानकम् | | ०– ५–० |
| २३ सूक्तरत्नावली | | ०– ४–० |
| २४ मेघदूतसमस्यालेखः | | ०– ४–० |
| २५ चेतोदूतम् | | ०– ४–० |
| ×२६ पर्युषणाष्टाह्निकाव्याख्यानम् | | ०– ६–० |
| ×२७ चम्पकमालाकथा | | ०– ६–० |
| ×२८ सम्यक्त्वकौमुदी | | ०–१२–० |
| ×२९ श्राद्धगुणविवरणम् | | १– ०–० |
| ×३० धर्मरत्नप्रकरणं | सटीकम् | ०–११–० |
| ×३१ कल्पसूत्रं | सुबोधिकाख्यया व्याख्ययोपेतम् | ०– ०–० |
| ×३२ उत्तराध्ययनसूत्रं | सटीकम् | ५– ०–० |
| ×३३ उपदेशसप्ततिका | | ०–१३–० |
| ×३४ कुमारपालप्रबन्धः | | १– ०–० |
| ×३५ आचारोपदेशः | | ०– ३–० |
| ×३६ रोहिण्यशोकचन्द्रकथा | | ०– २–० |
| ×३७ गुरुगुणषट्त्रिंशत्षट्त्रिंशिकाकुलकं | सटीकम् | ०–१०–० |
| ×३८ ज्ञानसारः | सटीकः | १– ४–० |
| ३९ समयसारप्रकरणं | सटीकम् | ०–१०–० |
| ×४० सुकृतसागरः | | ०–१२–० |
| ×४१ धम्मिल्लकथा | | ०– २–० |
| ४२ प्रतिमाशतकं | सटीकम् | ०– ८–० |
| ×४३ धन्यकथानकम् | | ०– २–० |
| ×४४ चतुर्विंशतिजिनस्तुतिसंग्रहः | | ०– ६–० |
| ×४५ रौहिणेयकथानकम् | | ०– २–० |
| ×४६ लघुक्षेत्रसमासप्रकरणं | सटीकम् | १– ०–० |
| ×४७ बृहत्संग्रहणी | सटीका | २– ८–० |
| ×४८ श्राद्धविधिः | सटीका | २– ७–० |
| ×४९ षड्दर्शनसमुच्चयः | सटीकः | ३– ०–० |
| ×५० पञ्चसंग्रहपूर्वार्द्धं | सटीकम् | ३– ८–० |
| ×५१ सुकृतसंकीर्तनम् | | ०– ८–० |
| ×५२ चत्वारः प्राचीनाः कर्मग्रन्थाः | सटीकाः | २– ८–० |
| ×५३ सम्बोधसप्ततिका | सटीका | ०– १–० |
| ×५४ कुवलयमालाकथा | | १– ८–० |
| ५५ सामाचारीप्रकरणं आराधक-विराधकचतुर्भङ्गी च | सटीका | ०– ८–० |
| ५६ करुणावज्रायुधनाटकम् | | ०– ४–० |
| ×५७ कुमारपालमहाकाव्यम् | | ०– ८–० |

| ग्रन्थनाम. | | मूल्यम्. |
|---|---|---|
| ५८ महावीरचरियम् | | १- ०-० |
| ५९ कौमुदीमित्रानन्दं | नाटकम् | ०- ६-० |
| ६० प्रबुद्धरौहिणेयनाटकम् | | ०- ५-० |
| ६१ धर्माभ्युदयनाटकं सूक्तावली च | | ०- ४-० |
| ६२ पञ्चनिर्ग्रन्थीप्रकरणम् | सटीकम् | ०- ६-० |
| ६३ रयणसेहरीकहा | | ०- ६-० |
| ६४ सिद्धप्राभृतं | सटीकम् | ०-१०-० |
| ६५ दानप्रदीपः | | २- ०-० |
| ६६ बन्धहेतूदयत्रिभङ्गीप्रकरणं सटीकम्, जघन्योत्कृष्टपदे एककालं गुणस्थानकेषु बन्धहेतुप्रकरणम्, चतुर्दशजीवस्थानेषु जघन्योत्कृष्टपदे युगपद्बन्धहेतुप्रकरणं सटीकम् बन्धोदयसत्ताप्रकरणं च | सटीकम् | ०-१०-० |
| ६७ धर्मपरीक्षा जिनमण्डनीया | | १- ०-० |
| ६८ सप्ततिशतस्थानकप्रकरणं | सटीकम् | १- ०-० |
| ६९ चेइयवंदणमहाभासं छायाटिप्पणीयुतम् | | १-१२-० |
| ७० प्रश्नपद्धतिः | | ०- २-० |
| ×७१ कल्पसूत्रं किरणावलीटीकोपेतम् | | ०- ०-० |
| ७२ योगदर्शनं योगविंशिका च सटीका | | १- ८-० |
| ७३ मण्डलप्रकरणं | सटीकम् | ०- ६-० |
| ७४ देवेन्द्रनरकेन्द्रप्रकरणं | सटीकम् | ०-१२-० |
| ७५ चन्द्रवीरशुभा-धर्मधन-सिद्धदत्तकपिल-सुमुखनृपादिमित्रचतुष्ककथा | | ०-११-० |
| ७६ जैनमेघदूतकाव्यं | सटीकम् | २- ०-० |
| ७७ श्रावकधर्मविधिप्रकरणं | सटीकम् | ०- ८-० |
| ७८ गुरुतत्त्वविनिश्चयः | सटीकः | ३- ०-० |
| ७९ ऐन्द्रस्तुतिचतुर्विंशतिका | सटीका | ०- ४-० |
| ८० वसुदेवहिण्डीप्रथमभागः | | ३- ८-० |
| ८१ वसुदेवहिण्डीद्वितीयभागः | | ३- ८-० |

## श्रीआत्मानन्द-जैनग्रन्थरत्नमालायां मुद्यमाणा ग्रन्थाः ।

वसुदेवहिण्डीतृतीयभागः

सटीकाः चत्वारः नव्यकर्मग्रन्थाः

बृहत्कल्पसूत्रं सटीकं द्वितीयो विभागः

वीर सेवा मन्दिर
पुस्तकालय
काल नं० २२ मद्रवा
लेखक श्री भद्रबाहु स्वामी।
शीर्षक बृहत् कल्पसूत्रम्
खण्ड १ क्रम संख्या ३८०